	मन्त्रप्रभावेन सूर्यात् कुन्त्यां कर्णस्योत्पत्तिः	...	६८३
	लोकभयात् कुन्त्या यमुनायां विसृष्टस्य शिशोः राधा-भर्त्रा स्वीकारो वसुषेणइतिनामकरणञ्च	...	६८४
१०५	कर्णस्य स्वप्ने सूर्ये बोधनम्	...	६८५
	कर्णेनेन्द्राय कवचकुण्डलदानम्	...	६८६
१०६	पाण्डुना कुन्तीमाद्र्योर्विवाहः	...	६८७
	पाण्डोर्दिग्विजयः	...	६८८
	मृगयार्थमरण्यं गतस्य पाण्डोः किन्दमेन शापः	...	६९२
१०७	पाण्डोर्वानप्रस्थाश्रमप्रवेशः	...	६९६
	कुन्तीमाद्र्योरपि पाण्डुना सह वनगमनम्	...	६९९
	पाण्डोर्वने तपश्चरणम्	...	७०२
	ब्रह्मलोकगन्तृभिः ऋषिभिरपुत्रस्य तव गतिर्नास्तीति-पुत्राश्च तव भविष्यन्तीति पाण्डोः अनुगमननिषेधः		७०३
	विदुरविवाहः तत्पुत्रोत्पत्तिश्च	...	७०५
१०८	व्यासेन वरदानाद् गान्धार्यां धृतराष्ट्राद्भोत्पत्तिः	...	७०६
	पुत्रजनने पाण्डोश्चिन्ता	...	७०८

अध्यायः		पुटम्
	व्युषिताश्वोपाख्यानम् ...	७११
	व्युषिताश्वेन मृतेन स्वपत्नीप्रलापेन मृतशरीरेणैव स्वपत्न्यै पुत्रदानम् ...	७१४
१०९	पाण्डुना कुन्त्यै पुरातनस्त्रीस्वरूपकथनम् ...	७१५
	उद्दालक कथा ...	७१६
	द्विजेन उद्दालकं प्रति पुत्रार्थं भार्याप्रदानयाचनम् ...	७१७
१०९	द्विजश्वेतकेतुविवादः ...	७१८
	श्वेतकेतुना स्त्रीपुंसयोर्मर्यादास्थापनम् ...	७२०
	पाण्डुना पुत्रार्थं कुन्तीप्रेरणम् ...	७२१
११०	कुन्त्यां यमप्रसादाद्युधिष्ठिरस्य उत्पत्तिः ...	७२३
	गान्धार्या स्त्रोदरघातनम् ...	७२६
	शतधा भूताया मांसपेश्याः व्यासेन घृतपूर्णकुण्डशते निक्षेपः	७२७
	पाण्ड्वनुमत्या वायोः कुन्त्यां भीमस्योत्पत्तिः ...	७२९
	दशमेऽहनि स्नातायाः कुन्त्या अङ्कात् व्याघ्रभयेन शिलायां भीमस्य पतनेन तस्याश्शतधा स्फोटः ...	७३१
	दुर्योधनजननम् ...	७३२
	धृतराष्ट्रस्य ब्राह्मणैर्मन्त्रणम् ...	,,
	दुश्शासनादिजननम् ...	७३३
१११	गान्धार्यां दुश्शलाया उत्पत्तिः ...	७३४
११२	दुर्योधनादीनां नामकथनम् ...	७३७
	दुश्शलापरिणयः ...	७३९
११३	अर्जुनजननम् ...	७४०
११४	माद्र्यां नकुलसहदेवजननम् ...	७४९
	पाण्डवानां नामकरणम् ...	७५३
	वृष्णिभिर्वसुदेवमन्त्रणेन काश्यपपुरोहितप्रेषणम् ...	७५४
	काश्यपेन जातकर्मादिसंस्कारकरणम् ...	७५५
	शय्यातिपुत्राच्छुकात् पाण्डवैर्धनुर्वेदशिक्षणं ...	,,
११५	युधिष्ठिरादीनामायुर्भावकथनम् ...	७५७
	पाण्डोर्मरणम् ...	७६०

अध्यायः			पृष्ठम्
११५	कुन्तीमाद्र्योः प्रलापः	...	७६१
	युधिष्ठिरादीनां प्रलापः	...	७६४
	कुन्तीमाद्र्योः ऋषिभिराश्वासनम्	...	७६७
	माद्र्यनुगमनम्	...	७७१
	पाण्डोर्संस्कारः	.	,,
११६	पाण्डवानां ऋषिभिस्सह हास्तिनपुरगमनम्	...	७७२
	भीष्मादीनां पाण्डवदर्शनाय गमनम्	...	७७४
	ऋषिभिःपाण्डोर्मरणकथनपूर्वकं पाण्डवानां भीष्मादिहस्ते-प्रतिपादनम्	...	७७५
११७	पाण्डोरस्थिसञ्चयनादिविधिः	...	७७९
११८	पाण्डोः श्राद्धदानम्	...	७८४
	व्यासोक्त्या सत्यवत्या स्नुषाभ्यां सह तपोवनगमनम्	...	,,
११९	कुमाराणां विहारवर्णनम्	...	७८६
	भीमेन धार्तराष्ट्राणां क्रीडनसमये परिभवनम्	...	७८७
	दुर्योधनेन भीमस्य गङ्गापातनं सर्पदंशनं विषमिश्र-भोज्यदानं च	...	७८९
१२०	भीमाय पुनरपि विषभोज्यदानम् जलपातनम्	...	७९१
	भीमस्य नागलोकप्राप्तिः	...	७९४
	भीमेन नागलोके वासुकिदत्तरसपानम्	...	७९६
	युधिष्ठिरादिभि र्भीमस्यान्वेषणम्	...	७९७
	भीमस्य नागलोकादागमनम्	...	७९८
१२१	कृपाचार्योत्पत्तिः	...	८००
	गौतमस्य शरद्वतः जालवत्या दर्शनेन मनो विकारः	...	८०१
	शन्तनुना कृपस्य कृप्याश्च पोषणम्	. .	,,
	कृपात्पाण्डवादीनां धनुर्वेदाध्ययनम्	...	८०२
१२२	द्रोणस्योत्पत्तिः	...	८०३
	द्रोणस्य द्रुपदेन सहाध्ययनादि	...	८०५
	अश्वत्थाम्न उत्पत्तिः	...	८०६
	द्रोणस्य परशुरामादस्त्रप्राप्तिः	...	८०७

अध्यायः			पृष्ठम्
१२३	द्रोणस्य द्रुपदं प्राप्य स्वसखित्वं वदतो द्रुपदकृतं-भर्त्सनम्	...	८०८
	द्रोणेन हास्तिनपुरगमनम्	...	८१०
	द्रोणेन जले पतिताया वीटाया उद्धरणम्	...	८१२
१२४	द्रोणेन भीष्मादिभ्यः स्वपूर्ववृत्तान्त कथनम्	...	८१५
	अश्वत्थाम्ने क्षीरार्थं पिष्टोदकदानेन प्रलोभनं सखिभिः कुमारैः परिहासश्च	...	८१७
	पाण्डवादिभिः द्रोणादस्त्रशिक्षणम्	...	८२१
१२५	द्रोणेनार्जुनाय सर्वश्रेष्ठत्वप्रापणप्रतिज्ञा	...	८२५
	द्रोणसमीपं प्रति एकलव्यागमनम्	...	८२७
	द्रोणेन तस्यानङ्गीकारः	...	,,
	एकलव्येन पाण्डवेभ्यस्स्वस्य द्रोणशिष्यत्वख्यापनम्	...	८२९
	द्रोणेन एकलव्याङ्गुष्ठस्य गुरुदक्षिणात्वेन ग्रहणम्	...	८३०
१२६	द्रोणेन कृत्रिमभावेनार्जुनादीनां परीक्षा	...	८३२
	द्रोणस्यार्जुनेन ग्राहान्मोचनम्	...	८३६
१२७	पाण्डवादीनामस्त्रशिक्षापरीक्षार्थं रङ्गनिर्माणम् ..	...	८३८
	शिक्षादर्शनार्थं भीष्मादीनां प्रेक्षागारप्रवेशः	...	८४०
	युधिष्ठिरादीनां परीक्षा	...	८४२
	भीमदुर्योधनयोर्गदायुद्धपरीक्षा	...	८४३
१२८	द्रोणेनाश्वत्थामद्वारा भीमदुर्योधनयोर्गदायुद्धवारणम्	...	८४४
	अर्जुनपरीक्षा	...	८४५
१२९	कर्णस्य रङ्गप्रवेशः	...	८४९
	कर्णार्जुनयोर्युद्धप्रसङ्गः	...	८५१
	कृपाचार्येण कर्णस्याधिक्षेपः	...	८५३
	दुर्योधनेन कर्णस्य राज्याभिषेकः	...	८५४
१३०	कर्णपितुरधिरथस्य रङ्ग प्रवेशः	...	८५५
	कर्णस्य भीमेनाधिक्षेपः	...	८५६
	दुर्योधनेन भीमस्य प्रत्युत्तरदानम्	...	८५७
	सर्वेषां रङ्गान्निष्क्रमणम्	...	८५९

अध्यायः		पृष्ठम्
१३१	द्रोणेन जीवतो द्रुपदस्य ग्रहणे आज्ञापिते तदर्थं सर्व-शिष्याणां पाञ्चालपुरगमनम् ...	८६०
	द्रुपदग्रहणाय पाण्डववर्जं गतानां कौरवाणां तेन-पराजयः ...	८६४
	अर्जुनेन द्रुपदग्रहणम् ...	८६७
	द्रुपदेन सह द्रोणस्य संवादः ...	८७४
	द्रोणेन राज्यार्धहरणेन द्रुपदायार्धराज्यदानम् ...	,,
१३२	द्रुपदेन द्रोणविजयाय पुत्रोत्पादनार्थं उपयाजागमनम् ...	८७६
	उपयाजेन याजोपसर्पणकथनम् ...	८७८
	याजेन द्रुपदस्य वैतानाग्नौ धृष्टद्युम्न पाञ्चाल्योरुत्पादनम्...	८८२
	धृष्टद्युम्नेन द्रोणादस्त्रशिक्षणम् ...	८८५
१३३	द्रुपदोत्पत्तिः ...	८८६
१३४	युधिष्ठिरस्य यौवराज्येऽभिषेकः ...	८९०
	भीमस्य बलरामोद्दायुद्धशिक्षणम् ...	,,
	द्रोणेनार्जुनस्य ब्रह्मशिरोऽस्त्रविषये नियमकथनम् ...	८९१
	अर्जुनेन द्रोणाय गुरुदक्षिणादानम् ...	८९२
	भीमार्जुनदिग्विजयेन धृतराष्ट्रचिन्ता ...	८९४
१३५	युधिष्ठिरस्साम्राज्येऽभिषेक्तव्य इति पौरवार्ता-श्रुत्वा व्यथितस्य दुर्योधनस्य पित्रा संवादः ...	८९६
१३६	दुर्योधनेन स्वपित्रे पाण्डवानां वारणावत प्रस्थापन-कथनम् ...	९०२
१३७	कणिङ्केन धृतराष्ट्राय दुर्नीत्युपदेशः ...	९०४
	जम्बुकोपाख्यानम् ...	९०८

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ १ ॥ आदिपर्व ॥ १ ॥

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ ध्यानश्लोकाः ॥

*[1]शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १

[2]धर्मो विवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन ।
शत्रुर्विनश्यति धनञ्जयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः ॥ २

भारताध्ययनात् पुण्यादपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ ३

सरस्वतीपदं वन्दे श्रियः पतिमुमापतिम् ।
त्विषां पतिं गणपतिं बृहस्पतिमुखानृषीन् ॥ ४

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ ५

असच्च सच्चैव (च) यद् विश्वं सदसतः परम् ।
परावराणां स्रष्टारं पुराणं परमव्ययम् ॥ ६

---

* क कोशे—(11838.) 1 to 11, श्लोकाः न दृश्यन्ते ।

1. ख कोशे— (11851.) { अशुभानि निराचष्टे तनोति शुभसन्ततिम् । स्मृतमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदुः ॥ } अधिकः पाठः ।

2. ख—श्लोकमारभ्य, 2 to 12 श्लोकाः न दृश्यन्ते ।

मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥ ७

महर्षेः सर्वलोकस्य पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥ ८

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥ ९

अभ्रश्यामः पिङ्गजटाबद्धकलापः
प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
साक्षाल्लोकान् पावयमानः कविमुख्यः
पाराशर्यः पर्वसु रूपं विवृणोतु ॥ १०

[1]पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासंबोधनाबोधनम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसनं श्रेयसे ॥ ११

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान् ॥ १२

---

1. ग—(11809) इतः पूर्वं विद्यमाना दश श्लोका अत्र नोपलभ्यन्ते ॥
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥
जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः
यस्यास्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥
} अधिकः पाठः ।

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ आदिपर्व ॥

(अनुक्रमणिकापर्व)

॥ प्रथमोऽध्यायः ॥

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

श्री रोमहर्षणपुत्र उग्रश्रवाः सूतः पौराणिको नैमिशारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे वर्तमाने । १

समासीनानभ्यगच्छद् ब्रह्मर्षीन् संशितव्रतान् ।
विनयावनतो भूत्वा कदाचित् सूतनन्दनः ॥ २

[1]शौनकप्रमुखाः सर्वे नैमिशारण्यवासिनः ।

---

1. क-ख-ग—अधिकः पाठः।

तमाश्रममनुप्राप्य नैमिशारण्यवासिनः ।
उवाच तानृषीन् सर्वान् धन्यो वोऽस्म्यद्य दर्शनात् ॥
वेद वैयासिकीः सर्वाः कथा धर्मार्थसंहिताः ।
वक्ष्यामि वो द्विजश्रेष्ठाः शृण्वन्त्वद्य तपोधनाः ॥
तस्य तद्वचनं श्रुत्वा नैमिशारण्यवासिनः ॥

चित्राः श्रोतुं कथास्तत्र परिवव्रुः [1]समन्ततः ॥ ३

अभिवाद्य मुनींस्तांस्तु सर्वानेव कृताञ्जलिः ।
अपृच्छत् [2]स तपोवृद्धिं सद्भिश्चैवाभिनन्दितः ॥ ४

अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ।
निर्दिष्टमासनं भेजे विनयाद्रौमहर्षणिः ॥ ५

सुखासीनं ततस्तं तु विश्रान्तमुपलक्ष्य च ।
अथापृच्छ[3]दृषिश्रेष्ठः [4]सम्यक् प्रस्तावयन् कथाः ॥ ६

कुत आगम्यते सौते [5]क्व वायं विहृतस्त्वया ।
कालः कमलपत्राक्ष शंसैतत् पृच्छतो मम ॥ ७

सूतः—

जनमेजयस्य राजर्षेः सर्पसत्रे महात्मनः ।
समीपे पार्थिवेन्द्रस्य सम्यक् पारिक्षितस्य च ॥ ८

कृष्णद्वैपायनप्रोक्ताः [6]सपुण्या विविधाः कथाः ।
कथिताश्चापि विधिवद् या वैशम्पायनेन च ॥ ९

श्रुत्वाहं ता विचित्रार्था महाभारतसंश्रिताः ।
बहूनि संपरिक्रम्य तीर्थान्यायतनानि च ॥ १०

क-ख-ग. { 1. तपस्विनः 2. तपसो वृद्धिं 3. ऋषिस्तत्र
4. कश्चित् 5 क्व चायं
6. क—सु

[1]समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितम् ।
गतवानस्मि तं देशं युद्धं यत्राभवत्पुरा ॥ ११

पाण्डवानां कुरूणां च सर्वेषां च महीक्षिताम् ।
दिदृक्षुरागतस्तस्मात् समीपं भवतामिह ॥ १२

आयुष्मन्तः सर्व एव ब्रह्मभूता हि मे मताः ।
अस्मिन्यज्ञे महाभागाः सूर्यपावकवर्चसः ॥ १३

[2]कृतकृत्याश्च शुचयः कृतजप्या हुताग्नयः ।
भवन्त [3]आगताः स्वस्था ब्रवीमि किमहं द्विजाः ॥ १४

पुराणसं[4]हिताः पुण्याः कथा वा सं[5]मतिं श्रिताः ।
इतिवृत्तं नरेन्द्राणामृषीणां च महात्मनाम् ॥ १५

ऋषयः—

द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा ।
सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम् ॥ १६

तस्याख्यानवरिष्ठस्य विचित्रपदपर्वणः ।
सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥ १७

भारतस्येतिहासस्य [6]पुण्यग्रन्थार्थसंयुताम् ।
संस्कारोप[7]गतां ब्राह्मीं नानाशास्त्रोपबृंहिताम् ॥ १८

क { 1. स्यमन्त 2. कृताभिषेकाः 3. आसते
4. संश्रिताः 5. धर्मसंश्रिताः 6. पुण्यां गूढार्थसंयुताम्
7. हितां }

जनमेजयस्य यां राज्ञो वैशम्पायन उक्तवान् ।
यथावत् [1]स मुनिः [2]पृष्टः सत्रे द्वैपायनाज्ञया ॥ १९

वेदैश्चतुर्भिः सहितां व्यासस्याद्भुतकर्मणः ।
संहितां श्रोतुमिच्छामो धर्म्यां पापभयापहाम् ॥ २०

सूतः—

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥ २१

[3]नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ।
महर्षेः सर्व[4]लोकेषु पूजितस्य महात्मनः ॥ २२

प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ।
[5]आचख्युः कवयः केचित् संप्रत्याचक्षते परे ॥ २३

आख्यास्यन्ति तथैवान्य इतिहासमिमं भुवि ।

---

1. क—तां 2. क—श्रुत्वा

3. क—असच्च सच्चैव च यद् विश्वं सदसतः परम् ।
परावराणां स्रष्टारं पुराणं परमव्ययम् ।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ॥ } अधिकः पाठः ।

4. क—भूतेषु

5. क-ख—नमो भगवते तस्मै व्यासायामिततेजसे ।
यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥
सर्वाश्रमाभिगमनं सर्वतीर्थावगाहनम् ॥
न तथा फलदं सूते नारायणकथा यथा ॥
नास्ति नारायणसमो न भूतो न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥ } अधिकः पाठः ।

[1]एतद्धि त्रिषु लोकेषु महज्ज्ञानं प्रतिष्ठितम् ॥ २४

विस्तरैश्च समासैश्च [2]साध्यते यद्द्विजातिभिः ।
[3]अलङ्कृतैः शुभैः शब्दैः समयैर्दिव्यमानुषैः ॥ २५

छन्दोवृत्तैश्च विविधैरन्वितं विदुषां प्रियम् ।
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ॥ २६

[4]इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ।
पुण्ये हिमवतः पादे मध्ये गिरिगुहालये ॥ २७

विशोध्य देहं धर्मात्मा दर्भसंस्तरमाश्रितः ।
शुचिः सनियमो व्यासः शान्तात्मा तपसि स्थितः ॥ २८

भारतस्येतिहासस्य धर्मेणान्वीक्ष्य तां गतिम् ।
प्रविश्य योगं ज्ञानेन सोऽपश्यत् सर्वमन्ततः ॥ २९

निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसावृते ।
[5]ब्राह्ममण्डमभूदेकं प्रजानां बीज[6]मक्षयम् ॥ ३०

युगस्यादिनिमित्तं तन् महद्दिव्यं प्रचक्षते ।
यस्मिंस्तच्छ्रूयते नित्यं ज्योतिर्ब्रह्म सनातनम् ॥ ३१

---

1. अ (मूलकोशे)-ख-ग—एतस्मिन् हि त्रिलोकेषु
2. क—धार्यते 3. क—अलङ्कृतं
4. अ-ख-ग—संस्कारोपगतं ब्रह्म नानाशास्त्रोपबृंहितम्
5. क—बृहदण्डं 6. ग—मक्षरम्

अद्भुतं चाप्यजातं च सर्वतः समतां गतम् ।
अव्यक्तं कारणं सूक्ष्मं यत्तत्सदसदात्मकम् ॥ ३२

यस्मिन् पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुश्च परमेष्ठिजः ॥ ३३

[1]प्राचेतसस्तथा दक्षो दक्षपुत्राश्च सप्त ये ।
ततः प्रजानां पतयः प्राभवन्नेकविंशतिः ॥ ३४

पुरुषश्चाप्रमेयात्मा यं सर्वेऋषयो विदुः ।
विश्वेदेवास्तथादित्या वसवोऽथाश्विनावपि ॥ ३५

यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा ।
सप्तर्षयश्च विद्वांसः शिष्टा ब्रह्मर्षयस्तथा ॥ ३६

राजर्षयश्च बहवः संभूता भूरितेजसः ।
तथा द्यौः पृथिवी वायुरन्तरिक्षं दिशस्तथा ॥ ३७

संवत्सर[2]स्ततो मासाः पक्षाहोरात्रयः क्रमात् ।
यच्चान्यदपि तत्सर्वं संभूतं लोक[3]साक्षिकम् ॥ ३८

[4]यदिदं दृश्यते किञ्चिद् भूतं स्थावरजङ्गमम् ।
पुनः संक्षिप्यते [5]सर्वं जगत् प्राप्ते युगक्षये ॥ ३९

1.—अ-ख-ग—प्रचेतसः

क—{2. तंवो　3. संज्ञितम्
　{4. यदेतन्　5. चेदं

यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ ४०

एवमेतदनाद्यन्तं भूत[1]सङ्घातकारकम् ।
अनादिनिधनं लोके चक्रं संपरिवर्तते ॥ ४१

त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ।
त्रयस्त्रिंशच्च देवानां सृष्टिः संक्षेपलक्षणा ॥ ४२

दिवस्पुत्रो बृहद्भानुश् चक्षुरात्मा विभावसुः ।
सविता च[2] ऋचीकोऽर्को भानुरावाहको रविः ॥ ४३

सुता विवस्वतः सर्वे [3]मह्यस्तेषामथावरः ।
दे[4]वरस्तस्य तनयस् तस्मात्सुभ्राडिति स्मृतः ॥ ४४

सुभ्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः ।
दशज्योतिः शतज्योतिः सहस्रज्योतिरात्मवान् ॥ ४५

दशपुत्रसहस्राणि दशज्योतेर्महात्मनः ।
ततो दशगुणाश्चान्ये शतज्योतेरिहात्मजाः ॥ ४६

भूयस्ततो दशगुणाः [5]सहस्रज्योतिजाः [6]सुताः ।
तेभ्योऽयं कुरुवंशश्च यदूनां [7]भारतस्य च ॥ ४७

---

1. अ—ख-ग—संसार
2. क—स 3. क—परः 4. क—देवभ्राट् तस्य 5. क—ज्योतिषः
6. ख—तथा 7. ख—भरतस्य

ययातीक्ष्वाकुवंशश्च राजर्षीणां [1]तु सर्वशः ।
संभूता बहवो [2]वंशा भूतसङ्घाः [3]सुविस्तराः ॥ ४८

भूतस्थानानि सर्वाणि रहस्यं त्रिविधं च यत् ।
वेद[4]योगं सविज्ञानं धर्मार्थौ काममेव च ॥ ४९

धर्मार्थकामशास्त्राणि शास्त्राणि विविधानि च ।
लोकयात्राविधानं च संभूतं दृष्टवानृषिः ॥ ५०

नीति[5]र्भरतवंशस्य विस्तारश्चैव सर्वशः ।
इतिहासाः सहव्याख्या विविधाः श्रुतयोऽपि च ॥ ५१

इह सर्वमनुक्रान्तं उक्तं ग्रन्थस्य लक्षणम् ।
संक्षेपेणेतिहासस्य ततो वक्ष्यति विस्तरम् ॥ ५२

विस्तीर्यैतन्[6]महात्मायं ऋषिः संक्षिप्य चाब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥ ५३

मन्वादि भारतं केचिद् आस्तीकादि तथापरे ।
तथोपरिचराद्यन्ये विप्राः सम्यग[7]धीयते ॥ ५४

विविधं [8]संहिताज्ञानं दीपयन्ति मनीषिणः ।
व्याख्यानकुशलाः केचित् केचिद्ग्रन्थस्य धारणे ॥ ५५

---

1. क—च 2. क—वंश्या 3. क—सुवर्चसः 4. क—वेदं
5. ख-ग—भारत
6. क—महज्ज्ञानमृषिः 7. क—अधायिरे
8. अ—ख-ग—संहितं ज्ञानं

तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥ ५६

पराशरात्मजः [1]श्रीमान् ब्रह्मर्षिः संशितव्रतः ।
मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः ॥ ५७

क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा ।
त्रीनग्नीनिव कौरव्याञ् जनयामास वीर्यवान् ॥ ५८

उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च ।
जगाम तपसे [2]श्रीमान् पुनरेवाश्रमं प्रति ॥ ५९

तेष्वात्मजेषु वृद्धेषु गतेषु [3]च परां गतिम् ।
अब्रवीद्भारतं लोके मानुषेऽस्मिन्[4]महानृषिः ॥ ६०

जनमेजयेन पृष्टः सन् ब्राह्मणैश्च सहस्रशः ।
शशास शिष्यमासीनं वैशम्पायनमन्तिके ॥ ६१

स सदस्यैः समासीनं श्रावयामास भारतम् ।
कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनः पुनः ॥ ६२

[5]विस्तरं कुरुवंशस्य गान्धार्याः [6]सर्पशीलताम् ।
क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत् ॥ ६३

वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् ।

---

1. क—विद्वान् 2. क—धीमान् 3. क—परमां
4. अ-ख-ग—महात्मनि 5. क—विस्तारं 6. क—धर्म

दुर्वृत्तं धार्तराष्ट्राणां उक्तवान्भगवानृषिः ॥ ६४

इदं शतसहस्रा[1]ग्रं श्लोकानां पुण्य[2]कर्मणः ।
उपाख्यानैः सह ज्ञेयं श्राव्यं भारतमुत्तमम् ॥ ६५

[3]चतुर्विंशतिसाहस्रं चक्रे भारत[4]संज्ञितम् ।
उपाख्यानै [5]र्विना तावद् भारतं प्रोच्यते बुधैः ॥ ६६

ततोऽ[6]प्यर्धशतं भूयः संक्षेपं कृतवानृषिः । ६६॥
[7]तस्याख्यानवरिष्ठस्य कृष्णद्वैपायनः प्रभुः ।

कथमध्यापयामी[8]ह शिष्यानित्यभ्यचिन्तयत् ॥ ६७॥
तस्य [9]चिन्तयमानस्य ऋषेर्द्वैपायनस्य च ।

[10]स्मृत्याजगाम भगवान् ब्रह्मा लोकगुरुः स्वयम् ।
प्रियार्थं महर्षेश्चापि लोकानां हितकाम्यया ॥ ६९

तं दृष्ट्वा विस्मितो भूत्वा प्राञ्जलिः प्रणतः स्थितः ।
आसनं कल्पयामास सर्वदेवगणै[11]र्वृतम् ॥ ७०

हिरण्यगर्भमासीनं तस्मिंस्तु परमासने ।

---

1. क—ग्र्यं 2. क--कर्मणाम्
3. ख—चतुर्विंशत्सहस्राणि
क— 4. संहिताम् 5. विनैतावत् 6. अध्यर्ध
7. अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणाम् ।
8. ति सशिष्यानित्यचिन्तयत् 9. चिन्तयतश्चापि
10. ख-ग—स्मृत्वा 11. ख—युतम्

परिवृत्यासनाभ्याशे [1]वासवेयः[2] स्थितोऽ[3]नघः ॥ ७१

अनुज्ञातोऽथ कृतिना ब्रह्मणा परमेष्ठिना ।
निषसादासनाभ्याशे प्रीयमाणः सुविस्मितः ॥ ७२

उवाच च महातेजा ब्रह्माणं परमेष्ठिनम् ।
कृतं [4]मयैतद्भगवन् काव्यं परमपूजितम् ॥ ७३

ब्रह्मन्वेदरहस्यं च यच्चाप्यभि[5]हितं मया ।
साङ्गोप[6]निषदानां च वेदानां विस्तरक्रिया ॥ ७४

इतिहासपुराणानां उन्मेषं निमिषं च यत् ।
भूतं भव्यं भविष्यच्च त्रिविधं कालसंज्ञितम् ॥ ७५

जरामृत्युभयव्याधि [7]भाव्यभावार्थनिश्चयः ।
विविधस्य च धर्मस्य ह्याश्रमाणां च लक्षणम् ॥ ७६

चातुर्वर्ण्यविधानं च [8]पुरुषाणां च कृत्स्नशः ।
तपसो ब्रह्मचर्यस्य पृथिव्याश्चन्द्रसूर्ययोः ॥ ७७

ग्रहनक्षत्रताराणां प्रमाणं च युगैः सह ।
ऋचो यजूंषि सामानि [9]शब्दोऽध्यात्मं तथैव च ॥ ७८

क— 1. अ-ग—वासवीयः 2. ख—वासवो यः
3. नतः 4. मयेदं भगवन् 5. मतं
6. निषदां चैव 7. भावाभावविनिश्चयम्
8. पुराणार्थं च 9. वेदाध्यात्मम्

[1]न्यायः शिक्षा चिकित्सा च ज्ञानं पाशुपतं तथा ।
इत्यनेकाश्रयं जन्म दिव्यमानुषसं[2]श्रितम् ॥ ७९

तीर्थानां चैव पुण्यानां देशानां चैव कीर्तनम् ।
नदीनां पर्वतानां च वनानां सागरस्य च ॥ ८०

पुराणां चैव दिव्यानां कल्पानां युद्धकौशलम् ।
वाक्यजाति[3]विशेषश्च लोकयात्राक्रमश्च यः ॥ ८१

[4]यच्च सर्वगतं [5]वस्तु तत्प्रभो क्षन्तुमर्हसि । ८१॥

ब्रह्मा—

तपोविशिष्टादपि [6]च वसिष्ठान्मुनिपुङ्गवात् ।
मन्ये श्रेष्ठतमं त्वाऽद्य रहस्यज्ञानवेदनात् ॥ ८२॥
जन्मप्रभृति सत्यां ते विद्म गां ब्रह्म[7]वादिनीम् ।
त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति ॥ ८३॥
अस्य काव्यस्य कवयो न समर्था विशेषणे ।
विशेषणे गृहस्थस्य शेषाश्चय इवाश्रमाः ॥ ८४॥
जडान्धबधिरो[8]न्मत्तं तमोभूतं जगद्भवेत् ।

---

1. क-ख—न्यायशिक्षा
2. क—श्रितम् 3. क—विशेषाश्च 4. क—यच्चापि सर्वगं
5. ख—वाक्यं 6. क—वै 7. ख—गामिनीम्
8. ग—न्मत्ततमोभूतम्

यदि ज्ञानहुताशेन त्वया नोज्ज्वलितं भवेत् ॥ ८५॥

तमसान्धस्य लोकस्य [1]चेष्टितस्य स्वकर्मभिः ।
ज्ञानाञ्जनशलाकाभिर् बुद्धिनेत्रोत्सवः कृतः ॥ ८६॥

धर्मार्थकाममो[2]क्षाणां समासव्यासकीर्तनैः ।
त्वया भारतसूर्येण [3]तूर्णं विनिहतं तमः ॥ ८७॥

पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाप्रकाशिना ।
नृणां कुमुदसौम्यानां कृतं बुद्धिप्रबोधनम् ॥ ८८॥

इतिहासप्रदीपेन मोहावरणघातिना ।
लोकगर्भगृहं कृत्स्नं यथावत्संप्रकाशितम् ॥ ८९॥

संग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान् ।
संभवस्कन्धविस्तारः सभारण्यविटङ्कवान् ॥ ९०॥

आरण्यपर्वरूपाढ्यो विराटोद्योगसारवान् ।
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ॥ ९१॥

कर्णपर्वचितैः पुष्पैः शल्यपर्वसुगन्धिभिः ।
स्त्री[4]पर्वैकान्तविश्रामः शान्तिपर्वमहाफलः ॥ ९२॥

आश्वमेधामृतरसस् त्वाश्रमस्थानसंश्रयः ।
मौसल[5]द्विजसंक्षेप शिष्टद्विजनिषेवितः ॥ ९३॥

क— { 1. वेष्टितस्य 2. मोक्षार्थैः 3. नृणां
4. पर्वैषीक 5. श्रुति

सर्वेषां कविमुख्यानां उपजीव्यो भविष्यति ।
पर्जन्य इव भूतानां [1]अक्षयो भारतद्रुमः ॥ ९४॥

सूतः—

एवमाभाष्य तं ब्रह्मा जगाम स्वं निवेशनम् ।
भगवान् स जगत्स्रष्टा ऋषिर्देवगणैः सह ॥ ९५॥

तस्य वृक्षस्य वक्ष्यामि शाखापुष्पफलोदयम् ।
[2]साधुमेध्यरसोपेतं अच्छेद्यममरैरपि ॥ ९६॥

अनुक्रामिणमध्यायं वृत्तान्तं सर्वपर्वणाम् ।
इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम् ॥ ९७॥

ततोऽन्येभ्योऽभिरूपेभ्यः शिष्येभ्यः प्रददौ प्रभुः ।
नारदोऽश्रावयद्देवान् असितो देवलः पितॄन् ॥ ९८॥

गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः ॥ ९९
वैशम्पायनविप्रर्षिः श्रावयामास पार्थिवम् ।
पारिक्षितं महाबाहुं नाम्ना तु जनमेजयम् ॥ १००

दुर्योधनो मन्युमयो महाद्रुमः
स्कन्धः कर्णः शकुनिस्तस्य [3]शाखाः ।
दुःशासनः पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रोऽम्बिकेयः ॥ १०१

क—आश्रयो 2. क—स्वादु 3. अ-ख-ग—शाखा

युधिष्ठिरो धर्ममयो महाद्रुमः
स्कन्धोऽर्जुनो भीमसेनोऽस्य [1]शाखाः ।
माद्रीसुतौ पुष्पफले समृद्धे
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ १०२

पाण्डुर्जित्वा बहून्देशान् [2]युध्वा विक्रमणेन च ।
अरण्ये मृगयाशीलो न्यवसत्सजनस्तदा ॥ १०३

मृगव्यवायनिधने कुच्छ्रां प्राप स आपदम् ।
जन्मप्रभृति पार्थानां तत्राचारविधिक्रमः ॥ १०४

मातुरभ्युपपत्तिश्च धर्मोपनिषदं प्रति ।
धर्मस्य वायोः शक्रस्य देवयोश्च तथाश्विनोः ॥ १०५

ततो धर्मोपनिषदः श्रुत्वा भर्तुः प्रिया पृथा ।
धर्मानिले[3]न्द्रान्स्तुतिभिर् जुहाव सुतवाञ्छया ॥ १०६

तदुक्तोपनिषन्माद्री चाश्विनावाजुहाव च ।
जाताः पार्थास्ततः [4]कामी पाण्डुर्माद्र्या दिवं गतः ॥ १०७

तापसैः सह संवृद्धा मातृभ्यां परिरक्षिताः ।
मध्येऽरण्येषु पुण्येषु महतामाश्रमेषु च ॥ १०८

[5]मुनिभिश्च समानीता धार्तराष्ट्रान् प्रति स्वयम् ।

---

1. अ-क-ख-ग—शाखा
2. युधा 3. न्द्रांस्ताभिःसा 4. सर्वेकुन्त्यामाद्याश्रमन्व्रतः ।
क— 5. तेषु जातेषु सर्वेषु पाण्डवेषु महात्मसु । माद्र्या तु सह संगम्य ऋषिशापप्रभावतः॥ मृतः पाण्डुर्महापुण्ये शतशृङ्गे महागिरौ । } अधिकः पाठः ।

शिशवश्चाभिरूपाश्च जटिला ब्रह्मचारिणः ॥ १०९

पुत्राश्च भ्रातरश्चेमे शिष्याश्च सुहृदश्च वः ।
पाण्डवाश्चैत इत्युक्त्वा मुनयोऽन्तर्हितास्ततः ॥ ११०

तैस्तान्निवेदिताञ्छ्रुत्वा पाण्डवान् [1]कौरवांस्तदा ।
शिष्टाश्च वर्णाः पौरा ये ते हर्षाच्चुक्रुशुर्भृशम् ॥ १११

आहुः केचिन्न तस्यैते तस्यैत इति चापरे ।
[2]यदा चिरमृतः पाण्डुः कथं तस्येति चापरे ॥ ११२

स्वागतं सर्वथा दिष्ट्या पाण्डोः पश्याम सन्ततिम् ।
उच्यतां स्वागतमिति वाचोऽश्रूयन्त सर्वशः ॥ ११३

तस्मिन्नुपरते शब्दे दिशः सर्वा विनादयन् ।
अन्तर्हितानां भूतानां निस्स्वनस्तुमुलोऽभवत् ॥ ११४

पुष्पवृष्टिः शुभा गन्धाः शङ्खदुन्दुभिनिस्वनाः ।
आसन् प्रवेशे पार्थानां तदद्भुतमिवाभवत् ॥ ११५

तत्प्रीत्या चैव सर्वेषां पौराणां हर्षसंभवः ।
शब्द आसीन्महांस्तत्र दिविस्पृक् कीर्तिवर्धनः ॥ ११६

तेऽधीत्य सकलान्वेदाञ् शास्त्राणि विविधानि च ।
न्यवसन् पाण्डवास्तत्र पूजिता अकुतोभयाः ॥ ११७

1. क—कौरवास्तदा 2. अ-ख-ग—इदमर्धं नास्ति

युधिष्ठिरस्य शौचेन प्रीताः प्रकृतयोऽभवन् ।
धृत्या च भीमसेनस्य विक्रमेणार्जुनस्य च ॥ ११८

गुरुशुश्रूषया कुन्त्या यमयोर्विनयेन च ।
तुतोष लोकः सकलस् तेषां वीर्यगुणेन च ॥ ११९

समवाये तदा राज्ञां कन्यां तत्र स्वयंवरात् ।
प्राप्तवानर्जुनः कृष्णां कृत्वा कर्म सुदुष्करम् ॥ १२०

तदा प्रभृति लोकेऽस्मिन् पूज्यः सर्वधनुष्मताम् ।
आदित्य इव दुष्प्रेक्ष्यः समरेष्वपि चाभवत् ॥ १२१

स सर्वान् पार्थिवाञ्जित्वा सर्वांश्च महतो [1]गणान् ।
आजहारार्जुनो [2]राज्ञो राजसूनुर्महाक्रतुम् ॥ १२२

अन्नवान्दक्षिणावांश्च सर्वैः समुदितो गुणैः ।
युधिष्ठिरेण संप्राप्तो राजसूयो महाक्रतुः ॥ १२३

सुनयाद्वासुदेवस्य भीमार्जुनबलेन च ।
घातयित्वा जरासन्धं चैद्यं च बलदर्पितम् ॥ १२४

[3]दुर्योधनमुपागच्छन्नर्हणानि ततस्ततः ।
मणिकाञ्चनरत्नानि गोहस्त्यश्वधनानि च ॥ १२५

समृद्धां तां ततो दृष्ट्वा पाण्डवानां तदा श्रियम् ।

---

1. अ-ख-ग—गुणान्
2. क—राज्ञे राजसूयं
3. क—दुर्योधनं विनागच्छन्

ईर्ष्यासमुत्थः सुमहांस्तस्य मन्युरजायत ॥ १२६

विमानप्रतिमां चापि मयेन सुकृतां सभाम् ।
पाण्डवानामुप[1]सृतां स दृष्ट्वा पर्यतप्यत ॥ १२७

यत्रापहसितश्चासीत् प्रस्कन्दन्निव संभ्रमात् ।
प्रत्यक्षं वासुदेवस्य भीमेनानभिजातवत् ॥ १२८

स भोगान्विविधान्भुञ्जन् रत्नानि विविधानि च ।
ध्यथितो धृतराष्ट्रस्य विवर्णोऽथ शशंस च ॥ १२९

अन्वजानात्ततो द्यूतं धृतराष्ट्रः सुतप्रियः ।
तच्छ्रुत्वा वासुदेवस्य कोपस्समभवन्महान् ॥ १३०

नातिप्रीतमनाश्चासीद् विषादं चाप्युपेक्षते ।
[2]द्यूतादीननयान्घोरान् प्रवृद्धां श्चाप्युपेक्षते ॥ १३१

निरस्य विदुरं द्रोणं भीष्म शारद्वतं कृपम् ।
विग्रहे तुमुले तस्मिन्नहन्क्षत्रं परस्परम् ॥ १३२

जयस्तु पाण्डुपुत्रेषु श्रुत्वा सुमहदप्रियम् ।
दुर्योधनवधं श्रुत्वा कर्णस्य शकुनेस्तथा ॥ १३३

धृतराष्ट्रश्चिरं ध्यात्वा संजयं वाक्यमब्रवीत् ॥ १३३॥

शृणु संजय मे [3]सर्वान्नाद्यासूयितुमर्हसि ।

---

1 क—हृतां 2. ग—द्यूतादीनित्यर्धश्लोको नास्ति
3. क—सर्व नाभ्यसूयितुं

श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसत्तम ॥ १३४॥

विग्रहे मम पुत्राणां पाण्डूनां च तथा सति ।
न मे विशेषः पुत्रेषु स्वेषु पाण्डुसुतेषु वा ॥ १३५॥

वृद्धं मामभ्यसूयन्ते पुत्रा मन्युपरायणाः ।
अहं त्वचक्षुः कार्पण्यात्पुत्रप्रीत्या सहामि तत् ॥ १३६॥

मुह्यन्तं चानुमुह्यामि दुर्योधनमचेतसम् ।
राजसूये श्रियं दृष्ट्वा पाण्डवस्य महौजसः ॥ १३७॥

तच्चापहसनं प्राप्य सभारोहणदर्शने ।
अमर्षितः स्वयं जेतुमशक्तः पाण्डवान् रणे ॥ १३८॥

[1]निरुत्साहः श्रियं प्राप्तुं श्रियं चाक्षत्रियो यथा ।
गान्धारराजसहितश् छद्मद्यूतममन्त्रयत् ॥ १३९॥

तत्र यद्यद्यथा ज्ञातं मया संजय तच्छृणु ॥ १४०

श्रुत्वा तु मम वाक्यानि बुद्ध्या युक्तानि तत्त्वतः ।
ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत ॥ १४१

यदाश्रौषं धनुरायम्य चित्रं
विद्धं लक्ष्यं पातितं वै पृथिव्याम् ।
कृष्णां हृतां पश्यतां सर्वराज्ञां
तदा नाशंसे विजयाय संजय ॥ १४२

1. क—निरुत्साहं च संप्राप्तुं

यदाश्रौषं द्वारकायां सुभद्रां
प्रसह्योढां माधवीमर्जुनेन ।
इन्द्रप्रस्थं वृष्णिवीरौ च यातौ
तदा नाशंसे विजयाय संजय ॥ १४३

यदाश्रौषं देवराजप्रवृष्टं
शरैर्दिव्यैर्वारितमर्जुनेन ।
अग्निं तदा तर्पितं खाण्डवे तु
तदा नाशंसे विजयाय संजय ॥ १४४

यदाश्रौषं पुनरामन्त्र्य द्यूते
महात्मनां प्रस्थितानां वनाय ।
ज्येष्ठप्रीत्या क्लिश्यतां पाण्डवानां
तदा नाशंसे विजयाय संजय ॥ १४५

यदाश्रौषं हृतराज्यं युधिष्ठिरं
पराजितं सौबलेनाक्षवत्याम् ।
अन्वागतं भ्रातृभिरप्रमेयै-
स्तदा नाशंसे विजयाय संजय ॥ १४६

यदाश्रौषं द्रौपदीमश्रुकण्ठीं
सभां नीतां दुःखिता मेकवस्त्राम् ।
रजस्वलां नाथवतीमनाथवत्
तदा नाशंसे विजयाय संजय ॥ १४७

यदाश्रौषं स्नातकानां सहस्रै-
रन्वागतं धर्मराजं वनस्थम् ।
भिक्षाभुजां ब्राह्मणानां महात्मनां
तदा नाशंसे विजयाय संजय ॥ १४८

यदाश्रौषं चार्जुनो देवदेवं
किरातवेषं त्र्यम्बकं तोष्य युद्धे ।
अवाप तत्पाशुपतं महास्त्रं
तदा नाशंसे विजयाय संजय ॥ १४९

यदाश्रौषं वनवासे तु [3]पार्थान्
समागतान्महर्षिभिः पुराणैः ।
उपास्यमानान् सगणैर्जातसख्यान्
तदा नाशंसे विजयाय संजय ॥ १५०

यदाश्रौषं त्रिदिवस्थं धनञ्जयं
शक्रात्साक्षात् [1]दिव्यमस्त्रं यथावत् ।
अधीयानं संशितं सत्यसन्धं
तदा नाशंसे विजयाय संजय ॥ १५१

यदाश्रौषं तीर्थयात्रा[2]निवृत्तं
पाण्डोस्सुतं सहितं रोमशेन ।

---

1. अ-ख-ग—त्रिदिवास्त्रं 2. क—प्रवृत्तं

[1]तस्मादश्रौषीदर्जुनस्यार्थलाभं
तदा नाशंसे विजयाय संजय ॥ १५२
यदाश्रौषं वैश्रवणेन सार्धं
समागतं भीममन्यांश्च पार्थान् ।
तस्मिन्देशे मानुषाणामगम्ये
तदा नाशंसे विजयाय संजय ॥ १५३
यदाश्रौषं घोषयात्रागतानां
बन्धं गन्धर्वैर्मोक्षणं चार्जुनेन ।
स्वेषां सुतानां कर्णबुद्धौ रतानां
तदा नाशंसे विजयाय संजय ॥ १५४
यदाश्रौषं यक्षरूपेण धर्मं
समागतं धर्मराजेन सूत ।
प्रश्नानुक्तान् [2]विब्रुवन्तं च सम्यक्
तदा नाशंसे विजयाय संजय ॥ १५५
यदाश्रौषं तान्यथाज्ञातवासे-
ऽज्ञायमानान्मामकानां सकाशे ।
दक्षान्पार्थान् [3]चरतश्चाग्निकल्पां-
स्तदा नाशंसे विजयाय संजय ॥ १५६

1. क—बृहदश्वा दक्षहृदयं च प्राप्तं
2. अ-ख-ग—विद्रवता; क—विब्रुवता
3. अ-ख—यास्यतः; क—आगतः; ग—आगतान्

यदाश्रौषं कीचकानां वरिष्ठं
निदूदितं भ्रातृशतेन सार्धम् ।
द्रौपद्यर्थं भीमसेनेन [1]सङ्ख्ये
तदा नाशंसे विजयाय संजय ॥ १५७

यदाश्रौषं मामकानां वरिष्ठान्
धनंजयेनैकरथेन भग्नान् ।
विराटराष्ट्रे वसता महात्मना
तदा नाशंसे विजयाय संजय ॥ १५८

यदाश्रौषं सत्कृतां मत्स्यराज्ञा
सुतां दत्तामुत्तरामर्जुनाय ।
तां त्वर्जुनः प्रत्यगृह्णात्सुतार्थे
तदा नाशंसे विजयाय संजय ॥ १५९

यदाश्रौषं निर्जितस्याधनस्य
प्रव्राजितस्य स्वजनात्प्रच्युतस्य ।
अक्षौहिणीस्सप्त युधिष्ठिरस्य
तदा नाशंसे विजयाय संजय ॥ १६०

यदाश्रौषं नरनारायणौ तौ
कृष्णार्जुनौ वदतो नारदस्य ।

1. ख—सङ्घे

अहं द्रष्टा ब्रह्मलोके सदेति
तदा नाशंसे विजयाय संजय ॥ १६१
यदाश्रौषं माधवं वासुदेवं
सर्वात्मना पाण्डवार्थे निविष्टम् ।
यस्येमां गां विक्रममेकमाहु-
स्तदा नाशंसे विजयाय संजय ॥ १६२
यदाश्रौषं कर्णदुर्योधनाभ्यां
बुद्धिं कृतां निग्रहे केशवस्य ।
तं चात्मानं बहुधा दर्शयानं
तदा नाशंसे विजयाय संजय ॥ १६३
यदाश्रौषं वासुदेवे प्रयाते
रथस्यैकामग्रतस्तिष्ठमानाम् ।
तप्तां पृथां सान्त्वितां केशवेन
तदा नाशंसे विजयाय संजय ॥ १६४
यदाश्रौषं मन्त्रिणं वासुदेवं
तथा भीष्मं शान्तनवं च तेषाम् ।
भारद्वाजं चाशिषोऽनुब्रुवाणं
तदा नाशंसे विजयाय संजय ॥ १६५
यदाश्रौषं वासुदेवार्जुनौ तौ
तथा धनुर्गाण्डिवमप्रमेयम् ।

त्रीण्युग्रवीर्याणि समागतानि
तदा नाशंसे विजयाय संजय ॥ १६६

यदाश्रौषं कश्मलेनाभिपन्ने
रथोपस्थे सीदमानेऽर्जुने वै ।
कृष्णं लोकान्दर्शयानं शरीरे
तदा नाशंसे विजयाय संजय ॥ १६७

यदाश्रौषं भीष्ममभित्रकर्शनं
निघ्नन्तमाजावयुतं रथानाम् ।
न चैषां कश्चिद्दृश्यते वध्यरूप-
स्तदा नाशंसे विजयाय संजय ॥ १६८

यदाश्रौषं भीष्ममत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
शिखण्डिनं पुरतस्थापयित्वा
तदा नाशंसे विजयाय संजय ॥ १६९

यदाश्रौषं शरतल्पे शयानं
वृद्धं शूरं सूदितं चित्रपुङ्खैः ।
भीष्मं कृत्वा सोमकानल्पशेषां-
स्तदा नाशंसे विजयाय संजय ॥ १७०

यदाश्रौषं शान्तनवे शयाने
पानीयार्थं चोदिते शक्रसूनौ ।

गां भित्त्वाम्भो वारुणेनाददाने
तदा नाशंसे विजयाय संजय ॥ १७१

यदाश्रौषं शुक्रसूर्यौ च युक्तौ
कौन्तेयानामनुलोमौ जयाय ।
नित्यं चास्मास्वापदमावहन्तौ
तदा नाशंसे विजयाय संजय ॥ १७२

यदा द्रोणो विविधानस्त्रमार्गा-
न्निदर्शयन्समरे चित्रयोधी ।
तान्पाण्डवान् श्रेष्ठतमान्नहन्ति
तदा नाशंसे विजयाय संजय ॥ १७३

यदाश्रौषं [1]त्रैगर्तान्महारथान्
व्यवस्थितानर्जुनस्या[2]न्तकाय ।
संशप्तकान्निहतानर्जुनेन
तदा नाशंसे विजयाय संजय ॥ १७४

यदाश्रौषं व्यूहमभेद्यमन्यै-
र्भारद्वाजे [3]नात्तशस्त्रेण गुप्तम् ।
भित्त्वा सौभद्रं वीरमेकं प्रविष्टं
तदा नाशंसे विजयाय संजय ॥ १७५

1. क—चास्मदीयान् 2. क—अन्तरायम् 3. अ-क-ख—नोक्त

[1]यदाभिमन्युं परिवार्य बालं
सर्वे हत्वा हृष्टरूपा बभूवुः ।
महारथाः [2]पार्थमशक्नुवन्त-
स्तदा नाशंसे विजयाय संजय ॥ १७६

यदाश्रौषं चाभिमन्युं निहत्य
हर्षान्मोहात्क्रोशतो धार्तराष्ट्रान् ।
क्रोधं मुक्तं सैन्धवे चार्जुनेन
तदा नाशंसे विजयाय संजय ॥ १७७

यदाश्रौषं सैन्धवार्थे प्रतिज्ञां
कृतां तदा मन्युना चार्जुनेन ।
सत्यान्निस्तीर्णां शत्रुमध्ये च तेन
तदा नाशंसे विजयाय संजय ॥ १७८

यदाश्रौषं श्रान्तहये धनञ्जये
मुक्त्वा हयान्पाययित्वोपवृत्तान् ।
पुनर्युक्त्वा वासुदेवं प्रयान्तं
तदा नाशंसे विजयाय संजय ॥ १७९

यदाश्रौषं वाहनेष्वाश्वसत्सु
रथोपस्थे तिष्ठता चार्जुनेन ।

---

1. ख—अयं श्लोकः ख पुस्तके नास्ति
2. अ-क-ग—मन्यु

सर्वान्योधान्वारितान्पाण्डवेन
तदा नाशंसे विजयाय संजय ॥ १८०

यदाश्रौषं नागबलं दुरुत्सहं
द्रोणानीकं युयुधानं प्रमथ्य ।
यान्तं वार्ष्णेयं यत्र तौ कृष्णपार्थौ
तदा नाशंसे विजयाय संजय ॥ १८१

यदाश्रौषं कर्णमासाद्य मुक्तं
वधाद्भीमं कुत्सयित्वा वचोभिः ।
धनुष्कोट्या तुद्य कर्णेन वीरं
तदा नाशंसे विजयाय संजय ॥ १८२

यदाश्रौषं कृतवर्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च [1]सङ्घे ।
[2]नारक्षन्यत्सैन्धवं वध्यमानं
तदा नाशंसे विजयाय संजय ॥ १८३

यदाश्रौषं देवराजेन दत्तां
शक्तिं मुक्तां शङ्कितां माधवेन ।
घटोत्कचे राक्षसे घोररूपे
तदा नाशंसे विजयाय संजय ॥ १८४

1. अ-ख-ग—सङ्के 2. अ-ख-ग—यदा रक्षन्सैन्धवं

यदाश्रौषं कर्णघटोत्कचाभ्यां
युद्धे मुक्तां सूतपुत्रेण शक्तिम् ।
यया वध्यः समरे सव्यसाची
तदा नाशंसे विजयाय संजय ॥ १८५

यदाश्रौषं द्रोणमाचार्यमेकं
धृष्टद्युम्नेन ह्यतिक्रम्य धर्मम् ।
रथोपस्थे प्रायगतं विशस्तं
तदा नाशंसे विजयाय संजय ॥ १८६

यदाश्रौषं द्रौणिना द्वैरथस्थं
माद्रीपुत्रं नकुलं योधमध्ये ।
सम्यग्युद्धे पाण्डवं युध्यमानं
तदा नाशंसे विजयाय संजय ॥ १८७

यदा द्रोणे निहते द्रोणपुत्रो
नारायणं दिव्यमस्त्रं विकुर्वन् ।
नैषामन्तं गतवान्पाण्डवानां
तदा नाशंसे विजयाय संजय ॥ १८८

यदाश्रौषं कर्णमत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।

तस्मिन् भ्रातॄणां विग्रहे देवगुह्ये
तदा नाशंसे विजयाय संजय ॥ १८९

यदाश्रौषं द्रोणपुत्रं कृपं च
दुःशासनं कृतवर्माणमुग्रम् ।
युधिष्ठिरं शूरममर्षयन्तं
तदा नाशंसे विजयाय संजय ॥ १९०

यदाश्रौषं निहतं मद्रराजं
रणे शूरं धर्मराजेन सूत ।
सदा सङ्ग्रामे स्पर्धते यस्तु कृष्णं
तदा नाशंसे विजयाय संजय ॥ १९१

यदाश्रौषं कलहद्यूतमूलं
मायाबलं सौबलं पाण्डवेन ।
हतं सङ्ग्रामे सहदेवेन [1]पापं
तदा नाशंसे विजयाय संजय ॥ १९२

यदाश्रौषं श्रा[2]न्तमेकं शयानं
ह्रदं गत्वा स्तम्भयित्वा तदम्भः ।
दुर्योधनं विरथं भग्नदर्पं
तदा नाशंसे विजयाय संजय ॥ १९३

---

1. अ-ख-ग—सार्धं 2. अ-ख-ग—शान्त

यदाश्रौषं पाण्डवांस्तिष्ठमानान्
गङ्गाह्रदे वासुदेवेन सार्धम् ।
[1]अमर्षणं धर्षयतस्सुतं मे
तदा नाशंसे विजयाय संजय ॥ १९४

यदाश्रौषं विविधांस्तात मार्गान्
गदायुद्धे मण्डलं संचरन्तम् ।
मिथ्याहतं वासुदेवस्य बुद्ध्या
तदा नाशंसे विजयाय संजय ॥ १९५

यदाश्रौषं द्रोणपुत्रादिभिस्तै-
र्हतान्पाञ्चालान्द्रौपदेयांश्च सुप्तान् ।
कृतं बीभत्समयशस्यं च कर्म
तदा नाशंसे विजयाय संजय ॥ १९६

यदाश्रौषं भीमसेनानुयाते-
नाश्वत्थाम्ना परमास्त्रं प्रयुक्तम् ।
क्रुद्धेनैषी[2]कमवधीद्येन गर्भं
तदा नाशंसे विजयाय संजय ॥ १९७

यदाश्रौषं ब्रह्मशिरोऽर्जुनेन
मुक्तं स्वस्ती[3]त्यस्त्रमस्त्रेण शान्तम् ।

---

1. अ—अमर्षणान्मर्षयतस्सुतान्मे ।
2. क—कं नावधीत् ३. अ-ख-ग—उग्रं

अश्वत्थाम्ना मणिरत्नं च मुक्तं
तदा नाशंसे विजयाय संजय ॥ १९८

यदाश्रौषं द्रोणपुत्रेण गर्भे
वैराट्या वै पात्यमाने महास्त्रे ।
[1]संजीवयामीति हरेः प्रतिज्ञां
तदा नाशंसे विजयाय संजय ॥ १९९

[2]शोच्या गान्धारी पुत्रपौत्रैर्विहीना
तथा वध्वः पतिभिर्भ्रातृभिश्च ।
कृतं कार्यं दुष्करं पाण्डवेयैः
प्राप्तं राज्यं निस्सपत्नं पुनस्तैः ॥ २००

कष्टं युद्धे दश शेषाः श्रुता मे
त्रयोऽस्माकं पाण्डवानां च सप्त ।
न्यूना विंशत्सूदिताक्षौहिणीनां
तस्मिन्सङ्ग्रामे [3]निघ्नतां क्षत्रियाणाम् ॥ २०१

---

1. अ—कोशे-इदमर्धं नास्ति-परं तु अत्र इदमुपलभ्यते
"द्वैपायनः केशवो द्रोणपुत्रं
परस्परेणाभिशापैश्शपेताम्"

2. क—बुध्वा चाहं बुद्धिहीनोऽद्य सूत सन्तप्येऽहं पुत्रपौत्रैश्च हीनः ।
संचिन्तयन्नद्य विहीनबुद्धिः कर्तव्यतां नाभिजानामि सूत ॥
अधिकः पाठः ।

3. अ-ख-ग—विग्रहे

[1]तमसा संभृतं तूर्णं मोह आविशतीव माम् ।
संज्ञां नैव लभे सूत मनो विह्वलतीव मे ॥ २०२

इत्युक्त्वा धृतराष्ट्रोऽथ विलप्य च सुदुःखितः ।
मूर्च्छितः पुनराश्वस्तस् संजयं वाक्यमब्रवीत् ॥ २०३

संजयैवं गते प्राणान् त्यक्तुमिच्छामि मा चिरम् ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ॥ २०४

सूतः—

तमेवंवादिनं दीनं विलपन्तं महीपतिम् ।
गावल्गणिरयं धीमान् महार्थं वाक्यमब्रवीत् ॥ २०५

संजयः—

श्रुतवानसि वै राजन् महोत्साहान्महाबलान् ।
द्वैपायनस्य वचनान्नारदस्य च धीमतः ॥ २०६

महत्सु राजवंशेषु गुणैस्समुदितेषु च ।
जातान् दिव्यास्त्रविदुषश् शक्रप्रतिमतेजसः ॥ २०७

धर्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वाप्तदक्षिणैः ।
अस्मिंलोके यशः प्राप्य ततः कालवशं गतान् ॥ २०८

वैन्यं महारथं वीरं सृञ्जयं जयतां वरम् ।
सुहोत्रं रन्तिदेवं च कक्षीवन्तमथौशिजम् ॥ २०९

---

1. क-ग—कालाभिपन्ना समितिर्महात्मनां
निधूदिता हेतुरासीत्सुतो मे ॥ इदमर्धमधिकम् ।

बाह्लीकं दमनं चैद्यं शर्यातिं च शिबिं नलम् ।
विश्वामित्रममित्रघ्नं अम्बरीषं महाबलम् ॥ २१०

मरुत्तं मनुमिक्ष्वाकुं गयं भरतमेव च ।
रामं दाशरथिं चैव शशबिन्दुं भगीरथम् ॥ २११

ययातिं शुभकर्माणं देवैर्यो याजितः स्वयम् ।
चित्ययूपाङ्किता भूमिर् यस्येयं सवनाकरा ॥ २१२

इति राज्ञां चतुर्विंशन् नारदेन महात्मना ।
पुत्रशोकाभितप्ताय पुरा चैत्याय कीर्तिताः ॥ २१३

तेभ्यश्चान्ये गताः पूर्वे राजानो बलवत्तराः ।
महारथा महात्मानस् सर्वैस्समुदिता गुणैः ॥ २१४

पूरुः कुरुर्यदुश्शूरो विष्वगश्वो महाधृतिः ।
अणुहो युवनाश्वश्च काकुत्स्थो विक्रमो रघुः ॥ २१५

विजितिर्वीतिहोत्रोऽङ्गो हयश्वेतो बृहद्गुरुः ।
उशीनरः शतरथः कहोलो हुहुलो ध्रुवः । २१६

सहोद्भवः पुरो वेनः सगरस्सांकृतिर्निमिः ।
अजेयः परशुः पुण्ड्रः शंभुर्देवव्रतोऽनघः ॥ २१७

देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः ।
महोत्साहो विनीतात्मा सुक्रतुर्नैषधो नलः ॥ २१८

सत्यव्रतः शान्तभवः सुमित्रः सुबलः प्रभुः ।

जानुजङ्घोऽनरण्यश्च प्रियभृत्यश्शुचिव्रतः ॥ २१९

बलबन्धुर्निरामर्दः केतुशृङ्गो बृहद्बलः ।
धृष्टकेतुर्बृहत्केतुर् दीप्तकेतुर्निरामयः ॥ २२०

अधिक्षुर्वलली धूर्तो दृढबन्धुर्दृढायुधः ।
महापुराणसंभाव्यः प्रत्यङ्गः पुरहा श्रुतिः ॥ २२१

एते चान्ये च बहवः शतशोऽथ सहस्रशः ।
श्रूयन्ते शतशश्चान्ये सङ्ख्याताश्चापि सर्वशः ॥ २२२

हित्वा तु विपुलान्भोगान् ऋद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास् तव पुत्रैर्महत्तमाः ॥ २२३

येषां दिव्यानि कर्माणि विक्रमस्त्याग एव च ।
माहात्म्यमपि चास्तिक्यं सत्यं शौचं दमार्जवम् ॥ २२४

विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः ।
सुबुद्धिगुणसंपन्नास् ते चापि निधनं गताः ॥ २२५

तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना ।
लुब्धा दुर्वृत्तभूयिष्ठा न ताञ्छोचितुमर्हसि ॥ २२६

श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसत्तमः ।
येषां शास्त्रगता बुद्धिर् न ते मुह्यन्ति भारत ॥ २२७

निग्रहानुग्रहौ चापि विदितौ ते नराधिप ।
नात्यन्तमेवानुवृत्तिः श्रूयते पुत्ररक्षणे ॥ २२८

भवितव्यं तथा तच्च नातश्शोचितुमर्हसि ।
दैवं [1]पुरुषकारेण को निवर्तितुमर्हति ॥ २२९

विधातृविहितं मार्गं न कश्चिदतिवर्तते ।
कालमूलमिदं सर्वं भावाभावौ सुखावहौ ॥ २३०

कालः पचति भूतानि कालः संहरति प्रजाः ।
निर्दहन्तं प्रजाः कालं कालः शमयते पुनः ॥ २३१

कालोऽपि कुरुते भावान् सर्वलोकशुभाशुभान् ।
कालः संक्षिप्य सर्वास्तु प्रजा विसृजते पुनः ॥ २३२

कालः सर्वेषु भूतेषु चरत्यविरतः समः ।
अतीतानागता भावा ये वर्तन्ते च सांप्रतम् ॥ २३३

तान्कालनिर्मितान्बुद्ध्वा न संज्ञां हातुमर्हसि ॥ २३३॥

सूतः—

[2]इत्येवं पुत्रशोकार्तं धृतराष्ट्रं जनेश्वरम् ॥ २३४

आश्वास्य स्वस्थमकरोत् सूतो गावल्गणिस्तदा ।
अब्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ॥ २३५

---

1. अ-ख-ग—पूजाविशेषेण
2. क—एवमुक्त्वा तु राजानं संजयो विरराम च ।
धृतराष्ट्रोऽथ राजा च धृतिमेव समाश्रयत् ॥
दिष्टयेदमागतमिति मत्वा स प्राज्ञसत्तमः ।
लोकानां च हितार्थाय कारुण्यान्मुनिसत्तमः ॥
} अधिकः पाठ ।

भारताध्ययनात्पुण्याद् अपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ २३६

देवर्षयो ह्यत्र पुण्या ब्रह्मराजर्षयस्तदा ।
कीर्त्यन्ते शुभकर्माणस् तदा यक्षमहोरगाः ॥ २३७

भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
सहि सत्यमृतंचैव पवित्रं पुण्यमेवच ॥ २३८

शाश्वतं परमं ब्रह्म परं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ॥ २३९

असत्सत्सदसच्चैव यस्मादेव प्रवर्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्म मृत्युः पुनर्भवः ॥ २४०

अध्यात्मं श्रूयते यत्र पञ्चभूतगुणात्मकम् ।
अव्यक्तादि परं तच्च स एव परिगीयते ॥ २४१

यं तं यतिवरा मुक्ता ध्यानयोगबलान्विताः ।
प्रतिबिम्बमिवादर्शे पश्यन्त्यात्मन्यवस्थितम् ॥ २४२

श्रद्दधानस्सदोद्युक्तः सत्यधर्मपरायणः ।
कथयन्निममध्यायं नरः पापात्प्रमुच्यते ॥ २४३

अनुक्रामिणमध्यायं भारतस्यैवमादितः ।
आस्तिकः सततं शृण्वन् न कृच्छ्रेष्ववसीदति ॥ २४४

सभामध्ये जपन्कश्चित् सद्यो मुच्येत किल्बिषात् ।

अनुक्रमिष्यां तन्न स्याद् दिवा रात्र्यां च संचितम् ॥ २४५

भारतस्य वपुर्ह्येतत् सत्यं चानृतमेव च ।
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ॥ २४६

[1]आरण्यकं च वेदेभ्य ओषधीभ्यो यथामृतम् ।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ २४७

यथैतानि विशिष्टानि तथा भारतमुच्यते ॥ २४७॥

यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नदानं तत् पितॄंस्तस्योपतिष्ठति ॥ २४८॥

इतिहासपुराणाभ्यां [2]वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥ २४९॥

[3]काष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतं चापि पापं दह्यान्न संशयः ॥ २५०॥

य इमं शुचिरध्यायं पठन्पर्वणि पर्वणि ।
अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः ॥ २५१॥

यश्चेदं शृणुयान्नित्यं आर्षं श्रद्धासमन्वितः ।
स दीर्घमायुर्दीर्घां च स्वर्गतिं चाप्नुयान्नरः ॥ २५२॥

चत्वार एकतो वेदा भारतं चैकमेकतः ।

---

1. अ-ख-ग—आरणं चापि 2. अ-ख-ग—वेदार्थमुपबृंहयेत्
3. अ-ख-कृत्स्नं

समागतैः सुरर्षिभिस्तुलामारोपितं पुरा ॥ २५३॥

महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम् ।
महत्त्वा[1]द्गारवत्वाच्च महाभारतमुच्यते ॥ २५४॥

निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ २५५

तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः ।
प्रसह्य वित्ताहरणं न कल्कस्
तान्येव भावोपनतानि कल्कः ॥ २५६

इति श्रीमहाभारते शतसहस्रिकायां संहितायामादिपर्वणि
पदार्थानुक्रमो नाम-प्रथमोऽध्यायः ॥
[अस्मिन्नध्याये एकं वाक्यं २५५ श्लोकाः ।]

॥ द्वितीयोऽध्यायः ॥

(पर्वसङ्ग्रहपर्व)

ऋषय ऊचुः—

समन्तपञ्चकमिति यदुक्तं सूतनन्दन ।
एतत्सर्वं यथान्यायं श्रोतुमिच्छामहे वयम् ॥ १

सूतः—

शुश्रूषा यदि वो विप्रा ब्रुवतश्च शुभाः कथाः ।
समन्तपञ्चकाख्यानं श्रोतुमर्हथ सत्तमाः ॥ २

---

1. अ-ख-ग—भारतत्वाच्च

त्रेताद्वापरयोस्सन्धौ रामः प्रहरतां वरः ।
असकृत्पार्थिवं क्षत्रं जघानामर्षचोदितः ॥ ३

स सर्वं क्षत्रमुत्साद्य स्ववीर्येणानलद्युतिः ।
समन्तपञ्चके पञ्च चकार रुधिरह्रदान् ॥ ४

स तेषु रुधिराम्भस्सु ह्रदेषु क्रोधमूर्च्छितः ।
पितॄन् संतर्पयामास रुधिरेणेति नः श्रुतम् ॥ ५

अथर्चीकादयोऽभ्येत्य पितरो ब्राह्मणर्षभम् ।
तं क्षमस्वेति जगदुस् ततः स विरराम ह ॥ ६

तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् ।
समन्तपञ्चकमिति तत्पुण्यं परिकीर्त्यते ॥ ७

येन लिङ्गेन यो देशो युक्तस्समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥ ८

अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत् ।
समन्तपञ्चके युद्धं कुरुपाण्डवसैन्ययोः ॥ ९

तस्मिन्परमधर्मिष्ठे देशे भूदोषवर्जिते ।
अष्टादश समाजग्मुर् अक्षौहिण्यो युयुत्सया ॥ १०

एवं नामाभिनिर्वृत्तं तस्य देशस्य वै द्विजाः ।
पुण्यश्च रमणीयश्च स देशः संप्रकीर्तितः ॥ ११

तदेतत्कथितं सर्वं मया वो मुनि[1]सत्तमाः ।
यथा देशः सविख्यातस् त्रिषु लोकेषु विश्रुतः ॥ १२

ऋषय.—

अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन ।
एतदिच्छामहे श्रोतुं सर्वं एव यथातथम् ॥ १३

अक्षौहिण्याः परीमाणं रथाश्वनरहस्तिनाम् ।
यथावच्चैव नो ब्रूहि तत्सर्वं विदितं त्वया ॥ १४

सूतः—

एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ १५

पत्तिं त्रिगुणितामेनां विदुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ १६

त्रयो गुल्मा गणो नाम वाहिनी तु गणत्रयम् ।
स्मृतास्तिस्रोऽथ वाहिन्यः पृतनेति विचक्षणैः ॥ १७

चमूस्तु पृतनास्तिस्रस् ताश्च तिस्रस्त्वनीकिनी ।
अनीकिनीं दशगुणां आहुरक्षौहिणीं बुधाः ॥ १८

अक्षौहिण्यां प्रसंख्याता रथानां द्विजसत्तमाः ।
संख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ १९

1. अ—द्विज

शतान्युपरि चाप्यष्टौ भूयश्च सह सप्ततिः ।
गजानां तु परीमाणं तावदेवात्र निर्दिशेत् ॥ २०

ज्ञेयं शतसहस्रं तु सहस्राणि तथा नव ।
नराणामपि पञ्चाशत् छतानि त्रीणि चानघाः ॥ २१

पञ्चषष्टिसहस्राणि तथाश्वानां शतानि च ।
दशोत्तराणि षट् प्राहुर् यथावदभिसंख्यया ॥ २२

एतामक्षौहिणीं प्राहुः संख्यातत्त्वविदो जनाः ।
यां वः कथितवानस्मि विस्तरेण द्विजोत्तमाः ॥ २३

एतया संख्यया ह्यासन् कुरुपाण्डवसैन्ययोः ।
अक्षौहिण्यो द्विजश्रेष्ठाः पिण्डेनाष्टादशैव ताः ॥ २४

समेता [1]यत्र वै देशे तत्रैव निधनं गताः ।
कौरवान्कारणं कृत्वा कालेनाद्भुतकर्मणा ॥ २५

अहानि युयुधे भीष्मो दशैव परमास्त्रवित् ।
अहानि पञ्च द्रोणश्च ररक्ष कुरुवाहिनीम् ॥ २६

अहनी युयुधे द्वे तु कर्णः परबलार्दनः ।
शल्योऽर्धदिवसं चासीद् गदायुद्धं ततः परम् ॥ २७

तस्यैव तु दिनस्यान्ते हार्दिक्यद्रौणिगौतमाः ।
प्रसुप्तं निशि विश्वस्तं जघ्नुर्यौधिष्ठिरं बलम् ॥ २८

1. अ—तत्र

तत्तु शौनक सत्रे ते भारताख्यानविस्तरम् ।
आख्यास्ये पौष्य पौलोमं आस्तीकं च ततः परम् ॥ २९

*चित्रार्थपदमाख्यानं अनेकसमयान्वितम् ।
प्रतिपन्नं नरैः प्राज्ञैर् वैराग्यमिव मोक्षिभिः ॥ ३०

आत्मेव वेदितव्येषु प्रियेष्विव हि जीवितम् ।
इतिहासः प्रधानार्थः श्रेष्ठः सर्वागमेष्वयम् ॥ ३१

इतिहासोत्तमे ह्यस्मिन् अर्पिता बुद्धिरुत्तमा ।
स्वरव्यञ्जनयोः कुत्स्ना लोकवेदाश्रयेव वाक् ॥ ३२

अस्य प्रज्ञाभिपन्नस्य विचित्रपदपर्वणः ।
भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः ॥ ३३

†[1]सर्वानुक्रमणं पूर्वं द्वितीयं [2]पर्वसंग्रहः ।
[3]पौष्यं [4]पौलोम[5]मास्तीकं [6]आदिवंशावतारणम् ॥ ३४

ततः [7]संभवपर्वोक्तं अद्भुतं देवनिर्मितम् ।
[8]दाहो जतुगृहस्यात्र [9]हैडिम्बं पर्व चोच्यते ॥ ३५

ततो [10]बकवधः पर्व पर्व [11]चैत्ररथं तथा ।
ततः [12]स्वयंवरो देव्याः पाञ्चाल्याः पर्व चोच्यते ॥ ३६

क्षत्रधर्मेण निर्जित्य ततो [13]वैवाहिकं स्मृतम् ।
[14]विदुरागमनं पर्व [15]राज्यलाभस्तथैव च ॥ ३७

अ—विचित्राख्यपदाख्यानं † अ-ख-ग—पर्वानुक्रमणी पर्व

अर्जुनस्य [16]वने वासः [17]सुभद्राहरणं तथा ।
सुभद्राहरणादूर्ध्वं ज्ञेयं [18]हरणहारिकम् ॥ ३८
ततः [19]खाण्डवदाहाख्यं तत्रैव [20]मयदर्शनम् ।
सभापर्व ततः प्रोक्तं [21]मन्त्रपर्व ततः परम् ॥ ३९
[22]जरासन्धवधः पर्व पर्व [23]दिग्विजयस्तथा ।
पर्वदिग्विजयादूर्ध्वं [24]राजसूयकमुच्यते ॥ ४०
[25]ततश्चार्घाभिहरणं [26]शिशुपालवधस्तथा ।
[27]द्यूतपर्व ततः प्रोक्तं [28]अनुद्यूतमतः परम् ॥ ४१
तत [29]आरण्यकं पर्व [30]किम्मीरवध एव च ।
ईश्वरार्जुनयोर्युद्धं पर्व [31]कैरातमुच्यते ॥ ४२
[32]इन्द्रलोकाभिगमनं पर्व ज्ञेयमतः परम् ।
[33]तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः ॥ ४३
[34]जटासुरवधः पर्व [35]यक्षयुद्धमतः परम् ।
[36]तथैवाजगरं पर्व विज्ञेयं तदनन्तरम् ॥ ४४
[37]मार्कण्डेयसमास्या च पर्वोक्तं तदनन्तरम् ।
[38]संवादश्च ततः पर्व द्रौपदीसत्यभामयोः ॥ ४५
[39]घोषयात्रा ततः पर्व पर्व [40]प्रायोपवेशनम् ।
*मन्त्रस्य निश्चयं कृत्वा कार्यस्यापि विचिन्तनम् ॥ ४६

* क-ख-ग—इदमर्धं नास्ति

[41]ब्रीहिद्रोणकमाख्यानं ततोऽनन्तरमुच्यते ।
[42]द्रौपदीहरणं पर्व सैन्धवेन वनात्ततः ॥ ४७
*[43]कुण्डलाहरणं पर्व ततः परमिहोच्यते ।
[44]आरणेयं ततः पर्व [45]वैराटं तदनन्तरम् ॥ ४८
[46]कीचकानां वधः पर्व पर्व [47]गोग्रहणं तथा ।
अभिमन्योश्च वैराट्याः पर्व [48]वैवाहिकं स्मृतम् ॥ ४९
[49]उद्योगं पर्व विज्ञेयं अत ऊर्ध्वं महाद्भुतम् ।
ततः [50]संजययानाख्यं तदनन्तरमुच्यते ॥ ५०
[51]प्रजागरं ततः पर्व धृतराष्ट्रस्य चिन्तया ।
पर्व [52]सानत्सुजातं च गुह्यमध्यात्मदर्शनम् ॥ ५१
[53]व्यासाभिगमनं पर्व [54]भगवद्यानमेव च ।
ज्ञेयं [55]विवादपर्वात्र कर्णस्य च महात्मनः ॥ ५२
मन्त्रस्य निश्चयं कृत्वा कार्यं समभिचिन्तयन् ।
कीर्त्यते चाप्युपाख्यानं सैनापत्येऽभिषेचनम् ॥ ५३
श्वेतस्य वासुदेवेन चित्रं बहुकथाश्रयम् ।
[56]भीष्माभिषेचनं पर्व ततश्चाद्भुतमुच्यते ॥ ५४
[57]निर्याणं च ततः पर्व कुरुपाण्डवसेनयोः ।
[58]रथातिरथसंख्या च पर्वोक्तं तदनन्तरम् ॥ ५५

*-क-ख-ग—रामायणमुपाख्यानं अत्रैव बहुविस्तरम् । सावित्रोद्दालकीयं च वैन्योपाख्यानमेव च ॥ } अधिकः पाठः ।

[59]उलूकदूतागमनं पर्व रोषविवर्धनम् ।
[60]अम्बोपाख्यानमथ च पर्व ज्ञेयमतः परम् । ५६
[61]जम्बूखण्डविनिर्माणं पर्वोक्तं तदनन्तरम् ।
[62]भूमिपर्व ततो ज्ञेयं द्वीपविस्तारकीर्तनम् ॥ ५७
दिव्यं चक्षुर्ददौ यत्र संजयाय महानृषिः ।
पर्वोक्तं [63]भगवद्गीता पर्व [64]भीष्मवधस्ततः ॥ ५८
[65]द्रोणाभिषेकः पर्वोक्तं [66]संशप्तकवधस्तथा ।
[67]अभिमन्युवधः पर्व [68]प्रतिज्ञापर्व चोच्यते ॥ ५९
[69]जयद्रथवधः पर्व [70]घटोत्कचवधस्ततः ।
ततो [71]द्रोणवधःपर्व विज्ञेयं तदनन्तरम् ॥ ६०
[72]मोक्षो नारायणास्त्रस्य पर्वानन्तरमुच्यते ।
[73]कर्णपर्व ततो ज्ञेयं [74]शल्यपर्व ततः परम् ॥ ६१
[75]ह्रदप्रवेशनं पर्व [76]गदायुद्धमतः परम् ।
[77]सारस्वतं ततःपर्व तीर्थवंशगुणान्वितम् ॥ ६२
अत ऊर्ध्वं तु बीभत्सं पर्व [78]सौप्तिकमुच्यते ।
[79]ऐषीकं पर्व निर्दिष्टं अत ऊर्ध्वं सुदारुणम् ॥ ६३
[80]जलप्रदानकं पर्व [81]स्त्रीपर्व च ततः परम् ।
[82]श्राद्धपर्व ततो ज्ञेयं कुरूणामौर्ध्वदैहिकम् ॥ ६४
[83]आभिषेचनिकं पर्व धर्मराजस्य धीमतः ।

[84]चार्वाकनिग्रहःपर्व रक्षसो ब्रह्मरूपिणः ॥ ६५

[85]प्रविभागो ग्रहाणां च पर्वोक्तं तदनन्तरम् ।
शान्तिपर्व ततो यत्र [86]राजधर्मानुकीर्तनम् ॥ ६६

[87]आपद्धर्मश्च पर्वोक्तं [88]मोक्षधर्मस्ततःपरम् ।
ततःपर्व परिज्ञेयं[89]आनुशासनिकं परम् ॥ ६७

[90]स्वर्गारोहणकं पर्व ततो भीष्मस्य धीमतः ।
[91]ततोऽश्वमेधिकं पर्व सर्वपापप्रणाशनम् ॥ ६८

[92]अनुगीतापर्व ततो ज्ञेयमध्यात्मवाचकम् ।
पर्व [93]चाश्रमवासाख्यं [94]पुत्रदर्शनमेव च ॥ ६९

[95]नारदागमनं पर्व ततःपरमिहोच्यते ।
*[96]मौसलं पर्व च ततो घोरं समनुवर्ण्यते ॥ ७०

[97]महाप्रस्थानिकं पर्व [98]स्वर्गारोहणकं ततः ।
[99]हरिवंशस्ततःपर्व पुराणं खिलसंज्ञितम् ॥ ७१

[100]भविष्यत्पर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत् ।
एतत्पर्वशतं †पुण्यं व्यासेनोक्तं महात्मना ॥ ७२

यथा तु सूतपुत्रेण रौमहर्षणिना पुनः ।
कथितं नैमिशारण्ये पर्वाण्यष्टादशैव तु ॥ ७३

---

* क-ख-ग—वर्णधर्मस्ततोज्ञेय आश्रमाणां च कीर्तनम् । } अधिकः
मृतानां दर्शनं चैव व्यासेनाद्भुतकर्मणा ॥ } पाठः ।

† क-ख-ग—पूर्ण ।

समासो भारतस्यायं तत्रोक्तः पर्वसंग्रहः ।
पौष्ये पर्वणि माहात्म्यं उदङ्कस्योपवर्णितम् ॥ ७४
पौलोमे भृगुवंशस्य विस्तारः परिकीर्तितः ।
श्लोकाग्रं च सहस्रं च पञ्चाशच्छतमेव च ॥ ७५
अध्यायानां तथाष्टौ [1]वा आदितोस्मिन् प्रकीर्तिताः ।
आस्तिके सर्वनागानां गरुडस्य च संभवः ॥ ७६
क्षीरोदमथनं चैव जन्मोच्चैःश्रवसस्तथा ।
यजतस्सर्पसत्रेण राज्ञः पारिक्षितस्य ह ॥ ७७
कथेयमभिनिर्वृत्ता भारतानां महात्मनाम् ।
[2]श्लोकाग्रं च सहस्रं च त्रिंशतं चोत्तरं तथा ॥ ७८
श्लोकाश्च चतुराशीतिः पर्वण्यस्मिंस्तथैव च ।
अध्यायानां ततः प्रोक्तं चत्वारिंशन्महर्षिणा ॥ ७९
विविधास्संभवा राज्ञां उक्ताः संभवपर्वणि ।
अन्येषां चैव विप्राणामृषेर्द्वैपायनस्य च ॥ ८०
अंशावतरणं चात्र देवानां परिकीर्तितम् ।
दैत्यानां दानवानां च यक्षाणां च महौजसाम् ॥ ८१
नागानामथ सर्पाणां गन्धर्वाणां पतत्त्रिणाम् ।
अन्येषां चैव भूतानां विविधानां समुद्भवः ॥ ८२

1. अ-क-ख-ग—च पर्वण्यस्मिन्
2. क-ख-ग—'श्लोकाग्रं च सहस्रं च' इत्यारभ्य सार्धश्लोकः नास्ति।

वसूनां पुनरुत्पत्तिर् भागीरथ्यां महात्मनाम् ।
शन्तनोर्वेश्मनि पुनस् तेषां चारोहणं दिवि ॥ ८३

तेजोंशानां च संयोगाद् भीष्मस्याप्यत्र संभवः ।
राज्यान्निवर्तनं चैव ब्रह्मचर्यव्रतस्थितिः ॥ ८४

प्रतिज्ञापालनं चैव रक्षा चित्राङ्गदस्य च ।
हते चित्राङ्गदे चैव रक्षा भ्रातुर्यवीयसः ॥ ८५

विचित्रवीर्यस्य तथा राज्ये संप्रतिपादनम् ।
धर्मस्य नृषु संभूतिराणिमाण्डव्यशापजा ॥ ८६

कृष्णद्वैपायनाच्चैव प्रसूतिर्विदुरस्य च ।
धृतराष्ट्रस्य पाण्डोश्च पाण्डवानां च संभवः ॥ ८७

वारणावतयात्रा च मन्त्रो दुर्योधनस्य च ।
विदुरस्य च वाक्येन सुरङ्गापगमक्रिया ॥ ८८

पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम् ।
घटोत्कचस्य चोत्पत्तिर् अत्रैव परिकीर्तिता ॥ ८९

अज्ञातचर्या पार्थानां वासो ब्राह्मणवेश्मनि ।
बकस्य निधनं चैव नागराणां च विस्मयः ॥ ९०

[1]अङ्गारपर्णं निर्जित्य गङ्गाकूलेऽर्जुनस्तदा ।
भ्रातृभिः सहितः सर्वैः पाञ्चालानभितो ययौ ॥ ९१

1. क-ख-ग—अङ्गारपर्ण ।

तापत्यमथ वासिष्ठं और्वोपाख्यानमेव च ।
पञ्चेन्द्राणामुपाख्यानं अत्रैवाद्भुतमुच्यते ॥ ९२

पञ्चानां चैव पत्नीत्वे विमर्शो द्रुपदस्य च ।
द्रौपद्या देवविहितो विवाहश्चाप्यमानुषः ॥ ९३

विदुरस्य च संप्राप्तिर् दर्शनं केशवस्य च ।
खाण्डवप्रस्थवासश्च ततो राज्यार्धशासनम् ॥ ९४

नारदस्य च वाक्येन द्रौपद्यास्समयक्रिया ।
सुन्दोपसुन्दयोस्तत्र ह्युपाख्यानं प्रकीर्तितम् ॥ ९५

पार्थस्य वनवासश्च उलूप्या सह सङ्गमः ।
पुण्यतीर्थानुसंयानं बभ्रुवाहनजन्म च ॥ ९६

द्वारकायां सुभद्रा च कामयानेन कामिनी ।
वासुदेवस्यानुमते प्राप्तात्रैव किरीटिना ॥ ९७

हरणं गृह्य संप्राप्ते कृष्णे देवकिनन्दने ।
अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः ॥ ९८

संप्राप्तिः शक्रधनुषः खाण्डवस्य च दाहनम् ।
मयस्य मोक्षो ज्वलनाद् भुजङ्गस्य च मोक्षणम् ॥ ९९

महर्षेर्मन्दपालस्य शार्ङ्गयां तनयसंभवः ।
इत्येवमादिपर्वोक्तं प्रथमं भुवि विस्तरम् ॥ १००

अध्यायानां शते द्वे तु संख्याते परमर्षिणा ।
अष्टादशैव चाध्याया व्यासेनोक्तमतेजसा ॥ १०१

[1]नवश्लोकसहस्राणि शतान्यष्टौ तथैव च ।
श्लोकाश्च चतुराशीतिर् दृष्टो ग्रन्थो महात्मना ॥ १०२

द्वितीयं तु सभापर्व बहुवृत्तान्तमुच्यते ।
सभाक्रिया पाण्डवानां किङ्कराणां च दर्शनम् ॥ १०३

लोकपालसमाख्यानं नारदाद्देवदर्शनात् ।
राजसूयस्य चारम्भो जरासन्धवधस्तथा ॥ १०४

गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणम् ।
राजसूयेऽर्घसंवादे शिशुपालवधस्तथा ॥ १०५

यज्ञे विभूतिं दृष्ट्वा तां दुःखामर्षान्वितस्य च ।
दुर्योधनस्यापहासो भीमेन च सभातले ॥ १०६

यत्रास्य [2]मन्युरभवद् येन द्यूतमकल्पयत् ।
यत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत् ॥ १०७

यत्र द्यूतास्रवे मग्ना द्रौपदी नौरिवार्णवे ।
गच्छतश्चातिसृष्टांस्तान् ज्ञात्वा दुर्योधनो नृपः ॥ १०८

पुनरेव ततो द्यूते समाह्वयत पाण्डवान् ।
एतत्सर्वं सभापर्व [3]व्याख्यातं परमर्षिणा ॥ १०९

---

1. क-ख-ग—अष्टौ 2. क-ख-ग—युद्धमभव
3. क-ख-ग—व्याहृतं वो महाद्विजाः

अध्यायाः सप्ततिर्ज्ञेया द्वौ चात्र परिसंख्यया ।
चतुः श्लोकसहस्राणि पञ्च श्लोकशतानि च ॥ ११०
श्लोकाश्चैकादश ज्ञेयाः पर्वण्यस्मिन्प्रकीर्तिताः ।
अतः परं तृतीयं तु ज्ञेयमारण्यकं परम् ॥ १११
वनवासं प्रयातेषु पाण्डवेषु महात्मसु ।
पौरानुकम्पा व्रजतो धर्मराजस्य धर्मतः ॥ ११२
धौम्योपदेशात्तिग्मांशुप्रसादादन्नसंभवः ।
मैत्रेयशापोत्सर्गश्च विदुरस्य प्रवासनम् ॥ ११३
[1]किम्मीरकवधाख्यानं वृष्णीनामागमस्तथा ।
पाण्डवानां च सर्वेषां सहाख्यानं तथैव च ॥ ११४
पाञ्चालागमनं चैव द्रौपद्याश्चाश्रुमोक्षणम् ।
अस्त्रहेतोर्विवासश्च पार्थस्यामिततेजसः ॥ ११५
महादेवेन युद्धं च किरातवपुषा सह ।
दर्शनं लोकपालानां स्वर्गारोहणमेव च ॥ ११६
दर्शनं बृहदश्वस्य महर्षेर्भावितात्मनः ।
युधिष्ठिरस्य चार्तस्य व्यसने परिदेवनम् ॥ ११७
नलोपाख्यानमत्रैव धर्मिष्ठं करुणोदयम् ।

---

1. क-ख-ग—वृष्णीनामागमो यत्र पाञ्चालानां च सर्वशः ।
यत्र सौभस्य चाख्यानं किंमीरवध एव च ॥
(किंमीरेत्यारभ्यार्धत्रयस्य स्थाने अयं श्लोको दृश्यते)

दमयन्त्याः स्थितिर्यत्र नलस्य व्यसनागमे ॥ ११८

वनवासगतानां च पाण्डवानां महात्मनाम् ।
स्वर्गे प्रवृत्तिराख्याता रोमशेनार्जुनस्य च ॥ ११९

तीर्थयात्रा तथैवात्र पाण्डवानां महात्मनाम् ।
आगस्त्यमपि चाख्यानं यत्र वातापिभक्षणम् ॥ १२०

लोपामुद्राभिगमनं अपत्यार्थमृषेरपि ।
ततः श्येनकपोतीयं उपाख्यानमनन्तरम् ॥ १२१

इन्द्रोऽग्निर्यत्र धर्मश्च अजिज्ञासञ्शिबिं नृपम् ।
ऋश्यशृङ्गस्य चरितं कौमारब्रह्मचारिणः । १२२

जामदग्न्यस्य रामस्य चरितं भूरितेजसः ।
कार्तवीर्यवधो यत्र हैहयानां च वर्ण्यते ॥ १२३

[1]तीर्थयात्रा तथैवात्र पाण्डवानां महात्मनाम् ।
कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात् ॥ १२४

नियुक्तो भीमसेनश्च द्रौपद्या गन्धमादने ।
यत्र मन्दारपुष्पार्थं नलिनीं तामधर्षयत् ॥ १२५

यत्रास्य सुमहद्युद्धं अभवद्राक्षसैः सह ।
यक्षैश्चापि महावीर्यैर् मणिमत्प्रमुखैस्तथा ॥ १२६

सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः ।

---

1. क-ख-ग—तीर्थयात्रेति अर्धश्लोकः इह न

शर्यातियज्ञे नासत्यौ कृतवान्सोमपीथिनौ ॥ १२७

ताभ्यां च यत्र स मुनिर् यौवनं प्रतिपादितः ।
जन्तूपाख्यानमत्रैव यत्र पुत्रेण सोमकः ॥ १२८

पुत्रार्थमजयद्राजा लेभे पुत्रशतं च सः ।
अष्टावक्रीयमत्रैव विवादे यत्र वन्दिनम् ॥ १२९

विजित्य सागरं प्राप्तं पितरं लब्धवानृषिः ।
[1]अजासुरस्य चात्रैव वधः समुपवर्ण्यते ॥ १३०

अवाप्य दिव्यान्यस्त्राणि गुर्वर्थे सव्यसाचिना ।
निवातकवचैर्युद्धं हिरण्यपुरवासिभिः ॥ १३१

समागमश्च पार्थस्य भ्रातृभिर्गन्धमादने ।
घोषयात्रा च गन्धर्वैर् यत्र युद्धं किरीटिनः ॥ १३२

[2]जयद्रथेनापहारो द्रौपद्याश्चाश्रमान्तरात् ।
यत्रैनमन्वगाद्भीमो वातवेगसमो जवे ॥ १३३

मार्कण्डेयसमस्यायां उपाख्यानानि सर्वशः ।
सन्दर्शनं च कृष्णस्य संवादश्चापि सत्यया ॥ १३४

व्रीहिद्रोणकमाख्यानं ऐन्द्रद्युम्नं तथैव च ।
सावित्र्यौदालकीये च वैन्योपाख्यानमेव च ॥ १३५

---

1. क-ख-ग—' अजासुरस्य ' इत्यर्धश्लोको न
2. क-ख-ग—पुनरागमनं चैव तेषां द्वैतवनं प्रति । अधिकः पाठ ।

रामायणमुपाख्यानं अत्रैव बहुविस्तरम् ।
पुनरागमनं चैव तेषां द्वैतवने सरः ॥ १३६

आरण्येयकमाख्यानं यत्र धर्मोऽवदत्सुतम् ।
जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशम् ॥ १३७

एतदारण्यकं पर्व तृतीयं परिकीर्तितम् ।
अत्राध्यायशते द्वे तु संख्याते परमर्षिणा ॥ १३८

एकोनसप्ततिश्चैव तथाध्यायाः प्रकीर्तिताः ।
एकादशसहस्राणि श्लोकानां षट्छतानि च ॥ १३९

चतुष्षष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्तिताः ।
अतः परं निबोधेदं वैराटं पर्व विस्तरम् ॥ १४०

विराटनगरं गत्वा श्मशाने विपुलां शमीम् ।
दृष्ट्वा संन्यदधुर्यत्र पाण्डवा आयुधान्युत ॥ १४१

यत्र प्रविश्य नगरं छद्मभिर्न्यवसंस्तदा ।
दुरात्मनो वधो यत्र कीचकस्य वृकोदरात् ॥ १४२

गोग्रहे यत्र पार्थेन निर्जिताः कुरवो युधि ।
गोधनं च विराटस्य मोक्षितं यत्र पाण्डवैः ॥ १४३

विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः ।
अभिमन्युं समुद्दिश्य सौभद्रमरिघातिनम् ॥ १४४

चतुर्थमेतद्विपुलं वैराटं पर्व वर्णितम् ।
अत्रचोपरि संख्यानं अध्यायानां महात्मना ॥ १४५

सप्तषष्टिरथो पूर्णा श्लोकाग्रमपि मे शृणु ।
त्रीणि श्लोकसहस्राणि पञ्चश्लोकशतानि च ॥ १४६

पर्वण्यस्मिन् समाख्यातं संख्यया परमर्षिणा ।
उद्योगपर्व विज्ञेयं पञ्चमं शृण्वतःपरम् ॥ १४७

उपप्लाव्ये निविष्टेषु पाण्डवेषु जिगीषया ।
दुर्योधनोऽर्जुनश्चैव वासुदेवमुपस्थितौ ॥ १४८

साहाय्यमस्मिन् समरे भवान्नौ दातुमर्हति ।
इत्युक्ते वचने कृष्णो यत्रोवाच महामनाः ॥ १४९

अयुध्यमानमात्मानं मन्त्रिणं पुरुषर्षभौ ।
अक्षौहिणीं च सैन्यस्य कस्य किं वा ददाम्यहम् ॥ १५०

वव्रे दुर्योधनः सैन्यं मन्दात्मा यत्र दुर्मतिः ।
अयुध्यमानं सचिवं वव्रे कृष्णं धनञ्जयः ॥ १५१

संजयं प्रेषयामास शमार्थं पाण्डवान् प्रति ।
यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान् ॥ १५२

श्रुत्वा च पाण्डवान्यातान् वासुदेवपुरोगमान् ।
प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिन्तया ॥ १५३

विदुरो यत्र वाक्यानि चित्राणि विविधानि च ।
श्रावयामास राजानं धृतराष्ट्रं मनीषिणम् ॥ १५४

तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमम् ।
मनस्तापान्वितो राजा श्रावितः शोकलालसः ॥ १५५

प्रभाते राजसमितौ संजयो यत्र [1]च प्रभुम् ।
[2]ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्जुनस्य च ॥ १५६

यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महायशाः ।
स्वयमागाच्छमं कर्तुं नगरं नागसाह्वयम् ॥ १५७

प्रत्याख्यानं च कृष्णस्य राज्ञा दुर्योधनेन वै ।
शमार्थं याचमानस्य पक्षयोरुभयोर्हितम् ॥ १५८

कर्णदुर्योधनादीनां दुष्टं विज्ञाय मन्त्रितम् ।
योगेश्वरत्वं कृष्णेन यत्र राजसु दर्शितम् ॥ १५९

रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः ।
उपायपूर्वं शौण्डीर्यात् प्रत्याख्यातश्च तेन सः ॥ १६०

श्वेताभिषेकः कृष्णोक्तो विचित्रो बहुविस्तरः ।
ततश्चात्राभिनिर्याणं रथाश्वनरदन्तिनाम् ॥ १६१

नगराद्धस्तिनपुराद् बलसंख्यानमेव च ।
यत्र राज्ञा उलूकस्य प्रेषणं पाण्डवान् प्रति ॥ १६२

1. क-ख-ग—तु प्रभुः 2. क ख-ग—ऐक्यार्थं

श्वोभाविनि महायुद्धे दूतेन क्रूरवादिना ।
रथातिरथसंख्यानं अम्बोपाख्यानमेवच ॥ १६३

एतत्सुबहुवृत्तान्तं पञ्चमं पर्व भारते ।
उद्योगपर्व निर्दिष्टं सन्धिविग्रहसंज्ञितम् ॥ १६४

अध्यायाः संख्यया तत्र षडशीतिशतं स्मृतम् ।
[1]श्लोकाः [2]सप्तसहस्राणि नवश्लोकशतानि च ॥ १६५

श्लोकाश्च नवतिः प्रोक्तास् तथैवाष्टौ महात्मना ।
व्यासेनोदारमतिना पर्वण्यस्मिंस्तपोधनाः ॥ १६६

अतऊर्ध्वं विचित्रार्थं भीष्मपर्व प्रचक्षते ।
जम्बूखण्डविनिर्माणं यत्रोक्तं संजयेन ह ॥ १६७

यत्र युद्धमभूद्घोरं दशाहान्यतिदारुणम् ।
यत्र यौधिष्ठिरं सैन्यं विषादमगमत्परम् ॥ १६८

कश्मलं यत्र पार्थस्य वासुदेवो महाद्युतिः ।
मोहजं नाशयामास हेतुभिर्मोक्षदर्शनैः ॥ १६९

शिखण्डिनं पुरस्कृत्य यत्र पार्थो महारथः ।
विनिघ्नन्निशितैर्बाणै रथान्भीष्ममपातयत् ॥ १७०

षष्ठमेतन्महापर्व भारते परिकीर्तितम् ।
अध्यायानां शतं प्रोक्तं अष्टादश तथापरे ॥ १७१

1. ग—श्लोकानां षट्सहस्राणि 2. ख—षट्सहस्राणि

पञ्चश्लोकसहस्राणि संख्ययाष्टौ शतानि च ।
श्लोकानां चतुराशीतिर् अस्मिन् पर्वणि कीर्तिता ॥ १७२

व्यासेन वेदविदुषा संख्यया भीष्मपर्वणि ।
द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते ॥ १७३

यत्र संशप्तकाः पार्थं अभिपेतू रणाजिरे ।
भगदत्तो महाराजो यत्र शक्रसमो युधि ॥ १७४

सुप्रतीकेन नागेन सह शस्तः किरीटिना ।
यत्राभिमन्युं बहवो जघ्नुर्लोकमहारथाः ॥ १७५

जयद्रथमुखा बालं शूरमप्राप्तयौवनम् ।
हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे ॥ १७६

अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः ।
संशप्तकावशेषं च कृतं निश्शेषमाहवे ॥ १७७

[1]अलम्बुसः श्रुतायुश्च [2]जलसन्धिश्च वीर्यवान् ।
सौमदत्तिर्विराटश्च द्रुपदश्च महारथः ॥ १७८

घटोत्कचादयश्चान्ये निहता द्रोणपर्वणि ।
अत्र ते पृथिवीपालाः प्रायशो निधनं गताः ॥ १७९

द्रोणपर्वणि ये शूरा निर्दिष्टाः पुरुषर्षभाः ।

---

1. क-ख-ग—संशप्तकानां वीराणां कोटयो नव महारणे । किरीटिनाभिनिष्क्रम्य गमिता यमसादनम्॥ } अधिकः पाठः ।
2. क-ख-ग—जारासन्धिश्च

अश्वत्थामा पितरि वै द्रोणे युधि निपातिते ॥ १८०
अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः ।
[1]सप्तमं भारते पर्व महदेतदुदाहृतम् ॥ १८१
अध्यायानां शतं प्रोक्तमध्यायाः सप्ततिः स्मृताः ।
[2]अष्टौ श्लोकसहस्राणि नव श्लोकशतानि च ॥ १८२
श्लोका नव तथैवात्र संख्यातास्तत्वदर्शिना ।
पाराशर्येण मुनिना संचिन्त्य द्रोणपर्वणि ॥ १८३
अतः परं कर्णपर्व प्रोच्यते परमाद्भुतम् ।
सारथ्ये विनियोगश्च मद्रराजस्य धीमतः ॥ १८४
आख्यानं यत्र पौराणं त्रिपुरस्य निपातनम् ।
प्रायेण पुरुषश्चात्र संवादः कर्णशल्ययोः ॥ १८५
हंसकाकीयमाख्यानं अत्रैवाक्षेपसंहितम् ।
अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः ॥ १८६
द्वैरथे यत्र पार्थेन हतः कर्णो महारथः ।
अष्टमं पर्व निर्दिष्टं एतद्भारतचिन्तकैः ॥ १८७
एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि ।
चत्वार्येव सहस्राणि नव श्लोकशतानि च ॥ १८८

---

1. क-ख ग—आग्नेयं कीर्त्यते यत्र गदितं चोद्यमुत्तरम् । व्यासस्य चागमो नाम यत्र कृष्णस्य पाण्डवैः ॥ } अधिकः पाठः ।
2. क-ख ग—दश

अतः परं विचित्रार्थं शल्यपर्व प्रकीर्तितम् ।
हतप्रवीरे सैन्ये तु नेता मद्रेश्वरोऽभवत् ॥ १८९

वृत्तानि रथयुद्धानि कीर्त्यन्ते यत्र भागशः ।
विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्यते ॥ १९०

शल्यस्य निधनं चात्र धर्मराजान्महारथात् ।
गदायुद्धं च तुमुलं अत्रैव परिकीर्तितम् ॥ १९१

सरस्वत्याश्च तीर्थानां पुण्यता परिकीर्तिता ।
नवमं पर्व निर्दिष्टं एतदद्भुतमर्थवत् ॥ १९२

एकोनषष्टिरध्यायास् तत्र संख्याविशारदैः ।
संख्याता बहुवृत्तान्ताः श्लोकाग्रं चात्र शब्द्यते ॥ १९३

त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा ।
मुनिना संप्रणीतानि कौरवाणां यशोभृताम् ॥ १९४

अतः परं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम् ।
भग्नोरुं यत्र राजानं दुर्योधनममर्षिणम् ॥ १९५

व्यपयातेषु पार्थेषु त्रयस्तेह्यायायूरथाः ।
कृतवर्मा कृपो द्रौणिः सायाह्ने रुधिरोक्षिताः ॥ १९६

प्रतिजज्ञे दृढक्रोधो द्रौणिर्यत्र महारथः ।
अहत्वा सर्वपाञ्चालान् धृष्टद्युम्नपुरोगमान् ॥ १९७

पाण्डवांश्च तथामात्यान् न विमोक्ष्यामि दंसनम् ।
प्रसुप्तान्निशि विश्वस्तान् यत्र ते पुरुषर्षभाः ॥ १९८

पाञ्चालान् सपरीवाराञ् जघ्नुर्द्रौणिपुरोगमाः ।
यत्रामुच्यन्त पार्थास्ते पञ्च कृष्णबलाश्रयात् ॥ १९९

सात्यकिश्च महेष्वासः शेषाश्च निधनं गताः ।
द्रौपदी पुत्रशोकार्ता पितृभ्रातृवधार्दिता ॥ २००

कृतानशनसंकल्पा यत्र भर्तॄनुपाविशत् ।
द्रौपदीवचनाद्यत्र भीमो भीमपराक्रमः ॥ २०१

अन्वधावत संक्रुद्धो भारद्वाजं गुरोः सुतम् ।
भीमसेनभयाद्यत्र दैवेन प्रतिचोदितः ॥ २०२

अपाण्डवायेति रुषा द्रौणिरस्त्रमवासृजत् ।
मैवमित्यब्रवीत्कृष्णः शमयंस्तस्य तद्वचः ॥ २०३

यत्रास्त्रमस्त्रेण च तच् छमयामास फल्गुनः ।
द्रौणिद्वैपायनादीनां शापाश्चान्योन्यकारिताः ॥ २०४

चिताकर्मणि सर्वेषां राज्ञामुदकदानिके ।
गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः ॥ २०५

सुतस्यैतदिह प्रोक्तं दशमं पर्व सौप्तिकम् ।
अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महात्मना ॥ २०६

श्लोकाग्रमत्र कथितं शतान्यष्टौ तथैव च ।
श्लोकाश्च सप्ततिः प्रोक्ता यथावदभिसंख्यया ॥ २०७

सौप्तिकैषीकसंबन्धे पर्वण्यमितबुद्धिना ।
अत ऊर्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयम् ॥ २०८

विलापो वीरपत्नीनां यत्रातिकरुणं स्मृतम् ।
क्रोधवेगः प्रसादश्च गान्धारीधृतराष्ट्रयोः ॥ २०९

यत्र च क्षत्रियान् शूरान् इष्टांस्तानिवर्तिनः ।
पुत्रान् भ्रातॄन् पितॄंश्चैव निहतान्ददृशू रणे ॥ २१०

यत्र राजा महाप्राज्ञः सर्वधर्मविदां वरः ।
राज्ञां तानि शरीराणि दाहयामास शास्त्रतः ॥ २११

एतदेकादशं प्रोक्तं पर्वातिकरुणं महत् ।
सप्तविंशतिरध्यायाः पर्वण्यस्मिन्नुदाहृताः ॥ २१२

श्लोकाः सप्तशतं चापि पञ्चसप्ततिरुच्यते ।
संख्यया भारताख्यानकर्त्रा ह्यत्र महात्मना ॥ २१३

प्रणीतं सज्जनमनोवैक्लव्याश्रुप्रवर्तनम् ।
अतः परं शान्तिपर्व द्वादशं बुद्धिवर्धनम् ॥ २१४

यत्र निर्वेदमापेदे धर्मराजो युधिष्ठिरः ।
घातयित्वा पितॄन् भ्रातॄन् पुत्रान् संबन्धिबान्धवान् ॥ २१५

शान्तिपर्वणि धर्माश्च व्याहृताः शरतल्पिकाः ।
राजभिर्वेदितव्या ये सम्यगर्थं बुभुत्सुभिः ॥ २१६

आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शकाः ।
यान् बुद्ध्वा पुरुषः सम्यक् सर्वज्ञत्वमवाप्नुयात् ॥ २१७

मोक्षधर्माश्च विविधा विचित्रा बहुविस्तराः ।
द्वादशं पर्व निर्दिष्टं एतत् प्राज्ञजनप्रियम् ॥ २१८

पर्वण्यत्र परिज्ञेयं अध्यायानां शतत्रयम् ।
त्रिंशच्चैव तथाध्याया नव चैव तपोधनाः ॥ २१९

श्लोकानां तु सहस्राणि कीर्तितानि चतुर्दश ।
पञ्च चैव शतान्याहुः पञ्चविंशतिसंख्यया ॥ २२०

अत ऊर्ध्वं तु विज्ञेयं आनुशासनमुत्तमम् ।
यत्र प्रकृतिमापन्नः श्रुत्वा धर्मविनिश्चयान् ॥ २२१

भीष्माद्भागीरथीपुत्रात् कुरुराजो युधिष्ठिरः ।
व्यवहारोऽत्र कात्स्न्र्येन धर्मार्थौ येन दर्शितः ॥ २२२

विविधानां च दानानां फलयोगाः पृथग्विधाः ।
तथा पात्रविशेषाश्च दानानां च परो विधिः ॥ २२३

आचारविधियोगश्च सत्यस्य च परा गतिः ।
एतत्सुबहुवृत्तान्तं उत्तमं चानुशासनम् ॥ २२४

भीष्मस्यैवात्र संप्राप्तिः स्वर्गस्य परिकीर्तिता ।
एतत्त्रयोदशं पर्व धर्मनिश्चयकारणम् ॥ २२५

अध्यायानां शतं तत्र षट्पञ्चाश[1]च्छतोत्तरम् ।
श्लोकानां च सहस्राणि द्वादशैवेति कीर्त्यते ॥ २२६

अथाश्वमेधिकं नाम पर्व चोक्तं चतुर्दशम् ।
तत्संवर्तमरुत्तीयं अत्राख्यानमनुत्तमम् ॥ २२७

सुवर्णकोशसंप्राप्तिर् जन्म चोक्तं परीक्षितः ।
दग्धस्यास्त्राग्निना पूर्वं कृष्णात्सञ्जीवनं पुनः ॥ २२८

चर्यया हयमुत्सृष्टं पाण्डवस्यानुगच्छतः ।
तत्र तत्र च युद्धानि राजपुत्रैरमर्षणैः ॥ २२९

चित्राङ्गदायाः पुत्रेण स्वपुत्रेण किरीटिनः ।
संग्रामे बभ्रुवाहेन संशयश्चात्र दर्शितः ॥ २३०

[2]अश्वमेधे महायज्ञे नकुलारुण्यानमेव च ।
इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम् ॥ २३१

अत्राध्यायशतं त्रिंशत् त्रयोऽध्यायाश्च शब्दिताः ।
चत्वार्येव सहस्राणि तावन्त्येव शतानि च ॥ २३२

विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ।
ततश्चाश्रमवासाख्यं पर्व पञ्चदशं स्मृतम् ॥ २३३

---

1. क-ख-ग—त्तथोत्तरम्
2. क-ख-ग—मृगदर्शं तथा चैव वैष्णवं धर्ममेव च । अधिकः पाठः ।

यत्र राज्यं परित्यज्य गान्धारीसहितो नृपः ।
धृतराष्ट्राश्रमपदं विदुरश्च जगाम ह ॥ २३४
यं दृष्ट्वा प्रस्थितं साध्वी पृथाप्यनुययौ तदा ।
पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता ॥ २३५
यत्र राजा हतान् पुत्रान् पौत्रानन्यांश्च पार्थिवान् ।
लोकान्तरगतान्वीरान् अपश्यत्पुनरागतान् ॥ २३६
[1]ऋषेः प्रसादात्कृष्णस्य दृष्ट्वाश्चर्यमनुत्तमम् ।
त्यक्त्वा शोकं सदारश्च सिद्धिं [2]परमिकां गतः ॥ २३७
यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः ।
सञ्जयश्च महामात्रो विद्वान्गावल्गणिर्वशी ॥ २३८
ददर्श नारदं यत्र धर्मराजो युधिष्ठिरः ।
नारदाच्चैव शुश्राव वृष्णीनां कदनं महत् ॥ २३९
एतदाश्रमवासाख्यं पर्वोक्तं सुमहाद्भुतम् ।
द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया ॥ २४०
सहस्र[3]मेकं श्लोकानां नवश्लोकशतानि च ।
षडेव च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥ २४१
अतः परं निबोधेदं मौसलं भृशदारुणम् ।

---

1. क—'ऋषेः प्रसादात्' इत्यारभ्य 'यत्र धर्मम्' इति पर्यन्तं सार्धश्लोकः न दृश्यते।
2. अ-ख-ग—परमतां
3. क-ख-ग—मेतच्छ्लोकानां

यत्र ते पुरुषव्याघ्राः शस्त्रस्पर्शहता युधि ॥ २४२

[1]ब्रह्मदण्डविनिष्पिष्टाः समीपे लवणाम्भसः ।
आपाने पानगलिता दैवेनाभिप्रचोदिताः ॥ २४३

एरकारूपिभिर्वज्रैर् निजघ्नुरितरेतरे ।
यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ ॥ २४४

नातिचक्रामतुः कालं प्राप्तं सर्वहरं परम् ।
यत्रार्जुनो द्वारवतीं एत्य कृष्णाद्विनाकृताम् ॥ २४५

दृष्ट्वा विषादमगमत् परां चार्तिं नरर्षभः ।
सन्त्यज्य च यदुश्रेष्ठं मातुलं शौरिमात्मनः ॥ २४६

ददर्श यदुवीराणां आपाने वैशसं महत् ।
शरीरं वासुदेवस्य रामस्य च महात्मनः ॥ २४७

संस्कारं लम्भयामास वृष्णीनां च प्रधानतः ।
सवृद्धबालमादाय द्वारवत्यास्ततो जनम् ॥ २४८

ददर्शापदि कष्टायां गाण्डीवस्य पराभवम् ।
सर्वेषां चैव दिव्यानां अस्त्राणामप्रसन्नताम् ॥ २४९

नाशं वृष्णिकलत्राणां प्रभावानामनित्यताम् ।
दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचोदितः ॥ २५०

धर्मराजं समासाद्य संन्यासं समरोचयत् ।
इतीदं मौसलं पर्व षोडशं परिकीर्तितम् ॥ २५१

1. अ-क-ख-ग—बृहदण्डविनिर्दिष्टाः

अष्टाध्यायाः प्रसंख्याताः श्लोकाग्रं च शतत्रयम् ।
महाप्रस्थानिकं तस्माद् ऊर्ध्वं सप्तदशं स्मृतम् । २५२
यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः ।
द्रौपद्या सहिता देव्या सिद्धिं परमिकां गताः ॥ २५३
अध्यायाश्च त्रयः प्रोक्ताः श्लोकानां च तथा शतम् ।
विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥ २५४
स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम् ।
[1]अध्यायाः पञ्च संख्याताः पर्वैतदभिसंख्यया ॥ २५५
श्लोकानां द्वे शते चैव प्रसंख्याते तपोधनाः ।
अष्टादशैवमेतानि पर्वाण्युक्तान्यशेषतः ॥ २५६
खिलेषु हरिवंशश्च भविष्यच्च प्रकीर्तितम् ।
[2]एतत्सखिलमाख्यातं भारतं पर्व संग्रहात् ॥ २५७
अष्टादशसमाजग्मुर् अक्षौहिण्यो युयुत्सया ।

---

1. क-ख-ग—अधिकः पाठः ।
यत्र दुर्योधनादीनां श्रियं दृष्ट्वा युधिष्ठिरः ।
निर्वेदं परमं गत्वा स्वर्गं नाकाङ्क्षदव्ययम् ॥
देवानां वचनाद्यत्र तनुं त्यक्त्वा महारथः ।
स्वर्गं नित्यं महातेजाः स्वस्थानमगमद्वनम् ॥

2. क-ख-ग—अधिकः पाठः ।
खिलेषु हरिवंशस्य व्याख्याताः परमर्षिणा ।
यत्र दिव्याः कथाः पुण्याः कीर्तिताः पापनाशनाः ॥
देवासुरकथाश्चैव विचित्राःसमुदाहृताः ।
भविष्यदपि चाख्यानं विचित्रं पुण्यवर्धनम् ॥
यत्र कृष्णस्य कर्माणि श्रूयन्ते जन्मना सह ।

तन्महद्दारुणं युद्धं अहान्यष्टादशाभवत् ॥ २५८

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः ।
न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ॥ २५९

श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते ।
पुंस्कोकिलरुतं श्रुत्वा रूक्षा ध्वाङ्क्षस्य वागिव ॥ २६०

इतिहासोत्तमादस्माज् जायन्ते कविबुद्धयः ।
पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रयः ॥ २६१

अस्याख्यानस्य विषये पुराणं वर्तते द्विजाः ।
अन्तरिक्षस्य विषये प्रजा इव चतुर्विधाः ॥ २६२

क्रियागुणानां सर्वेषां इदमाख्यानमाश्रयः ।
इन्द्रियाणां समस्तानां चित्रा इव मनःक्रियाः ॥ २६३

अनाश्रित्यैतदाख्यानं कथा भुवि न विद्यते ।
आहारमनपाश्रित्य शरीरस्येव धारणम् ॥ २६४

इदं सर्वैः कविवरैर् आख्यानमुपजीव्यते ।
उदयप्रेप्सुभिर्भृत्यैर् अभिजात इवेश्वरः ॥ २६५

[1]आख्यानं तदिदमनुत्तमं महार्थं
विन्यस्तं महदिह पर्वसंग्रहेण ।

---

1. क-ख-ग—द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥

अधिकः पाठः ।

श्रुत्वादौ [1]महति नृणां सुखावगाहो
विस्तीर्णे लवणजले यथा प्लवेन ॥ २६६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां आदिपर्वणि पर्वसंग्रहो नाम द्वितीयोऽध्यायः ॥

[अस्मिन्नध्याये २६६ श्लोकाः ।]

॥ तृतीयोऽध्यायः ॥

(अथ पौष्यपर्व)

जनमेजयं प्रति सरमाख्यदेवशुनीशापः ॥ १ ॥ शापनिवारणार्थं-मृषेः सोमश्रवसः पौरोहित्येन वरणम् ॥ २ ॥ आरुण्युपमन्युवैदाख्यानां धौम्यशिष्याणामुपाख्यानम् ॥ ३ ॥ वैदशिष्यस्योदङ्कस्योपाख्यानम् ॥ ४ ॥ पौष्यस्य राज्ञ उपाख्यानम् ॥ ५ ॥

सूतः—

जनमेजयः पारीक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमास्ते स्म । तस्य भ्रातरश्चयः [2]श्रुतसेन उग्रसेनो भीमसेन इति । तेषु तत्सत्रमुपासीनेषु तत्र [3]श्वाभ्यागच्छत्सारमेयः ॥ १

स जनमेजयस्य भ्रातृभिर्हतो रोरूयमाणो मातुः समीपमभ्यागच्छत् ॥ २

---

1. क-ख-ग—भवति नृणां सुखं तदानीम्
2. क-ख-ग—शूरसेन 3. ख ग—श्वाभ्यगात्

तं माता रोरूयमाणमुवाच । किं रोदिषि, केनास्यभिहत इति ॥ ३

स एवमुक्तो मातरं प्रत्युवाच । जनमेजयस्य भ्रातृभिर्हतोऽस्मीति ॥ ४

तं माता प्रत्युवाच । व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति ॥ ५

स तां पुनरुवाच । नापराध्यामि किञ्चित्, नावेक्षे हवींषि, नावलीढेऽहमिति ॥ ६

तस्य माता सरमा पुत्रदुःखार्ता तत्सत्रमगच्छत् । यत्र जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते स्म ॥ ७

स तया क्रुद्धया तत्रोक्तः, अयं मे पुत्रो न किञ्चिदपराध्यति किमर्थमभिहत इति ॥ ८

न किञ्चिदुक्तवतस्तानाह सरमा, यस्मादयमभिहतो नापराधी, तस्माद्दुष्टं त्वां भयमागमिष्यतीति ॥ ९

स जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो विषण्णश्चासीत् ॥ १०

स तस्मिन्सत्रे समाप्ते हस्तिनपुरमभ्येत्य पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोत्, यो मे पापकृत्यां नाशयेदिति । ११

स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्च स्वविषयोद्देशे आश्रममपश्यत् ॥ १२

तत्र काश्चिदृषिरासाञ्चक्रे श्रुतश्रवा नाम । तस्याभिमतः पुत्र आस्ते सोमश्रवा नाम ॥ १३

तपोभिः संभृतं तस्य तं पुत्रमभिगम्य जनमेजयः पारीक्षितः पौरोहित्याय वव्रे ॥ १४

स नमस्कृत्य तमृषिमुवाच । भगवन्नयं तव पुत्रो मम पुरोहितोऽस्त्विति ॥ १५

स एवमुक्तः प्रत्युवाच-भो जनमेजय! पुत्रो मम सर्प्यां जातो महातपाः स्वाध्यायसंपन्नो मत्तपोवीर्यसंभृतो मच्छुक्रं पिबन्त्याः सर्प्याः कुक्षौ संवृद्धः; समर्थोऽयं भवतः सर्वाः पापकृत्याः शमयितुं, अन्तरेण महादेवकृत्याम् । अस्य वै विद्यते त्वेकमुपांशुव्रतम् । यद्येनं काश्चित्कञ्चिदर्थमभियाचेत्तस्मै तद्दद्यादयम् । यद्येतत्सहसि ततो नयस्वैनमिति ॥ १६

तेनैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तथा भविष्यतीति ॥ १७

स तं पुरोहितमुपादायोपावृत्तो भ्रातॄनुवाच-मयायं वृत उपाध्यायः, यदयं ब्रूयात्तत्कार्यमविचारयद्भिरिति ॥ १८

तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः ॥ १९

स तथा तान्भ्रातॄन्सन्दिश्य तक्षशिलां प्रत्यभितस्थौ । तं च देशं स्वांशे स्थापयामास ॥ २०

एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामा[1] योनिजः । तस्य शिष्यास्त्रयो बभूवुः-उपमन्युरारुणिपाञ्चालो वैद इति ॥ २१

एकं शिष्यमारुणिपाञ्चालं प्रेषयामास । भो! गच्छ, केदारखण्डं बधानेति ॥ २२

स उपाध्यायेन सन्दिष्ट आरुणिपाञ्चालस्तत्र गत्वा केदारखण्डं बद्धुं नाशक्नोत् । स क्लिश्यमानो गतिं नापश्यत् किञ्चित् । भवत्वेवं तावत्करिष्यामीति । स तत्र संविवेश । केदारखण्डे शयाने तस्मिंस्तदुदकं तस्थौ ॥ २३

ततः कदाचिदुपाध्यायस्तस्मिन्नागते [2]आयोद धौम्यः शिष्यावपृच्छत् । क्वारुणिपाञ्चालो गत इति ॥ २४

तौ प्रत्यूचतुः । भगवतैव प्रेषितः केदारखण्डं बधानेति ॥

एवमुक्तस्तौ शिष्यौ प्रत्युवाच । तस्मात्सर्वे तत्र गच्छामो यत्र स इति ॥ २६

स गत्वा तत्र ह्याह्वानशब्दं चकार । भो आरुणिपाञ्चाल! क्वासि वत्सैहीति ॥ २७

---

1. क-ख—आयोदः } आपोदः (?)
   ग—आयातः }
2. क-ख-ग—आयातो धौम्यः

तच्छ्रुत्वाथारुणिपाञ्चाल उपाध्यायवाक्यं तस्मात्केदारखण्डात् सहसोत्थाय तमुपतस्थे। प्रोवाच चैनम्। अहमस्मात्केदारखण्डान्निस्सरमाणमुदकमवारणीयं संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य केदारखण्डं भगवन्तमुपस्थितः। तदभिवादये भगवन्तं, आज्ञापयतु भवान् किंकरवाणीति ॥

तमुपाध्यायोऽब्रवीत्। यस्माद्भवान्केदारखण्डमवदार्योत्थितस्तस्मादुद्दालक एव नाम्ना भवत्विति ॥ २९

स उपाध्यायेनानुगृहीतः—यस्मात्त्वया मद्वचोऽनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि, सर्वे ते वेदाः प्रतिभास्यन्ति, सर्वाणि च धर्मशास्त्राणीति ॥ ३०

स एवमुक्त उपाध्यायेनेष्टान्देशाञ्जगाम ॥ ३१

[1]अथापरस्तस्यायोदधौम्यस्य शिष्य उपमन्युर्नाम। तमुपाध्यायः प्रेषयामास, वत्सोपमन्यो! गा रक्षेति ॥ ३२

स उपाध्यायवचनादरक्षद्गाः। स चाह्नि रक्षित्वा दिवसक्षये त्वागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥ ३३

तमुपाध्यायः पीवानमेव दृष्ट्वोवाच। वत्सोपमन्यो! केन वृत्तिं कल्पयसि दृढमिति ॥ ३४

स उपाध्यायं प्रत्युवाच भैक्षेण वृत्तिं कल्पयामीति ॥ ३५

1. क-ख-ग—आयोदस्य शिष्य उपमन्युर्नाम धौम्यस्य

तमुपाध्यायः प्रत्युवाच। ममानिवेद्य भैक्षं नोपयोक्तव्यमिति स्थूलमिति ॥ ३६

तथेत्युक्त्वा पुनररक्षद्गाः। रक्षित्वा च पुनरागम्य तथैवोपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥ ३७

तमुपाध्यायस्तथा पीवानमेव दृष्ट्वावोचत्। वत्सोपमन्यो! सर्वमशेषतस्ते भैक्षं गृह्णामि। केनेदानीं वृत्तिं कल्पयसीति ॥३८

स एवमुक्त उपाध्यायेन प्रत्युवाच। भैक्षं पूर्वं निवेद्य तुभ्यं अपरं चरामि। तेन वृत्तिं कल्पयामीति ॥ ३९

तमुपाध्यायः प्रत्युवाच। नैषा न्याय्या गुरुवृत्तिः। अन्येषामपि प्रत्युपरोधं करोषि, एवं वर्तमानो लुब्धोऽसीति ॥ ४०

तथेत्युक्त्वाऽन्येद्युरपि गा अरक्षत्। रक्षित्वा पुनरागम्योपाध्यायस्याग्रतस्थित्वा नमश्चक्रे ॥ ४१

तमुपाध्यायस्तथा पीवानमेव दृष्ट्वा पुनरुवाच। अहं ते भैक्षं गृह्णामि, न चान्यच्चरासि, [1]पीवासि, केन वृत्तिं कल्पयसीति ॥

स उपाध्यायं प्रत्युवाच। [2]तवासां गवां पयसा वृत्तिं कल्पयामीति ॥ ४३

तमुपाध्यायः प्रत्युवाच-नैतन्न्याय्यं पय उपयोक्तुं भवतो मया नाभ्यनुज्ञातमिति ॥ ४४

1. क-ख-ग—पीवानसि 2. क-ख-ग—तत एतासां

स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमासाद्य गुरोरग्रतस्स्थित्वा नमश्चक्रे ॥ ४५

तमुपाध्यायस्तथा पीवानमेव दृष्ट्वोवाच । भैक्षं नाश्नासि, न चान्यच्चरसि, न पयः पिबसि, पीवासि, केन वृत्तिं कल्पयसीति ॥ ४६

स एवमुक्त उपाध्यायं प्रत्युवाच । वत्सानां वदनाच्च्युतं फेनं पिबामीति । यदि मे वत्सा मातॄणां स्तनं पिबन्त उद्गिरन्ते॥

तमुपाध्यायः प्रत्युवाच । एते वत्सास्त्वदनुकम्पया गुणवन्तः प्रभूततरं फेनमुद्गिरन्ति । तदेवमपि वत्सानां प्रत्युपरोधं करोषि एवं वर्तमानः फेनं नैवं पातुमर्हसीति ॥ ४८

स तथेति प्रतिज्ञाय निराहारो गा ररक्ष ॥ ४९

तथा प्रतिषिद्धो भैक्षं नाश्नाति । न चान्यच्चरति । नपयः पिबति । फेनं नोपयुङ्क्ते ॥ ५०

स कदाचिदरण्येषु क्षुधार्तोऽर्कपर्णान्यभक्षयत् ॥ ५१

सतैरर्कपर्णैर्भक्षितैः क्षारकटुतीक्ष्णोष्णविपाकाच्चक्षुष्युपहतेऽन्धोऽभवत् ॥ ५२

सोऽन्धोऽपि चङ्क्रम्यमाणः कूपेऽपतत् ॥ ५३

अथ तस्मिन्नागच्छत्युपाध्यायश्शिष्यानवोचत् । मयोपमन्युः सर्वतः प्रतिषिद्धः कुपितो नागच्छति चिरंगतस्त्विति॥५४

स एवमुक्त्वा गत्वारण्यमुपाध्याय आह्वानं चक्रे । भो उपमन्यो! क्वासि वत्सैहीति ॥ ५५

स तदाह्वानमुपाध्यायाच्छ्रुत्वा प्रत्युवाचोच्चैः, भो उपाध्याय! कूपे पतित इति ॥ ५६

स उपाध्यायः प्रत्युवाच । कथमसि कूपे पतित इति ॥५७

स च तं प्रत्युवाच-अर्कपत्राणि भक्षयित्वान्धीभूतोऽस्मि, अस्मिन्कूपे पतित इति ॥ ५८

तं उपाध्यायः प्रत्युवाच । अश्विनौ स्तुहि, तौ त्वा देवभिषजौ चक्षुष्मन्तं करिष्यत इति ॥ ५९

स एवं उक्त उपाध्यायवचनेन स्तोतुं उपचक्रमे देवावश्विनौ वाग्भिर्ऋग्भिः ॥ ६०

ओम्—प्रपूर्वगौ पूर्वजौ चित्रभानू
गिरा शंसामि तपनावनन्तौ ।
दिव्यौ सुपर्णावरजौ विमाना-
वधिक्षिपन्तौ भुवनानि विश्वा ॥ ६१

हिरण्मयौ शकुनी सांपरायौ
नासत्यदस्रौ सुमनसौ वैजयन्तौ ।
शुक्रं वयन्तौ तरसा सुवेषा-
वभिव्ययन्तावसितं विवस्वत् ॥ ६२

ग्रस्तां सुपर्णस्य बलेन वर्तिका-
ममुञ्चतावश्विनौ सौभगाय ।
तावत्सुवृत्तावनमत्तमाययौ
तौ सत्तमौ गा अरुणावुदावहन् ॥ ६३

षष्टिश्च गावस्त्रिंशताश्च धेनव
एकं वत्सं [1]सुवहते दुहन्तीः ।
नानागोष्ठा विहिता एकदोहनाः
तावश्विभ्यां दुहते घर्ममुक्थ्यम् ॥ ६४

एकां नाभिं सप्तशता अराः श्रिताः
प्रधिष्वस्यां विंशतिरर्पिता अराः ।
सुनेमिचक्रं परिवर्तते [2]जरा
[3]यथाश्विना संसक्त चर्ष[4]णम् ॥ ६५

एकं चक्रं वर्तते द्वादशप्रधि
षण्णाभिमेकाक्ष[5]मृतस्य धारम् ।
यस्मिन्देवा अधिविश्वे विषक्ता-
स्तदश्विनौ मुञ्चथो मा विषीदथः ॥ ६६

अश्वि[6]नौ धेनुममृतं प्रवृत्तं
भूयस्तिरोधामश्विनौ दासपत्नी ।

क-ख-ग— { 1. सुवते तं दुहन्ति 2. जरं 3. अमाययाश्विना
4. णीम् 5. मम्रतस्य 6. ना

भित्वा गिरीनश्विनौ गा[1]स्सदा चर-
[2]न्नरगा अदृष्टं प्रथिता बलस्य ॥ ६७

युवां दिशो जनयथो दशाग्रे
समानमूर्ध्नि रथया वियन्ति ।
तासां यानं वर्षणयोऽनुप्रयान्ति
देवा मनुष्याः क्षितिमाचरन्ति ॥ ६८

युवां पर्णान्वीरुधो विश्वरू[3]पां[4]
स्तेऽधिक्षिपन्ति भुवनानि विश्वा ।
ते भानवोऽप्यानुसृताश्चरन्ति
देवामनुष्याः क्षितिमाचरन्ति ६९

सन्तौ नासत्यावश्विना [5]वह्नये वां
स्रजं च यौ बि[6]भ्रतः पुष्करस्य ।
ततो नासत्यावमृतावृतावृधा
वृते [7]देवांस्तत्प्रपदेन सूते ॥ ७०

मुखेन गर्भं लभतां युवानौ
गतासुरिक्तं प्रपदेन सूते ।

---

1. क-ख-ग—उदाचर 2. क-ख-ग—न्न दृष्टमह्ना प्रथिता बलस्य भो
3. ख-ग—पास्ते 4. क—अयं पादःनास्ति 5. क-ग—वा
6. क-ख-ग—भृथः 7. क-ख-ग—देवौ प्रतिपदेन

सद्यो जातो मातरं [1]मुक्तिगर्भ-
[2]स्तवाश्विनौ मुञ्चथो [3]जीवसे गाम् ॥ ७१

स्तोतुं न शक्नोमि गुणैर्भवन्तौ
चक्षुर्विहीनः पथि संप्रमूढः ।
दुर्गेऽहमस्मिन्पतितोऽस्मि कूपे
युवां शरण्यौ शरणं प्रपद्ये ॥ ७२

[4]सूतः —

एवमृग्भिश्चान्यैरस्तुवत् ॥ ७३

एवं तेनाभिष्टुतावश्विनावाजग्मतुः ॥ ७४

आहतुश्चैनं, प्रीतौ स्वः, एष तेऽपूपोऽशानैनमिति ॥ ७५

स एवमुक्तः प्रत्युवाच । नानृतमूचतुर्भवन्तौ । नत्वहं चैनमपूपमुपयोक्तुमुत्सहे अनिवेद्य गुरव इति ॥ ७६

ततस्तावश्विनावूचतुः । आवाभ्यां भवत उपाध्यायेनैवमभिष्टुताभ्यां प्रीताभ्यामपूपो दत्तः, उपयुक्तश्च तेनानिवेद्य गुरवे । अद्य त्वमपि तथैव कुरुष्व, यथा ते कृतमुपाध्यायेनेति ॥ ७७

स एवमुक्तः प्रत्युवाच । एतौ प्रत्यनुनये भवन्तावश्विनौ, नोत्सहेऽहमनिवेद्योपाध्यायायोपयोक्तुमिति ॥ ७८

---

1. क-ख-ग—रमत्तिगर्भः
2. क-ख-ग—तावश्विनौ
3. क-ग—विश्वसे
4. क-ख-ग—सूतः इतिपदं नास्ति

तमश्विनावाहतुः। प्रीतौ स्वस्तवानया गुरुवृत्त्याऽपूपं भक्षय। उपाध्यायस्य ते देहः काष्णायसो दत्तः। भवतो हिरण्मयो भविष्यति। एतौ [1]गृहाण, चक्षुष्मांश्च भवसि, श्रेयश्चावाप्स्यसीति॥

एवमुक्तोऽश्विभ्यां [2]तथा भक्षयित्वा लब्धचक्षुरुपाध्याय-सकाशमागम्याभ्यवादयत्, आचचक्षे च ॥ ८०

अस्य स दृष्ट्वा प्रीतिमानभूत्। आह चैनं, यथाश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसीति। सर्वे च वेदाः प्रतिभास्यन्तीति॥८१

एषा तस्यापि परीक्षोपमन्योः ॥ ८२

अथापरशिष्यस्तस्यैवायोदस्य धौम्यस्य बैदो नाम। तमुपाध्यायः सन्दिदेश। वत्स बैद! इहास्यतां, भवता मद्गृहे कंचित्कालं शुश्रूषणपरेण भवितव्यं, श्रेयस्ते भविष्यतीति ॥८३

स तथेत्युक्त्वा दीर्घकालं गुरुकुले गुरुशुश्रूषापरोऽभवत् ॥

गौरिव नित्यं गुरुषु धूर्षु नियुज्यमानः शीतोष्णक्षुत्तृष्णादुःखसहः सर्वत्राप्रतिकूलः, तस्य महता कालेन गुरुः परितोषं जगाम ॥ ८५

तत्परितोषाच्च श्रेयः सर्वज्ञतां चाप। एषा तस्यापि परीक्षा बैदस्य ॥ ८६

---

1. क-ख-ग--एतौ गृहाणेतिवाक्यं नास्ति
2. क-ख-ग—तथा भक्षयित्वेति पदद्वयं नास्ति

स उपाध्यायेनानुज्ञातस्समावृत्तस्तस्माद्गुरुकुलनिवासाद्गृहाश्रमं प्रत्यपद्यत ॥ ८७

तस्यापि गृहे वसतश्चयश्शिष्या बभूवुः । स शिष्यान् न किञ्चिदुवाच । कर्म वा क्रियतां शुश्रूषा वेति । दुःखाभिज्ञो गुरुकुलवासस्य शिष्यान्परिक्लेशेन योजयितुं नेयेष ॥ ८८

अथ कस्यचित्कालस्य बैदं ब्राह्मणं जनमेजयः पौष्यश्च क्षत्रियावुपेत्योपाध्यायं वरयाञ्चक्रतुः ॥ ८९

स कदाचिद्राजकार्येणाभिप्रस्थितो ह्युदङ्कं नाम शिष्यं योजयामास । भो उदङ्क! यत्किञ्चिद्गृहे मां विना परिहीयते. तदिच्छाम्यहं भवताऽपरिहीयमाणं क्रियमाणमिति ॥ ९०

स एवं प्रतिसमादिश्योदङ्कं बैदः प्रवासं जगाम ॥ ९१

अथोदङ्कश्शुश्रूषुर्गुरुनियोगमनुतिष्ठमानस्तत्र गुरुकुले वसति स्म ॥ ९२

वसंस्तत्रोपाध्यायस्त्रीभिस्सहिताभिराहूयोक्तः । उपाध्यायानी ते ऋतुमती । उपाध्यायश्च प्रोषितः । अस्या यथायमृतुर्वन्ध्यो न भवति तथा क्रियतामेतस्यामेतद्धि सीदतीति ॥ ९३

स एवमुक्तस्त्रीः प्रत्युवाच । न मया स्त्रीणां वचनादकार्यं कार्यं । नह्यहमुपाध्यायेन सन्दिष्टोऽकार्यमपि त्वया कार्यमिति ॥

तस्य पुनरुपाध्यायः कालान्तरे गृहानुपाजगाम तस्मात्प्रवासात् ॥ ९५

स तद्वृत्तान्तं तस्याशेषत उपलभ्य प्रीतिमानभूत् ॥ ९६

उवाच चैनं, वत्सोदङ्क! किं ते प्रियं करवाणीति, धर्मतश्शुश्रूषितोऽस्मि भवता। तेन प्रीतिः परस्परेण नौ संवृत्ता। तदनुजाने सर्वामेव सिद्धिं प्राप्स्यसि गम्यतामिति ॥ ९७

स एवमुक्तः प्रत्युवाच। किं ते प्रियं करवाणीति ॥ ९८

एवं ह्याह—

यश्चाधर्मेण विब्रूयाद् यश्चाधर्मेण पृच्छति।
तयोरन्यतरः प्रैति विद्वेषं वाऽधिगच्छति ॥ ९९

अहमनुज्ञातो भवता। इच्छामि त इष्टं गुर्वर्थमुपहर्तुमिति॥

तेनैवमुक्त उपाध्यायः प्रत्युवाच। वत्सोदङ्क! उच्यतां तावदिति ॥ १०१

स कदाचित्तमुपाध्यायमाहोदङ्कः, आज्ञापयतु भवान्, किं ते प्रियमुपहरामि गुर्वर्थमिति ॥ १०२

तमुपाध्यायः प्रत्युवाच। वत्सोदङ्क! बहुशो मां चोदयसि। गुर्वर्थमुपहरेयमिति। तच्चैनामुपाध्यायानीं गच्छ, पृच्छ, किमुपहरामि गुर्वर्थमिति, एषा यद्ब्रवीति, तदुपाहरस्वेति ॥ १०३

एवमुक्त उपाध्यायेनोपाध्यायानमिपृच्छत्। भवति! उपाध्यायेनास्म्यनुज्ञातो गन्तुं। तदिच्छामीष्टं ते गुर्वर्थमुपहृत्यानृणो गन्तुं। तदाज्ञापयतु भवती किमुपहरामि गुर्वर्थमिति ॥१०४

सैवमुक्तोपाध्यायान्युदङ्कं प्रत्युवाच । गच्छ, पौष्यं कुण्डले भिक्षस्वेति । क्षत्रियया पिनद्धे ते आनयस्व, इतश्चतुर्थेऽहनि पुण्यकर्म भविता, एताभ्यां कुण्डलाभ्यां शोभमाना ब्राह्मणान् परिवेष्टुमिच्छामि । तथा [1]त्वं संपादयस्व, [2]श्रेयस्ते कुण्डलभिक्षणं कुर्वत इति ॥ १०५

स एवमुक्त उपाध्यायान्या प्रतिगृदुदङ्कः ॥ १०६

स पथि गच्छन्नपश्यदृषभमतिप्रमाणं तदधिरूढं च पुरुषमतिप्रमाणमेव ॥ १०७

पुरुष उदङ्कमभ्यभाषत । उदङ्क! [3]एतस्य पुरीषमृषभस्य भक्षयस्वेति ॥ १०८

स एवमुक्तो नैच्छत् ॥ १०९

तमाह पुरुषो भूयः, भक्षयस्वोदङ्क मा विचारयोपाध्यायेनापि ते भक्षितमिति ॥ ११०

स एवमुक्तो बाढमित्युक्त्वा ततस्तस्य वृषभस्य पुरीषं मूत्रं च भक्षयित्वोदङ्कः प्रतस्थे ॥ १११

यत्र स क्षत्रियः पौष्यस्तमुपेत्यापश्यदुदङ्क आसीनं, स तमुपेत्याशीर्भिरभिनन्द्योवाच । अर्थी भवन्तमभिगतोऽस्मीति ॥

---

1. क-ख-ग—ताभ्यां तस्मिन्नहनि
2. क-ख-ग—श्रेयोहि ते स्यात्
3. क-ख-ग—तत्

स तमभिवाद्योवाच । भगवन्पौष्यः खल्वहं किं करवाणीति ॥ ११३

तमुवाचोदङ्को गुर्वर्थे कुण्डलाभ्यामर्थ्यागतोऽस्मीति ।
ये ते क्षत्रियया पिनद्धे ते कुण्डले भवान्दातुमर्हतीति ॥ ११४

तं पौष्यः प्रत्युवाच । प्रविश्यान्तःपुरं क्षत्रिया याच्यतामिति ॥ ११५

स तेनैवमुक्तः प्रविश्यान्तःपुरं क्षत्रियां तां नापश्यत् ॥

स पौष्यं पुनरुवाच । अयुक्तं भवता वयमनृतेनाचरितुम् । न हि सा क्षत्रियाऽन्तःपुरे संन्निहिता । नैनां पश्यामीति ॥ ११७

एवमुक्तः पौष्यस्तं प्रत्युवाच । तत्र सन्निहितैव सा, संप्रति भवानुच्छिष्टः, स्मर तावत्, न सा क्षत्रियोच्छिष्टेनाशुचिना वा शक्या द्रष्टुं पतिव्रतात्वात्, एषा नाशुचिना त्वया द्रष्टव्या भविष्यतीति ॥ ११८

[1]अथैवमुक्तस्तत्राहोदङ्कः । अस्ति खलु मया तु भक्षितं, नोपस्पृष्टमागच्छतेति ॥ ११९

पौष्यः प्रत्युवाच । एवं [2]चेच्छुद्धो भूत्वा गन्तव्यमिति ॥

अथोदङ्कस्तथेत्युक्त्वा प्राङ्मुख उपविश्य प्रक्षालितपाणिपादवदनश्शुद्धाभिः हृदयङ्गमाभिरद्भिर्द्विरुपस्पृश्य द्विः

1. क-ख-ग—तथैवमुक्तवन्तं स्मृत्वाहोदङ्कः
2. एतदेवहि न हि गच्छतोपस्पृष्टम्

परिमृज्य मुखान्यङ्गैरुपस्पृश्यान्तःपुरं प्रविश्य क्षात्रियामपश्यत् ॥ १२१

सा च दृष्ट्वैवोदङ्कमभ्युत्थायाभिवाद्योवाच । स्वागतं ते भगवन्नाज्ञापय । भो ! तेऽहं किं करवाणीति ॥ १२२

स तामुवाच । एते कुण्डले गुर्वर्थं मे भिक्षिते दातुमर्हसीति ॥

सा प्रीता तस्य तेन सद्भावेन पात्रमयं मयाऽनतिक्रमणीयं चेति मत्वा कुण्डले अवमुच्यास्मै प्रायच्छत् ॥ १२४

आह चैनम् । एते कुण्डले तक्षको नागराजः प्रार्थयति । अप्रमत्तो नेतुमर्हसीति ॥ १२५

एवमुक्तस्तां क्षत्रियां प्रत्युवाच । भवती सुनि[1]र्वृता भवतु । स मामशक्तस्तक्षको नागराजो धर्षयितुमिति ॥ १२६

स एवमुक्त्वा क्षत्रियामामन्त्र्य पौष्यसकाशमागच्छत् ॥

स तं दृष्ट्वोवाच । भोः पौष्य ! प्रीतोऽस्मीति ॥ १२८

तं पौष्यः प्रत्युवाच । भगवंश्चिरस्य पात्रमासाद्यते । भगवांश्च गुणवानतिथिः, प्रकरिष्येऽहं श्राद्धं, क्षणः क्रियतामिति ॥ १२९

तमुदङ्कः प्रत्युवाच । कृतक्षणभावोऽस्मि, [2]शीघ्रमागच्छामीति । यथोपपन्नमन्न[3]मुपाहृतं भवत्विति ॥ १३०

---

1. अ—निर्वृत्ता　　2. ग—शीघ्रंत्वहमिच्छामि
3. क-ख-ग—उपाहृतमिति पदं नास्ति

स तथेत्युक्त्वा यथोपपन्नेनैवान्नेन भोजयामास ॥ १३१

अथोदङ्कः शीतमन्नं दृष्ट्वा अशुच्येतदन्नमिति मत्वा पौष्यमुवाच। सकेशमन्नमुपहृतं शीतमन्नमशुचि यस्मान्मे ददासि, तस्मात्त्वमन्धो भविष्यसीति ॥ १३२

तं पौष्यः प्रत्युवाच। यस्मात्त्वमदुष्टमन्नं दूषयसि। तस्मादनपत्यो भविष्यसीति ॥ १३३

सोऽथ तस्यान्नस्यापि अशुचिभावं दर्शयामास ॥ १३४

अथ तदन्नं मुक्तकेश्या स्त्रियोपहृतं सकेशमालोक्योदङ्कं प्रसादयामास। भगवन्नज्ञानादेतदन्नं सकेशमुपहृतं शीतं च। एतत्क्षमये भवन्तं न भवेयमन्ध इति ॥ १३५

तमुदङ्कः प्रत्युवाच। न मृषा ब्रवीमि भूत्वा त्वमन्धो न चिरादनन्धो भविष्यसीति। ममापि शापो न भवेद्भवद्दत्त इति ॥ १३६

तं पौष्यः प्रत्युवाच। नाहं शक्तः शापं प्रत्यादातुं, नहि मे मन्युरद्याप्युपशमं गच्छतीति ॥ १३७

किमेतद्भवता न ज्ञायते ॥

यथा—नवनीतं हृदयं ब्राह्मणस्य
वाचि क्षुरो निहितस्तीक्ष्णधारः।
विपरीतमेतदुभयं क्षत्रियस्य
वाङ्नवनीतं हृदयं तीक्ष्णधारम् ॥ इति ॥ १३८

तदेवं गते न शक्तोऽहं तीक्ष्णहृदयत्वात्तं शापमन्यथाकर्तुं गम्यतामिति ॥ १३९

तमुदङ्कः प्रत्युवाच । भवताहमन्नस्याशुचिभावं गमयित्वा प्रत्यनुनीतः । प्राक् त्वेतदभिहितम् । यस्माददुष्टमन्नं दूषयसि, तस्मादनपत्यो भविष्यसीति । दुष्टे चान्ने मम शापो न भविष्यति । साधयामस्तावदित्युक्त्वा प्रातिष्ठदुदङ्कः ते कुण्डले गृहीत्वा ॥

सोऽपश्यत्पथि नग्नं श्रमणमागच्छन्तं मुहुर्मुहुर्दृश्यमानं मुहुर्मुहुरदृश्यमानम् ॥ १४१

अथोदङ्कस्ते कुण्डले भूमौ निक्षिप्योदकार्थं प्रचक्रमे ॥

तस्मिन्नन्तरे श्रमण उपसृत्य कुण्डले गृहीत्वा प्राद्रवत् ॥

[1]तमुदङ्कोऽभिसृत्य जग्राह । स तद्रूपं विहाय तक्षकरूपं गृहीत्वा सहसा धरण्यां विवृतं महाबिलं प्रविवेश । प्रविश्य नागलोकं स्वभवनमगच्छत् ॥ १४४

[2]तमुदङ्को ज्ञात्वा तेनैव बिलेनान्वाविश्य नागानस्तुवदेभिः श्लोकैः ॥ १४५

---

1. क-ख-ग—तमुदङ्क उपसृत्य

2. क-ख—तद्बिलं दण्डकाष्ठेन च खनितुं नाशकत् । क्लिश्यमान मिन्द्रोऽपश्यत् । वज्रं प्रेषयामास । गत्वास्य ब्राह्मणस्य कार्यं कुरुष्वेति । अथ वज्रो दण्डकाष्ठं प्रविश्य तद्बिलमदारयत् । तमुदङ्कोऽन्वाविवेश । तेनैव बिलेन च प्रविश्य तं नागलोकमपर्यन्तमनेकविधप्रासादवदननिर्यूहशतसङ्कुलमुच्चावचाक्रीडनवासस्थानावकीर्णमपश्यत् ॥

[इत्यधिकः पाठः ।]

[1]यावन्तो नागराजानः सर्पास्त्वमितविक्रमाः ।
वर्षन्त इव जीमूताः सविद्युत्पवनेरिताः ॥ १४६

[2]सुस्वरूपा विरूपाश्च विविधोपलकुण्डलाः ।
आदित्यवन्नाकपृष्ठे रेजुरैरावतोद्भवाः ॥ १४७

बहूनि नागवेश्मानि गङ्गायास्तीर उत्तरे ।
इच्छन्तोऽर्कांशुसेवायै वस्तुमैरावतं विना ॥ १४८

शतान्यशीतिरष्टौ च सहस्राणि च विंशतिः ।
सर्पाणां प्रग्रहा यान्ति धृतराष्ट्रो जयेदिति ॥ १४९

ये चैवमुपशृण्वन्ति ये च दूरं परागताः ।
अहमैरावतज्येष्ठभ्रातृभ्योऽकरवं नमः ॥ १५०

यस्य वासः कुरुक्षेत्रे खाण्डवे चाभवत्सदा ।
तं काद्रवेयमस्तौषं कुण्डलार्थाय तक्षकम् ॥ १५१

तक्षकश्चाश्वसेनश्च नित्यं सहचरावुभौ ।
कुरुक्षेत्रे निवसतां नदीमिक्षुमतीमनु ॥ १५२

नदीं मन्दाकिनीं रम्यां प्रसन्नसलिलामनु ।
जघन्य[3]कस्तक्षकस्य श्रुतसेन इति श्रुतः ॥ १५३

अवसद्यो महानिम्ने प्रार्थयन्नागमुख्यताम् ।

---

1. क-ख-ग—यद्येव नागाः सर्पा वा सर्वे संमतविक्रमाः
2. क-ख-ग—सुरूपाश्च विरूपाश्च यथा कल्माषकुण्डलाः
3. क-ख-ग—ज

करवाणि सदा चाहं नमस्तस्मै महात्मने ॥ १५४

एवं स्तुवन्नपि नागान्नालभत्कुण्डले तदा ॥ १५४॥

[1]अथापश्यत्स्त्रियौ तन्त्रे अधिरोप्य पटं वयन्त्यौ ॥ १५५

तस्मिंस्तन्त्रे कृष्णांश्च सितांश्च तन्त्रं चक्रं चापश्यत्। द्वादशारं षड्भिः कुमारैः परिवर्तमानमभ्यारूढं पुरुषं चापश्यत् ॥

दर्शनीयान्स तान्सर्पांस्तुष्टाव तदेभिर्मन्त्रवादश्लोकैः॥ १५७

त्रीण्यर्पितान्यत्र शतानि मध्ये
षष्टिश्च नित्यं चरति ध्रुवेऽस्मिन्।
चक्रे चतुर्विंशति पर्वयोगे
षड्वै कुमाराः परिवर्तयन्ति ॥ १५८

तन्त्रं चेदं विश्वरूपं [2]युवत्यौ
[3]वयतस्तन्तून्सततं वर्तयन्त्यौ।
कृष्णान्सितांश्चैव निवर्तयन्त्यौ
भूतान्यजस्रं भुवनानि चैव ॥ १५९

वज्रस्य भर्ता भुवनस्य गोप्ता
वृत्रस्य हन्ता नमुचे[4]र्बलस्य

---

1. क-ख-ग—तदा चैव चिन्तयामास उपाध्यायया यदीरितम्।
काले च समतिक्रान्ते शापं दास्यति मन्युना ॥
[अधिकः पाठः ॥]

2. क-ख-ग—वयन्त्यौ 3. क-ख-ग—यतस्तन्तून्

4. क-ख-ग—निर्हन्ता

कृष्णे वसानो वसने महात्मा
सत्यानृते यो विविनक्ति लोके ॥ १६०

यो [1]वाहनं गर्भमपां पुराणं
वैश्वानरं [2]वानरमप्युपेतः ।
नमः सदास्मै जगदीश्वराय
लोकत्रयेशाय पुरन्दराय ॥ इति ॥ १६१

तत एनं पुरुषः प्राह । प्रीतोऽहमनेन स्तोत्रेण प्रियं ते किं करवाणीति ॥ १६२

स तमुवाचोदङ्कः । नागा मे वशमेयुरिति ॥ १६३

स एनं पुरुषः प्रोवाच एनमश्वमपाने धमेति ॥ १६४

स तमश्वमपानेऽधमत् । अथ धम्यमानस्य सर्वतः स्रोतोभ्यः सधूमार्चिषो निष्पेतुः । याभिर्नागलोक उपधूपितः ॥

अथ संभ्रान्तस्तक्षकोऽग्नितेजोभयविषण्णस्ते कुण्डले गृहीत्वा सहसा स्वभवनान्निष्क्रम्योदङ्कमुवाच । एते मणिकुण्डले प्रतिगृह्णातु भवानिति ॥ १६६

[3]स ते प्रतिजग्राहोदङ्कः । कुण्डले प्रतिगृह्याचिन्तयत् । अद्य तत्पुण्यमहरुपाध्यायान्या दूरं चाहमभ्यागतः । कथं नु खलु-संभावयेयमिति ॥ १६७

---

1. क-ख-ग—वाजिनं 2. क-ख-ग—वाहन
3. क-ख-ग—स ते प्रतिगृह्याचिन्तयत्

तत एनं चिन्तयानमेवं पुरुष उवाच । उदङ्कैनमश्वमधिरोह, एष त्वामेतत्क्षणेनोपाध्यायकुलं प्रापयिष्यतीति ॥ १६८

स तथेत्युक्त्वाश्वमधिरुह्य प्रत्याजगामोपाध्यायकुलम् ॥

उपाध्यायानी स्नात्वा केशानावपयन्त्युपविष्टा । अद्याप्युदङ्को नागच्छतीति शापायास्य मतिं दधे ॥ १७०

अथोदङ्क उपविश्योपाध्यायानीमभ्यवादयत् । तेचास्यै कुण्डले प्रायच्छत् ॥ १७१

सा चैनं प्रत्युवाचोदङ्कम् । वत्सोदङ्क! देशकालेऽभ्यागतः स्वागतं ते वत्स! मुहूर्तं नागच्छसि [1]चेन्मया शप्तः । श्रेयस्ते न भविष्यति । अथोपस्थितां सिद्धिमवाप्स्यसीति ॥ १७२

अथोदङ्क उपाध्यायमभ्यवादयत् तमुपाध्यायः प्रत्युवाच । वत्सोदङ्क! स्वागतं ते किं चिरं कृतमिति ॥ १७३

तमुदङ्क उपाध्यायं प्रत्युवाच । भो तक्षकेण नागराजेन विघ्नः कृतः अस्मिन्कर्मणि, तेनास्मि नागलोकगतस्तत्रैव च मया दृष्टे स्त्रियौ तन्त्रेऽधिरोप्य पटं वयन्त्यौ, तस्मिंश्च तन्त्रे कृष्णासिताश्च तन्तवः, किं, तत्र चक्रमपि दृष्टं, द्वादशारं चैनं कुमाराः परिवर्तयन्ति, तदपि किं, पुरुषश्च मया दृष्टः, पुनरश्व-

1. क-ख-ग—चेन्मत्वा शापायोपस्थितः । श्रेयस्तवोपस्थितं सिद्धिमवाप्स्यसीति । } पाठान्तरम् ।

श्वातिप्रमाणयुक्तः, स चापि कः, पथि गच्छता मया वृषभो दृष्टः, तं च पुरुषोऽधिरूढः, तेनास्मि सोपचारमुक्तः । अस्य पुरीषमृषभस्य भक्षयेति । उपाध्यायेनापि ते भक्षितमिति । ततस्तस्य वचनान्मयापि तदृषभस्य पुरीषमुपयुक्तम् । तदिच्छामि भवतोपदिष्टं, किं तदिति ॥ १७४

तेनैवमुक्त उपाध्यायः प्रत्युवाच, ये ते स्त्रियौ धाता विधाता च । ये ते कृष्णास्सिताश्च तन्तवः, ते रात्र्यहनी । तदपि चक्रं द्वादशारं षट् कुमाराः परिवर्तयन्ति, ते षडृतवः, द्वादशारं द्वादशमासाः, संवत्सरश्चक्रम् । यः पुरुषस्स पर्जन्यः । योऽश्वस्सोऽग्निः । य ऋषभस्त्वया दृष्टस्स ऐरावतो नाम नागराजः । यश्चैनमधिरूढस्स इन्द्रः । यदपि ते पुरीषं भक्षितं तदमृतम् । तेन खल्वसि न व्यापन्नः । तस्मिन् नागभवने स चापि मम सखेन्द्रः । तदनुग्रहात्कुण्डले गृह्य पुनरभ्यागतोऽसि । तत्सौम्य गम्यताम् । अनुजाने भवन्तं श्रेयोऽवाप्स्यसीति ॥ १७५

स उपाध्यायेनानुज्ञात उदङ्कस्तस्य तक्षकस्य प्रतिचिकीर्षमाणो हास्तिनपुरं प्रतस्थे ॥ १७६

स हास्तिनपुरं प्राप्य न चिराद्द्विजसत्तमः ।
समागच्छत राजानं उदङ्को जनमेजयम् ॥ १७७

पुरा तक्षशिलायास्तु निवृत्तमपराजितम् ।
सम्यग्विजयिनं दृष्ट्वा समन्तान्मन्त्रिभिर्वृतम् ॥ १७८

तस्मै जयाशिषः पूर्वं यथान्यायं प्र[1]युज्य सः ।
उवाचैनं वचः काले शब्दसम्पन्नया गिरा ॥ १७९

उदङ्कः—
अन्यस्मिन्करणीये त्वं कार्ये पार्थिवसत्तम ।
बाल्यादिवान्यदेव त्वं कुरुषे नृपसत्तम ॥ १८०

सूतः—
एवमुक्तस्तु विप्रेण स राजा प्रत्युवाच ह ।
जनमेजयः प्रसन्नात्मा सम्यक्संपूज्य तं मुनिम् ॥ १८१

जनमेजयः—
अहं प्रजानां परिपालनेन
त्वं क्षत्रधर्मं परिपालयामि ।
ब्रूहि किं वा क्रियतां द्विजेन्द्र
शुश्रूपुरस्म्यद्य वचस्त्वदीयम् ॥ १८२

सूतः—
स एवमुक्तस्तु नृपोत्तमेन
द्विजोत्तमः पुण्यकृतां वरिष्ठः ।
उवाच राजानमदीनसत्वं
स्वमेव कार्यं नृपतेश्च यत्तत् ॥ १८३

1. अ—पूज्य

उदङ्कः—

तक्षकेण हि राजेन्द्र येन ते हिंसितः पिता ।
तस्मै प्रतिकुरुष्व त्वं पन्नगाय दुरात्मने ॥ १८४

कार्यकालं च मन्येऽहं विधिदृष्टस्य कर्मणः ।
तद्गच्छापचितिं राजन् पितुस्तस्य महात्मनः ॥ १८५

तेन ह्यनपराधी स दष्टो दुष्टान्तरात्मना ।
पञ्चत्वमगमद्राजा वज्राहत इव द्रुमः ॥ १८६

बलदर्पसमुत्सिक्तस् तक्षकः पन्नगाधमः ।
अकार्यं कृतवान्पापो योऽदशत्पितरं तव ॥ १८७

राजर्षिवंशगोप्तारं अमरप्रतिमं नृपम् ।
जघान काश्यपं चैव न्यवर्तयत पापकृत् ॥ १८८

दग्धुमर्हसि राजंस्त्वं ज्वलिते हव्यवाहने ।
सर्पसत्रे महाराज त्वयि तद्धि विधीयते ॥ १८९

एवं पितुश्चापचितिं [1]गतवांस्त्वं भविष्यसि ।
मम प्रियं च सुमहत् कृतं राजन् भविष्यति ॥ १९०

कर्मणां पृथिवीपाल मम येन दुरात्मना ।
विघ्नः कृतो महाराज गुर्वर्थे चरतोऽनघ ॥ १९१

सूतः—

एतच्छ्रुत्वा तु नृपतिस् तक्षकस्य चुकोप ह ।

---

1. क-ग—कृतवांस्त्वं

उदङ्कवाक्यहविषा दीप्तोऽग्निर्हविषा यथा ॥ १९२

अपृच्छच्च महाराजो मन्त्रिणस्तान्सुदुःखितः ।
उदङ्कस्यैव सान्निध्ये पितुस्स्वर्गगतं प्रति ॥ १९३

तदैव हि स राजेन्द्रो दुःखशोकापुतोऽभवत् ।
[1]यदैवासौ पितुर्वृत्तं उदङ्कादशृणोद्द्विजात् ॥ १९४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
॥ ३ ॥ पौष्यपर्वणि - प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये १४९ वाक्यानि ४५॥ श्लोकाः ।]

॥ चतुर्थोऽध्यायः ॥

(पौलोमपर्व)

सूतशौनकसंवादमुखेन कथोपोद्घातः ॥

सूतः—

रोमहर्षणपुत्र उग्रश्रवाः सूतः पौराणिको नैमिशारण्ये शौनकस्य कुलपतेः सत्रे ऋषीनभ्यागतानुपतस्थे ॥ १

पुराणे कृतश्रमः स तान् कृताञ्जलिरुवाच ॥ २

[2]किं भगवन्तः श्रोतुमिच्छथ, किमहं ब्रवीमीति ॥ ३

1. क-ख-ग—यदैवं पितरं वृत्तं
2. क-ख-ग— (मयोदङ्कस्य चरितमशेषमुक्तं जनमेजयस्य सर्पसत्रस्य अधिकः पाठः । (निमित्तान्तरमिदमपि किं भवन्तः श्रोतुमिच्छन्ति ।

तमृषय ऊचुः । रौमहर्षणे प्रवक्ष्यामः, त्वं वक्ष्यसि च शुश्रूषतां कथायोगं । भगवांश्च तावच्छौनकोऽग्निशरण एवास्ते ॥ ४

[1]योऽसौ दिव्याः कथा वेद देवदानवसंकथाः ।
मानुष्यदेवगन्धर्वकथा वेद च सर्वशः ॥ ५

स चाप्यस्मिन्मखे सौते विद्वान्गृहपतिर्द्विजः ।
[2]सर्वेषां चैव नो नाथः स तावत्परिपाल्यताम् ॥ ६

सूत —
एवमस्तु गुरौ तस्मिन् उपविष्टे महात्मनि ।
तेन पृष्टाः कथाः पुण्या वक्ष्यामि विविधाश्रयाः ॥ ७

सोऽथ विप्रर्षभः कृत्वा कार्यं सर्वं यथाक्रमम् ।
देवान्वाग्भिः पितॄनद्भिस् तर्पयित्वाऽऽजगाम ह ॥ ८

यत्र ब्रह्मर्षयः सिद्धास् त आसीना यतव्रताः ।
यज्ञायतनमाश्रित्य सूतपुत्रपुरस्सराः ॥ ९

---

1. क-ख-ग—दीर्घसत्रत्वात् सर्वाः कथाः श्रोतुं कालोऽस्ति ।
[अधिकः पाठः ।]

2. क-ख-ग—दक्षो धृतव्रतो धीमान् शास्त्रे चारण्यके गुरुः ॥
सत्यवादी शमपरस्तपस्वी नियतव्रतः ।
सर्वेषामेव नो मान्यः स तावत्प्रतिपाल्यताम् ॥
तस्मिन्नध्यासति गुरावासनं परमार्चितम् ।
ततो वक्ष्यामि यत्त्वां स पृच्छति द्विजसत्तमः ॥
[अधिकः पाठः]

ऋत्विक्ष्वथ सदस्येषु स वै गृहपतिस्ततः ।
उपविष्टेषूपविष्टः शौनकोऽथाब्रवीदिदम् ॥ १०

शौनकः—

पुराणमखिलं तात पिता तेऽधीतवान्पुरा ।
कच्चित्त्वमपि तत्सर्वं अधीतो रौमहर्षणे ॥ ११

पुराणे हि कथा दिव्या आदिवंशाश्च धीमताम् ।
कथ्यन्ते ताः पुराऽस्माभिः श्रुताः पूर्वं पितुस्तव ॥ १२

तत्र वंशमहं पूर्वं श्रोतुमिच्छामि भार्गवम् ।
कथयस्व कथामेतां [1]कल्यस्तच्छ्रवणेन च ॥ १३

सूत —

यदधीतं सदा सम्यग् द्विजश्रेष्ठैर्महात्मभिः ।
वैशंपायनविप्राद्यैस् तैश्चापि कथितं पुरा ॥ १४

यदधीतं च पित्रा मे सम्यक्चैव ततो मया ।
तं तावच्छृणु यो देवैः सर्वैः साग्निमरुद्गणैः ॥ १५

पूजितः प्रवरो वंशो भार्गवः पृथुनन्दन ।
इमं वंशं महद्दिव्यं भार्गवं ते महामुने ॥ १६

निगदामि कथायुक्तं पुराणाश्रयमद्भुतम् ।
भृगोश्च दयितः पुत्रश् च्यवनो नाम भार्गवः ॥ १७

1. क-ख-ग—कल्याः स्म श्रवणे तव

च्यवनस्यापि दायादः प्रमतिर्नाम धार्मिकः ।
प्रमतेरप्यभूत्पुत्रो घृताच्यां रुरुरित्युत ॥ १८

रुरोरपि सुतो जज्ञे शुनको वेदपारगः ।
प्रमद्वरायां धर्मात्मा तव पूर्वपितामहः ॥ १९

तपस्वी च यशस्वी च श्रुतवान्धर्मवित्तमः ।
धर्मिष्ठः सत्यवादी च नियतो नियतेन्द्रियः ॥ २०

शौनक—

सूतपुत्र यथा तस्य भार्गवस्य महात्मनः ।
च्यवनत्वं परिख्यातं तन्ममाचक्ष्व सुव्रत ॥ २१

सूतः—

भृगोस्तु दयिता भार्या पुलोमेत्यभिविश्रुता ।
तस्यां गर्भः समभवद् भृगोर्वीर्यसमुद्भवः ॥ २२

तस्मिन्गर्भे समुद्भूते पुलोमायां भृगूद्भव ।
समये समशीलिन्यां धर्मपत्न्यां यशस्विनः ॥ २३

अभिषेकाय निष्क्रान्ते भृगौ धर्मभृतां वरे ।
आश्रमं तस्य रक्षोऽथ पुलोमां हि जगाम ह ॥ २४

तं प्रविश्याश्रमं दृष्ट्वा भृगोर्भार्यामनिन्दिताम् ।
हृच्छयेन समाविष्टो विचेताः समपद्यत ॥ २५

अभ्यागतं तु तद्दृष्ट्वा पुलोमा चारुहासिनी ।

न्यमन्त्रयत पाद्येन फलमूलादिना तदा ॥ २६

तां तु रक्षस्तदा ब्रह्मन् हृच्छयेन निपीडितः ।
दृष्ट्वा हृष्टमना भूत्वा जिहीर्षुस्तामनिन्दिताम् ॥ २७

अथाग्निशरणेऽपश्यज् ज्वलितं जातवेदसम् ।
तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा ॥ २८

शंस मे कस्य भार्येयं अग्ने पृष्टो वदस्व मे ।
सत्यस्त्वमसि सत्यं वै वद पावक [1]पृच्छतः ॥ २९

मया हीयं पूर्ववृता भार्यार्थे वरवर्णिनी ।
पश्चात्त्विमां पिता प्रादाद् भृगवेऽनृतकारिणे ॥ ३०

सेयं यदि वरारोहा भृगोर्भार्या रहोगता ।
तथा सत्यम्ममाख्याहि जिहीर्षाम्याश्रमादिमाम् ॥ ३१

मन्युर्हि हृदयं मेऽद्य निर्दहन्निव तिष्ठति ।
मत्पूर्वभार्यां यदिमां भृगुः प्राप सुमध्यमाम् ॥ ३२

[2]तद्रक्ष एवमामन्त्र्य ज्वलितं जातवेदसम् ।
शङ्कमानो भृगोर्भार्यां पुनः पुनरपृच्छत ॥ ३३

त्वमग्ने सर्वभूतानां अन्तर्वससि नित्यदा ।

---

1. क-ख-ग—पृच्छते
2. क-ख-ग—असंमतमिदं मेऽद्य हरिष्याम्याश्रमादिमाम् ।
[अधिकः पाठः]

साक्षिवत्पुण्यपापेषु सत्यं ब्रूहि कवे वचः ॥ ३४

मत्पूर्वभार्याऽपहृता भृगुणाऽनृतकारिणा ।
सेयं यदि तथा मे त्वं सत्यमाख्यातुमर्हसि ॥ ३५

श्रुत्वा त्वत्तो भृगोर्भार्यां हरिष्याम्यहमाश्रमात् ।
जातवेदः पश्यतस्ते वद सत्यां गिरं मम ॥ ३६

तस्य तद्वचनं श्रुत्वा सप्तार्चिर्दुःखितो भृशम् ।
[1]भीतोऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
॥ ४ ॥ पौलोमपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[अस्मिन्नध्याये ४ वाक्यानि ३३ श्लोकाः ।]

---

1. क-ख-ग—सत्यं वदामि यदि मे शापः स्याद् ब्रह्मवित्तमात् ॥
असत्यं चेदहं ब्रूवे पतिष्ये नरकान्क्रमात् ।
भीतोऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः ॥
त्वया वृतेयं लोकेश पूर्वं दानवनन्दन ।
किं त्विदं विधिना पूर्वं मन्त्रवन्न वृता त्वया ॥
पिता तु भृगवे दत्ता पुलोमेयं यशस्विनी ।
न तु तुभ्यं प्रदत्ता वै वरारोहा महायशः ॥
अथैनां वेददृष्टेन कर्मणा विधिपूर्वकम् ।
भार्यामृषि र्भृगुः प्राप्तस् तं पुरस्कृत्य दानव ॥
सेयमित्यवगच्छामि नानृतं वक्तुमुत्सहे ।
नानृतं हि सदा लोके पूज्यं दानवसत्तम ॥
[अधिकः पाठः]

॥ पञ्चमोऽध्यायः ॥

च्यवनस्य जननम् ॥ १ ॥ भृगुणाग्नेः सर्वभक्षत्वशापः ॥ २ ॥

सूतः—

अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम् ।
ब्रह्मन्वराहरूपेण मनोमारुतरंहसा ॥ १

ततः स कुक्षौ निवसन् गर्भो भृगुकुलोद्वहः ।
रोषान्मातुश्च्युतः कुक्षेश् च्यवनस्तेन सोऽभवत् ॥ २

तं दृष्ट्वा मातुरुदराच् च्युतमादित्यवर्चसम् ।
तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य ताम् ॥ ३

सा तमादाय सुश्रोणी ससार भृगुनन्दनम् ।
च्यवनं भार्गवं ब्रह्मन् पुलोमा दुःखमूर्च्छिता ॥ ४

तां ददर्श स्वयं ब्रह्मा सर्वलोकपितामहः[1] ।
अश्रुबिन्दूद्भवा तस्याः प्रावर्तत महानदी ॥ ५

अनुवर्त्म सृता तस्या भृगोः पत्न्या यशस्विनः ।
तस्या मार्गं [2]गतवतीं दृष्ट्वा तु सरितं तदा ॥ ६

---

1. क-ख-ग—रुदन्तीं बाष्पपूर्णाक्षीं भृगोर्भार्यामनिन्दिताम् ।
सान्त्वयामास भगवान् वधूं ब्रह्मा पितामहः ॥
[अधिकः पाठः ।]

2. क-ख-ग—सृ

नाम तस्यास्तदा नद्याश् चक्रे लोकपितामहः ।
वधूसरेति भगवान् च्यवनस्याश्रमं प्रति ॥ ७
स एव च्यवनो जज्ञे भृगोः पुत्रः प्रतापवान् ।
तं ददर्श पिता तत्र च्यवनं तां च भामिनीम् ॥ ८
स पुलोमां तदा भार्यां पप्रच्छ कुपितो भृगुः ॥ ८॥
केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षवे ।
न हि त्वां वेद तद्रक्षो मद्भार्यां चारुहासिनीम् ॥ ९॥
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा ।
बिभेति को न शापान्मे कस्य वायं व्यतिक्रमः ॥ १०॥

पुलोमा—

अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता ।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥ ११॥
साऽहं तव सुतस्यास्य तेजसा परिमोक्षिता ।
भस्मीभूतं तु तद्रक्षो मामुत्सृज्य पपात वै ॥ १२॥

सूतः—

इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्वभक्षो भवेदिति ॥ १३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
॥ ४ ॥ पौलोमपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये १३॥ श्लोका.]

॥ षष्ठोऽध्यायः ॥

क्रोधेनाभिकृत आत्मोपसंहारः ॥ १ ॥ ब्रह्मस्तुत्या स्वशिखादीपनं च ॥ २ ॥

सूतः—

शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् ।
किमिदं साहसं ब्रह्मन् कृतवानसि सांप्रतम् ॥ १

धर्मे प्रयतमानस्य सत्यं च वदतः समम् ।
पृष्टो यदब्रवं सत्यं व्यभिचारोऽत्र को मम ॥ २

पृष्टो हि साक्षी यः साक्ष्यं [1]जानमानोऽन्यथा वदेत् ।
स पूर्वानात्मनः सप्त कुले हन्यात्तथाऽपरान् ॥ ३

यश्च कार्यार्थतत्त्वज्ञो [2]जानमानो न भाषते ।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः ॥ ४

शक्तोऽहमभिशप्तुं त्वां मान्यास्तु ब्राह्मणा मम ।
जानतोऽपि च ते व्यक्तं कथयिष्ये निबोध तत् ॥ ५

एकोऽहं बहुधाऽऽत्मानं कृत्वा तिष्ठामि मूर्तिषु ।
अग्निहोत्रेषु सत्रेषु क्रियासु च मखेषु च ॥ ६

1. क-ख-ग—जानानश्चा 2. क-ख-ग—जानानोऽपि

वेदोक्तेन विधानेन मयि यद्धूयते हविः ।
देवताः पितरश्चैव तृप्तास्तेन भवन्ति वै ॥ ७

आपो देवगणाः सर्वे आपः पितृगणास्तथा ।
दर्शश्च पौर्णमासश्च देवानां पितृभिः सह ॥ ८

देवताः पितृभिस्तस्मात् पितरश्चापि देवताः ।
एकीभूताश्च पूज्यन्ते पृथक्त्वेन च पर्वसु ॥ ९

देवाश्च पितरश्चैव जुह्वते मयि यत्सदा ।
त्रिदशानां पितॄणां च मुखमेवमहं स्मृतम् ॥ १०

अमावास्यां च पितरः पौर्णमास्यां च देवताः ।
मन्मुखेनैव हूयन्ते भुञ्जते यद्धुतं हविः ॥ ११

सर्वभक्षः कथं तेषां भविष्यामि मुखं त्वहम् ।
चिन्तयित्वा ततो वह्निश् चक्रे संहारमात्मनः ॥ १२

द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ।
निरोंकारवषट्काराः स्वधास्वाहाविवर्जिताः ॥ १३

विनाऽग्निना प्रजाः सर्वास् तदा ह्यासन्सुदुःखिताः ।
अथर्षयः समुद्विग्ना देवान् गत्वाऽब्रुवन्वचः ॥ १४

अग्निनाशात्क्रियाभ्रंशाद् भ्रान्ता लोकास्त्रयोऽनघाः ।
विधध्वमत्र यत्कार्यं न स्यात्कालात्ययो महान् ॥ १५

अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य च ।
अग्नेरावेदयञ्शापं क्रियासंहारमेव च ॥ १६

भृगुणा वै महाभाग शप्तोऽग्निः कारणान्तरे ।
कथं देवमुखं भूत्वा यज्ञभागाग्रभुक् तथा ॥ १७

हुतभुक्सर्वलोकेषु सर्वभक्षत्वमेष्यति ।
श्रुत्वा तु तद्वचस्तेषामग्निमाहूय लोककृत् ॥ १८
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् । १८॥

ब्रह्मा—

लोकानामिह सर्वेषां त्वं कर्ता चान्त एव च ॥ १९

त्वं धारयसि लोकांस्त्रीन् [1]गुणानां च प्रवर्तकः ।
स तथा कुरु देवेश नोच्छिद्येरन् क्रियादयः ॥ २०

कस्मादेवं स मूढस्त्वं ईशस्त्वं हि हुताशन ।
त्वं पवित्रं सदा लोके सर्वभूतगतश्च ह ॥ २१

न त्वं सर्वशरीरेण सर्वभक्षत्वमेष्यसि ।
उपादानेऽर्चिषो यास्ते सर्वं धक्ष्यन्ति ताः शिखाः ॥ २२

यथा सूर्यांशुभिः स्पृष्टं सर्वं शुचि विभाव्यते ।
तथा त्वदर्चिर्निर्दग्धं सर्वं शुद्धं भविष्यति ॥ २३

---

1. क-ख-ग—क्रियाणां त्वं

तदग्ने त्वं महत्तेजः स्वप्रभावाद्विनिर्गतम् ।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो ॥ २४

देवानां चात्मना भागं गृहाण त्वन्मुखे हुतम् ॥ २४॥

सूतः—

एवमस्त्विति तं वह्निः प्रत्युक्त्वाथ पितामहम् ।
जगाम शासनं कर्तुं देवस्य परमेष्ठिनः ॥ २५॥

देवर्षयश्च मुदिताः प्रतिजग्मुर्यथागतम् ।
ऋषयश्च यथापूर्वं क्रियाः सर्वाः प्रचक्रिरे ॥ २६॥

दिवि देवा मुमुदिरे भूतसङ्घाश्च लौकिकाः ।
अग्निश्च परमां प्रीतिं अवाप [1]हृतकल्मषः ॥ २७॥

एवमेष पुरावृत्त इतिहासोऽग्निशापजः ।
पुलो[2]मस्य विनाशश्च च्यवनस्य च संभवः ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
॥ ४ ॥ पौलोमपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः ।]

---

1. क-ख-ग—ह 2. क-ग—श्नोऽथ

॥ सप्तमोऽध्यायः ॥

रुरुकथा ॥ १ ॥ प्रमद्वरायाः सर्पदंशेन रुरोर्दुःखम् ॥ २ ॥

सूतः—

स चापि च्यवनो ब्रह्मन् भार्गवोऽजनयत्सुतम् ।
सुकन्यायां महाभागं प्रमतिं दीप्ततेजसम् ॥ १

प्रमतिस्तु रुरुं नाम घृताच्यां समजीजनत् ।
रुरोः प्रमद्वरायां तु शुनकः समपद्यत ॥ २

शौनकस्त्वं महाभागश् शुनकस्य सुतोऽभवत् ।
शौनकस्त्वं महासत्वः सर्वभार्गवनन्दनः ॥ ३

इज्यातपस्वी तीव्रे वै [1]स्थिरः स्थितिवशः श्रुतः ॥ ३॥

तस्य ब्रह्मन्रुरोः सर्वं चरितं भूरितेजसः ।
विस्तरेण प्रवक्ष्यामि तच्छृणु त्वमशेषतः ॥ ४॥

ऋषिरासीन्महान्पूर्वं तपोविद्याविशारदः ।
स्थूलकेश इति ख्यातः सर्वभूतहिते रतः ॥ ५॥

एतस्मिन्नेव काले तु मेनकायां प्रजज्ञिवान् ।
गन्धर्वराजो विप्रर्षेर् विश्वावसुरिति श्रुतः ॥ ६॥

1. क—स्थितवचः श्रितः, ग—स्थितः स्थिरवचश्रितः

अथाप्सरा मेनका सा तं गर्भं भृगुनन्दन ।
उत्ससर्ज यथाकालं स्थूलकेशाश्रमं प्रति ॥ ७॥

उत्सृज्य चै[1]व तं गर्भं नद्यास्तीरे जगाम ह ॥ ८

कन्याममरगर्भाभां ज्वलन्तीमिव च श्रिया ।
तां ददर्श समुत्सृष्टां नदीतीरे महानृषिः ॥ ९

स्थूलकेशः सुतेजस्वी विजने बन्धुवर्जिताम् ।
स तां दृष्ट्वा तदा कन्यां स्थूलकेशो द्विजोत्तमः ॥ १०

जग्राहाथ मुनिश्रेष्ठः कृपाविष्टः पुपोष च ।
ववृधे सा वरारोहा तस्याश्रमपदे शुभा ॥ ११

प्रमदाभ्यो वरा सा तु सर्वरूपगुणैर्युता ।
ततः प्रमद्वरेत्यस्या नाम चक्रे महानृषिः ॥ १२

तामाश्रमपदे तस्य रुरुर्दृष्ट्वा प्रमद्वराम् ।
बभूव किल धर्मात्मा मदनानुगतात्मवान् ॥ १३

पितरं सखिभिः सोऽथ याचयामास भार्गवः ।
प्रमतिश्चाभ्ययाच्छ्रुत्वा स्थूलकेशं यशस्विनम् ॥ १४

ततः प्रादात्तदा कन्यां रुरवे तां प्रमद्वराम् ।
विवाहं [2]कल्पयामास नक्षत्रे भगदैवते ॥ १५

ततः कतिपयाहस्सु विवाहे समुपस्थिते ।

1. अ-तं 2. क-ख-ग—स्थापयित्वाग्रे

सर्वाभिः सखिभिस्त[1]त्र क्रीडन्ती वरवर्णिनी ॥ १६

नापश्यत्तं प्रसुप्तं वै भुजंगं तिर्यगायतम् ।
पदा शीर्षे समाक्रामन् मुमूर्षुः कालचोदिता ॥ १७

स तस्याः संप्रमत्तायाश् चोदितः कालधर्मणा ।
विषोपलिप्तैर्दशनैर् न्यदंशच्च न्यपातयत् ॥ १८

सा दृष्टा सहसा भूमौ पपात गतचेतना ।
व्यसुरप्रेक्षणीया च प्रेक्षणीयतमाकृतिः ॥ १९

प्रसुप्तेवाभवच्चापि भुवि सर्पविषार्दिता ।
भूयो मनोहरतरा बभूव तनुमध्यमा ॥ २०

तां ददर्श पिता चैव ते चैवान्ये तपस्विनः ।
विवेष्टमानां पतितां भूतले पद्मवर्चसम् ॥ २१

ततः सर्वे द्विजवराः समाजग्मुः कृपान्विताः ।
स्वस्त्यात्रेयो महाजानुः कुशिकः शङ्खमेखलः ॥ २२

उद्दालकः [2]कठश्चैव श्वेतकेतुस्तथैव च ।
भरद्वाजः कौणकुत्स आर्ष्टिषेणोऽथ गौतमः ॥ २३

प्रमतिः सह पुत्रेण तथान्ये वनवासिनः ।
तां ते कन्यां व्यसुं दृष्ट्वा भुजंगस्य विषार्दिताम् ॥ २४

---

1. अ—स्य 2. क-ख-ग—कमठरः

रुरुदुः कृपयाऽऽविष्टा रुरुस्त्वार्तो बहिर्गतः ।
ते च सर्वे द्विजश्रेष्ठास् तत्रैवोपाविशंस्तदा ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
॥ ४ ॥ पौलोमपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

॥ अष्टमोऽध्यायः ॥

प्रमद्वराजीवनं, तया सह रुरोर्विवाहः, रुरुडुण्डुभसंवादः ॥ १ ॥ जनमेजयसत्रप्रस्तावश्च ॥ २ ॥

सूतः—
तेषु तत्रोपविष्टेषु ब्राह्मणेषु समन्ततः ।
रुरुः शोकसमापन्नः प्ररुरोद सुदुःखितः ॥ १
शोकेनाभिहतः सोऽथ विलपन्करुणं बहु ।
अब्रवीद्वचनं शोचन् प्रियां चिन्त्य प्रमद्वराम् ॥ २
शेते सा भुवि तन्वङ्गी मम शोकविवर्धिनी ।
[1]बान्धवानां च सर्वेषां किं नु दुःखमतः परम् ॥ ३

---

1. क-ख-ग—प्राणानपहरन्तीव पूर्णचन्द्रनिभानना ।
यदि पीनायतश्रोणी पद्मपत्रनिभक्षणा ॥
मुमूर्षुरपि मे प्राणान् आदायाशु गमिष्यति ।
पितृमातृसखीनां च लुप्तपिण्डस्य तस्य मे ॥
} अधिकः पाठः ।

यदि दत्तं तपस्तप्तं गुरवो वा मया यदि ।
सम्यगाराधितास्तेन सा जीवतु मम प्रिया ॥ ४

तथा च जन्मप्रभृति यतात्माऽहं धृतव्रतः ।
प्रमद्वरा तथाद्यासौ उत्तिष्ठतु मम प्रिया ॥ ५

[1]प्रलपन्तमतीवार्तं रुरुं दीनतरं तदा ।
देवदूतः समागम्य वचनं चेदमब्रवीत् ॥ ६

देवदूतः—

अभिधत्से[2]भवान्वाचा रुरो दुःखेन तन्मृषा ।
न तु मर्त्यस्य धर्मात्मन् आयुर[3]स्तु गतायुषः ॥ ७

गतायुरेषा कृपणा गन्धर्वाप्सरसोः सुता ।
तस्माच्छोके मनस्तात मा कृथास्त्वं कथंचन ॥ ८

उपायश्चात्र विहितः पूर्वं देवैर्महात्मभिः ।
तं यदीच्छसि कर्तुं त्वं लप्स्यसीमां प्रमद्वराम् ॥ ९

---

1. क-ख-ग—कृष्णे विष्णौ हृषीकेशे लोकेशेऽसुरविद्विषि ।
यदि मे निश्चला भक्तिर्मम जीवतु सा प्रिया ॥
विलप्यमाने तु रुरौ सर्वे देवाः कृपान्विताः ।
दूतं प्रस्थापयामासुः सन्दिश्यास्य हितं वचः ॥
स दूतस्त्वरितोऽभ्येत्य देवानां प्रियकृच्छुचिः ।
उवाच देववचनं रुरुमाभाष्य दुःखितम् ॥
देवैस्सर्वैरहं ब्रह्मन् प्रेषितोऽस्मि तवान्तिकम् ।
त्वद्धितं त्वद्धितैरुक्तं शृणु वाक्यं द्विजोत्तम ॥
[अधिकः पाठः ।]

2. क-ख-ग—ह यद्वाचा 3. क-ख-ग—स्ति

रुरुः—

क उपायः कृतो देवैर् ब्रूहि तत्त्वेन खेचर ।
करिष्येऽहं तथा श्रुत्वा त्रातुमर्हति मां भवान् ॥ १०

देवदूतः—

आयुषोऽर्धं प्रयच्छस्व कन्यायै भृगुनन्दन ।
एवमुत्थास्यति रुरो तव भार्या प्रमद्वरा ॥ ११

रुरुः—

आयुषोऽर्धं प्रयच्छामि कन्यायै खेचरोत्तम ।
भृङ्गाररूपाभरणा सोत्तिष्ठतु मम प्रिया ॥ १२

सूतः—

ततो गन्धर्वराजश्च देवदूतश्च सत्तम ।
धर्मराजमुपेत्येदं वचनं प्रत्यभाषताम् ॥ १३

देवदूतः—

धर्मराजायुषोऽर्धेन रुरोर्भार्या प्रमद्वरा ।
समुत्तिष्ठतु कल्याणी मृतैव यदि मन्यसे ॥ १४

धर्मराजः—

प्रमद्वरा रुरोर्भार्या देवदूत यदीच्छसि ।
उत्तिष्ठत्वायुषोऽर्धेन रुरोरेव समन्विता ॥ १५

सूतः—

एवमुक्ते ततः कन्या सोदतिष्ठत् प्रमद्वरा ।
रुरोस्तस्यायुषोऽर्धेन सुप्तेव वरवर्णिनी ॥ १६

एतद्दृष्टं [1]महत्कर्म रुरोरुत्तमतेजसः ।
तपसातिप्रवृद्धस्य भार्यार्थेऽर्घं प्रयच्छतः ॥ १७

तत इष्टेऽहनि तयोः पितरौ चक्रतुर्मुदा ।
विवाहं तौ च रे[2]जाते परस्परहितैषिणौ ॥ १८

स लब्ध्वा दुर्लभां भार्यां पद्मकिञ्जल्क[3]सप्रभाम् ।
[4]मतिं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥ १९

स दृष्ट्वा जिह्मगान् सर्वांस् तीक्ष्णकोपसमन्वितः ।
अभिहन्ति यदासन्नं गृह्य प्रहरणं तदा ॥ २०

स कदाचिद्वनं विप्रो रुरुरभ्यागमन्महत् ।
शयानं तत्र चापश्यद् डुण्डुभं वयसान्वितम् ॥ २१

तत उद्यम्य दण्डं स कालदण्डोपमं तदा ।
[5]अहनत् कुपितो विप्रस् तमुवाचाथ डुण्डुभः ॥ २२

नापराध्यामि ते किंचिद् अहमद्य तपोधन ।
संरम्भोऽत्र किमर्थं वै मा मा हिंसी रुषान्वितः ॥ २३

रुरु.—

मम प्राणसमा भार्या दष्टासीद्भुजगेन वै ।

क-ख-ग— 1. भविष्यद्धि 2. मा 3. सन्निभाम् 4. व्रतं

5. क-ग— अभ्यघ्नत्
ख— अभ्यघ्नन्

तत्र मे समयो घोर आत्मनोरग वै कृतः ॥ २४

भुजङ्गमान् समाहन्यां यान् यान् पश्येयमित्युत ।
ततोऽहं त्वां जिघांसामि जीवितेन विमोक्ष्यसे ॥ २५

डुण्डुभः—

अन्ये ते भुजगा विप्र ये दशन्तीह मानवान् ।
डुण्डुभानहिशब्देन न त्वं हिंसितुमर्हसि ॥ २६

एकानर्थान्पृथग्धर्मान् [1]एकदुःखान्पृथक्सुखान् ।
डुण्डुभानहिशब्देन न त्वं हिंसितुमर्हसि ॥ २७

सूतः—

इति श्रुत्वा वचस्तस्य भुजगस्य रुरुस्तदा ।
नावधीद्भयसंविग्न ऋषिं मत्वा च डुण्डुभम् ॥ २८

उवाच चैनं भगवान् रुरुस्तं भुजगं तदा ।
केन त्वं भुजग ब्रूहि कोऽसीमां विक्रियां गतः ॥ २९

डुण्डुभः—

अहं पुरा रुरो नाम्ना ऋषिरासं सहस्रपात् ।
सोऽहं शापेन विप्रस्य भुजगत्वमुपागतः ॥ ३०

रुरुः—

किमर्थं शप्तवान्क्रुद्धो द्विजस्त्वां भुजगोत्तम ।
कियन्तं चैव कालं ते वपुरेतद्भविष्यति ॥ ३१

---

1. अ—नै

डुन्डुभः—

सखा बभूव मे पूर्वं खगमो नाम वै द्विजः।
भृशं संशितवाक्तात तपोबलसमन्वितः ॥ ३२

स मया क्रीडता सर्पं कृत्वा तृणमयं तदा।
अग्निहोत्रे प्रमत्तः सन् भीषितः प्रमुमोह वै ॥ ३३

लब्ध्वा च स पुनः संज्ञां मामुवाच तपोधनः।
निर्दहन्निव कोपेन सत्यवाक्संशितव्रतः ॥ ३४

यथावीर्यः कृतः सर्पस् त्वयायं मद्विभीषया।
तथा वीर्यो भुजंगस्त्वं आत्मकोपाद्भविष्यसि ॥ ३५

तस्याहं तपसो वीर्यं जानमानस्तपोधन।
[1]भृशमुद्विग्नहृदयस् तमवोचं तपोधनम् ॥ ३६

प्रयतः सन् प्रमादाच्च प्राञ्जलिः प्रणतः स्थितः।
सखेति साहसं तात हास्यार्थं वै कृतं मया ॥ ३७

क्षन्तुमर्हसि मे ब्रह्मन् शापोऽयं विनिवर्त्यताम्।
स तु मामब्रवीद्दृष्ट्वा भृशमुद्विग्नचेतसम् ॥ ३८

मुहुरुष्णं विनिश्वस्य सुसंभ्रान्तस्तपोधनः।
नानृतं वै मया प्रोक्तं भवितेदं कथञ्चन ॥ ३९

यत्तु वक्ष्यामि ते सर्वं शृणु तत् संशितव्रत।

---

1. क-ख-ग—मुहुरुष्णं विनिश्वस्य सुसंभ्रान्तस्तपोधनः।
[अधिकः पाठः।]

श्रुत्वा च हृदि मे वाक्यं इदमस्तु तवानघ ॥ ४०
उत्पत्स्यति रुरुर्नाम प्रमतेरात्मजः शुचिः ।
तं दृष्ट्वा शापमोक्षस्ते भविता न चिरादिव । ४१
स त्वं रुरुरिति ख्यातः प्रमतेरात्मजः शुचिः ।
स्वरूपं प्रतिलभ्याहं अद्य वक्ष्यामि ते हितम् ॥ ४२
अहिंसा परमो धर्मः सर्वप्राणभृतां वर ।
तस्मात्प्राणभृतः सर्वान् न हिं[1]सेद्ब्राह्मणः क्वचित् ॥ ४३
ब्राह्मणः सौम्यभावेन जायतेति [2]पुरा श्रुतिः ।
वेदवेदाङ्गवित्तात सर्वभूताभय[3]प्रद ॥ ४४
अहिंसा सत्यवचनं क्षमा चेति विनिश्चितम् ।
ब्राह्मणस्य परो धर्मो वेदानां धारणादपि ॥ ४५
क्षत्रियस्य च यो धर्मः स नेहेष्यति वै तव ।
दण्डधारणमुग्रत्वं प्रजानां परिपालनम् ॥ ४६
तदिदं क्षत्रियस्यासीत् कर्मणा शृणु मे रुरो ।
जनमेजयस्य धर्मात्मन् सर्पाणां हिंसने पुरा ॥ ४७
परित्राणं च भीतानां सर्पाणां ब्राह्मणादपि ।
तपोवीर्यबलोपेताद् वेदवेदाङ्गपारगात् ॥ ४८
अस्तीकाद्द्विजमुख्याद्वै सर्पसत्रे द्विजोत्तम ॥ ४८॥

1. क-ख-ग—स्यात् 2. क-ख-ग—परा 3. क-ख-ग—प्रदः

रुरुः—

कथं हिंसितवान्सर्पान् क्षत्रियो जनमेजयः ।
सर्पा वा हिंसितास्तेन किमर्थमृषिसत्तम ॥ ४९॥
किमर्थं मोक्षितास्तेन पन्नगाश्चैव शंस मे ।
अस्तिकेन तदाचक्ष्व श्रोतुमिच्छाम्यशेषतः ॥ ५०॥

ऋषिः—

श्रोष्यासि त्वं रुरो वत्स [1]अस्तीकचरितं महत् ।
ब्राह्मणानां कथयतां इत्युक्त्वान्तरधीयत ॥ ५१॥

सूतः—

रुरुस्त्वथ वनं सर्वं पर्यधावत्समन्ततः ।
तमृषिं [2]द्रष्टुमन्विच्छन् संश्रान्तो न्यपतद्भुवि ॥ ५२॥
लब्धसंज्ञो रुरुः सोऽथ तत्राचख्यौ पितुस्तदा ।
पित्रे तु सर्वमाख्याय डुण्डुभस्य वचोऽर्थवत् ॥ ५३॥
अपृच्छत्पितरं भूयः सोऽस्तिकस्य वचस्तदा ।
[3]आख्यातवांस्तदाऽऽख्यानं डुण्डुभेनाथ कीर्तितम् ॥ ५४॥
तत्कीर्त्यमानं भगवन् श्रोतुमर्हसि तत्त्वतः ।
पिता चास्य तदाख्यानं पृष्टः सर्वं न्यवेदयत् ॥ ५५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
॥ ४ ॥ पौलोमपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ५५॥ श्लोकाः]
॥ समाप्तं पौलोमपर्व ॥

1. क-ख-ग—आस्तिकं 2. क-ख-ग—नष्ट
3. क-ख-ग—यत्तदाख्यानमखिलं

॥ नवमोऽध्यायः ॥

(अथ अस्तीकपर्व ॥ ५ ॥)

अस्तीकस्योपाख्यानम् ॥ १ ॥

शौनकः—

किमर्थं राजशार्दूलः स राजा जनमेजयः ।
सर्पसत्रेण सर्पाणां गतोऽन्तं तद्वदस्व मे ॥ १

अस्तीकस्तु द्विजश्रेष्ठः किमर्थं जपतां वरः ।
मोक्षयामास भुजगान् दीप्तात्तस्माद्धुताशनात् ॥ २

कस्य पुत्रः स राजासीत् सर्पसत्रं य आहरत् ।
स च द्विजातिप्रवरः कस्य पुत्रो वदस्व तत् ॥ ३

श्रोतुमिच्छाम्यशेषेण कथामेतां मनोहराम्[1] ।
अस्तीकस्य पुराणस्य ब्राह्मणस्य तपस्विनः ॥ ४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि नवमोऽध्यायः ॥ ९ ॥
॥ ५ ॥ आस्तीकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ४ श्लोकाः]

1. क-ख-ग—रमाम्

॥ दशमोऽध्यायः ॥

जरत्कारोरुपाख्यानम् ॥ १ ॥

सूतः—

महदाख्यानमास्तीकं यत्रैतत्प्रोच्यते बुधैः ।
सर्वमेतदशेषेण शृणु मे वदतां वर ॥ १

इतिहासमिमं वृद्धाः पुराणं परिचक्षते ।
कृष्णद्वैपायनप्रोक्तं नैमिशारण्यवासि[1]भिः ॥ २

पूर्वं प्रचोदितः सूतः पिता मे रोमहर्षणः ।
शिष्यो व्यासस्य मेधावी ब्राह्म[2]णैरिदमुक्तवान् ॥ ३

तस्मादहमुपश्रुत्य प्रवक्ष्यामि यथातथम् ।
इदमास्तीकमाख्यानं तुभ्यं शौनक पृच्छते ॥ ४

[3]अस्तीकस्य पिता ह्यासीत् पितामहसमो भुवि ।
ब्रह्मचारी यताहारस्तपस्युग्रे रतस्तदा ॥ ५

जरत्कारुरिति ख्यात ऊर्ध्वरेता महानृषिः ।
यायावराणां धर्मज्ञः सततं संशितव्रतः ॥ ६

अटमानः कदाचित्स स्वान् ददर्श पितामहान् ।

---

1. क-ख-ग—न· 2. क-ख-ग—णेष्विद
3. क-ख-ग—कथयिष्याम्यशेषेण सर्वपापप्रणाशनम् ।
[अधिकः पाठः ।]

लम्बमानान्महागर्ते पादैरूर्ध्वैरवाङ्मुखान् ॥ ७

तानब्रवीत्स दृष्ट्वैव जरत्कारुः प्रतापवान् ।

जरत्कारु —

के वै भवन्तो लम्बन्ते गर्तेऽस्मिन्वै ह्यधोमुखाः ॥ ८

वीरणस्तम्बके लग्नाः सर्वतः परिभक्षिते ।

मूषिकेन निगूढेन गर्तेऽस्मिन्नित्यवासिना ॥ ९

पितरः —

यायावरा नाम वयं ऋषयः संशितव्रताः ।

संतानप्रक्षयाद्ब्रह्मन् अधो गच्छाम मेदिनीम् ॥ १०

अस्माकं संततिस्त्वेको जरत्कारुरिति श्रुतः ।

मन्दभाग्योऽल्पभाग्यानां तप एव समा[1]श्रितः ११

न स पुत्राञ्जनयितुं दारान्मूढश्चिकीर्षति ।

तेन लम्बामहे गर्ते संतानप्रक्षयादिह ॥ १२

अनाथास्तेन नाथेन यथा दुष्कृतिनस्तथा ।

कस्त्वं बन्धुरिहा[2]स्माकमनुशोचसि सत्तम ॥ १३

ज्ञातुमिच्छामहे ब्रह्मन् को भवानिह तिष्ठति ।

किमर्थं चैव नः शोच्यान् अनुकम्पितुमिच्छति ॥ १४

जरत्कारु —

मम पूर्वे भवन्तो वै पितरः सपितामहाः ।

ब्रूत किं करवाण्यद्य जरत्कारुरहं स्वयम् । १५

1. क-ख-ग—स्थित. 2. क-ख-ग—वा

पितरः—

यतस्व यत्नवांस्तात संतानाय कुलस्य नः ।
आत्मनोऽर्थेऽस्मदर्थे [1]वा गृहमेधी भवाद्य भो ॥ १६
न हि धर्मफलैस्तात न तपोभिः स्वसंचितैः ।
तां गतिं प्राप्नुवन्तीह पुत्रिणो यां व्रजन्ति च ॥ १७
तदारग्रहणे यत्नं संतत्यर्थे मनः कुरु ।
पुत्रक त्वां नियोक्ष्याम एतन्नः परमं हितम् ॥ १८

जरत्कारुः—

न दारान्वै [2]करिष्येऽहं इति मे भाषितं मनः ।
भवतां तु हितार्थाय करिष्ये दारसंग्रहम् ॥ १९
समयेन च कर्ताऽहं अनेन विधिपूर्वकम् ।
तथा यद्युपलप्स्यामि करिष्ये नान्यथा त्वहम् ॥ २०
सनाम्नी या भवित्री मे दित्सिता चैव बन्धुभिः ।
भैक्षवत्तामहं कन्यां उपयंस्ये विधानतः ॥ २१
दरिद्राय हि मे कन्यां को दास्यति विशेषतः ।
प्रतिग्रहीष्ये भिक्षां तु यदि काश्चित्प्रदास्यति ॥ २२
एवं दारक्रिया[3]योगे प्रयतिष्ये पितामहाः ।
अनेन विधिना शश्वत् करिष्ये नाहमन्यथा ॥ २३
तत्रोत्पत्स्यति चेज्जन्तुर् भवतां तारणाय वै ।
शाश्वतं स्थानमासाद्य मोदन्तु पितरो मम ॥ २४

1. क--च धर्मं इत्येव वाभि भो । ख-ग—धर्मं इत्येव चाभिभो ।
2. क-ख-ग—करिष्यामि बुद्धिर्मे तपसि स्थिता 3. क-ख-ग—हेतोः

सूतः—

ततो निवेशाय तदा स विप्रः संशितव्रतः ।
महीं चचार दारार्थी न च दारां[1]स्त्वविन्दत ॥ २५

स कदाचिद्वनं गत्वा विप्रः पितृवचः स्मरन् ।
चुक्रोश कन्या[2]भिक्षेति तिस्रो वाचः शनैः शनैः ॥ २६

तां वासुकिः प्रत्यगृह्णाद् उद्यम्य भगिनीं तदा ।
न स तां प्रतिजग्राह न सनाम्नीति चिन्तयन् ॥ २७

सनाम्नी[3]मुत्तमां भार्यां गृह्णीयामिति तस्य हि ।
मनो निविष्टमभवज् जरत्कारोर्महात्मनः ॥ २८

तमुवाच महाप्राज्ञो जरत्कारुर्महामनाः ।
किंनाम्नी भगिनीयं ते ब्रूहि स [4]त्वं भुजंगम ॥ २९

वासुकिः—

जरत्कारो जरत्कारुः स्वसेयमनुजा मम ।
त्वदर्थं रक्षिता पूर्वं प्रतीच्छेमां द्विजोत्तम ॥ ३०

सूतः—

[5]मात्रा हि भुजगाः शप्ताः पूर्वं ब्रह्मविदां वर ।
जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः ॥ ३१

क-ख-ग— 1. नवि 2. भिक्षार्थी 3. मुद्यतां 4. त्वं

5. क-ख-ग—एवमुक्त्वा तदा प्रादाद्भार्यार्थे वरवर्णिनीम् ।

[अधिकः पाठः]

तस्य शापस्य शान्त्यर्थं प्रददौ पन्नगोत्तमः ।
स्वसारमृषये तस्मै सुवृत्ताय महात्मने ॥ ३२

स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ।
अस्तीको नाम पुत्रश्च तस्यां जज्ञे महामनाः ॥ ३३

तपस्वी च महात्मा च वेदवेदाङ्गपारगः ।
समः सर्वस्य लोकस्य पितृमातृभयापहः ॥ ३४

अथ कालस्य महतः पाण्डवेयो नराधिपः ।
आजहार महायज्ञं सर्पसत्रमिति श्रुतम् ॥ ३५

तस्मिन्प्रवृत्ते सत्रे तु सर्पाणामन्तकाय वै ।
मोचयामास [1]ताञ्शापाद् अस्तीकः स महातपाः ॥ ३६

नागांश्च मातुलांश्चैव तथा संबन्धिबान्धवान् ।
पितुं च तारयामास संतत्या तपसा तथा ॥ ३७

व्रतैश्च विविधैर्ब्रह्मन् स्वाध्यायैश्चानृणोऽभवत् ।
देवांश्च तर्पयामास यज्ञैर्विविधदक्षिणैः ॥ ३८

ऋषींश्च ब्रह्मचर्येण सन्तत्या च पितामहान् ।
अपहृत्य गुरुं भारं पितॄणां संशितव्रतः ॥ ३९

जरत्कारुर्गतः स्वर्गं सहितः स्वैः पितामहैः ।
अस्तीकं च सुतं प्राप्य धर्मं चानुत्तमं मुनिः ॥ ४०

---

1. क-ख ग—तं शापं

जरत्कारुः सुमहता कालेन स्वर्गमेयिवान् ॥ ४०॥

एतदाख्यानमास्तीकं यथाव[1]त्कथितं मया ।
प्रब्रूहि भृगुशार्दूल किं भूयः कथ्यतामिति ॥ ४१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि दशमोऽध्यायः ॥ १० ॥
॥ ५ ॥ आस्तीकपर्वणि [2]द्वितीयोऽध्यायः ॥ २ ॥

[अस्मिन्नध्याये ४१॥ श्लोका.]

॥ एकादशोऽध्यायः ॥

अस्तीकाख्यानविस्तरः ॥ १ ॥ सर्पाणां गरुडारुणयोश्चोत्पत्तिः ॥ २॥

शौनकः—

सौते कथय तत्त्वेन विस्तरेण कथामिमाम् ।
अस्तीकस्य कवेः साधोः शुश्रूषा परमा हि नः ॥ १

मधुरं कथ्यते सौते श्लक्ष्णाक्षरपदं त्वया ।
प्रीयामहे भृशं तात पितेवेदं प्रभाषसे ॥ २

अस्मच्छुश्रूषणे नित्यं पिता हि निरतस्तव ।
आचष्टे तद्यथाऽऽख्यानं पिता ते त्वं तथा वद ॥ ३

---

1. क-ख-ग—कीर्तितं
2. क-ख-ग—कोशेष्वत्रैव प्रथमाध्यायसमाप्ति·

सूत—

आयुष्मन्निदमाख्यानं आस्तीकं कथयामि ते ।
यथाश्रुतं कथयतः सकाशाच्च पितुर्मया ॥ ४

पुरा देवयुगे ब्रह्मन् पितामहसुते शुभे ।
आस्तां भगिन्यौ रूपेण समुपेतेऽद्भुते तदा ॥ ५

ते भार्ये काश्यपस्यास्तां कद्रूश्च विनता तथा ।
प्रादात्ताभ्यां [1]वरौ प्रीतः पितामहसमः पतिः ॥ ६

काश्यपो धर्मपत्नीभ्यां [2]परया च मुदान्वितः ।
वरातिसर्गं श्रुत्वैव काश्यपादुत्तमं च ते ॥ ७

हर्षादप्रतिमां प्रीतिं प्रापतुः स्म वरस्त्रियौ ।
वव्रे कद्रूः सुतान्नागान् सहस्रं तुल्यतेजसः ॥ ८

द्वौ पुत्रौ विनता वव्रे कद्रूपुत्राधिकौ बले ।
ओजसा तेजसा चैव विक्रमेणाधिकौ सुतौ ॥ ९

तस्यै भर्ता वरं प्रादाद् ईदृशौ तौ भविष्यतः ।
एवमस्त्विति तं चाह काश्यपं विनता तदा ॥ १०

[3]कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ।
कद्रूश्च लब्ध्वा पुत्राणां सहस्रं तुल्यतेजसाम् ॥ ११

क-ख-ग— 1. वरं प्रीतः प्रजापति 2. सम्यक्प्रीत्या समन्वितः
3. सा प्रीता चाभवत्तौ तु

धार्यौ प्रयत्नतो गर्भौ इत्युक्त्वा स महातपाः ।
[1]ते भार्ये वरसंहृष्टे काश्यपो वनमाविशत् ॥ १२
कालेन महता कद्रू[2]रण्डानां दशतीर्दश ।
जनयामास विप्रेन्द्र द्वे त्वण्डे विनता तदा ॥ १३
ततोऽप्यण्डानि निदधुः प्रहृष्टाः परिचारिकाः ।
सोपव[3]स्तुषु कुण्डेषु पञ्चवर्षशतानि च ॥ १४
ततः पञ्चशते [4]वर्षे कद्रूपुत्रा विनिस्सृताः ।
अण्डाभ्यां विनतायास्तु मिथुनं नाप्यदृश्यत ॥ १५
ततः पुत्रार्थिनी देवी व्रीडिता सा तपस्विनी ।
अण्डं बिभेद विनता तत्र पुत्रमदृश्यत ॥ १६
पूर्वार्धकायसं[5]पन्नं इतरेणाप्रकाशितम् ।
स पुत्रो रोषसंपन्नः शशापैनामिति श्रुतम् ॥ १७
सोऽहमेवं कृतो मातस्त्वया लोभपरीतया ।
शरीरेणासमग्रोऽद्य तस्माद्दासी भविष्यसि ॥ १८
पञ्च वर्षशतान्यस्या यया विस्पर्ध[6]से सह ।
एष च त्वां सुतो मात[7]र्दास्यकान्मोक्षयिष्यति ॥ १९
यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात् ।

क-ख-ग— 1. भार्ये परमसंहृष्टे 2. रण्डान्दशशतान्यथ
3. स्नेहेषु 4. पूर्णे 5. पूर्णमितरेणाप्रकाशता
6. ते 7. दासीत्वान्मोक्षयिष्यति

न करिष्यस्यदेहं वा व्यङ्गं वापि तपस्वि[1]नम् ॥ २०
प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया ।

विशिष्टं फलमीप्सन्त्या पञ्चवर्षशतात्परम् ॥ २१

सूतः—

एवं शप्त्वा ततः पुत्रो विनतामन्तरिक्षगः ।
अरुणो दृश्यते ब्रह्मन् प्रभातसमये तदा ॥ २२

[2]गरुडोऽपि यथाकालं जज्ञे पन्नगसूदनः ।
स जातमात्रो विनतां परित्यज्य खमाविशत् ॥ २३

आदास्यन्नात्मनो भोज्यं अन्नं विहितमस्य यत् ।
विधात्रा भृगुशार्दूल क्षुधितस्य बुभुक्षतः ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकादशोऽध्यायः ॥ ११ ॥

॥ ५ ॥ आस्तीकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये २४ श्लोका ।]

---

1. क-ख-ग—नी

2. क-ख-ग—अधिकः पाठः ॥
उद्यन्नथ सहस्रांशुर्दृष्ट्वा तमरुणं प्रभुः ।
स्वतेजसा प्रज्वलन्तमात्मनः समतेजसम् ॥
सारथ्ये कल्पयामास प्रीयमाणस्तमोनुदं ।
सोऽपि तं रथमारुह्य भानोरमिततेजसः ॥
सर्वलोकप्रदीपस्य ह्यमरोप्यरुणोऽभवत् ।

॥ द्वादशोऽध्यायः ॥

भगवता देवानां समुद्रमथने नियमनम् ॥ १ ॥

सूतः—

एतस्मिन्नेव काले तु भगिन्यौ ते तपोधन ।
अपश्यतां समायान्तं उच्चैःश्रवसमन्तिकात् ॥ १
यं [1]ते देवगणाः सर्वे हृष्टरूपाह्यपूजयन् ।
मथ्यमानेऽमृते जातं अश्वरत्नमनुत्तमम् ॥ २
महौघबलमश्वानां दिव्यं जववतां वरम् ।
श्रीमन्तमजरं दिव्यं सर्वलक्षणलक्षितम् ॥ ३

शौनकः

कथं तदमृतं देवैर् मथितं क च शंस मे ।
[2]यत्र [3]जज्ञे महावीर्यः सोऽश्वराजो महाद्युतिः ॥ ४

सूतः—

ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमम् ।
आक्षिपन्तं प्रभां भानोः स्वशृङ्गैः काञ्चनोज्ज्वलैः ॥ ५
काञ्चनाभरणं चित्रं देवगन्धर्वसेवितम् ।
अप्रमेयमनाधृष्यं अधर्मबहुलैर्जनैः ॥ ६
व्यालैराचरितं घोरैर् दिव्यौषधिविदीपितम् ।

1. क-ख-ग—तु
2. क-ख-ग—कारणं चात्र मथने संजातममृतात्परम् ।
3. क-ख-ग—जातो [अधिकः पाठः।]

नाकमावृत्य तिष्ठन्तं उ[1]च्छ्रायेण महागिरिम् ॥ ७

अगम्यं मनसाप्यन्यैर् नदीवृक्ष[2]गणान्वितम् ।
नानापतगसङ्घैश्च नादितं सुमनोहरैः ॥ ८

तस्य पृष्ठं समारुह्य बहुरत्नाचितं शुभम् ।
अनन्तकल्पमद्वन्द्वं सुराः सर्वे महौजसः ॥ ९

ते मन्त्रयितुमारब्धास् तत्रा[3]सीना दिवौकसः ।
अमृतार्थे [4]समागम्य सर्वे चन्द्रपुरोगमाः ॥ १०

तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत् ।
चिन्तयत्सु सुरेष्वेवं मन्त्रयत्सु च सर्वशः ॥ ११

देवैरसुरसङ्घैश्च मथ्यतां कलशोदधिः ।
भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ ॥ १२

सर्वौषधीः समावाप्य सर्वरत्नानि चैव हि ।
मन्थध्वमुदधिं देवा वेत्स्यध्वममृतं ततः ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ ५ ॥ आस्तीकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

[अस्मिन्नध्याये १३ श्लोकाः]

---

1. क-ख-ग—च्छ्रयेण 2. ग—समन्वितम् 3. क-ख-ग—दी
4. क-ख-ग—पुरो गम्य

॥ त्रयोदशोऽध्यायः ॥

वासुकियोक्त्रेण मन्दरेण समुद्रमथनम् ॥ १ ॥ अमृतोत्पत्तिः ॥ २ ॥ मोहिन्या देवेभ्योऽमृतदानम् ॥ ३ ॥

सूतः—

ततोऽभ्रशिखराकारैर् गिरिशृङ्गैरलंकृतम् ।
मन्दरं पर्वतवरं लताजालसमावृतम् ॥ १

नानाविहंगसंघुष्टं नाना[1]व्यालसमाकुलम् ।
किंनरैरप्सरोभिश्च देवैरपि च [2]शोभितम् ॥ २

एकादश सहस्राणि योजनानां समुच्छ्रितम् ।
अधोभूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितम् ॥ ३

[3]समुद्धर्तुं न शक्ता वै सर्वे देवगणास्तदा ।
विष्णुमासीनमभ्येत्य ब्रह्माणं चेदमब्रुवन् ॥ ४

भवन्तावत्र कुरुतां बुद्धिं नैश्रेयसीं पराम् ।
मन्दरोद्धरणे यत्नः क्रियतां [4]तु हिताय नः ॥ ५

तथेति चाब्रवीद्विष्णुर् ब्रह्मणा सह भार्गव ।
अचोदयदमेयात्मा फणीन्द्रं पद्मलोचनः ॥ ६

क-ख-ग— 1. दंष्ट्रि 2. सेवि 3. त 4. च

[1]ततोऽनन्तः समुत्थाय ब्रह्मणा परिचोदितः ।
नारायणेन चाप्युक्तस् तस्मिन्कर्मणि वीर्यवान् ॥ ७

अथ पर्वतराजानं तमनन्तो महाबलः ।
उज्जहार बलाद्ब्रह्मन् सवनं सवनौकसम् ॥ ८

ततस्तेन सुराः सार्धं समुद्रमुपतस्थिरे ।
तमूचुरमृतार्थे वै निर्मथिष्याम[2]ते जलम् ॥ ९

अपांपतिरथोवाच ममाप्यंशो भवेत्ततः ।
सोढाऽस्मि विपुलं मर्दं मन्दरभ्रमणादिह ॥ १०

ऊचुश्च कूर्मराजानं अकूपारे सुरासुराः ।
गिरेरधिष्ठानमस्य भवान्भवितुमर्हति ॥ ११

कूर्मेण तु तथेत्युक्ते पृष्ठे तस्य समर्पितः ।
स शैलस्तस्य चाग्रं वै वज्रेणेन्द्रोऽप्यपीडयत् ॥ १२

मन्थानं मन्दरं कृत्वा ततो योक्त्रं च वासुकिम् ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भसाम् ॥ १३

अमृतार्थं ततो ब्रह्मन् सहिता दैत्यदानवैः ।
एकमग्रमुपाश्लिष्टा नागराज्ञो महाबलाः ॥ १४

विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः ।
वासुकेरग्रमाश्लिष्टा नागराज्ञो महासुराः ॥ १५

---

1. क-ख-ग—सूतः [अधिकः पाठः ।] 2. क-ख-ग—हे

शिर उद्यम्य नागस्य पुनः पुनरवाक्षिपन् ।
अनन्तो भगवान्देवो यतो नारायणः स्थितः ॥ १६

वासुकेरथ नागस्य सहसा क्षिप्यतोऽसुरैः ।
सधूमाश्चार्चिषो वह्नेर् निष्पेतुरसकृन्मुखात् ॥ १७

वासुकेर्मथ्यमानस्य निस्सृतेन विषेण च ।
अभवन्मिश्रितं तोयं तदा भार्गवनन्दन ॥ १८

मथनान्मन्दरेणाथ देवदानवबाहुभिः ।
[1]विषं तीक्ष्णं समुद्भूतं हालाहलमिति श्रुतम् ॥ १९

देवाश्च दानवाश्चैव दग्धास्तेन विषेण ह ।
अपाक्रामंस्ततो भीत्या विषादमगमंस्तदा ॥ २०

ब्रह्माणमब्रुवन्देवाः समेत्य मुनिपुङ्गवैः ।
मथ्यमानेऽमृते जातं विषं कालानलप्रभम् ॥ २१

तेनैव तापिता लोकास् तत्र प्रतिकुरुष्व ह ।
एवमुक्तस्तदा ब्रह्मा दध्यौ लोकेश्वरं हरम् ॥ २२

त्र्यक्षं त्रिशूलिनं रुद्रं देवदेवमुमापतिम् ।
तदाऽथ चिन्तितो देवस् तज्ज्ञात्वा द्रुतमाययौ ॥ २३

तस्याथ देवस्तत्सर्वं आचचक्षे प्रजापतिः ।
तच्छ्रुत्वा देवदेवेशो लोकस्यास्य हितेप्सया ॥ २४

---

1. क-ख-ग—अम्भोनिधेस्समुद्भूतं वासुके र्विषसंयुतम् ।
[अधिकः पाठः ।]

अपिबत्तद्विषं रुद्रः कालानलसमप्रभम् ।
कण्ठे निहितवान्देवो देवानां हितकाम्यया ॥ २५

यस्मात्तु नीलता कण्ठे नीलकण्ठस्ततः स्मृतः ।
पीतमात्रे विषे तत्र रुद्रेणामिततेजसा ॥ २६

देवाः प्रीताः पुनर्जग्मुश् चक्रुर्वै कर्म तत्तथा ।
मथ्यमानेऽमृतस्यार्थे भूयो वै देवदानवैः ॥ २७

वासुकेरथ नागस्य सहसा क्षिप्यतस्तु तैः ।
सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात् ॥ २८

ते धूमसङ्घास्संभूताः महामेघाः सविद्युतः ।
अभ्यवर्षन्सुरगणाञ् श्रमसंतापकर्शितान् ॥ २९

तस्माच्च गिरिकूटाग्रात् प्रच्युताः पुष्पवृष्टयः ।
ततः सुरगणान्माल्यैः सर्वतः समवाकिरन् ॥ ३०

धूमो बभूवात्र महान् घोषो मेघरवोपमः ।
उदधेर्मथ्यमानस्य मन्दरेण सुरासुरैः ॥ ३१

तत्र नानाजलचरा विनिर्धूता महाद्रिणा ।
विलयं समुपाजग्मुः शतशो लवणाम्भसि ॥ ३२

वारुणानि च भूतानि विविधानि महीधरः ।
पातालतलवासीनि विलयं समुपानयत् ॥ ३३

तस्मिंश्च भ्राम्यमाणेऽद्रौ संघृष्यन्तः परस्परम् ।
न्यपतन्पतगोपेताः पर्वताग्रान्महाद्रुमाः ॥ ३४

तेषां संघर्षजश्चाग्निर् अर्चिर्भिः प्रज्वलन्बहु ।
विद्युद्भिरिव नीलाभ्रं आवृणोन्मन्दरं गिरिम् ॥ ३५

ददाह कुञ्जरांश्चैव सिंहांश्चान्यान् सहस्रशः ।
विगतासूनि सत्वानि सर्वाणि विविधानि च ॥ ३६

तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः ।
वारिणा मेघजेनेन्द्रः शमयामास सर्वतः ॥ ३७

ततो नानारसास्तत्र सुस्रुवुः सागराम्भसि ।
ततो द्रुमाणां निर्यासा बहवश्चौषधीरसाः ॥ ३८

तेषाममृतवीर्याणां रसानां तेजसैव च ।
अमरत्वं सुरा जग्मुः काञ्चनस्य च निस्स्रवात् ॥ ३९

अथ तस्य समुद्रस्य सञ्जातमुदकं पयः ।
रसोत्तरैर्विमिश्रं च ततः क्षीरादभूद्घृतम् ॥ ४०

ततो ब्रह्माणमासीनं देवा वरदमब्रुवन् ।
श्रान्ताः स्म सुभृशं ब्रह्मन् नोद्भवत्यमृतं च तत् ॥ ४१

ऋते नारायणं देवं दैत्या नागोत्तमास्तथा ।
चिरारब्धमिदं चापि सागरस्यापि मन्थनम् ॥ ४२

[1]ततो नारायणं देवं [2]ब्रह्मा वचनमब्रवीत् ।
विधत्स्वैषां बलं विष्णो भवानत्र परायणम् ॥ ४३

श्रीभगवान् ।

बलं ददामि सर्वेषां कर्मैतद्धे समास्थिताः ।
क्षोभ्यतां कलशः सर्वैर् मन्दरः परिवर्त्यताम् ॥ ४४

सूत —

नारायणवचः श्रुत्वा बलिनस्ते महोदधेः ।
तत्पयः सहिता भूयश् चक्रिरे भृशमाकुलम् ॥ ४५

तत्र पूर्वं विषं जातं [3]तद्ब्रह्मवचनाच्छिवः । ४५॥

प्राग्रसल्लोकरक्षार्थं ततो ज्येष्ठा समुत्थिता ।
कृष्णाम्बरधरा देवी सर्वाभरणभूषिता ॥ ४६॥

ततः शतसहस्रांशुसमानइव सागरात् ।
प्रसन्नाभः समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ ४७॥

श्रीरनन्तरमुत्पन्ना घृतात्पाण्डुरवासिनी ।
सुरा देवी समुत्पन्ना तुरगः पाण्डुरस्तथा ॥ ४८॥

कौस्तुभश्च मणिर्दिव्य उत्पन्नोऽमृतसंभवः ।
मरीचिविकचः श्रीमान् स च नारायणं गतः ॥ ४९॥

---

1. क-ख-ग—देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः ।
2. क-ख-ग—वचनं चेदमब्रवीत् [अधिकः पाठः ।]
3. क-ख-ग —शिवो ब्रह्माभियाचनात्

पारिजातश्च तत्रैव सुरभिश्च महामुने ।
जातौ तौ च महाब्रह्मन् सर्वकामफलप्रदौ ॥ ५०॥

ततो जज्ञे महाकायश्चतुर्दन्तो महागजः ।
[1]विषं ज्येष्ठा च सोमश्च श्रीः सुरा तुरगस्तथा ॥ ५१॥

[2]कपिला कामवृक्षश्च कौस्तुभश्च महागजः ।
यतो देवास्ततो जग्मुर् आदित्यपदमाश्रिताः ॥ ५२॥

धन्वन्तरिस्तदा देवो वपुष्मानुदतिष्ठत ।
श्वेतं कमण्डलुं बिभ्रद् अमृतं यत्र तिष्ठति ॥ ५३॥

एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः ।
अमृतार्थे महान्नादो ममेदमिति जल्पताम् ॥ ५४॥

ततो नारायणो मायां आस्थितो मोहिनीं प्रभुः ।
स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः ॥ ५५॥

ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः ।
स्त्रियै दानवदैतेयाः सर्वे तद्गतमानसाः ॥ ५६॥

सा तु नारायणी माया धारयन्ती कमण्डलुम् ।

---

1. क-ख—श्रीस्सुरा चैव सोमश्च तुरगश्च मनोजवः
[अधिकः पाठः ।]

2. क-ख—ऐरावतस्स वै नागः नागानां प्रवरश्शुभः ।
[अधिकः पाठः।]

आस्यमानेषु देवेषु पङ्क्त्या च सह दानवैः ॥ ५७॥
देवानपाययद्देवी न दैत्यांस्ते च चुक्रुशुः ॥ ५८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
॥ ५ ॥ आस्तीकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये ५८ श्लोकाः]

॥ चतुर्दशोऽध्यायः ॥

राहुशिरश्छेद ॥ १ ॥ देवासुरयुद्धेऽसुरपराजयः ॥ २ ॥

सूत—

अथावरणमुख्यानि नानाप्रहरणानि च ।
प्रगृह्याभ्यद्रवन्देवान् सहिता दैत्यदानवाः ॥ १

ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् ।
जगाम दानवेन्द्रेभ्यो नरेण सहितः प्रभुः ॥ २

ततो देवगणाः सर्वे पपुस्तदमृतं तदा ।
विष्णोः सकाशात्संप्राप्य [1]संभ्रमे तुमुले सति ॥ ३

पाययत्यमृतं देवान् हरौ बाहुबलेन च ।
निरोधयति चापेन दूरीकृत्य धनुर्धरान् ॥ ४

1. क-ख-ग—सङ्गमे

ततः पिबत्सु तत्काले देवेष्वमृतमुत्तमम् ।
[1]राहुर्विबुधरूपेण दानवः प्रापिबत्तदा ॥ ५
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा ।
आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया । ६
ततो भगवता तस्य शिरश्छिन्नमलंकृतम् ।
चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥ ७
तच्छैलशृङ्गप्रतिमं दानवस्य शिरो महत् ।
चक्रेणोत्कृत्तमपतच् चालयद्वसुधातलम् ॥ ८
ततो वैरविनिर्बद्धः कृतो राहुर्मुखेन वै ।
शाश्वतश्चन्द्रसूर्याभ्यां ग्रसतेऽद्यापि चैव तौ ॥ ९
विहाय भगवांश्चापि स्त्रीरूपमतुलं हरिः ।
नानाप्रहरणैर् दीप्तैर् दानवान्समकम्पयत् ॥ १०
ततः प्रवृत्तः संग्रामः समीपे लवणाम्भसः ।
सुराणामसुराणां च स सुघोरतरो महान् ॥ ११
प्रासास्सुविपुलास्तीक्ष्णा न्यपतन्त सहस्रशः ।
तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ १२
ततोऽसुराश्चक्रभिन्ना वमन्तो रुधिरं बहु ।

---

1. क-ख—ये येऽमृतं पिबन्ति स्म ते ते युध्यन्ति दानवैः ।
[अधिकः पाठः ।]

असिशक्तिगदारुग्णा निपेतुर्धरणीतले ॥ १३

छिन्नानि [1]पट्टिशैश्चापि शिरांसि युधि दारुणैः ।
तप्तकाञ्चनमाल्यानि निपेतुरनिशं तदा ॥ १४

रुधिरेणानुलिप्ताङ्गा निहताश्च महासुराः ।
अद्रीणामिव कूटानि धातुरक्तानि शेरते ॥ १५

ततो हलहलाशब्दः संबभूव समन्ततः ।
हाहाकारः संबभूव तत्र तत्र समन्ततः ॥ १६

अन्योन्यं छिन्दतां शस्त्रैर् आदित्ये लोहितायति ।
परिघैश्चायसैः [2]पीनैस् संनिकृष्टे च मुष्टिभिः ॥ १७

निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ।
छिन्धि भिन्धि प्रधाव त्वं पातयाभिसरेति च ॥ १८

व्यश्रूयन्त महाघोराः शब्दास्तत्र समन्ततः ।
एवं सुतुमुले युद्धे वर्तमाने भयावहे ॥ १९

नरनारायणौ देवौ समाजग्मतुराहवम् ।
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ॥ २०

चिन्तयामास तच्चक्रं विष्णुर्दानवसूदनम् ॥ २०॥

---

1. क-ख-ग—पट्टसैश्चापि शिरांसि विबुधद्विषाम्
2. क-ख-ग—पीतै स्संनिकर्षाच्च मुष्टिभि·

ततोऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रममित्रतापनम् ।
विभावसोस्तुल्यमकुण्ठमण्डलं
सुदर्शनं भीममजेयमुत्तमम् ॥ २१॥

तदागतं ज्वलितहुताशनप्रभं
भयंकरं करिकरबाहुरच्युतः ।
मुमोच वै विपुलमुदग्रतेजवन्
महाप्रभं परनगरावदारणम् ॥ २२॥

तदन्तकं ज्वलितहुताशनप्रभं
पुनः पुनर्न्यपतत वेगवत्तदा ।
व्यदारयद्दितिदनुजान्सहस्रशः
करेरितं पुरुषवरेण संयुगे ॥ २३॥

दहत्कचिज्ज्वलन इवावलेलिहत्
प्रसह्य तानसुरगणान्न्यकृन्तत ।
प्रघोदितं वियति मुहुः क्षितौ तदा
पपौ रणे रुधिरमथो पिशाचवत् ॥ २४॥

अथासुरा गिरिभिरदीनमानसा
मुहुर्मुहुः सुरगणमर्दयंस्तदा ।
महाबला विगलितमेघवर्चसः
सहस्रशो गगनमभिप्रविश्य ते ॥ २५॥

अथाम्बराद्भयजननाः प्रपेदिरे
सपादपा बहुविधा मेघरूपिणः ।
महाद्रयः प्रविगलिताग्रसानवः
परस्परं द्रुतमभिहत्य सस्वनाः ॥ २६॥

ततो धरा प्रविचलिता सकानना
महाद्रिपाताभिहता समन्ततः ।
परस्परं भृशमभिगर्जतां मुहू
[1]रणाजिरे ध्वनिरनिशं प्रवर्तते ॥ २७॥

नरस्ततो वरकनकाग्रभूषणैर्
महेषुभिः पवनपथं समावृणोत् ।
विदारयन्गिरिशिखराणि पत्त्रिभिर्
महा[2]भयेऽसुरगणविग्रहे तदा ॥ २८॥

ततो महीं लवणजलं च सागरं
महासुराः प्रविविशुरर्दिताः शरैः ।
वियद्गतं ज्वलितहुताशनप्रभं
सुदर्शनं परिकुपितं निशाम्य च ॥ २९॥

ततः सुरैर्विजयमवाप्य मन्दरः
स्वमेव देशं गमितः सुपूजितः ।

---

1. क-ख-ग—विमर्दनं भृशमभिसंप्रवर्तते
2. क-ख-ग—हवे

विनाद्य खं दिवमपि चैव सर्वश-
स्ततो गताः सलिलधरा यथागतम् ॥ ३०॥

ततोऽमृतं सुनिहितमेव चक्रिरे
सुराः परां मुदमधिगम्य पुष्कलाम् ।
ददुश्च तं निधिममृतस्य रक्षितुं
किरीटिने बलिभिरथामरैः सह ॥ ३१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
॥ ५ ॥ आस्तीकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[अस्मिन्नध्याये ३१॥ श्लोकाः ।]

॥ पञ्चदशोऽध्यायः ॥

कद्रूविनतयो पणबन्धः ॥ १ ॥ सर्पाणां कद्रूशापः ॥ २ ॥ ब्रह्मणा कश्यपाय विषहरविद्यादानं ॥ ३ ॥

सूतः—

एतत्ते सर्वमाख्यातममृतं मथितं यथा ।
तत्र सोऽश्वः समुत्पन्नः श्रीमानतुलविक्रमः ॥ १

यं निशम्य तदा कद्रूर् विनतामिदमब्रवीत् ।
उच्चैःश्रवास्तु किंवर्णो जानीहि ब्रूहि मा चिरम् ॥ २

विनता—

श्वेत एवाश्वराजोऽयं किं वा त्वं मन्यसे शुभे ।
ब्रूहि वर्णं त्वमप्यस्य ततोऽस्त्र विपणावहे ॥ ३

कद्रूः—

कृष्णबालमहं मन्ये हयमेतं [1]सुमध्यमे ।
एहि सार्धं मया [2]पश्य दासभावाय भामिनि ॥ ४

सूतः—

एवं तु समयं कृत्वा दासभावाय ते मिथः ।
जग्मतुः स्वगृहानेव श्वो द्रक्ष्याव इति स्म ह ॥ ५

तत्र पुत्रसहस्रं तत् कद्रूर्जिह्मं चिकीर्षती ।
आज्ञापयामास.तदा वाला भूत्वाऽञ्जनप्रभाः ॥ ६

प्रविशध्वं हयं क्षिप्रं दासी न स्यामहं यथा ।
तद्वाक्यं नान्वमन्यन्त ताञ्शशाप भुजंगमान् ॥ ७

सर्पसत्रे वर्तमाने पावको वः प्रधक्ष्यति ।
जनमेजयस्य राजर्षेः पाण्डवेयस्य धीमतः ॥ ८

शापमेनं तु शुश्राव स्वयमेव पितामहः ।
अतिक्रूरं समुद्दिष्टं कद्रूा दैवादतीव हि ॥ ९

सार्धं देवगणैः सर्वैर् वचनं चान्वमोदत ।
बहुत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया ॥ १०

1. क-ख-ग—शुचिस्मिते 2. क-ख-ग—देवि दासीभावाय

उग्रवीर्यविषा ह्येते दन्दशूका महाबलाः ।
तेषां तीक्ष्णविषत्वाद्धि प्रजानां च हिताय वै ॥ ११

प्रादाद्विषहणीं विद्यां काश्यपाय महात्मने ॥ ११॥

एवं शप्तेषु नागेषु कद्रू च द्विजसत्तम ।
उद्विग्नः शापतस्तस्याः कद्रूं कार्कोटकोऽब्रवीत् ॥ १२॥

मातरं परमप्रीतस् तथा भुजगसत्तमः ।
आविश्य वाजिनं मुख्यं वालो भूत्वाऽञ्जनप्रभः ॥ १३॥

दर्शयिष्यामि तत्राहमात्मानं काममाश्वस ।
एवमस्त्विति सा पुत्रं प्रत्युवाच यशस्विनी ॥ १४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
॥ ५ ॥ आस्तीकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[अस्मिन्नध्याये १४॥ श्लोकाः ।]

॥ षोडशोऽध्यायः ॥

उच्चैःश्रवसो दर्शनार्थं कद्रूविनतयोर्गमनम् ॥ १ ॥

सूतः—
ततो रजन्यां व्युष्टायां प्रभात उदिते रवौ ।
कद्रूश्च विनता चैव भगिन्यौ ते तपोधन ॥ १

अमर्षिते सुसंरब्धे दास्ये कृतपणे तदा ।
जग्मतुस्तुरगं द्रष्टुं उच्चैःश्रवसमन्तिकात् ॥ २
ददृशाते उभे तत्र समुद्रं निधिमम्भसाम् ॥ २॥
[1]तिमिंगिलझषाकीर्णं मकरैरावृतं तथा ।
सत्त्वैश्च बहुसाहस्रैर् नानारूपैः समावृतम् ॥ ३॥
उग्रैर्नित्यमनाधृष्यं कूर्मग्राहसमाकुलम् ।
आकरं सर्वरत्नानामालयं वरुणस्य च ॥ ४॥
नागानामालयं रम्यमुत्तमं सरितां पतिम् ।
पातालज्वलनावासमसुराणां च बान्धवम् ॥ ५॥
भयङ्कराणां सत्त्वानां पयसां निधिमद्भुतम् ॥ ६
शुभ्रं दिव्यममर्त्यानाममृतस्याकरं परम् ।
अप्रमेयमचिन्त्यं च सुपुण्यजलमद्भुतम् ॥ ७
घोरं जलचराकीर्णं रौद्रं भैरवनिस्वनम् ।
गम्भीरावर्तसलिलं सर्वभूतभयंकरम् ॥ ८
वेलालोलानिलबलक्षोभवेगसमुत्थितैः ।
वीचीहस्तैः प्रचलितैर् नृत्यन्तमिव सर्वतः ॥ ९
चन्द्रवृद्धिक्षयवशाद् उत्थितोर्मिं दुरासदम् ।
पाञ्चजन्यस्य जननं रत्नाकरमनुत्तमम् ॥ १०

1. क-ख-ग—महान्तमुदकाधारं क्षोभ्यमाणं महास्वनम् ।
[अधिकः पाठः ।]

गां विन्दता भगवता गोविन्देनामितौजसा ।
वराहरूपिणा चान्तर् विक्षोभितजलाविलम् ॥ ११
ब्रह्मर्षिणा च तपता वर्षाणां शतमविणा ।
अनासादितगाधं च पातालतलमव्ययम् ॥ १२
अध्यात्मयोगनिद्रां च पद्मनाभस्य सेवतः ।
युगान्तकालशयनं विष्णोरमिततेजसः ॥ १३
बडवामुखदीप्ताग्नेस् तोयहव्यप्रदं शुभम् ।
अगाधतलविस्तीर्णमप्रमेयं सरित्पतिम् ॥ १४
महानदीभिर्वह्वीभिः स्पर्धयेव सहस्रशः ।
अभिसार्यमाणमनिशं तत्र तत्र समन्ततः ॥ १५

गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्जन्तं जलचररावनादितैस्तैः ।
विस्तीर्णं ददृशतुरम्बरप्रकाशं
तेऽगाधं निधिमुरुमम्भसामपारम् ॥ १६

इत्येवं झषमकरोर्मिसंकुलं तं
गम्भीरं विकसितमम्बरप्रकाशम् ।
पातालज्वलनशिखाविदीपितान्तं
पश्यन्त्यौ द्रुतमभिपेततुस्तदानीम् ॥ १७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षोडशोऽध्यायः ॥ १६ ॥
॥ ५ ॥ आस्तीकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[अस्मिन्नध्याये १७ श्लोकाः ।]

॥ सप्तदशोऽध्यायः ॥

मातुर्दास्यनिवृत्तंये अण्डं भित्वा गरुडनिर्गमः ।

सूतः—

[1]तं समुद्रमभिक्रम्य कद्रूर्विनतया सह ।
न्यपतत्तुरगाभ्याशे नचिरादिव शीघ्रगा ॥ १

निशाम्य च बहून्वालान् कृष्णान्पुच्छमुपाश्रितान् ।
[2]विषण्णवदनां कद्रूर् नतां दास्ये न्ययोजयत् ॥ २

ततः सा विनता तस्मिन् पणिते वै पराजिता ।
अभवद्दुःखसंतप्ता दासीभावे नियोजिता ॥ ३

एतस्मिन्नन्तरे चैव गरुडः काल आगते ।
विना मात्रा महातेजा विदार्याण्डमजायत ॥ ४

---

1. क-ख-ग—नागास्तु सहिताः कृत्वा कर्तव्यमिति तद्वचः ।
विस्नेहा विदहेन्माताह्यसंप्राप्तमनोरथा ॥
प्रसन्ना मोक्षयेदस्मांस्तस्माच्छापाच्च भामिनि ।
कृष्णं पुच्छं करिष्यामस्तुरगस्य महात्मनः ॥
तथेति तस्य ते तस्य कृष्णा वाला इव स्थिताः ।
एतस्मिन्नन्तरे ते तु पत्न्यौ वै पणिते तदा ॥
महासत्वबलोपेतः शशिवद् द्योतयन्दिशः ।
कामरूपः कामगमः कामरूपो धियत्तमः ॥
[अधिकः पाठः ।]

2. क-ख-ग—विनतां विषण्णवदनां कद्रूर्दास्ये न्ययोजयत्

अग्निराशिरिवोद्भासन् समिद्धोऽतिभयंकरः ।
प्रवृद्धः स महापक्षी महाकायो नभोगतः ॥ ५

तं दृष्ट्वा शरणं जग्मुः प्रजाः सर्वा विभावसुम् ।
प्रणिपत्याब्रुवंश्चैनं आसीनं विश्वरूपिणम् ॥ ६

मा त्वमग्ने प्रवर्धिष्ठाः कञ्चिन्नो न दिधक्षसि ।
असौ हि राशिः सुमहान् समिद्धस्तव सर्पति ॥ ७

अग्निः—

नैतदेवं यथा यूयं मन्यध्वमसुरार्दनाः ।
गरुडो बलवानेष मम तुल्यः स्वतेजसा ॥ ८

1 सूत.—

एवमुक्तास्ततो देवा गरुडं वाग्भिरस्तुवन ।
अदूरादभ्युपेत्यैनं देवाः सर्षिगणास्तदा ॥ ९

देवाः—

त्वमृषिस्त्वं महाभागस् त्वं देवः पतगेश्वरः ।
[2]त्वं प्रभुस्तपनप्रख्यः [3]परमेष्ठी प्रजापतिः ॥ १०
त्वमिन्द्रस्त्वं हयमुखस् त्वं [4]शर्वस्त्वं जगत्पतिः ।

---

1. क-ख-ग —नागक्षयकरश्चैव काश्यपेयो महाबलः ।
देवानां च हिते युक्तस्त्वहितो दैत्यरक्षसाम् ॥
न भी. कार्या कथञ्चिद्वै पश्यध्वं सहिता मया ।
[अधिकः पाठः ।]
2. क-ख-ग—त्वं प्रभुस्तपनस्सूर्य परमेष्ठी प्रजापतिः ।
3. ख-ग—त्वं नस्त्राणमनुत्तमम् [अधिकः पाठः ।]
4. क-ख-ग—विष्णु. [अधिकः पाठः ।]

त्वं मुखं पद्मजो विप्रस् त्वमग्निः पवनस्तथा ॥ ११
त्वं विधाता च धाता च [1]त्वं विष्णुः सुरसत्तमः ।
त्वं महानभिभूः शश्वद् अमृतं त्वं महद्यशः ॥ १२
त्वं प्रभास्त्वमभिप्रेतस् त्वं नक्षाणमनुत्तमम् ।
त्वं गतिः सततं भक्तान् कथं नः प्राप्नुयाद्भयम् ॥ १३

बलोत्तमः साधुरदीनसत्त्वः
समृद्धिमान्दुष्प्रसहस्त्वमेव ।
तव श्रुतं सर्वमहीनकीर्तेर्
अनागतं चोपगतं च सर्वम् ॥ १४

त्वमुत्तमः सर्वमिदं चराचरं
गभस्तिभिर्भासि दिवाकरो यथा ।
समाक्षिपन्भानुमतः प्रभां मुहुस्
त्वमन्तकः सर्वमिदं ध्रुवाध्रुवम् ॥ १५

दिवाकरः परिकुपितो यथा दहेत्
प्रजास्तथा दहसि हुताशनप्रभ ।
भयंकरः प्रलय इवाग्निरुत्थितो
विनाशयन् युगपरिवर्तनान्तकृत् ॥ १६

खगेश्वरं शरणमुपस्थिता वयं
महौजसं वितिमिरमभ्रगोचरम् ।

---

1. क-ख-ग—त्वमीश्वरस्सुरनायकः

महाबलं गरुडमुपेत्य खेचरं
परावरं वरदमजेयविक्रमम् ॥ १७

[1] सूतः—

[2]एवं स्तुतः सुपर्णस्तु देवैः सर्षिगणैस्तदा ।

---

1. क-ख-ग—त्वदोजसा सकलमिदं प्रतापितं
जगत्प्रभो तपन सुवर्णवर्चसा ।
त्वयार्दिता नभसि विमानगामिनो
विमानिता विषमगतिं प्रयान्ति ॥
सुतस्त्वमसि सदाऽव नः प्रभो
महात्मनः खगवरः काश्यपस्य ।
स मा क्रुशः कुरु जगतो दयां परां
त्वमीश्वरः परममुपैहि पाहि नः ॥
महाशनिस्फुरितसमस्वनेन तं
दिशान्तरं त्रिदिवमिमां च मेदिनीम् ।
चलन्ति नः खग हृदयानि चानघ
निगृह्यतां वपुरिदमग्निसंनिभम् ॥
तव द्युतिं कुपितकृतान्तसन्निभां
निशाम्य नश्चलति मनोऽव्यवस्थितम् ।
प्रसीद नः पतगपते प्रयाचतां
शिवश्च नो भव भगवन्सुखावहः ॥
[अधिकः पाठः]

2. क-ख-ग—वचः श्रुत्वात्मनो देहं सुपर्णः प्रेक्ष्य च स्वयम् ।
ततस्संप्रति हर्तुं स सर्वतः परिचक्रमे ॥
सुपर्णः—
न मे सर्वाणि भूतानि बिभियुर्देहदर्शनात् ।
समुद्विग्नानि रूपान्मे इति तेजस्समाहरत् ॥
[अधिकः पाठः]

तेजसः प्रतिसंहारमात्मन[1]स्तु चकार ह ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
॥ ५ ॥ आस्तीकपर्वणि नवमोऽध्यायः ॥ ९ ॥
[अस्मिन्नध्याये १८ श्लोकाः ।]

॥ अष्टादशोऽध्यायः ॥

विनतागरुडाभ्यां कद्रूसर्पवहनम् ॥ १ ॥

2 सूतः—

1. क-ख-ग—स चकार ह
2. क-ख-ग—ततः कामगमः पक्षी महावीर्यो महाबलः ।
अरुणं चात्मनः पृष्ठमुपारोप्य पितुर्गृहात् ॥
मातुरन्तिकमागम्य परया च मुदा युतः ।
तथारुणिस्सनिक्षिप्तः पुरोदेशे महाद्युतेः ।
सूर्यस्य सहितान् लोकांस्तदा दग्धुं समुद्यतः ॥

शौनकः—

किमर्थं भगवान् सूर्यो लोकान्दग्धुमनास्तदा ।
किमस्यापकृतं देवैर्येनेमं मन्युराविशत् ॥

सूतः—

चन्द्रार्काभ्यां यदाराहुराख्यातो ह्यमृतं पिबत् ।
वैरानुबन्धं कृतवांश्चन्द्रार्काभ्यां तदानघ ॥
बाध्यमानं ग्रहेणाथ आदित्यं मन्युराविशत् ।
सुरार्थं यत्समुत्पन्नो दोषो राहोस्तु सांप्रतम् ॥
बह्वनर्थकरं पापमहोऽहं समवाप्नुयाम् ।
सहाय एव कार्येषु न मे कृच्छ्रेषु जायते ॥

ततः कामगमः पक्षी [1]कामवीर्यो महाबलः ।
अरुणं चात्मनः पृष्ठमुपारोप्य पितुर्गृहात् ॥ १

पश्यन्ति वध्यमानं मां सह लोकैर्दिवौकसः ।
तस्माल्लोकविनाशाय व्यवतिष्ठे न संशयः ॥
एवं कृतमतिस्सूर्यं अस्तमभ्यगमद्गिरिम् ॥
अह्नः प्रारम्भसमये सर्वलोकभयावहः ।
उत्पत्स्यति महाबाहुस् त्रैलोक्यस्य विनाशन ॥
ततो देवास्सर्षिगणा उपगम्य पितामहम् ।
अब्रुवन् किमिदं देव अद्य भानुकृतं भयम् ॥
न तावदृश्यते सूर्यः क्षयोऽयं नः प्रभाति च ।
उदिते भगवन् भानौ कथमेतद्भविष्यति ॥

ब्रह्मा—

एष लोकविनाशाय रविरुद्गन्तुमुद्यतः ।
दृश्यते यदि लोकांश्च भस्मराशिं करिष्यति ॥
तस्य प्रतिविधातं हि विहितं पूर्वमेव हि ।
काश्यपस्य सुतो विद्वानरुणेत्यभिविश्रुतः ॥
महाकायो महातेजाः स स्थास्यति पुरो रवेः ।
करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति ॥
लोकानां शान्तिरेव स्याद् ऋषीणां च दिवौकसाम् ॥

सूतः—

ततः पितामहाज्ञप्तः सर्वं चक्रे तदाऽरुणः ।
उदितश्चैव सविता अरुणेन सदा युतः ॥
एतत्ते सर्वमाख्यातं यत्सूर्यं मन्युराविशत् ।
अरुणश्च तदा चास्य सारथ्यमकरोत्प्रभुः ॥
भूय एव परं ब्रह्म शृणु पूर्वमुदाहृतम् ॥

[अधिकः पाठः ।]

1. क-ख-ग—महा

मातुरन्तिकमागच्छत् परं तीरं महोदधेः ।
यत्र सा विनता तस्मिन् पणिते वै पराजिता ॥ २
अतीव दुःखसंतप्ता दासभावमुपागता ॥ २॥
ततः कदाचिद्विनतां प्रवणां पुत्रसन्निधौ ।
काल आहूय वचनं कद्रूरिदमभाषत ॥ ३॥
नागानामालयं भद्रे सुरम्यं रमणीयकम् ।
समुद्रकुक्षावेकान्ते तत्र मां विनते वह ॥ ४॥
ततः सुपर्णमाता तां आवहत्सर्पमातरम् ।
पन्नगान्गरुडश्चापि मातुर्वचनचोदितः ॥ ५॥
स सूर्यमभितोऽगच्छद् वैनतेयो विहंगमः ।
सूर्यरश्मिपरीताश्च मूर्च्छिताः पन्नगाऽभवन् ॥ ६॥
तदवस्थान्सुतान्दृष्ट्वा कद्रूः शक्रमथास्तुवत् ॥ ७
कद्रूः—
नमस्ते देवदेवेश नमस्ते बलसूदन ।
नमुचिघ्न नमस्तेऽस्तु सहस्राक्ष शचीपते ॥ ८
सर्पाणां सूर्यतप्तानां वारिणा त्वं प्लवो भव ।
त्वमेव परमं त्राणमस्माकममरोत्तम ॥ ९
ईशो ह्यसि पयः स्रष्टुं त्वं ह्यनल्पं पुरंदर ।
त्वमेव मेघस्त्वं वायुस् त्वमग्निर्विद्युतोऽम्बरे ॥ १०

त्वमभ्रघनविक्षेप्ता त्वामेवाहुर्घनं पुनः ॥ ११

त्वं वज्रमतुलं घोरं घोषवांस्त्वं वलाहकः ।
स्रष्टा त्वमेव लोकानां संहर्ता चापराजितः ॥ १२

त्वं ज्योतिः सर्वभूतानां त्वमादित्यो विभावसुः ।
त्वं महाभूतमाश्चर्यं त्वं राजा त्वं सुरोत्तमः ॥ १३

त्वं विष्णुस्त्वं सहस्राक्षस् त्वं देवस्त्वं परायणम् ।
त्वं सर्वममृतं देव त्वं सोमः परमार्चितः ॥ १४

त्वं मुहूर्तस्तिथिस्त्वं च त्वं लवस्त्वं परः क्षणः ।
शुक्लस्त्वं बहुलश्चैव कलाः काष्ठा तथा त्रुटिः ॥ १५

[1]त्वमुत्तमस्सगिरिवना वसुंधरा
सभास्करं वितिमिरमम्बरं तथा ।
महोदधिः सतिमितिमिङ्गिलस्तथा
महोर्मिमान्बहुमकरो झषाकुलः ॥ १६

महद्यशस्त्वमिति सदाऽभिपूज्यसे
मनीषिभिर्मुदितहृदम्बुजे विभो ।
अभिष्टुतः पिबसि च सोममध्वरे
वषट्कृतान्यपि च हवींषि हूयते ॥ १७

---

1. क-ख-ग—संवत्सरर्तवो मासा पक्षाहोरात्रयः क्रमात् ।
[अधिकः पाठः ।]

त्वं विप्रैः [1]सततमिहेज्यसे फलार्थं
वेदान्तेष्वतुलबलौघ गीयसे त्वम् ।
त्वद्धेतोर्यजनपरायणां द्विजेन्द्रा
वेदान्तान्यभिगमयन्ति सर्ववेदैः ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
॥ ५ ॥ आस्तीकपर्वणि - दशमोऽध्यायः ॥ १० ॥
[अस्मिन्नध्याये १८ श्लोकाः ।]

॥ एकोनविंशोऽध्यायः ॥

स्तुत्या तुष्टेन इन्द्रेण कृतं जलवर्षणम् ॥ १ ॥

सूत —

एवं स्तुतस्तदा कद्रू भगवान्हरिवाहनः ।
नीलजीमूतसंघातैः व्योम सर्वं समावृणोत् ॥ १

मेघानाज्ञापयामास वर्षध्वमुदकं शुभम् ।
ते मेघा मुमुचुस्तोयं प्रभूतं विद्युदुज्ज्वलाः ॥ २

परस्परमिवात्यन्तं गर्जन्तः सततं दिवि ।
अद्रिसङ्घमिवाकाशं जलदैस्तु महाद्भुतैः ॥ ३

1. क-ख-ग—सुहितमिहेज्यसे

सृजद्भिरतुलं तोयमसक्तं सुमहारवैः ।
संप्रवृत्तमिवाकाशं धारोर्मिभिरनेकशः ॥ ४

मेघस्तनितनिर्घोषमम्बरं समपद्यत ।
नागानामुत्तमो हर्षस् तथा वर्षति वासवे ॥ ५

आपूर्यत मही चापि सलिलेन समन्ततः ॥ ५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥
॥ ५ ॥ आस्तीकपर्वणि एकादशोऽध्यायः ॥ ११ ॥
[अस्मिन्नध्याये ५॥ श्लोकाः]

॥ विंशोऽध्यायः ॥

गरुडस्य विनतां प्रति दास्यकारणप्रश्नः ॥ १॥ सर्पैः दास्यमोचनोपायकथनम् ॥ २ ॥ गरुडस्यामृताहरणोद्यमः ॥ ३ ॥

सूतः—

सुपर्णेनोह्यमानास्ते जग्मुस्तं देशमाशु वै ।
[1]सागराम्बुपरिक्षिप्तं पक्षिसङ्घविनादितम् ॥ १

1. क-ख-ग—तं द्वीपं मकरावासं विहितं विश्वकर्मणा ॥
इन्द्रतुल्यबला घोरा ददृशुः पूर्वमालयम् ।
सुपर्णसहितास्सर्पाः काननं च मनोरमम् ॥
[अधिकः पाठः]

विचित्रफलपुष्पाभिर् वनराजिभिरावृतम् ।
भवनैश्चावृतं दिव्यैस् तथा पद्माकरैरपि ॥ २

प्रसन्नसलिलैश्चापि ह्रदैश्चित्रैर्विभूषितम् ।
दिव्यगन्धवहैः पुण्यैर् मारुतैरुपवीजितम् ॥ ३

आजिघ्रद्भिरिवाकाशं वृक्षैर्मलयजैरपि ।
शोभितं पुष्पवर्षैश्च मुञ्चद्भिर्मारुतेरितैः ॥ ४

किरद्भिरिव नागेन्द्रांस्तत्र तान् पुष्पवृष्टिभिः ।
मनःसंहर्षजं दिव्यं गन्धर्वाप्सरसां प्रियम् ॥ ५

नानापक्षिरुतं रम्यं कद्रूपुत्रप्रहर्षणम् ।
तत्ते वनं समासाद्य विजह्रुः पन्नगा मुदा । ६
अब्रुवंश्च महावीर्यं सुपर्णं पन्नगोत्तमाः ॥ ६॥

वहास्मानपरं [1]दिव्यं सुरम्यं विपुलोदकम् ।
त्वं हि देशान्बहून्रम्यान् पतन्पश्यसि खेचर ॥ ७॥

स विचिन्त्याब्रवीत्पक्षी मातरं विनतां तदा ।
किं कारणं मया मातः कर्तव्यं सर्पभाषितम् ॥ ८॥

विनता—

दासीभूतास्म्यनार्याया भगिन्याः पतगोत्तम ।
पणं वितथमास्थाय सर्पैरुपधिना कृतम् ॥ ९॥

---

1. क-ख-ग—द्वीपं

सूतः—

तस्मिंस्तु कथिते मात्रा कारणे गगनेचरः ।
उवाच वचनं सर्पान् तेन दुःखेन दुःखितः ॥ १०॥

गरुडः—

किं वाऽऽहृत्य [1]वितीर्याहं किंवा कृत्वेह पौरुषम् ।
दास्याद्वा विप्रमुच्येयं तथ्यं शंसत लेलिहाः ॥ ११॥
श्रुत्वा तमब्रुवन्सर्पा आहरामृतमोजसा ।
तदा दास्याद्विप्रमोक्षो भविता तव खेचर ॥ १२॥

सूतः—

इत्युक्तो गरुडः सर्पैस् ततो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्तुं भक्ष्यमिच्छामि वेदितुम् ॥ १३॥

विनता—

समुद्रकुक्षावेकान्ते निषादालयमुत्तमम् ।
सहस्राणामनेकानां तान्भुक्त्वाऽमृतमानय ॥ १४॥
[2]न तु ते ब्राह्मणान् हन्तुं कार्या बुद्धिः कथंचन ।
अवध्यः सर्वभूतानां ब्राह्मणो ह्यनलोपमः ॥ १५॥
अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः ।
भूतानामग्रभुग्विप्रो वर्णश्रेष्ठस्तथा गुरुः ॥ १६॥

---

1. क-ख-ग—विदित्वा वा किं वा कृत्वैव पौरुषम् ।
2. क-ख-ग—भवनानि निषादानां तत्र सन्ति द्विजोत्तम ॥
पापिनां नष्टलोकानां निर्घृणानां दुरात्मनाम् ।
सहस्राणि ह्यनेकानि तान्भुक्त्वाऽमृतमानय ॥
[अधिकः पाठः]

वैनतेय —

यथाह[1]मनुजानीयां ब्राह्मणं लक्षणैः शुभैः ।
तन्मे कारणतो मातर् वक्तुमर्हसि पृच्छतः ॥ १७॥

विनता—

यस्ते कण्ठबिलं प्राप्तो निगीर्णं बडिशं यथा ।
दहेदङ्गारवत्पुत्र तं विद्याद्ब्राह्मणर्षभम् ॥ १८॥

सूतः—

प्रोवाच चैनं विनता पुत्रहार्दादिदं वचः ।
जानन्त्यप्यतुलं वीर्यमाशीर्वादसमन्वितम् ॥ १९॥
पक्षौ ते मारुतः पातु चन्द्रः पृष्ठं तु पुत्रक ।
शिरस्तु पातु ते वह्निर् भास्करः सर्वमेव तु ॥ २०॥
[2]अहं च ते सदा पुत्र शान्तिस्वस्तिपरायणा ।
[3]अरिष्टं व्रज पन्थानं वत्स कार्यार्थसिद्धये ॥ २१॥

सूतः—

ततः स मातुर्वचनं निशम्य
वितत्य पक्षौ नभ उत्पपात ।

---

1. क-ख-ग—मभि
2. क-ख-ग—विष्णुस्सर्वगतस्सर्वमङ्गानि तव चैव च । [अधिकः पाठः]
3. क-ख-ग—व्रतोपवासनियता भवामि सुरलोकतः ।
भविष्यति न सन्देहो यावदागमनं तव ॥
[अधिकः पाठः]

ततो निषादान्बलवानुपागमत्
बुभुक्षितः काल इवान्तकोपमः ॥ २२॥

ततो निषादानुपसंहरंस्तदा
रजः समुद्धूय नभस्स्पृशं महत् ।
समुद्रकुक्षौ च विशोषयन्पयः
समीपगान्भूमिधरान्विचालयन् ॥ २३॥

ततः स चक्रे महदाननं तदा
निषादमार्गान् प्रतिरुध्य पक्षिराट् ।
ततो निषादास्त्वरितं प्रजग्मुर्
यतो मुखं तस्य भुजंगभोजिनः ॥ २४॥

तदाननं विवृतमतिप्रमाणवत्
समभ्ययुर्गगनमिवार्दिताः खगाः ।
सहस्रशः पवनरजोऽभ्रमोहिता
महानिलप्रचलितपादपे वने ॥ २५॥

ततः खगो वदनममित्रतापनः
समाहरत्परिचपलो महाबलः ।

निष्कृन्तन्बहुविधमत्स्यभक्षिणो
बुभुक्षितो गगनचरेश्वरस्तदा ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि विंशोऽध्यायः ॥ २० ॥

॥ ५ ॥ आस्तीकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥

[अस्मिन्नध्याये २६ श्लोकाः]

॥ एकविंशोऽध्यायः ॥

कण्ठं दहतो ब्राह्मणस्य परित्राणम् ॥ १ ॥ गरुडस्य काश्यपेन संवादः ॥ २ ॥ गजकच्छपपूर्ववृत्तान्तकथनम् ॥ ३ ॥ काश्यपाज्ञया गजकच्छपग्रहणम् ॥ ४ ॥

सूतः—

तस्य कण्ठमनुप्राप्तो ब्राह्मणः सह भार्यया ।
दहन्दीप्त इवाङ्गारस् तमुवाचान्तरिक्षगः ॥ १

द्विजोत्तम विनिर्गच्छ तूर्णमास्यादपावृतात् ।
न हि मे ब्राह्मणो वध्यः पापेष्वपि रतः सदा ॥ २

ब्रुवाणमेवं [1]गरुडं ब्राह्मणः प्रत्यभाषत ।
निषादी मम भार्येयं निर्गच्छतु मया सह ॥ ३

---

1. क-ख-ग—करुणं ब्राह्मणः समभाषत

गरुडः—

एतामपि निषादीं त्वं परिगृह्याशु निष्पत ।
तूर्णं संभावयात्मानमजीर्णं मम तेजसा ॥ ४

सूतः—

निश्चक्राम ततो विप्रो निषादीसहितस्तदा ।
वर्धयित्वा च गरुडमिष्टं देशं जगाम ह ॥ ५

सहभार्ये विनिष्क्रान्ते तस्मिन्विप्रे स पक्षिराट् ।
वितत्य पक्षावाकाशमुत्पपात मनोजवः ॥ ६
ततोऽपश्यत्स पितरं [1]पृष्टश्चाख्यातवान्पितुः ॥ ६॥
[2]अहं हि सर्पैः प्रहितः सोममाहर्तुमुत्तमम् ।
मातुर्दास्यविमोक्षार्थमाहरिष्ये तमद्य वै ॥ ७॥
मात्रा चापि समादिष्टो निषादान्भक्षयेति वै ।
न च मे तृप्तिरभवद् भक्षयित्वा सहस्रशः ॥ ८॥
तस्माद्भोक्तव्यमपरं भगवन्प्रदिशस्व मे ।
यद्भुक्त्वाऽमृतमाहर्तुं समर्थः स्यामहं प्रभो ॥ ९॥

---

1. क-ख-ग—काश्यपं दीप्ततेजसम् ।
तं श्रेष्ठं पततां श्रेष्ठो ब्रह्म ब्रह्मविदां प्रभुम् ॥
पृष्टश्च पित्रा बलवान् वैनतेयः प्रतापवान् ।
क्व गन्तासीति वेगेन मम त्वं वक्तुमर्हसि ॥
[अधिक पाठः]

2. क-ख-ग—माता मे कुशली तात यथाभूता तथा ह्यहम् ।
न च मे कुशलं तात भोजने बहुले सदा ॥
[अधिकः पाठः]

काश्यपः—

[1]आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम् ॥ १०

भ्राता तस्यानुजश्चासीत् सुप्रतीको महातपाः ।
स नेच्छति धनं भ्रात्रा सहैकस्थं महामुनिः ॥ ११

विभागं कीर्तयत्येव सुप्रतीकः स नित्यशः ।
अथाब्रवीत्स तं भ्राता सुप्रतीकं विभावसुः ॥ १२

विभागे बहवो दोषा भविष्यन्ति महातपः ॥ १२॥

विभागं बहवो मोहात् कृतमिच्छन्ति नित्यशः ।
ततो विभक्ताश्चान्योन्यं नाद्रियन्तेऽर्थमोहिताः ॥ १३॥

ततः स्वार्थपरान्मूढान् पृथग्भूतान्स्वकैर्जनैः ।
विदित्वा भेदयन्त्येनान् अमित्रा मित्ररूपिणः ॥ १४॥

विदीर्णाश्चापरे भिन्ना नरकेषु पतन्त्यधः ।
भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्तते ॥ १५॥

तस्माच्चैव विभागार्थं न प्रशंसन्ति पण्डिताः ।
एवमुक्तः सुप्रतीको भागं कीर्तयतेऽनिशम् ॥ १६॥

---

1. क-ख-ग—आसीत्सरो महत्पुण्यं देवलोकेऽतिविश्रुतम् ।
यत्र कूर्मो गजं गत्वा समहर्षदवाङ्मुखः ॥
तयोर्जन्म च ते कर्म प्रवक्ष्याम्यनु पूर्वशः ।
तन्मम त्वं निबोधस्व यत्प्रमाणौ च तावुभौ ॥
शृणु त्वं वत्स भद्रं ते कथां वैराग्यवर्धिनीम् ।
पित्रोरर्थविभागे वै समुत्पन्नं पुराण्डज ॥
[अधिकः पाठः ।]

एवं निर्बध्यमानस्तु शशापैनं विभावसुः ।
गुरुशास्त्रेण बद्धानामन्योन्यमभिशङ्किनाम् ॥ १७॥

तेषां मध्ये त्वमप्येकश् छद्मकृच्च महात्मभिः ॥ १८
निहन्तुं न हि शक्यस्त्वं भेदतो धनमिच्छसि ।
यस्मात्तस्मात्सुप्रतीक हस्तित्वं समवाप्स्यसि ॥ १९

शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत् ।
त्वमप्यन्तर्जलचरः कच्छपः संभविष्यसि ॥ २०

एवमन्योन्यशापात्तौ सुप्रतीकविभावसू ।
गजकच्छपतां प्राप्तौ धनार्थं मूढचेतसौ ॥ २१

रोषदोषानुषङ्गेण तिर्यग्योनिगतावपि ।
परस्परं दोषरतौ प्रमाणबलदर्पितौ ॥ २२

सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ ।
तयोरेकः सरः श्रीमान् समुपैति महागजः ॥ २३

तस्य बृंहितशब्देन कूर्मोऽप्यन्तर्जलेचरः ।
उत्थितोऽसौ महाकायः कृत्स्नं संक्षोभयन्सरः ॥ २४

यं दृष्ट्वाऽऽवेष्टितकरः पतत्येष गजो [1]बली ।
दन्तहस्ताग्रलाङ्गूलपादवेगेन वीर्यवान् ॥ २५

तं विक्षोभयमाणं तु सरो बहुझषाकुलम् ।

1. क-ख-ग—जलम्

स कूर्मोऽप्युन्नतशिरा युद्धायाभ्येति वीर्यवान् ॥ २६
षडुच्छ्रितो योजनानि गजस्तद्द्विगुणायतः ।
कूर्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः ॥ २७
तावेतौ युद्धसंमत्तौ परस्परजयैषिणौ ।
उपभुक्त्वा कूर्मगजौ साधयेप्सितमात्मनः ॥ २८

सूतः—

[1]स तच्छ्रुत्वा पितुर्वाक्यं भीमवेगोऽन्तरिक्षगः ।
करेण गजमेकेन कूर्ममेकेन चाक्षिपत् ॥ २९
समुत्पपात चाकाशं तत उच्चैर्विहङ्गमः ।
स लम्बतीर्थमासाद्य देववृक्षानुपागमत् ॥ ३०
ते भीताः समकम्पन्त तस्य पक्षानिलाहताः ।
न नो भञ्जेदिति तदा दिव्याः कनकशाखिनः ॥ ३१
प्रचलाङ्गांस्तदा दृष्ट्वा मनोहरफलाङ्कुरान् ।

---

1. क-ख-ग—इत्युक्त्वा गरुडं सर्पिर् मङ्गलान्यकरोत्तदा ।
सहपुत्रैस्तु देवैस्ते युद्धं भवतु मङ्गलम् ॥
पूर्णकुम्भो द्विजा गावो यच्चान्यद्भुवि चोत्तमम् ।
शुभं स्वस्त्ययनं चापि भविष्यति तवाण्डज ॥
युध्यमानस्य संग्रामे देवैस्सार्धं महाबल ।
ऋचो यजूंषि सामानि पवित्राणि हवींषि च ॥
रहस्यानि च सर्वाणि सर्वे देवाश्च ते बलम् ।
इत्युक्तो गरुडः पित्रा तं गत्वा देशमन्तिकात् ॥
अपश्यन्निर्मलस्वच्छं नानापक्षिसमाकुलम् ।
[अधिकः पाठः।]

अन्यानतुलरूपाङ्गान् उपचक्राम खेचरः ॥ ३२
राजतैः काञ्चनैश्चैव फलैर्वैदूर्यशाखिनः ।
सागराम्बुपरिक्षिप्तान् भ्राजमानान्महाद्रुमान् ॥ ३३
[1]तमुवाच खगश्रेष्ठं तत्र [2]रोचनपादपः ।
अतिप्रवृद्धः सुमहान् आपतन्तं मनोजवम् ॥ ३४

रोचनः—

एषा मम महाशाखा शतयोजनमायता ।
तां ममास्थाय शाखां त्वं खादेमौ गजकच्छपौ ॥ ३५

ततो द्रुमं पतगसहस्रसेवितं
महीधरप्रतिमवपुः प्रकम्पयन् ।
खगोत्तमो द्रुतमभिगम्य वेगवान्
बभञ्ज तामविरलपत्रसंवृताम् ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
॥ ५ ॥ आस्तीकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

[अस्मिन्नध्याये ३६ श्लोकाः]

---

1. क-ख-ग—तेषां मध्ये महानासीत् पादप सुमनोहरः ।
सहस्रयोजनोत्सेधो बहुशाखासमन्वितः ॥
खगानामालयो दिव्यो नाम्ना रौहिणपादपः ।
यस्य छायां समाश्रित्य सद्यो भवति निर्वृतः ॥
[अधिकः पाठः ।]

2. क-ख-ग—रौहिण

॥ द्वाविंशोऽध्यायः ॥

लम्बमानवालखिल्यरक्षणाय भग्नशाखाग्रहणम् ॥ १ ॥ काश्यपाज्ञया हिमालयगमनम् ॥ २ ॥ तत्र गजकच्छपभक्षणम् ॥ ३ ॥ देवानाममृतरक्षणोद्यमः ॥ ४ ॥

सूतः—

स्पृष्टमात्रा तु पद्भ्यां सा गरुडेन बलीयसा ।
अभज्यत तरोः शाखा भग्नां चैनामधारयत् ॥ १

तां भग्नां स महाशाखां स्मयन्समवलोकयन् ।
तत्रावलम्बतोऽपश्यद् वालखिल्यानवाङ्मुखान् ॥ २

[1]तपस्यतो भयाविष्टो वैनतेयो महाबलः ।
स तद्विनाशसंत्रासाद् उत्पत्य च महाखगः ॥ ३

शाखामास्येन जग्राह तेषामेवान्ववेक्षया ।

---

1. क-ख-ग—वैखानसांश्च शाखायां लम्बमानानधोमुखान् ।
हन्यादेतान्पतन्तीयं शाखेत्यथ विचिन्तयन् ॥
शनैर्विदारयामास सङ्गृह्य गजकच्छपौ ।
अधिदैवं तु तत्कर्म तस्य दृष्ट्वा महर्षयः ॥
विस्मयोत्फुल्लहृदया नाम चक्रुर्महात्मनः ।
गुरुभारं समासाद्य दीनपुच्छं विहङ्गमम् ॥
गरुत्मन्तं खगश्रेष्ठं तस्मात्पन्नगभोजिनम् ।
[अधिकः पाठः ।]

शनैः पर्यपतत्पक्षी पर्वतान्परिचालयन् ॥ ४

एवं सोऽभ्यपतद्देशान् बहून् सगजकच्छपः ।
भयात्तु वालखिल्यानां न च स्थानमविन्दत ॥ ५

स गत्वा पर्वतश्रेष्ठं गन्धमादनमव्ययम् ।
ददर्श काश्यपं तत्र पितरं तपसि स्थितम् ॥ ६

ददर्श तं पिता चापि दिव्यरूपं विहङ्गमम् ।
तेजोवीर्यबलोपेतं मनोमारुतरंहसम् ॥ ७

शैलशृङ्गप्रतीकाशं ब्रह्मदण्डमिवोद्यतम् ।
अचिन्त्यमनभिज्ञेयं सर्वभूतभयंकरम् ॥ ८

महावीर्यधरं साक्षाद् अग्निमिद्धमिवोद्यतम् ।
अप्रधृष्यमजय्यं च देवदानवराक्षसैः ॥ ९

भेत्तारं गिरिशृङ्गाणां नदीजलविशोषणम् ।
लोकसंलोडनं घोरं कृतान्तसमदर्शनम् ॥ १०

तमागतमभिप्रेक्ष्य भगवान्काश्यपस्तदा ।
विदित्वा चास्य संकल्पमिदं वचनमब्रवीत् ॥ ११

काश्यप —

पुत्र मा साहसं कार्षीर् मा सद्यो लप्स्यसे व्यथाम् ।
मा त्वां दहेयुः संक्रुद्धा वालखिल्या मरीचिपाः ॥ १२

सूत.—

प्रसादयामास स तान् काश्यपः पुत्रकारणात् ।
वालखिल्यांस्तपस्सिद्धान् इदमुद्दिश्य कारणम् ॥ १३

काश्यपः—

प्रजाहितार्थमारम्भो गरुडस्य तपोधनाः ।
चिकीर्षति महत्कर्म तदनुज्ञातुमर्हथ ॥ १४

सूतः—

एवमुक्ता भगवता मुनयस्ते समभ्ययुः ।
मुक्त्वा शाखां गिरिं पुण्यं हिमवन्तं तपोधनाः ॥ १५

ततस्तेष्वपयातेषु पितरं विनतात्मजः ।
शाखां व्याक्षिप्य वदनात् पर्यपृच्छत काश्यपम् ॥ १६

गरुड —

भगवन्कनु मुञ्चामि तरुशाखामिमामहम् ।
वर्जितं ब्राह्मणैर्देशमाख्यातु भगवान्मम ॥ १७

सूतः—

ततो निष्पुरुषं देशं हिमसंरुद्धकन्दरम् ।
अगम्यं मनसाप्यन्यैस् तस्याचख्यौ स काश्यपः ॥ १८

तं पर्वतं महाकुक्षिमुद्दिश्य मनसा खगः ।
जवेनाभ्यपतत्तार्क्ष्यः सशाखागजकच्छपः ॥ १९

न तां वार्ध्रः परिणहेच् छतचर्मा महानणुः ।

शाखिनो महतीं शाखां प्रगृह्य प्रययौ खगः ॥ २०
ततः शतसहस्रं स योजनान्तरमागतः ।
कालेन चातिमहता गरुडः पततां वरः ॥ २१
स गत्वा तत्क्षणेनैव पर्वतं वचनात्पितुः ।
अमुञ्चन्महतीं शाखां सस्वनां तत्र खेचरः ॥ २२
पक्षानिलहतश्चात्र प्राकम्पत स शैलराट् ।
मुमोच पुष्पवर्षं च समागलितपादपः ॥ २३
शृङ्गाणि च व्यशीर्यन्त गिरेस्तस्य समन्ततः ।
मणिकाञ्चनचित्राणि शोभयन्ति महागिरिम् ॥ २४
शाखिनो बहवश्चापि शाखयाऽभिहतास्तथा ।
काञ्चनैः कुसुमैर्भान्ति विद्युत्वन्त इवाम्बुदाः ॥ २५
ते हेमसदृशैर्भूयो युक्ताः पर्वतधातुभिः ।
व्यराजञ्छाखिनस्तत्र सूर्यांशुपरिरञ्जिताः ॥ २६
ततस्तस्य गिरेः शृङ्गमास्थाय स खगोत्तमः ।
भक्षयामास गरुडस् तावुभौ गजकच्छपौ ॥ २७
तावुभौ भक्षयित्वा तु स तार्क्ष्यः कूर्मकुञ्जरौ ।
ततः पर्वतकूटाग्राद् उत्पपात महाजवः ॥ २८
प्रावर्तन्ताथ देवानामुत्पाता भयवेदिनः ।
इन्द्रस्य वज्रं दयितं प्रजज्वाल व्यथन्निव ॥ २९

सधूमा चापतत्सार्चिर् दीप्तोल्का नभसि च्युता ।
तथा वसूनां रुद्राणामादित्यानां च सर्वशः ॥ ३०

साध्यानां मरुतां चैव ये चान्ये देवतागणाः ।
स्वं स्वं प्रहरणं तेषां परस्परमुपाद्रवत् ॥ ३१

अभूतपूर्वं संग्रामे तदा देवासुरेष्वपि ।
ववुर्वाताः सनिर्घाताः पेतुरुल्काः समन्ततः ॥ ३२

निरभ्रमेव चाकाशं प्रजगर्ज महास्वनम् ।
देवानामपि यो देवः सोऽप्यवर्षदसृक्तदा ॥ ३३

मम्लुर्माल्यानि देवानां शेमुस्तेजांसि चैव ह ।
उत्पातमेघा रौद्राश्च ववृषुः शोणितं बहु ॥ ३४

रजांसि मुकुटांश्चैषामुत्थितानि प्रधर्षयन् ।
ततस्त्रासससमुद्विग्नः सह देवैः शतक्रतुः ॥ ३५

उत्पातान्दारुणान्पश्यन् इत्युवाच बृहस्पतिम् ॥ ३५॥

किमिदं भगवन् घोरा महोत्पाताः समुत्थिताः ।
न च शत्रुं प्रपश्यामि युधि यो नः प्रधर्षयेत् ॥ ३६॥

बृहस्पतिः—

तवापराधाद्देवेश प्रमादाच्च शतक्रतो ।
तपसा वालखिल्यानां भूतमुत्पन्नमद्भुतम् ॥ ३७॥

काश्यपस्य मुनेः पुत्रो विनतायाश्च खेचरः ।

हर्तुं सोममनुप्राप्तो बलवान्कामरूपवान् ॥ ३८॥

समर्थो बलिनां श्रेष्ठो हर्तुं सोमं विहंगमः ।
सर्वं संभावयाम्यस्मिन् असाध्यमपि साधयेत् ॥ ३९॥

सूत—

श्रुत्वैतद्वचनं शक्रः प्रोवाचामृतरक्षिणः ।
महावीर्यबलः पक्षी हर्तुं सोममिहोद्यतः ॥ ४०॥

युष्मान्संबोधयाम्येष [1]यथा न स हरेद्बलात् ।
अतुलं हि बलं तस्य बृहस्पतिरुवाच मे ॥ ४१॥

सूतः—

तच्छ्रुत्वा विबुधा वाक्यं विस्मिता यत्नमास्थिताः ।
परिवार्यामृतं तस्थुर् वज्री चेन्द्रः शतक्रतुः ॥ ४२॥

धारयन्तो महार्हाणि कवचानि मनस्विनः ।
काञ्चनानि विचित्राणि वैदूर्यविकृतानि च ॥ ४३॥

विविधानि च शस्त्राणि घोररूपाण्यनेकशः ॥ ४४

शततीक्ष्णाग्रधाराणि समुद्यम्य सहस्रशः ।
सविष्फुलिङ्गज्वालानि सधूमानि च सर्वशः ॥ ४५॥

---

1. क-ख-ग—गृह्णीत्वा वरणायुधान् ।
परिवार्यामृतं सर्वे यूयं मद्वचनादिह ।
रक्षध्वं विबुधा वीरा यथा न स हरेद्बलात् ॥
[अधिकः पाठः]

चक्राणि परिघांश्चैव त्रिशूलानि परश्वधान् ।

शक्तीश्च विमलास्तीक्ष्णाः करवालांश्च निर्मलान् ॥ ४६
स्वदेहरूपाश्चादाय गदाश्चोग्रप्रदर्शनाः ॥ ४६॥

तैः शस्त्रैर्भानुमद्भिस्ते दिव्याभरणभूषिताः ।
भानुमन्तः सुरगणास् तस्थुर्विगतकल्मषाः ॥ ४७॥

अनुपमबलवीर्यतेजसो
धृतमनसः परिरक्षणेऽमृतस्य ।
असुरपुरविदारणाः सुरास्ते
ज्वलनसमिद्धवपुःप्रकाशिनश्च ॥ ४८॥

इति समरपरैः सुरैर्वृतं तत्
परिघसहस्रशतैः समाकुलम् ।
विलिखितमिव चाम्बरान्तरं
तपनमरीचिविभावितं बभासे ॥ ४९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

॥ ५ ॥ आस्तीकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥

[अस्मिन्नध्याये ४९॥ श्लोकाः ।]

॥ त्रयोविंशोऽध्यायः ॥

वालखिल्यतपोबलेन गरुडोत्पत्तिकथनम् ॥ १ ॥

शौनकः—

कः प्रमोदो महेन्द्रस्य कोऽपराधश्च सूतज ।
तपसा वालखिल्यानां संभूतो गरुडः कथम् ॥ १

काश्यपस्य द्विजातेश्च कथं वै पक्षिराट् सुतः ।
अधृष्यः सर्वभूतानामवध्यश्चाभवत्कथम् ॥ २

कथं च कामरूपी स कामवीर्यश्च खेचरः ।
एतदिच्छाम्यहं श्रोतुं पुराणे यदि पठ्यते ॥ ३

सूतः—

विषयोऽयं पुराणस्य यन्मां त्वं परिपृच्छसि ।
शृणु मे वदतः सर्वमेतत्संक्षेपतो द्विज ॥ ४

यजतः पुत्रकामस्य काश्यपस्य प्रजापतेः ।
साहाय्यमृषयो देवा गन्धर्वाश्च ददुः किल ॥ ५

तत्रेध्मानयने शक्रो नियुक्तः काश्यपेन हि ।
मुनयो वालखिल्याश्च ये चान्ये देवतागणाः ॥ ६

शक्रः स्ववीर्यसदृशमिध्मभारं गिरिप्रभम् ।
समुद्यम्यानयामास नातिकृच्छ्रादिव प्रभो ॥ ७

अथापश्यदृषीन् सर्वान् ह्रस्वानङ्गुष्ठमात्रकान् ।
पालाशवृत्तिकामेकां वहतः सहितान्पथि ॥ ८

प्रलीनान्स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् ।
क्षिप्यमानान्मृदुबलान् गोष्पदे संप्लुतोदके ॥ ९

तान्स्म सर्वान् स्मयाविष्टो वीर्योन्मत्तः पुरन्दरः ।
अपहास्यात्यगाच्छीघ्रं लङ्घयित्वाऽवमत्य च ॥ १०

ते तु रोषसमाविष्टा भृशं संजातमन्यवः ।
आरेभिरे महत्कर्म तदा शक्रभयंकरम् ॥ ११

जुहुवुस्ते सुतपसो विधिवज्जातवेदसम् ।
मन्त्रैरुच्चावचैर्विप्रा येन कामेन तच्छृणु ॥ १२

कामवीर्यः कामगमो देवराजभयप्रदः ।
इन्द्रोऽन्यः सर्वभूतानां भवेदिति यतव्रताः ॥ १३

इन्द्राच्छतगुणो वीर्ये शौर्ये चैव मनोजवः ।
तपसो नः फलेनाद्य दारुणः समपद्यताम् ॥ १४

तच्छ्रुत्वा भृशसंतप्तो देवराजः शतक्रतुः।
जगाम शरणं तत्र काश्यपं संशितव्रतम् ॥ १५

तच्छ्रुत्वा देवराजस्य काश्यपोऽथ प्रजापतिः ।
वालखिल्यानुपागम्य कर्मसिद्धिमपृच्छत ॥ १६

[1]एवमस्त्विति तं चापि प्रत्यूचुः सत्यवादिनः ।
तान्काश्यप उवाचेदं सान्त्वपूर्वं प्रजापतिः ॥ १७

अयमिन्द्रस्त्रिभुवने नियोगाद्ब्रह्मणः कृतः ।
इन्द्रार्थं च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥ १८

न मिथ्या ब्रह्मणो वाक्यं कर्तुमर्हथ सत्तमाः ।
भवतां च न मिथ्याऽयं संकल्पो हि भवेदिति ॥ १९

भवत्वेव पतत्रीणामिन्द्रोऽतिबलसत्त्ववान् ।
प्रसादः क्रियतां चैव देवराजस्य याचतः ॥ २०

एवमुक्ताः काश्यपेन बालखिल्यास्तपोधनाः ।
प्रत्यूचुरभिसंपूज्य मुनिश्रेष्ठं प्रजापतिम् ॥ २१

इन्द्रार्थोऽयं समारम्भः सर्वेषां नः प्रजापते ।
अपत्यार्थं समारम्भो भवतश्चायमीप्सितः ॥ २२

तदिदं सफलं कर्म त्वयावै प्रतिगृह्यताम् ।
तथा चैनं विधत्स्वात्र यथा श्रेयोऽनुपश्यसि ॥ २३

---

1. क-ख-ग—काश्यपः—
केन कामेन चारब्धं भवद्भिर्होमकर्म च ।
याथातथ्येन मे ब्रूत श्रोतुं कौतूहलं हि मे ॥
बालखिल्याः—
अवज्ञातास्सुरेन्द्रेण मूढेनाकृतबुद्धिना ।
ऐश्वर्यमदमत्तेन सदाचारान्निरस्यता ॥
तद्विघातार्थमारम्भो विधिवत्तस्य काश्यप ।
[अधिकः पाठः]

एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्रकामा यशस्विनी ॥ २४

तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्तारं तामुवाचाथ काश्यपः ॥ २५

आरम्भः सफलो देवि भविताऽयं तवेप्सितः ।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥ २६

तपसा वालखिल्यानां मम संकल्पजौ तथा ।
भविष्यतो महाभागौ पुत्रौ त्रैलोक्यविश्रुतौ ॥ २७

उवाच चैनां भगवान् मारीचः पुनरेव ह ।
धार्यतां मत्प्रसादेन गर्भोऽयं सुमहोदयः ॥ २८

एकः सर्वपतत्रीणामिन्द्रत्वं कारयिष्यति ।
लोकसंभावितो वीरः कामवीर्यो विहङ्गमः ॥ २९

शतक्रतुमथोवाच प्रीयमाणः प्रजापतिः । २९॥

काश्यपः--

त्वत्सखायौ खगावेतौ भ्रातरौ ते भविष्यतः ॥ ३०

नैताभ्यां भविता दोषः सकाशात्ते पुरंदर ।
ज्येतु ते शक्र संतापस् त्वमेवेन्द्रो भविष्यसि ॥ ३१

न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः ।
न चावमान्या दर्पात्ते वाग्विषा भृशकोपनाः ॥ ३२

सूतः—

एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिविष्टपम् ।
विनता चापि सिद्धार्था बभूव मुदिता तदा ॥ ३३

जनयामास पुत्रौ द्वावरुणं गरुडं तथा ।
अरुणस्तयोस्तु विकल आदित्यस्य पुरस्सरः ॥ ३४

पतत्रिणां तु गरुड इन्द्रत्वेनाभ्यषिच्यत ।
तस्यैतत्सुमहत्कर्म श्रूयतां भृगुनन्दन ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ ५ ॥ आस्तीकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

[अस्मिन्नध्याये ३५ श्लोकाः ।]

॥ चतुर्विंशोऽध्यायः ॥

देवगरुडयुद्धं, तत्र देवानां पराजयः ॥ १ ॥

सूतः—

ततस्तस्माद्विजश्रेष्ठः समुदीर्णो महाबलः ।
[1]गरुत्मानपि संप्राप्तो जवेन विबुधान्प्रति ॥ १

तं दृष्ट्वातिबलं चैव प्राकम्पन्त समन्ततः ।

---

1. क-ख-ग—गरुत्मान् पक्षिराट् तूर्णं संप्राप्तो विबुधान् प्रति

परस्परं च [1]प्रत्यघ्नन् सर्वप्रहरणा[2]युधि ॥ २

तत्र चासीदमेयात्मा विद्युदग्निसमप्रभः ।
[3]भौवरः सुमहावीर्यः सोमस्य परिरक्षिता ॥ ३

स तेन पतगेन्द्रेण पक्षतुण्डनखैः क्षतः ।
मुहूर्तमतुलं युद्धं कृत्वा विनिहतो युधि ॥ ४

रजश्चोद्धूय सुमहत् पक्षवातेन खेचरः ।
कृत्वा लोकान्निरालोकान् तेन देवानवाकिरत् ॥ ५

तेनावकीर्णो रजसा देवा मोहमुपाविशन् ।
न चैनं ददृशुश्छन्ना रजसाऽमृतरक्षिणः ॥ ६

एवं संलोडयामास गरुडस्त्रिदिवालयान् ।
पक्षतुण्डप्रहारैश्च देवांश्च विरराद ह ॥ ७

ततो देवः सहस्राक्षस् तूर्णं वायुमचोदयत् ।
विक्षिपेमां रजोवृष्टिं तवेदं कर्म मारुत ॥ ८

अथ वायुरपोवाह तद्रजस्तरसा बली ।
ततो वितिमिरे जाते देवाः शकुनिमर्दयन् ॥ ९

ननाद चोच्चै र्बलवान् महामेघरवः खगः ।
वध्यमानः सुरगणैस् सर्वभूतानि भीषयन् ॥ १०

---

1. क-ख-ग—प्रत्यस्यन् 2. क-ख-ग—न्यपि
3. क—भौवनः; ख-ग—भावनः

उत्पपात महावीर्यः पक्षिराट् परवीरहा ।
तमुपेत्यान्तरिक्षस्थं देवानामुपरि स्थितम् ॥ ११

वर्मिणो विबुधाः सर्वे नानाशस्त्रैरवाकिरन् ।
पट्टसैः परिघैः शूलैर् गदाभिश्च सवासवाः ॥ १२

क्षुरप्रैर्ज्वलितैश्चापि चक्रैरादित्यरूपिभिः ।
नानाशस्त्रविसर्गैस्तु वध्यमानः समन्ततः ॥ १३

कुर्वन्सुतुमुलं युद्धं पक्षिराण्ण ह्यकम्पत ॥ १३॥

विनर्दन्निव चाकाशे वैनतेयः प्रतापवान् ।
पक्षाभ्यामुरसा चैव समन्ताद्व्याक्षिपत्सुरान् ॥ १४॥

ते विक्षिप्ताः सुराः सर्वे प्रजग्मुर्गरुडार्दिताः ।
नखतुण्डहताश्चापि सुस्रुवुः शोणितं बहु ॥ १५॥

साध्याः प्राचीं सगन्धर्वा वसवो दक्षिणां दिशम् ।
प्रजग्मुः सहिता रुद्रैः पतगेन्द्रप्रधर्षिताः ॥ १६॥

दिशं प्रतीचीमादित्या नासत्यौ चोत्तरां दिशम् ।
मुहुर्मुहुः प्रेक्षमाणा युध्यमानमनेकशः ॥ १७॥

अश्वक्रन्देन वीरेण रेणुकेन च पक्षिणा ।
उलूकश्वसनाभ्यां च निमेषेण च पक्षिणा ॥ १८॥

क्रथनेन च शूरेण पतनेन च खेचरः ।

[1]परजेन च संयुद्धं चकार प्रलिहेन च ॥ १९॥

तान्पक्षनखतुण्डाग्रैर् अभिनद्विनतासुतः ।
युगान्तकाले संक्रुद्धः पिनाकीव महाबलः ॥ २०॥

महाबला महावीर्यास् तेन ते बहुधा क्षताः ।
रेजुरभ्रघनप्रख्या रुधिरौघप्रवर्षिणः ॥ २१॥

तान्कृत्वा पतगश्रेष्ठः सर्वानुत्क्रान्तजीवितान् ।
अतिक्रान्तोऽमृतस्यार्थे सर्वतोऽग्निमपश्यत ॥ २२॥

आवृण्वानं महाज्वालमर्चिर्भिः सर्वतोऽम्बरम् ।
दहन्तमिव तीक्ष्णांशुं घोरवायुसमीरितम् ॥ २३॥

[2]ततो नवत्या नवतिं मुखानि
कृत्वा तरस्वी गरुडो महात्मा ।
नदीः समापीय मुखैस्ततस्तैः
स शीघ्रमागत्य पुनर्जवेन ॥ २४॥

ज्वलन्तमाग्निं तमभित्रतापनः
समास्तरत्पत्ररथो नदीभिः ।

---

1. क-ख-ग—प्ररुचेन

2. क-ख-ग—नभस्स्पृशन्तं ज्वालाभिस्सर्वभूतभयङ्करम् ।
[अधिकः पाठः]

ततः प्रचक्रे वपुरन्यदल्पं
प्रवेष्टुकामोऽग्निमभिप्रशाम्य ॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ ५ ॥ आस्तीकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये २५॥ श्लोकाः ।]

॥ पञ्चविंशोऽध्यायः ॥

अमृताहरणम् ॥ १ ॥ विष्णुगारुडसंवादश्च ॥ २ ॥

सूतः—

जाम्बूनदमयो भूत्वा मरीचिविकचोज्ज्वलः ।
प्रविवेश बलात्पक्षी वारिवेग इवार्णवम् ॥ १

स चक्रं क्षुरपर्यन्तमपश्यदमृतान्तिके ।
परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम् ॥ २

ज्वलनार्कप्रभं घोरं [1]किङ्किणीजालसंवृतम् ।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्मितम् ॥ ३

तस्यान्तरं स दृष्ट्वैव पर्यवर्तत खेचरः ।
अरान्तरेणाभ्यपतत् संक्षिप्याङ्गं क्षणेन ह ॥ ४

---

1. क-ख-ग—छेदनं सोमहारिणाम् ।

[1]अथ चक्रस्य चैवास्तां दीप्तानलसमद्युती ।
विद्युज्जिह्वौ महाकायौ दीप्तास्यौ दीप्तलोचनौ ॥ ५
चक्षुर्विषौ महावीर्यौ नित्यं क्रुद्धौ तरस्विनौ ।
रक्षार्थमेवामृतस्य ददर्श भुजगोत्तमौ ॥ ६
सदा संरक्तनयनौ सदा चानिमिषेक्षणौ ।
तयोरेकोऽपि यं पश्येत् स तूर्णं भस्मसाद्भवेत् ॥ ७
[2]तयोश्चक्षूंषि रजसा सुपर्णस्तु समावृणोत् ।
अदृष्टरूपस्तौ चापि सर्वतः पर्यकालयत् ॥ ८
तयोरङ्गे समाक्रम्य वैनतेयोऽन्तरिक्षगः ।
आच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥ ९
समुत्पाट्यामृतं तत्तु वैनतेयस्तदा बली ।
उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्यवान् ॥ १०
अपीत्वैवामृतं पक्षी परिगृह्याशु वीर्यवान् ।
आगच्छदपरिश्रान्त आवार्यार्कप्रभां खगः ॥ ११
विष्णुना तु तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस् तेनातुल्येन कर्मणा ॥ १२

---

1. क-ख-ग—अधश्चक्रस्य
2. क-ख-ग—तौ दृष्ट्वा सहसा खेदं जगाम विनतात्मजः ।
कथमेतौ महावीर्यौ जेतव्यौ हरिभोजिनौ ।
इति संचिन्त्य गरुडस् तयोस्तूर्णं निराकरः ।
[अधिकः पाठः]

तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरिक्षगः ॥ १३

उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्च स्याममृतेन विनाऽप्यहम् ॥ १४

प्रतिगृह्य वरौ तौ च गरुडो विष्णुमब्रवीत् ॥ १४॥

भवतोऽपि वरं दद्मि वृणीतां भगवानपि ।
तं वव्रे वाहनं कृष्णो गरुत्मन्तं महाबलम् ॥ १५॥

ध्वजं च चक्रे भगवान् उपरि स्थास्यसीति तम् ।
[1]तथेत्येवाब्रवीत्पक्षी भगवन्तं सनातनम् ॥ १६॥

[2]अभ्युपेत्य खगं त्विन्द्रो वज्रेणाङ्के न्यपातयत् ।
विहङ्गमं सुराञ्जित्वा हरन्तममृतं बलात् ॥ १७॥

तमुवाचेन्द्रमाक्रान्तो गरुडः पततां वरः ॥ १८

प्रहसञ्श्लक्ष्णया वाचा तथा वज्रसमाहतः ।
ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसंभवम् ॥ १९

वज्रस्य च करिष्यामि तव चैव शतक्रतो ।
एष पत्रं त्यजाम्येकं यस्यान्तं नोपलप्स्यसे ॥ २०

---

1. क-ख-ग—एतस्मिन्नेव काले तु भगवान्हरिवाहनः ।
वव्राज तरसा वेगाद् वायुमार्गान्मनोजवः ॥
[अधिकः पाठः]

2. क-ख-ग—अथाभ्येत्य तु खं त्विन्द्रो वज्रेणैवाभ्यताडयत् ।

न हि वज्रनिपातेन वेदना मेऽस्ति काचन ।
इत्येवमुक्त्वा गरुडः पत्रं त्वेकं व्यसर्जयत् । २१
तत्रैव सर्वभूतानि विस्मितान्यब्रुवंस्तदा ।
सुरूपं पत्रमालक्ष्य सुपर्णोऽयं भवत्विति ॥ २२
[1]दृष्ट्वा तदद्भुतं चापि सहस्राक्षः पुरंदरः ।
खगो महदिदं भूतमिति मत्वाऽभ्यभाषत ॥ २३
इन्द्रः—
बलं वेदितुमिच्छामि यत्ते बलमनुत्तमम् ॥ २३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ ५ ॥ आस्तीकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये २३॥ श्लोकाः ।]

॥ षड्विंशोऽध्यायः ॥

विनताया दास्यमोचनम् ॥ १ ॥ शक्रेणामृताहरणं च ॥ २ ॥

[2]गरुडः—
सख्यमस्तु त्वया देव यथेच्छसि पुरंदर ।
बलं तु मम जानीहि महत्त्वासह्यमेव च ॥ १

1. क-ख-ग—त्रिधा कृत्वा तदा वज्रं गतं स्थानं स्वमेव हि ।
[अधिकः पाठः]
2. क-ख-ग—इत्येवमुक्तो गरुडः प्रत्युवाच शचीपतिम् ।
[अधिकः पाठः]

कामं नैव प्रशंसन्ति सन्तः स्वबलसंस्तवम् ।
[1]गुणसंकीर्तनं चापि [2]स्वयमेव शतक्रतो ॥ २

[3]सखेति कृत्वा तु सखे! पृष्टो वक्ष्याम्यहं त्वया ।
न ह्यात्मस्तवसंयुक्तं वक्तव्यमनिमित्ततः ॥ ३

सपर्वतवनामुर्वीं ससागरनदीमिमाम् ।
पक्षेणैकेन वै शक्र त्वां चैवात्रावलम्बिनम् ॥ ४

सर्वान्सांपिण्डितान्वापि लोकान्स्थावरजङ्गमान् ।
वहेयमपरिश्रान्तो विद्धीदं मे महद्बलम् ॥ ५

सूतः—

इत्युक्त्वा वचनं वीरः किरीटी श्रीमतां वरः ।
आह शौनक [4]देवेन्द्र सर्वभूतहिते रत ॥ ६

प्रगृह्यतामिदानीं मे सख्यमानन्त्यमुत्तमम् ।
न कार्यं तव सोमेन मम सोमः प्रदीयताम् ॥ ७

अस्मांस्ते [5]हि च बन्धेयुर् येभ्यो दद्याद्भवानिमम् ॥ ७ ॥

---

1. क-ख-ग—अनिमित्तं सुरश्रेष्ठ सद्यः प्राप्नोति गर्हणाम् ।
[अधिकः पाठः]
2. क-ख-ग--पृष्टो नान्येन गोपते।
3. क-ख-ग—वक्तव्यं न तु वक्तव्यं स्वयमेव शतक्रतो ।
[अधिकः पाठः]
4. क-ख-ग—न्द्रस्सर्वभूतप्रभुः प्रभुः ।
5. क-ख-ग—नु प्रबाधेयुः

गरुडः—

किंचित्कारणमुद्दिश्य सोमोऽयं नीयते मया ।
न दास्यामि समापातुं सोमं कस्मैचिदप्यहम् ॥ ८॥

यत्रेमं तु सहस्राक्ष निक्षिपेयमहं स्वयम् ।
समादाय ततस्तूर्णं व्रजेथास्त्रिदिवेश्वर ॥ ९॥

शक्रः—

वाक्येनानेन तुष्टोऽस्मि यत्त्वयोक्तमिहाण्डज ।
यमिच्छसि वरं मत्तस् तं गृहाण खगोत्तम ॥ १०॥

सूतः—

इत्युक्तः प्रत्युवाचेदं कद्रूपुत्राननुस्मरन् ।
स्मृत्वा चैवोपधिकृतान् मातुर्दास्यनिमित्ततः ॥ ११॥

गरुडः—

ईशोऽहमपि सर्वस्य करिष्यामि यथेप्सितम् ।
भवेयुर्भुजगाः शक्र मम भक्ष्या महाबलाः ॥ १२॥

सूतः—

तथेत्युक्त्वाऽन्वगच्छत्तं शक्रो दानवसूदनः ॥ १३

हरिष्यामि विनिक्षिप्तं सोममित्यनुभाष्य तम् ।
आजगाम ततस्तूर्णं सुपर्णो मातुरन्तिके ॥ १४

[1]अथ सर्पानुवाचेदं सर्वान्परमहृष्टवत् ॥ १४॥

गरुडः—

इदमानीतममृतं निक्षिपामि कुशेषु वः ।

स्नाता मङ्गलसंयुक्तास् ततः प्राश्नीत पन्नगाः ॥ १५॥

अदासी चैव मातेयम् अद्यप्रभृति चास्तु मे ।

यथोक्तं भवतामेतद् वचो मे प्रतिपादितम् ॥ १६॥

ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तं तथेत्युत ।

शक्रोऽप्यमृतमाक्षिप्य जगाम त्रिदिवं पुनः ॥ १७॥

अथागतास्तमुद्देशं सर्पाः सोमार्थिनस्तदा ।

स्नाताश्च कृतजप्याश्च हृष्टाश्च कृतमङ्गलाः ॥ १८॥

[2]तद्विज्ञाय हृतं सर्पाः [3]शक्रमायाकृतं च तत् ।

---

1. क-ख-ग—विनयावनतो भूत्वा वचनं चेदमब्रवीत् ॥

गरुडः—

इदमानीतममृतं देवानां भवनान्मया ।
प्रशाधि किमितो मातः करिष्यामि शुभव्रते ॥

विनता—

परितुष्टाहमेतेन कर्मणा तव पुत्रक ।
अजरश्चामरश्चैव देवानां सुप्रियो भव ॥ [अधिकः पाठः]

2. क-ख-ग—परस्परकृतद्वेषाः सोमप्राशनकर्मणि ।
अहं पूर्वमहं पूर्वमित्युक्त्वा ते समाद्रवन् ॥

3. क-ख-ग—प्रति [अधिकः पाठः]

सोमस्थानमिदं चेति दर्भांस्ते लिलिहुस्तदा ॥ १९॥
ततो द्वैधीकृता जिह्वाः सर्पाणां तेन कर्मणा ।

अभवंश्चामृतस्पर्शाद् दर्भास्तेऽथ पवित्रिणः ॥ २०॥

[1]ततः सुपर्णः परमप्रहर्षवान्
विहृत्य मात्रा सह तत्र कानने ।
भुजंगभक्षः परमार्थतः खगैर्
अहीनकीर्तिर्विनतामनन्दयत् ॥ २१॥

इमां कथां यः शृणुयान्नरः सदा
पठेत वा द्विजजनमुख्यसंसदि ।
असंशयं त्रिदिवमियात्स पुण्यभाङ्-
महात्मनः पतगपतेः प्रकीर्तनात् ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि पञ्चत्रिंशोऽध्यायः ॥ २६ ॥

॥ ५ ॥ आस्तीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

[अस्मिन्नध्याये २२॥ श्लोकाः ।]

॥ सौपर्णं समाप्तम् ॥

---

1. क-ख-ग—नागाश्च वञ्चिता भूत्वा विसृज्य विनतां ततः ।
विषादमगमंस्तीव्रं गरुडस्य बलात्प्रभो ॥
[अधिकः पाठः]

॥ सप्तविंशोऽध्यायः ॥

सर्पनामकथनम् ॥ १ ॥

शौनकः—

भुजङ्गमानां शापस्य मात्रा चैव सुतेन च ।
विनतायास्त्वया प्रोक्तं कारणं सूतनन्दन ॥ १

वरप्रदानं भर्त्रा च कद्रूविनतयोस्तथा ।
नामनी चैव ते प्रोक्ते पक्षिणोर्वैनतेययोः ॥ २

पन्नगानां तु नामानि न कीर्तयसि सूतज ।
प्राधान्येन तु नामानि श्रोतुमिच्छामहे वयम् ॥ ३

सूतः—

बहुत्वान्नामधेयानि भुजंगानां तपोधन ।
न कीर्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु ॥ ४

शेषस्तु प्रथमो जातो वासुकिस्तदनन्तरम् ।
ऐरावतस्तक्षकश्च कार्कोटकधनञ्जयौ ॥ ५

कालियो मणिनागश्च नागश्चापूरणस्तथा ।
नागस्तथा [1]पञ्चशिरा एलापत्रोऽथ वामनः ॥ ६

नीलानीलौ तथा नागौ कल्माषशबलौ तथा ।
आर्यकश्चार्द्रकश्चैव नागश्च हलपोतकः ॥ ७

1. क-ख-ग—पिञ्जरक

सुमुखो दुर्मुखश्चैव विमुखोऽसिमुखस्तथा ।
विमलः पिण्ड[1]कश्चैव शङ्खो वालशिखस्तथा ॥ ८

आप्तकोटरकश्चैव शङ्खपालशिखिस्तथा ।
निष्टूरिको हेमगुहो नहुषः पिङ्गलस्तथा ॥ ९

बाह्य[2]कर्णो हस्तिबकस् तथा मुद्गरपिण्डकः ।
कम्बलाश्वतरौ चापि नागः का[3]लिकटस्तथा ॥ १०

[4]वृत्तसंवृत्तकौ नागौ द्वौ च पद्मावितिं श्रुतौ ।
नागः शङ्खनकश्चैव तथा [5]गन्धवृकोदनः ॥ ११

क्षेमकश्च तथा नागो नागः [6]पिण्डीरकस्तथा ।
करवीरः पुष्पदंष्ट्रो [7]बिल्वको बिल्वपाण्डकः ॥ १२

मूषिकादः शङ्खशिराः पूर्णदंष्ट्रो हरिद्रकः ।
[8]अथानामित्रो ज्योतीकः पन्नगः शिवगस्तथा ॥ १३

कौरव्यो धृतराष्ट्रश्च पुष्करः शल्यकस्तथा ।
विराजश्च सुबाहुश्च [9]शालिपिण्डश्च वीर्यवान् ॥ १४

हस्तिभद्रः पिठरकः मुखरः कोणनासिकः ।
कुञ्जर[10]स्तुरगश्चैव तथा नागः प्रभाकरः ॥ १५

क-ख-ग—
1. कः क्षुप्तशङ्खो विलिखितस्तथा 2. कल्पो हस्तिपदः
3. लिङ्गकस्तथा 4. वृत्रस्संवर्तको 5. चण्डप्रकोपनः
6. पिण्डारकः 7. बैल्वको बिल्वपाण्डुकः ।
8. अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा ।
9. शल 10. :कञ्जरश्चैव तथा नागः प्रहारकः ।

कुमुदः कुमुदाक्षश्च [1]तिकिरिर्हरिलस्तथा ।
[2]कर्करार्कर्करौ लोहौ तुण्डोदरमहोदरौ ॥ १६

एते प्राधान्यतो नागाः कीर्तिता द्विजसत्तम ।
बहुत्वान्नामधेयानाम् इतरे नानुकीर्तिताः ॥ १७

एतेषां प्र[3]भवो यश्च प्रभवस्य च संततिः ।
असङ्ख्येयेति मत्त्वा तान् न ब्रवीमि द्विजोत्तम ॥ १८

बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
अशक्यान्येव सङ्ख्यातुं भुजंगानां तपोधन ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

॥ ५ ॥ आस्तीकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

[अस्मिन्नध्याये १९ श्लोकाः]

॥ अष्टाविंशोऽध्यायः ॥

शेषस्य ब्रह्माज्ञया पृथ्वीधारणांगीकरणम् ॥ १ ॥

शौनकः—
एते वै भुजगास्तात वीर्यवन्तो दुरासदाः ।
शापतत्त्वमविज्ञाय कृतवन्तो नु किं परम् ॥ १

क-ख-ग— 1. तित्तिरि र्हलिलस्तथा । 2. कर्करार्ककरौ चोभौ कुण्डोदर 3. सवो यश्च प्रसवस्य

सूतः—

तेषां तु भगवाञ्छेषः त्यक्त्वा कद्रूसुतानपि ।
तपो विपुलमास्थाय वायुभक्षो जितेन्द्रियः ॥ २

गन्धमादनमासाद्य बदर्यां च तपोधनः ।
गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥ ३

तेषु तेषु च पुण्येषु तीर्थेष्वायतनेषु च ।
एकान्तशीलो नियतः सततं विजितेन्द्रियः ॥ ४

[1]तप्यमानं तपो घोरं ददर्श च पितामहः ॥ ४॥

[2]ब्रह्मा—

किमिदं कुरुषे शेष प्रजानां स्वस्ति वै कुरु ॥ ५

त्वं हि तीव्रेण तपसा प्रजास्तापयसेऽनघ ।
ब्रूहि कामं च मे शेष यत्ते हृदि चिकीर्षितम् ॥ ६

शेषः—

सोदर्या मम सर्वे हि भ्रातरो मन्दचेतसः ।
सह तैर्नोत्सहे वस्तुं तद्भवाननुमन्यताम् ॥ ७

---

1. क-ख-ग—शीतवातातपसहः परित्यक्तप्रियाप्रियः ।
धर्मे मनस्समाधाय स्वानी त्रिषवणे तथा ॥
[अधिकः पाठः]

2. क-ख-ग—परिशुष्कमांसत्वक्स्नायुं जटाचीरधरं प्रभुः ।
तमब्रवीत्सत्यधृतिं तप्यमानं पितामहः ॥
[अधिकः पाठः]

अभ्यसूयन्ति सततं परस्परमिमित्रवत् ।
ततोऽहं तप आतिष्ठे नैतान्पश्येयमित्युत ॥ ८

न मर्षयन्ति सततं ससुतां विनतां च ते ।
अस्माकं चापरो भ्राता वैनतेयः पितामह ॥ ९

तं च द्विषन्ति तेऽत्यर्थं स चापि सुमहाबलः ।
वरप्रदानात्स्वपितुः काश्यपस्य महात्मनः ॥ १०

सोऽहं तपः समास्थाय मोक्ष्यामीदं कलेबरम् ।
कथं मे प्रेत्यभावेऽपि तैर्न स्यात्सह सङ्गमः ॥ ११

ब्रह्मा—

जानामि शेष सर्वेषां भ्रातॄणां ते विचेष्टितम् ॥ ११॥

मातुश्चाप्यपराधाद्वै भ्रातॄणां ते महद्भयम् ।
कृतोऽत्र परिहारश्च पूर्वमेव भुजङ्गम ॥ १२॥

भ्रातॄणां तव सर्वेषां [1]न शोकं कर्तुमर्हसि ॥ १३
शापादस्मान्महाघोराद् उक्तान्मात्रा महाबल ।

वृणीष्व च वरं मत्तः शेष यत्तेऽभिकाङ्क्षितम् ॥ १४
दित्सामीह वरं तेऽद्य प्रीतिर्मे परमा त्वयि ।

दिष्ट्या च बुद्धिर्धर्मे ते निविष्टा पन्नगोत्तम ॥ १५
अतो भूयश्च ते बुद्धिर् धर्मे भवतु सुस्थिरा ॥ १५॥

1. क-ख-ग—सुवृत्तानां विमोक्षणम्

शेषः—

एष एव वरो मेऽद्य काङ्क्षितः प्रपितामह ।
धर्मे मे रमतां बुद्धिः शमे तपसि चेश्वर ॥ १६॥

ब्रह्मा—

प्रीतोऽस्म्यनेन ते शेष दमेन प्रशमेन च ।
त्वया त्विदं वचः कार्यं मन्नियोगात्प्रजाहितम् ॥ १७॥

इमां महीं शैलवनोपपन्नां
ससागरां सनगरपत्तनां च ।
त्वं शेष सम्यक् चलितां यथावत्
संगृह्य तिष्ठस्व यथाऽचला स्यात् ॥ १८॥

शेषः—

यथाऽऽह देवो वरदः प्रजापतिर्
महीपतिर्भूतपतिर्जगत्पतिः ।
तथा महीं धारयिताऽस्मि निश्चलां
प्रयच्छतां मे शिरसि प्रजापते ॥ १९॥

ब्रह्मा—

अथो महीं गच्छ भुजङ्गमोत्तम
स्वयं तवैषा विवरं प्रदास्यति ।
इमां महीं धारयता त्वया हि मे
महत्प्रियं शेष कृतं भविष्यति ॥ २०॥

शेषोऽसि नागोत्तम धर्मदेवो
महीमिमां धारयिता त्वमेकः ।
अनेकभोगान् परिगृह्य सर्वान्
यथाहमेवं बलभिद्यथा वा ॥ २१॥

सूतः--

तथेति कृत्वा विवरं प्रविश्य स
प्रभुर्भुवो भुजगवराग्रजः स्थितः ।
बिभर्ति देवीं शिरसा महीमिमां
समुद्रनेमिं परिगृह्य सर्वशः ॥ २२॥

अधो भूमेर्वसत्येव नागोऽनन्तः प्रतापवान् ।
धारयन्वसुधामेकः शासनाद्ब्रह्मणः प्रभोः ॥ २३॥

सुपर्णं च सहायं वै भगवानमरोत्तमः ।
प्रादादेनमनन्ताय वैनतेयं पितामहः ॥ २४॥

अनन्ते च प्रयाते तु वासुकिः सुमहाबलः ।
अभ्यषिच्यत नागैस्तु दैवतैरिव वासवः ॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

॥ ५ ॥ आस्तीकपर्वणि विंशोऽध्यायः ॥ २० ॥

[अस्मिन्नध्याये २५॥ श्लोकाः ।]

॥ एकोनत्रिंशोऽध्यायः ॥

मातृशापपरिहारार्थं सर्पाणां मन्त्रालोचनम् ॥ १ ॥

सूतः—

मातुः सकाशात्तच्छापं श्रुत्वा पन्नगसत्तमः ।
वासुकिश्चिन्तयामास शापोऽयं न भवेत्कथम् ॥ १

ततः स मन्त्रयामास भ्रातृभिः सह सर्वशः ।
ऐरावतप्रभृतिभिर् ये स्वधर्मपरायणाः ॥ २

वासुकिः—

अयं शापो य[1]थोत्सृष्टो विदितो वस्सदानघाः ।
तस्य शापस्य मोक्षार्थं मन्त्रयित्वा यतामहे ॥ ३

सर्वेषामपि शापानां प्रतिघातो हि विद्यते ।
न तु मात्राऽभिशप्तानां मोक्षो विद्येत पन्नगाः ॥ ४

अव्ययस्याप्रमेयस्य सत्यस्य च यथाग्रतः ।
शप्ता इत्येव मे श्रुत्वा जायते हृदि वेपथुः ॥ ५

नूनं सर्वविनाशोऽयमस्माकं समुदाहृतः ।
[2]न [3]ह्यस्मान् सोऽव्ययो देवः शपन्तीं प्रत्यषेधयत् ॥ ६

---

1. अ—थादृष्टो विदितो वस्तदानघ ।
2. क-ख-ग—शापस्सृष्टो महाघोरो मात्रा खल्वविनीतया ।
3. क-ख-ग—ह्येनामव्ययो देवः [अधिकः पाठः]

तस्मात्संमन्त्रयामोऽद्य भुजङ्गानामनामयम् ।
यथा भवेन्न सर्वेषां मातुः कामोऽत्यगादयम् ॥ ७

मन्त्रयाम इहैवाथ हेतुं पश्याम मोक्षणे ।
यथा नष्टं पुरा देवो गूढमग्निं गुहागतम् ॥ ८

यथा स यज्ञो न भवेद् यथा चापि पराभवः ।
जनमेजयस्य सर्पाणां विनाशकरणाय वै ॥ ९

सूतः—

तथेत्युक्त्वा ततः सर्वे काद्रवेयाः समाहिताः ।
समयं चक्रिरे तत्र मन्त्रबुद्धिविशारदाः ॥ १०

एके तत्राब्रुवन्नागा वयं भूत्वा द्विजर्षभाः ।
[1]जनमेजयं तं भिक्षामो यज्ञस्ते न भवेदिति ॥ ११

अपरे त्वब्रुवन्नागास् तत्र पण्डितमानिनः ।
मन्त्रिणोऽस्य वयं सर्वे भविष्यामः [2]सुसंमताः ॥ १२

स नः पृच्छति सर्वेषु कार्येष्वर्थविनिश्चयम् ।
तत्र बुद्धिं प्रवक्ष्यामो यथा यज्ञो न वर्तते ॥ १३

---

1. क-ख-ग—तेषु तत्रोपविष्टेषु पन्नगेषु द्विजोत्तम ।
एलापत्रोऽब्रवीत्तेषां मन्त्रविद्योत्तमो बली ।
एलापत्रः—
शृण्वन्तु नागा हृत्स्थं मे वयं भूत्वा द्विजर्षभा. ।
[अधिकः पाठ]

2. क-ख-ग—समागता

स नो बहुमतान् राजा बुद्धौ बुद्धिमतां वरः ।
यज्ञार्थं वक्ष्यते व्यक्तं नेति वक्ष्यामहे वयम् ॥ १४
दर्शयन्तो बहून्दोषान् प्रेत्य चेह च दारुणान् ।
हेतुभिः कारणैश्चैव यथा यज्ञो भवेन्न सः ॥ १५
अथवा य उपाध्यायः क्रतौ तस्य भविष्यति ।
सर्पसत्रविधानज्ञो राजकार्यहिते रतः ॥ १६
तं गत्वा दशतां कश्चिद् भुजङ्गः स मरिष्यति ।
तस्मिन्हते यज्ञकारे क्रतुः स न भविष्यति ॥ १७
ये चान्ये सर्पसत्रज्ञा भविष्यन्त्यत्र चार्त्विजः ।
तान् सर्वान्दंशयिष्यामः कृतमेवं भविष्यति ॥ १८
तत्रापरे मन्त्रयन्ति धर्मात्मानो भुजङ्गमाः ।
अबुद्धिरेषा युष्माकं ब्रह्महत्या न शोभना ॥ १९
[1]सम्यक्सा धर्ममूला वै व्यसने शान्तिरुत्तमा ।
अधर्म एवं चरितः कृत्स्नं व्यापादयेज्जगत् ॥ २०
अपरे त्वब्रुवन्नागाः समिद्धं जातवेदसम् ।
वर्षैर्निर्वापयिष्यामो मेघा भूत्वा सविद्युतः ॥ २१
सुभाण्डा[2]न्निशि गत्वा चाप्यपरे भुजगोत्तमाः ।
प्रमत्तानाहरन्त्वाशु विघ्न एवं भविष्यति ॥ २२

1. क-ख-ग—सत्यव्रता धर्ममूला
2. क-ख-ग—ण्डं निशि गत्वा वा त्वपरे

यज्ञे वा भुजगास्तस्मिन् शतशोऽथ सहस्रशः ।
जनं दशन्तु वै सर्वमेवं त्रासो भविष्यति ॥ २३
अथवा संस्कृतं भोज्यं दूषयन्तु भुजङ्गमाः ।
स्वेन मूत्रपुरीषेण सर्वभोक्तृविनाशनम् ॥ २४
अपरे त्वब्रुवंस्तत्र ऋत्विजोऽस्य भवामहे ।
यज्ञविघ्नं करिष्यामो दीयतां दक्षिणा इति ॥ २५
वश्यतां चागतोऽसौ नः करिष्यति यथेप्सितम् ।
अपरे त्वब्रुवंस्तत्र जले प्रक्रीडितं नृपम् ॥ २६
गृहेत्वाऽऽनीय बध्नीमः क्रतुरेवं भवेन्न सः ।
अपरे त्वब्रुवंस्तत्र नागास्सुकृतकारिणः ॥ २७
दशामैनं प्रसह्याशु कृतमेवं भविष्यति ।
छिन्नं मूलमनर्थानां मृते तस्मिन्भविष्यति ॥ २८
एषा नो नैष्ठिकी बुद्धिः [1]मता कर्तुं भुजङ्गमाः ।
यथा वा मन्यसे राजंस् तत्क्षिप्रं संविधीयताम् ॥ २९
इत्युक्त्वा समुदैक्षन्त वासुकिं पन्नगेश्वरम् ।
वासुकिश्चापि संचिन्त्य तानुवाच भुजङ्गमान् ॥ ३०

वासुकिः—

[2]नैषा वै नैष्ठिकी बुद्धिर् मता कर्तुं भुजङ्गमाः ।

---

1. क-ख-ग—सर्वेषां यदि रोचते
2. क-ख-ग— { श्रेयः प्रसादनं मन्ये काश्यपस्य महात्मनः ।
अधिकः पाठः { ज्ञातिवंशस्य सौहार्दाद् आत्मनश्च भुजंगमाः ॥

सर्वेषामेव मे बुद्धिः पन्नगानां न रोचते ॥ ३१

किं तत्र संविधातव्यं भवतां यद्धितं भवेत् ।
अनेनाहं भृशं तप्ये गुणदोषौ मदाश्रयौ ॥ ३२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

॥ ५ ॥ आस्तीकपर्वणि एकविंशोऽध्यायः ॥ २१ ॥

[अस्मिन्नध्याये ३२ श्लोकाः]

॥ त्रिंशोऽध्यायः ॥

एलापत्रभाषणम् ॥ १ ॥ देवब्रह्मसंवादमुखेनास्तीकोत्पत्तिकथनम् ॥ २ ॥

सूतः—

श्रुत्वा तु वचनं तेषां सर्वेषामपि चैव हि ।
वासुकेश्च वचः श्रुत्वा एलापत्रोऽब्रवीदिदम् ॥ १

एलापत्रः—

[1]न स यज्ञो न भविता स च राजा तथाविधः ।
जनमेजयः पाण्डवेयो यतोऽस्माकमिदं भयम् ॥ २

---

1. क-ख-ग—प्रागेव दर्शिता बुद्धिर् मयैषा भुजगोत्तमाः ।
हेयेति यदि वो बुद्धिस् तवापि च तथा प्रभो ॥
अस्तु कामं ममाद्यापि बुद्धिः स्मरणमागता ।
तां शृणुष्व प्रवक्ष्यामि याथातथ्येन पन्नगाः ॥
[अधिकः पाठः]

दैवेनोपहतं राजन् न कर्तव्यं च पौरुषम् ।
[1]स दैवमेवाश्रयेत नान्यत्तत्र परायणम् ॥ ३

[2]पौरुषं नैतदस्माकं भयदं पन्नगोत्तमाः ।
दैवमेवाश्रयामोऽत्र शृणुध्वं वचनं मम ॥ ४

अहं शापे समुत्सृष्टे समश्रौषं वचस्तदा ।
मातुरुत्सङ्गमारूढो भयात्पन्नगसत्तमाः ॥ ५

[3]देवैश्चोक्तं तदाश्रौषं तीक्ष्ण तीक्ष्ण इति प्रभो ।
[4]पितामहमुपागम्य [5]दुःखार्तानां महाद्युते ॥ ६

देवाः—

का हि लब्ध्वा प्रियान्पुत्रान् शपेदेवं पितामह ।
ऋते कद्रूं तीक्ष्णरोषां देवदेव तवाग्रतः ॥ ७

तथेति वचनं तस्यास् त्वयाप्युक्तं पितामह ।
एतदिच्छाम विज्ञातुं कारणं यन्न वारिता ॥ ८

ब्रह्मा—

बहवः पन्नगास्तीक्ष्णा भीमवीर्या विषोल्बणाः ।

---

1. क-ख-ग – दैवेनोपद्रुतो राजन् यो भवेदिह पूरुषः ।
2. क-ख-ग—तदिदं दैवमस्माकं
3. क-ख-ग—देवानां पन्नगश्रेष्ठ
4. क-ख-ग—शापदुःखाग्नितप्तानां पन्नगानामनामयम् ।
कृपया परयाऽऽविष्टाः प्रार्थयन्तो दिवौकसः ॥
[अधिकः पाठः]
5. क-ख-ग—देवा वचनमब्रुवन्

प्रजानां हितकामोऽहं न च वारितवांस्तदा ॥ ९

ये दन्दशूकाः क्षुद्राश्च पापाचारा विषोल्बणाः ।
तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १०

तन्निमित्तश्च भविता मोक्षस्तेषां महाभयात् ।
पन्नगानां निबोधध्वं [1]यथा वै गदितं मया ॥ ११

यायावरकुले धीमान् भविष्यति महानृषिः ।
जरत्कारुरिति ख्यातस् तेजस्वी नियतेन्द्रियः ॥ १२

तस्य पुत्रो जरत्कारोर् उत्पत्स्यति महातपाः ।
अस्तीको नाम यज्ञं स प्रतिषेत्स्यति तं तदा ॥ १३
तत्र मोक्ष्यन्ति भुजगा ये भविष्यन्ति धार्मिकाः ॥ १३॥

देवा —

स मुनिप्रवरो देव जरत्कारुर्महातपाः ।
कस्यां पुत्रं महात्मानं जनयिष्यति वीर्यवान् ॥ १४॥

ब्रह्मा—

[2]सनामायां सनामा स कन्यायां द्विजसत्तमः ।
अपत्यं वीर्यवान्देवा वीर्यवज्जनयिष्यति ॥ १५॥

---

1. क-ख-ग—तस्मिन्काले तथा गते ।
2. क-ख-ग—वासुकेर्भगिनी कन्या समुत्पन्ना सुशोभना ।
तस्मै दास्यति तां कन्यां वासुकिर्भुजगोत्तमः ।
तस्यां जनयिता पुत्रं वेदवेदांगपारगम् ॥
[अधिक पाठः]

एलापत्रः—

एवमस्त्विति तं देवाः पितामहमथाब्रुवन् ।
उक्त्वा चैवं गता देवाः स च देवः पितामहः ॥ १६॥

सोऽहमेवं प्रपश्यामि वासुके भगिनीं तव ।
जरत्कारुरिति ख्यातां तां तस्मै प्रतिपादय ॥ १७॥

भैक्षवद्भिक्षमाणाय नागानां भयशान्तये ।
ऋषये सुव्रताय त्वम् एष मोक्षः श्रुतो मया ॥ १८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
॥ ५ ॥ आस्तीकपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
[अस्मिन्नध्याये १८॥ श्लोकाः ।]

॥ एकत्रिंशोऽध्यायः ॥

एलापत्रोपदेशेन वासुकिभगिन्या जरत्कार्वा रक्षणम् ॥ १ ॥

सूत—

[1]एलापत्रस्य तु वचश् श्रुत्वा नागा द्विजोत्तम ।
सर्वे प्रहृष्टमनसः साधु साध्वित्यपूजयन् ॥ १

ततः प्रभृति तां कन्यां वासुकिः पर्यरक्षत ।

1. अ—एलापत्रवचः श्रुत्वा नागरजो द्विजोत्तम ।

जरत्कारुं स्वसारं वै परं हर्षमवाप च ॥ २

ततो नातिमहान् कालः समतीत इवाभवत् ।
ततो देवासुराः सर्वे ममन्थुर्वरुणालयम् ॥ ३

तत्र योक्त्रमभून्नागो वासुकिर्बलिनां वरः ।
संस्थाप्य च महत्कर्म पितामहमुपागमन् ॥ ४

देवा वासुकिना सार्धं [1]पितामहमथाब्रुवन् ।
भगवञ्शापभीतोऽयं वासुकिस्तप्यते भृशम् ॥ ५

अस्यैतन्मानसं शल्यं समुद्धर्तुं त्वमर्हसि ॥ ५॥
जनन्याः शापजं देव ज्ञातीनां हितकाङ्क्षिणः ।

हितो ह्ययं सदाऽस्माकं प्रियकारी च नागराट् ॥ ६॥
कुरु प्रसादं देवेश शमयास्य मनोज्वरम् ॥ ७

ब्रह्मा—

मयैतच्चिन्तितं पूर्वं वचनं मनसाऽमराः ।
एलापत्रेण नागेन यदस्याभिहितं पुरा ॥ ८

तत्करोत्वेष नागेन्द्रः काले प्राप्तं वचस्तदा ।
विनशिष्यन्ति ते पापा न तु ये धर्मचारिणः ॥ ९

उत्पन्नः स जरत्कारुस् तपस्युग्रे रतः सदा ।
तस्मै स्वभगिनीं काले जरत्कारुं प्रयच्छतु ॥ १०

---

1. क-ख-ग—तेऽथ ब्रह्माणमब्रुवन्

एलापत्रेण वचनं तदोक्तं भुजगोत्तम ।
भुजगानां हितं चैव तथा तन्न तदन्यथा ॥ ११

सूतः—

एतच्छ्रुत्वा स नागेन्द्रः पितामहवचस्तदा ।
सर्पान्बहूञ्जरत्कारौ [1]नियुक्तान्सुसमादधत् ॥ १२
जरत्कारुर्यथा भार्याम् इच्छेद्वरयितुं प्रभुः ।
शीघ्रमेत्य ममाऽऽख्येयं तन्नः श्रेयो भविष्यति ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ ५ ॥ आस्तीकपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

[अस्मिन्नध्याये १३ श्लोकाः ।]

॥ द्वात्रिंशोऽध्यायः ॥

परीक्षिन्मृगयाकथनम् ॥ १ ॥ परीक्षिता शमीकस्कन्धे मृतसर्पनिधानम् ॥ २ ॥

शौनकः—

जरत्कारुरिति प्रोक्तं यत्त्वया सूतनन्दन ।
इच्छामि तदहं तस्य ऋषेः श्रोतुं महात्मनः ॥ १

---

1. क-ख-ग—नित्ययुक्तान्समादधत्

किं कारणं जरत्कारोर् नामैतत्प्रथितं भुवि ।
जरत्कारुनिमित्तं मे यथावद्वक्तुमर्हसि ॥ २

सूतः—

जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत् तत्स धीमाञ्शनैः शनैः ॥ ३

क्षपयामास तीव्रेण तपसेत्येतदुच्यते ।
जरत्कारुरिति ब्रह्मन् वासुकेर्भगिनीपतिः ॥ ४

एवमुक्तस्तु धर्मात्मा शौनकः प्राह तं तदा ।
उग्रश्रवसमामन्त्र्य उपपन्नमिति ब्रुवन् ॥ ५

[1]अथ कालस्य महतः स मुनिः संशितव्रतः ।
तपस्यभिरतो धीमान् न दारानभ्यकाङ्क्षत ॥ ६

स ह्यूर्ध्वरेतास्तपसि प्रसक्तः
स्वाध्यायवान्वीतभयक्लमस्सः ।
चचार सर्वां पृथिवीं महात्मा
न चापि दारान्मनसाभ्यकाङ्क्षत् ॥[2] ७

---

1. क-ख-ग—उक्तं नाम यथातत्त्वं सर्वं यत्पृष्टवानहम् ।
यथा तु जातो वास्तीक एतदिच्छामि वेदितुम् ॥
तच्छ्रुत्वा तस्य वचनं सौतिः प्रोवाच शाश्वतम् ।
संनिदिश्य पन्नगान्सर्वान् वासुकिश्शापमोहितः ॥
स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति॥[अधिकः पाठः]

2. क-ख-ग—कोशेषु अत्र अध्यायसमाप्तिः—
द्वाविंशोऽध्यायस्समाप्त इति ॥

ततः परस्मिन्संप्राप्ते काले कस्मिंश्चिदेव तु ।
परीक्षिदिति [1]विख्यातो राजा कौरववंशभृत् ॥ ८

यथा पाण्डुर्महाबाहुर् धनुर्धरवरो भुवि ।
तथा विख्यातवांल्लोके परीक्षिदभिमन्युजः ॥ ९

[2]पाण्डुस्तु मृगयाशीलः पुरास्य प्रपितामहः ।
मृगान्विध्यन्वराहांश्च तरक्षून्महिषांस्तथा ॥ १०
अन्यांश्च विविधान्वन्यान् जघान पृथिवीपतिः ॥ १०॥

स कदाचिन्मृगं [3]विद्ध्वा बोणन नतपर्वणा ।
पृष्ठतो धनुरादाय ससार गहने वने ॥ ११॥

यथा हि भगवान्रुद्रो विद्ध्वा यज्ञमृगं दिवि ।
अन्वगच्छद्धनुष्पाणिः पर्यन्विष्यंस्ततस्ततः ॥ १२॥

न हि तेन मृगो विद्धो जीवन्गच्छति वै वनम् ।
अभूतपूर्वस्तत्रासीद् राज्ञस्स्वर्गगतिं प्रति ॥ १३॥

[4]परीक्षितो महाराज्ञो विद्धो यन्नष्टवान्मृगः ।
दूरं चापहृतस्तेन मृगेण स महीपतिः ॥ १४॥

परिश्रान्तः पिपासार्त आससाद मुनिं वने ।
गवां प्रचारेष्वासीनं वत्सानां मुखनिस्सृतम् ॥ १५॥

क-ख-ग— 1. नामासीद्राजा कौरववंशजः । 2. बभूव
3. घोरं विद्ध्वा तीक्ष्णेन पत्रिणा
4. पाण्डवेयस्य ब्रह्मर्षे

भूयिष्ठमुपयुञ्जानं फेनं वै पिबतां पयः ॥ १६

तमभिद्रुत्य वेगेन स राजा संशितव्रतः ।
अपृच्छद्धनुरुद्यम्य तं मृगं क्षुच्छ्रमान्वितः ॥ १७

भो भो ब्रह्मन्नहं राजा परीक्षिदभिमन्युजः ।
मया विद्धो मृगो नष्टः कच्चित्त्वं दृष्टवानसि ॥ १८

स मुनिस्तस्य नोवाच किंचिन्मौनव्रते स्थितः ।
तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासृजत् ॥ १९

धनुष्कोट्या समुत्क्षिप्य [1]स चैनं समवैक्षत ।
न च किंचिदुवाचैनं शुभं वा यदि वाऽशुभम् ॥ २०

स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतम् ।
दृष्ट्वा जगाम नगरीम् ऋषिस्त्वास्ते तथैव च ॥ २१

[2]तरुणस्तस्य पुत्रोऽभूत् तिग्मतेजा महातपाः ।
शृङ्गी नाम महाक्रोधो दुष्प्रसादो महाव्रतः ॥ २२

स देवं परमीशानं सर्वभूतहिते रतम् ॥
ब्रह्माणमुपतस्थे वै काले काले सुसंयतः ॥ २३

---

1. क-ख-ग—न चैनं समुदैक्षत
2. क-ख-ग—न हि तं राजशार्दूलस् तथा धर्मपरायणम् ।
जानाति भरतश्रेष्ठस् तत एनमधर्षयत् ॥
[अधिकः पाठः]

स तेन समनुज्ञातो ब्रह्मणा गृहमेयिवान् ।
सख्योक्तः क्रीडमानेन स तत्र [1]सहसा किल ॥ २४

संरम्भात्कोपनोऽतीव विषकल्प ऋषेः सुतः ।
ऋषिपुत्रेण तत्त्वार्थं कृशेन द्विजसत्तम ॥ २५

कृशः—

तेजस्विनस्तव पिता तथैव च तपस्विनः ।
शवं स्कन्धेन वहति मा शृङ्गिन्गर्वितो भव ॥ २६

व्याहरत्स्वृषिपुत्रेषु मा च किञ्चिद्वचो वदीः ।
अस्मद्विधेषु सिद्धेषु ब्रह्मवित्सु तपस्विषु ॥ २७

क्व ते पुरुषमानित्वं क्व ते वाचस्तथाविधाः ।
दर्पजाः पितरं द्रष्टा यस्त्वं शवधरं तथा ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ ५ ॥ आस्तीकपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

[अस्मिन्नध्याये २८ श्लोकाः ।]

---

1. क-ख-ग—हसता

॥ त्रयस्त्रिंशोऽध्यायः ॥

मुनिपुत्रेण शृंगिणा परीक्षितः शापः ॥ १ ॥

सूतः—

एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः ।
[1]मृतधारं गुरुं श्रुत्वा पर्यतप्यत मन्युना ॥ १

स तं कृशमभिप्रेक्ष्य सूनृतां वाचमुत्सृजन् ।
अपृच्छत कथं तातः [2]स मेऽद्य मृतधारकः ॥ २

[3]कृशः—

राज्ञा परीक्षिता तात मृगयां परिधावता ।
अवसक्तः पितुस्तेऽद्य मृतः कण्ठे भुजङ्गमः ॥ ३

शृङ्गी—

किं मे पित्रा कृतं तात राज्ञोऽनिष्टं दुरात्मनः ।
ब्रूहि त्वं कृश तत्त्वेन पश्य मे तपसो बलम् ॥ ४

1. क-ख-ग—मृतभारगुरुं श्रुत्वा पर्यतप्यन्महामनाः ॥
2. क-ख-ग—सर्वभूतहिते रतः
3. क-ख-ग—अनन्यचेतास्सततं विष्णुं देवमतोषयत् ।
वन्यान्नभोजी सततं मुनिर्मौनव्रते स्थितः ।
एवं भूतस्स तेजस्वी सखेऽद्य मृतभारकः ॥
[अधिकः पाठः]

कृशः—

स राजा मृगयां यातः परीक्षिदभिमन्युजः ।
ससार मृगमेकाकी विद्ध्वा बाणेन पत्रिणा ॥ ५

न चापश्यन्मृगं राजा चरंस्तस्मिन्महावने ।
पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् ॥ ६

तं स्थूणभूतं तिष्ठन्तं क्षुत्पिपासाश्रमान्वितः ।
पुनःपुनर्मृगं नष्टं पप्रच्छ पितरं तव ॥ ७

स च मौनव्रतोपेतो वचो न प्रत्यभाषत ।
तस्य राजा धनुष्कोट्या मृतं सर्पमवासृजत् ॥ ८

[1]स्कन्धे तव पिता चासौ तथैवास्ते यतव्रतः ।
सोऽपि राजा स्वनगरं प्रतियातो गजाह्वयम् ॥ ९

सूतः—

[2]श्रुत्वैतदृषितः सख्युर् वचःस्तब्ध्वा च विष्ठितः ।
कोपसंरक्तनयनः प्रज्वलन्निव मन्युना ॥ १०

आविष्टः स तु कोपेन शशाप नृपतिं तदा ।
वार्युपस्पृश्य तेजस्वी क्रोधवेगसमन्वितः ॥ ११

शृङ्गी—

योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य च ।

---

1. क-ख-ग—शृंगिस्तव
2. क-ख-ग—श्रुत्वैतदृषिपुत्रस्तु दिवं स्तब्ध्वैव तिष्ठति ।

स्कन्धे मृतमवास्राक्षीत् पन्नगं राजकिल्बिषी ॥ १२

तं पापमतिसंक्रुद्धस् तक्षकः पन्नगोत्तमः ।
आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः ॥ १३

सप्तरात्रादितो नेता यमस्य सदनं प्रति ।
द्विजानामवमन्तारं कुरूणामयशस्करम् ॥ १४

सूतः—

इति शप्त्वा नृपं क्रुद्धः शृङ्गी पितरमभ्ययात् ॥ १४॥

आसीनं गोचरे तस्मिन् वहन्तं शवपन्नगम् ।
वृद्धमालोक्य पितरं शृङ्गी स्कन्धगतेन वै ॥ १५॥

शवेन भुजगेनासीद् भूयः क्रोधसमन्वितः ॥ १६

दुःखाच्चाश्रूणि मुमुचे पितरं चेदमब्रवीत् ॥ १६॥

श्रुत्वेमां धर्षणां तात राज्ञा तेन दुरात्मना ।
[1]कोपात्तमशपं तात राजानं दृष्टचेतसम् ॥ १७॥

यथार्हति तथा चोग्रं शप्तः कुरुकुलाधमः ॥ १८

सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ।
वैवस्वतस्य सदनं नेता परमदारुणम् ॥ १९

सूतः—

तमब्रवीत्पिता ब्रह्मंस् तथा कोपसमन्वितम् ॥ १९॥

1. क-ख-ग—राज्ञा परीक्षिता कोपाद् अशपं तमहं नृपम् ॥

न मे प्रियं कृतं तात नैष धर्मस्तपस्विनाम् ।
वयं तस्य नरेन्द्रस्य विषये निवसामहे ॥ २०॥

न्यायतो रक्षितास्तेन तस्य शापं न रोचये ॥ २१

सर्वथा वर्तमानस्य राज्ञोऽप्यस्मद्विधैः सदा ।
क्षन्तव्यं पुत्र धर्मो हि हतो हन्ति न संशयः ॥ २२

यदि राजा न रक्षेत पीडा वै नः परा भवेत् ।
न शक्नुयाम चरितुं धर्मं पुत्र यथासुखम् ॥ २३

[1]रक्ष्यमाणा वयं तात राजभिश्शास्त्रदृष्टिभिः ।
चरामो विपुलं धर्मं तेषां भागोऽस्ति धर्मतः ॥ २४

परीक्षित्तु विशेषेण यथाऽस्य प्रपितामहः ।
रक्षत्यस्मान्यथा राज्ञा रक्षितव्याः प्रजास्तथा ॥ २५

तेनेह क्षुधितेनैत्य श्रान्तेन मृगलिप्सया ।

---

1. क-ख-ग—अराजके जनपदे दोषो जायेत वै सदा ।
उद्धृतं सततं लोकं राजा धर्मेण शास्ति वै ॥
राज्ञा प्रवर्तते धर्मो नोद्विग्नश्चरते प्रजाः ।
धर्मे प्रवर्तते धर्मो धर्मात्स्वर्गः प्रतिष्ठितः ।
राज्ञा यज्ञकथास्सर्वा यज्ञाहेवाः प्रतिष्ठिताः ।
देवाद्वृष्टिः प्रवर्तेत वृष्टेरोषधयः स्मृताः ॥
ओषधीभ्यो मनुष्याणां जायते सततं हितम् ।
मानुषाणां हि यो धाता राजा राज्यकरः प्रभुः ।
सुदुःखश्रोत्रियस्सोम्य इत्येवं मनुरब्रवीत् ॥
[अधिकः पाठः]

अजानता [1]कृतं तात ध्रुवमेतदसंशयम् ॥ २६

कस्मादिदं त्वया बाल्यात् सहसा दुष्कृतं कृतम् ।
न ह्यर्हति नृपः शापम् अस्मत्तः पुत्र सर्वथा ॥ २७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ५ ॥ आस्तीकपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
[अस्मिन्नध्याये २७ श्लोकाः ।]

॥ चतुस्त्रिंशोऽध्यायः ॥

शमीकप्रेषितेन गौरमुखाख्यशिष्येण सह परीक्षित्संवादः ॥ १ ॥ मन्त्रिभि सह राज्ञो विचारः ॥ २ ॥ तक्षककाश्यपसंवादः ॥ ३ ॥

शृङ्गी—

यद्येतत्साहसं तात यदि वा दुष्कृतं कृतम् ।
प्रियं वाप्यप्रियं वापि वागुक्ता न मृषा मम ॥ १

नैवान्यथा तद्भविता पितरेतद्ब्रवीमि ते ।
नाहं मृषा प्रब्रवीमि स्वैरे[2]ष्वपि कुतः शपन् ॥ २

शमीकः—

[3]जानाम्यस्युग्रभावं त्वां तव सत्यां गिरं तथा ।

1. क-ख-ग—व्रतमिदं कृतमेतदसंशयम्
2. क-ख-ग—ष्वकुपितश्शपन्
3. क-ख-ग—जानाम्युग्रप्रभावं त्वां पुत्र सत्यगिरं तथा ।

नानृतं चोक्तपूर्वं ते नैतन्मिथ्या भविष्यति ॥ ३

पित्रा पुत्रो वयस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ ४

किं पुनर्बाल एव त्वं तपसा भावितः प्रभो ।
वर्धते च प्रभवतां कोपोऽतीव महात्मनाम् ॥ ५

[1]सोऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर ।
पुत्रत्वाद्बालभावाच्च तवावेक्ष्य च साहसम् ॥ ६

स त्वं शमयुतो भूत्वा [2]नातः साहसमाचर ।
चरन् क्रोधमिमं त्यक्त्वा नैव धर्मं प्रहास्यसि ॥ ७

क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम् ।
ततो धर्मविहीनानां गतिरिष्टा न विद्यते । ८

शम एव यतीनां हि क्षमिणां सिद्धिकारकः ।
क्षमावतामयं लोकः परश्चापि क्षमावताम् ॥ ९

तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः ।
क्षमया प्राप्स्यसे लोकान् ब्रह्मणः समनन्तरान् ॥ १०

[3]अहं तु शममास्थाय वक्तुं तत्त्वाख्यमद्य वै ।

---

1. क-ख-ग—उत्सीदेयुरिमे लोकाः क्षमा चास्य प्रतिश्रयः।
[अधिकः पाठः]

2. क-ख-ग—वन्यमाहारमाहरन्।

3. क-ख-ग--मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै ।

[1]शिष्यं धर्मभृतस्तात प्रेषयिष्ये नृपस्य वै ॥ ११
मम पुत्रेण शप्तोऽसि बालेनाकृतबुद्धिना ।
ममेमां धर्षणां त्वत्तः प्रेक्ष्य राजन्नमर्षिणा ॥ १२

सूतः—

एवमादिश्य शिष्यं वै प्रेषयामास सुव्रतः ।
परीक्षिते नृपतये दयापन्नो महातपाः ॥ १३
संदिश्य कुशलप्रश्नं कार्यवृत्तान्तमेव च ।
शिष्यं गौरमुखं नाम शीलवन्तं समाहितम् ॥ १४
सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्धनम् ।
विवेश भवनं राज्ञः पूर्वं द्वार्स्थैर्निवेदितः ॥ १५
पूजितस्तु नरेन्द्रेण द्विजो गौरमुखस्तदा ।
आचख्यौ विपरिश्रान्तो राज्ञे सर्वमशेषतः ॥ १६
शमीकवचनं घोरं यथोक्तं मन्त्रिसन्निधौ ॥ १६॥

गौरमुखः—

शमीको नाम राजेन्द्र विषये वसते तव ।
ऋषिः [2]शमदमोपेतो मौनव्रतसमन्वितः ॥ १७॥
तस्य त्वया नरव्याघ्र स्कन्धे भरतसत्तम ।
अवसक्तो धनुष्कोट्या सर्पः प्राणैर्वियोजितः ॥ १८॥

1. क-ख-ग—तत्करिष्यामि ताताहं
2. क-ख-ग—परमधर्मात्मा शान्तो दान्तो महातपाः।

क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे ॥ १९

तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ।
तक्षकात्सप्तरात्रेण मृत्युर्वै ते भविष्यति ॥ २०

तस्य रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत् ।
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥ २१

न हि शक्नोति संयन्तुं पुत्रं कोपसमन्वितम् ।
ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना ॥ २२

सूतः—

इति श्रुत्वा वचो घोरं स राजा कुरुनन्दनः ।
पर्यतप्यत तत्पापं कृत्वा ब्रह्मन्महात्मनः ॥ २३

तं च मौनव्रतधरं श्रुत्वा मुनिवरं तदा ।
भूय एवाभवद्राजा शोकसंतप्तमानसः ॥ २४

अनुक्रोशान्मतं तस्य शमीकस्योपधार्य तु ।
पर्यतप्यत भूयोऽपि कृत्वा तत्किल्बिषं मुने ॥ २५

न हि मृत्युं तथा राजा श्रुत्वा वै सोऽन्वतप्यत ।
अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत् ॥ २६

ततस्तं प्रेषयामास राजा गौरमुखं तदा ।
भूयः प्रसादं भगवान् करोत्विति ममैष वै ॥ २७

श्रुत्वा तद्वचनं राज्ञो मुनिर्गौरमुखस्तदा ।

तमनुज्ञाप्य वेगेन प्रजगामाश्रमं गुरोः ॥ २८

तस्मिंस्तु गतमात्रे तु राजा गौरमुखे तदा ।
मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः ॥ २९

निश्चित्य मन्त्रिभिश्चैव सहितो मन्त्रतत्त्ववित् ।
प्रासादं कारयामास एकस्तम्भं सुरक्षितम् ॥ ३०

रक्षां च विदधे तत्र भिषजश्चौषधानि च ।
ब्राह्मणान् सिद्धमन्त्रांश्च सर्वतो वै न्यवेशयत् ॥ ३१

राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः ।
मन्त्रिभिः सह मन्त्रज्ञैः समन्तात्परिरक्षितः ॥ ३२

प्राप्ते च दिवसे तस्मिन् सप्तमे द्विजसत्तम ।
काश्यपोऽभ्यागमद्विद्वांस् तं राजानं चिकित्सितुम् ॥ ३४

श्रुतं हि तेन तदभूद् अद्य तं राजसत्तमम् ।
तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम् ॥ ३५

तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम् ।
तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन् ॥ ३६

तं ददर्श स नागेन्द्रस् तक्षकः काश्यपं पथि ।
गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽधिकः ॥ ३७

तमब्रवीत्पन्नगेन्द्रः काश्यपं मुनिपुंगवम् ।
क्व भवांस्त्वरितो याति किं च कार्यं चिकीर्षति ॥ ३८

काश्यपः—

नृपं कुरुकुलोत्पन्नं परीक्षितमरिन्दमम् ।
तक्षकः पन्नगश्रेष्ठस् तेजसाऽद्य प्रधक्ष्यति ॥ ३९

तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा ।
पाण्डवानां कुलकरं राजानममितौजसम् ॥ ४०

गच्छामि सौम्य त्वरितः सद्यः कर्तुमपज्वरम् ॥ ४०॥

1तक्षकः—

अहं स तक्षको ब्रह्मंस् तं धक्ष्यामि महीपतिम् ।
निवर्तस्व मया दष्टं न शक्यं स्याच्चिकित्सितुम् ॥ ४१॥

काश्यप —

अहं तु नृपतिं नाग त्वया दष्टमपज्वरम् ।
करिष्य इति मे बुद्धिर् विद्याबलसमाश्रिता ॥ ४२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

॥ ५ ॥ आस्तीकपर्वणि षड्त्रिंशोऽध्यायः ॥ २६ ॥

[अस्मिन्नध्याये ४२ ॥ श्लोकाः]

---

1. क-ख-ग—विज्ञातविषविद्योऽहं ब्राह्मणो लोकपूजितः ।
अस्मद्गुरुकटाक्षेण कल्योऽहं विषनाशने ॥
[अधिकः पाठः]

॥ पञ्चत्रिंशोऽध्यायः ॥

परीक्षितः कृमिभूतेन तक्षकेण दंशनम् ॥ १ ॥

तक्षकः—

दष्टं यदि मयेह त्वं शक्तः किंचिच्चिकित्सितुम् ।
ततो दष्टं मया वृक्षम् इमं जीवय काश्यप ॥ १

परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च ।
न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम ॥ २

काश्यपः—

दश नागेन्द्र वृक्षं त्वं यमेनमभिमन्यसे ।
अहमेनं त्वया दष्टं जीवयिष्ये भुजंगम ॥ ३

सूतः—

एवमुक्तस्स नागेन्द्रः काश्यपेन महात्मना ।
अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ॥ ४

स वृक्षस्तेन दष्टस्सन् सद्य एव महाद्युते ।
आशीविषविषोपेतः प्रजज्वाल समन्ततः ॥ ५

तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ जीवयैनं वनस्पतिम् ॥ ६

सूतः—

भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा ।
भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ॥ ७

काश्यपः—

विद्याबलं पन्नगेन्द्र पश्य मेऽस्मिन्वनस्पतौ ।
अहं संजीवयाम्येनं पश्यतस्ते भुजंगम ॥ ८

सूत —

ततस्स भगवान्विद्वान् काश्यपो द्विजसत्तमः ।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥ ९

साङ्कुरं तं स कृतवांस् ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनं च तथा विटपिनं पुनः ॥ १०

तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना ।
उवाच तक्षको ब्रह्मन् [1]एतदत्यद्भुतं त्वयि ॥ ११

विप्रेन्द्र यद्विषं हन्या मम वा मद्विधस्य वा ।
कं त्वमर्थमभिप्रेक्ष्य यासि तत्र तपोधन ॥ १२

यत्तेऽभिलषितं प्राप्तुं फलमस्मान्नृपोत्तमात् ।
[2]तत्तेऽहं संप्रदास्यामि निवर्तस्व द्विजोत्तम ॥ १३

विप्रशापाभिभूते च क्षीणायुषि नराधिपे ।
अटमानस्य ते विप्र सिद्धिः संशयिता भवेत् ॥ १४

---

1. अ—नैत 2. क-ख-ग—अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम् ।

ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतम् ।
विरश्मिमिव घर्मांशुर् अन्तर्धानमितो व्रजेत् ॥ १५

काश्यपः—

धनार्थी याम्यहं तत्र तद्ददस्व भुजंगम ।
ततोऽहं विनिवर्तिष्ये गृहायोरगसत्तम ॥ १६

तक्षकः—

यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम् ।
अहं तेऽद्य प्रदास्यामि निवर्तस्व द्विजोत्तम ॥ १७

सूत —

तक्षकस्य वचश्श्रुत्वा काश्यपो द्विजसत्तमः ।
प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान् ॥ १८

दिव्यज्ञानस्स तेजस्वी ज्ञात्वा तं नृपतिं तदा ।
क्षीणायुषं पाण्डवेयम् अपावर्तत काश्यपः ॥ १९
लब्ध्वा वित्तं मुनिवरस् तक्षकाद्यावदीप्सितम् ॥ १९॥
निवृत्ते काश्यपे तस्मिन् समयेन महात्मनि ।
जगाम तक्षकस्तूर्णं नगरं नागसाह्वयम् ॥ २०॥

अथ शुश्राव गच्छन्स तक्षको जगतीपतिम् ।
मन्त्रैर्विषहरैर्दिव्यै रक्ष्यमाणं प्रयत्नतः ॥ २१॥
स चिन्तयामास तदा मायायोगेन पार्थिवः ।

मया वञ्चयितव्योऽसौ क उपायो भवेदिति ॥ २२॥
ततस्तापसरूपेण प्राहिणोत्स भुजंगमान् ।
फलपात्रोदकं गृह्य राज्ञे नागोऽथ तक्षकः ॥ २३॥

तक्षक—

गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया ।
फलपात्रोदकं नाम प्रतिग्राहयितुं नृपम् ॥ २४॥

सूत—

ते तक्षकसमादिष्टास् तथा निन्युर्भुजङ्गमाः ।
उपनिन्युस्तथा राज्ञे दर्भानम्भः फलानि च ॥ २५॥
तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान् ।
श्रुत्वा तु तेषां कार्याणि गम्यतामित्युवाच तान् ॥ २६॥
गतेषु तेषु नागेषु तापसच्छद्मरूपिषु ।
अमात्यान्सुहृदश्चैव प्रोवाच स नराधिपः ॥ २७॥
भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः ।
तापसैरुपनीतानि फलानि सहिता मया ॥ २८॥
अथ राजा ससचिवः फलान्यादातुमैच्छत ॥ २९
यज्जग्राह फलं राजा तस्मिन् कृमिरभूदणुः ।
ह्रस्वकः कृष्णनयनस् ताम्रो वर्णेन शौनक ॥ ३०
स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत् ॥ ३०॥
अस्तमभ्येति सविता विषादन्यन्न मे भयम् ।

सत्यवागस्तु स मुनिः कृमिको मां दशत्वयम् ॥ ३१॥
तक्षको नाम भूत्वा वै तथा परिहृतं भवेत् ।
ते चैनमन्ववर्तन्त मन्त्रिणः कालचोदिताः ॥ ३२॥
एवमुक्त्वा स राजेन्द्रो ग्रीवायां सन्निवेश्य ह ।
कृमिकं प्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः ॥ ३३॥
हसन्नेव च नागेन तक्षकेणाभिवेष्टितः ।
तस्मात्फलाद्विनिष्क्रम्य यत्तद्राज्ञे निवेदितम् ॥ ३४॥
वेष्टयित्वा च भोगेन विनद्य च महास्वनम् ।
अदशत्पृथिवीपालं तक्षकः पन्नगेश्वरः ॥ ३५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
॥ ५ ॥ आस्तीकपर्वणि सप्तविंशोऽध्याय ॥ २७ ॥
[अस्मिन्नध्याये ३५ ॥ श्लोकाः]

॥ षट्त्रिंशोऽध्यायः ॥

जनमेजयस्य राज्याभिषेक विवाहश्च ॥ १ ॥

सूतः—
तं तथा मन्त्रिणो दृष्ट्वा नागेन परिवेष्टितम् ।
विवर्णवदनास्सर्वे रुरुदुर्भृशदुःखिताः ॥ १
[1]दहन्तं तं तथा दृष्ट्वा मन्त्रिणस्ते प्रदुद्रुवुः ।

1. क-ख-ग—तं तु नागं ततो

अपश्यंश्चैव ते यान्तम् आकाशे नागमद्भुतम् ॥ २
सीमन्तमिव कुर्वाणं नभसः पद्मवर्चसम् ।
तक्षकं पन्नगश्रेष्ठं भृशं शोकपरायणाः ॥ ३

ततस्तु ते तद्गृहमग्निना वृतं
प्रदीप्यमानं विषजेन भोगिनः ।
भयात्परित्यज्य दिशः प्रपेदिरे
पपात तच्चाशनिताडितं यथा ॥ ४

ततो नृपे तक्षकतेजसा हते
प्रयुज्य सर्वाः परलोकसत्क्रियाः ।
ऋषिर्द्विजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥ ५

नृपं शिशुं तस्य [1]नृपस्य चक्रिरे
समन्त्रिणस्तत्पुरवासिनो जनाः ।
नृपं यमाहुस्तममित्रतापनं
कुरुप्रवीरं जनमेजयं [2]तदा ॥ ६

स बाल एवार्यमतिर्नृपोत्तमः
सहैव तैर्मन्त्रिपुरोहितैस्तदा ।
शशास राज्यं कुरुपुंगवाग्रजो
यथाऽस्य वीरः प्रपितामहस्तथा ॥ ७

1. क-ख-ग—सुतं प्रचक्रिरे 2. क-ख-ग—जनाः

ततस्तु राजानममित्रतापनं
समीक्ष्य ते तस्य नृपस्य मन्त्रिणः ।
सुवर्णवर्माणमुपेत्य काशिपं
वपुष्टमार्थं वरयांप्रचक्रमुः ॥ ८

ततस्स राजा प्रददौ वपुष्टमां
कुरुप्रवीराय [1]समीक्ष्य धर्मतः ।
स चापि तां प्राप्य मुदा युतोऽभवन्-
न चान्यनारीषु मनो दधे क्वचित् ॥ ९

सरस्सु फुल्लेषु नगेषु चैव हि
प्रसन्नचेता विजहार [2]सप्रियः ।
तथा स राजप्रवरो विजह्विवान्
यथोर्वशीं प्राप्य पुरा पुरूरवाः ॥ १०

वपुष्टमा चापि वरं पतिं तदा
प्रतीतरूपं तमवाप्य भूमिपम् ।
[3]अनन्यभावा रमयांबभूव सा
विहारकालेष्ववरोधसुन्दरी ॥ ११

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ ५ ॥ आस्तीकपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

[अस्मिन्नध्याये ११ श्लोकाः]

---

1. क-ख-ग—परीक्ष्य 2. क-ख-ग—वीर्यवान्
3. क-ख-ग—सुखेन रामा

॥ सप्तत्रिंशोऽध्यायः ॥

जरत्कारोर्गर्ते लम्बमानस्वपितॄणां दर्शनम् ॥ १ ॥

सूतः—

एतस्मिन्नेव काले तु जरत्कारुर्महातपाः ।
चचार पृथिवीं कृत्स्नां यत्रसायंगृहो मुनिः ॥ १

चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः ।
तीर्थेष्वा[1]यतनं कुर्वन् पुण्येषु विचचार ह ॥ २

वायुभक्षो निराहारः शुष्यन्नहरहर्मुनिः ।
स ददर्श पितॄन्गर्ते लम्बमानानधोमुखान् ॥ ३

एकतन्त्ववशिष्टान्वै वीरणस्तम्बमाश्रितान् ।
तं च तन्तुं शनैराखुम् आददानं बिलाश्रयम् ॥ ४

निराहारकृशाञ्जीर्णान् गर्ते स्वत्राणमिच्छतः ।
उपसृत्य स तान्दीनान् दीनरूपोऽभ्यभाषत ॥ ५

जरत्कारुः—

के भवन्तोऽवलम्बन्ते वीरणस्तम्बमाश्रिताः ।
दुर्बलं खादितं मूले आखुना बिलवासिना ॥ ६

वीरणस्तम्बके मूलं यदप्येकमिह स्थितम् ।
तदप्ययं शनैराखुर् आदत्ते दशनैः शितैः ॥ ७

1. क-ख-ग—प्लवनं

छेद्यतेऽल्पावशिष्टत्वाद् एतदप्यचिरादिव ।
तत्रस्थाः पतिता रौद्रे गर्तेह्यस्मिन्नधोमुखाः ॥ ८
तस्मान्मे दुःखमुत्पन्नं दृष्ट्वा युष्मानधोमुखान् ।
कृच्छ्रामापदमापन्नान् प्रियं किं करवाणि वः ॥ ९
तपसोऽस्य चतुर्थेन तृतीयेन च वा पुनः ।
अर्धेन वापि [1]सन्तर्तुम् आपदं ब्रूत मा चिरम् ॥ १०
अथवा तु समग्रेण तरन्तु तपसा मम ।
भवन्तः सर्व एतस्मात् काममेवं विधीयताम् ॥ ११

पितरः—

कुतो भवान्ब्रह्मचारी यो नस्त्रातुमिहेच्छति ।
न तु विप्राज्य तपसा शक्यमेतद्व्यपोहितुम् ॥ १२
अस्ति नस्तात तपसः फलं प्रवदतां वर ।
संतानप्रक्षयाद्ब्रह्मन् पताम निरयेऽशुचौ ॥ १३
लम्बतामिह नस्तात न ज्ञानं प्रतिभाति वै ।
येन त्वामभिजानीमो लोके विख्यातपौरुषम् ॥ १४
ऋद्धो भवान् महायोगी यो नः शोच्यान् सुदुःखितान् ।
[2]शोचस्युपेत्य कारुण्याच् छृणु ये वै वयं द्विज ॥ १५
यायावरा नाम वयम् ऋषयः संशितव्रताः ।

---

1. क-ख-ग—निस्तर्तुं
2. क-ख-ग—शोच्यान्सुदुःखितानस्मान् कस्माद्वेदविदांवर ।
[अधिकः पाठः]

लोकात् पुण्यादि[1]तो भ्रष्टाः सन्तानप्रक्षयान्विताः ॥ १६
प्रणष्टं नस्तपः पुण्यं न हि नस्तन्तुरस्ति वै ।
अस्ति त्वेकोऽद्य नस्तन्तुः सोऽपि नास्ति यथा तथा ॥ १७
मन्दभाग्योऽल्पभाग्यानां बन्धुस्स किल नः कुले ।
जरत्कारुरिति ख्यातो वेदवेदाङ्गपारगः ॥ १८
नियतात्मा महात्मा च सुव्रतः सुमहातपाः ।
तेन स्म तपसो लोभात् कृच्छ्रमापादिता वयम् ॥ १९
न तस्य भार्या पुत्रो वा बान्धवो वाऽपि कश्चन ।
तस्माल्लम्बामहे गर्ते नष्टसंज्ञा ह्यनाथवत् ॥ २०
स वक्तव्यस्त्वया दृष्ट्वा ह्यस्माकं नाथवत्तया ।
पितरस्तेऽवलम्बन्ते गर्ते दीना अधोमुखाः ॥ २१
साधु दारान् कुरुष्वेति प्रजायस्वेति चाभि भोः ।
कुलतन्तुर् हि नश्शिष्टः स एवैकस्तपोधन ॥ २२
यं तु पश्यसि नो ब्रह्मन् वीरणस्तम्बमाश्रितान् ।
एषोऽस्माकं कुलस्तम्ब आस्ते स्वकुलवर्धनः ॥ २३
यानि पश्यसि चैवं त्वं मूलानीमानि वीरुधः ।
एते नस्तन्तवस्तात कालेन परिभक्षिताः ॥ २४
यत्त्वेकं पश्यसि ब्रह्मन् मूल[2]मस्य न भक्षितम् ।
अत्र लम्बामहे सर्वे सोऽप्येकस्तम्ब आश्रितः ॥ २५

1. क-ख-ग—हस्तस्ता. 2. क-ख-ग—मस्यार्धभक्षितम्

यमाखुं पश्यसि ब्रह्मन् काल एष महाबलः ॥ २५॥
[1]स तन्तुमेकं दिवसैर् दशनैः क्षयते नुदन् ।
जरत्कारुं तपोलुब्धं मन्दात्मानमचेतसम् ॥ २६॥
न हि नस्तत्तपस्तस्य तारयिष्यति सत्तम ॥ २७
छिन्नमूलान् परिभ्रष्टान् कालोपहतचेतसः ।
अप्रतिष्ठान् प्रपश्यास्मान् यथा दुष्कृतकारिणः ॥ २८
अस्मासु पतितेष्वत्र सह [2]पूर्वैः सहान्वयैः ।
छिन्नः कालेन सोऽप्यत्र गन्ता वै नरकं ततः ॥ २९
तपो वाऽप्यथ वा यज्ञो यच्चान्यत्पावनं महत् ।
तत्सर्वं न समं तात संतत्यैतत्सतां मतम् ॥ ३०
स तात दृष्ट्वा ब्रूयास्त्वं जरत्कारुं तपस्विनम् ।
यथा दृष्टमिदं चाद्य त्वयाऽऽख्येयमशेषतः ॥ ३१
यथा दारान्प्रकुर्यात्स पुत्रांश्चोत्पादयेद्यथा ।
तथा ब्रह्मंस्त्वया वाच्यः सोऽस्माकं नाथवत्तया ॥ ३२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ ५ ॥ आस्तीकपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

[अस्मिन्नध्याये ३२ श्लोकाः ।]

---

1. क-ख-ग—स तं तपोरतं मन्दं शनैः क्षपयते तु नः
2. क-ख-ग—सर्वैः पितामहैः

॥ अष्टात्रिंशोऽध्यायः ॥

जरत्कारो· स्वपितृसंवाद ॥ १ ॥ भार्यान्वेषणं च ॥ २ ॥

सूतः—

एतच्छ्रुत्वा जरत्कारुर् भृशं शोकपरायणः ।
उवाच स्वान्पितॄन्[1] मुख्यान् बाष्पगद्गदया गिरा ॥ १

जरत्कारुः—

अहमेव जरत्कारुः किल्बिषी भवतां सुतः ।
तं दण्डं धारयत मे दुष्कृतेरकृतात्मनः ॥ २

पितरः—

पुत्र दिष्ट्याऽसि संप्राप्त इमं देशं यदृच्छया ।
किमर्थं च त्वया ब्रह्मन् न कृतो दारसङ्ग्रहः ॥ ३

जरत्कारुः—

ममायं पितरो नित्यं हृदि संपरिवर्तते ।
ऊर्ध्वरेताः शरीरं वै प्रापयेयममुत्र च ॥ ४

एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः ।
मया निवर्तिता बुद्धिर् ब्रह्मचर्यात्पितामहाः ॥ ५

करिष्ये वः प्रियं कामं निवेक्ष्ये नात्र संशयः ।
सनामां यद्यहं कन्याम् उपलप्स्ये कदाचन ॥ ६

1. क-ख-ग—दुःखाद्बाष्पसंदिग्धया

भविष्यति च या काचिद् भैक्षवत्स्वयमुद्यता ।
प्रतिग्रहीता तामस्मि [1]न हरेयं च तामहम् ॥ ७

एवंविधमहं [2]कुर्यां निवेशं प्राप्नुयां यदि ।
अन्यथा न करिष्ये तत् सत्यमेतत्पितामहाः ॥ ८

सूतः—

एवमुक्त्वा तु स पितॄंश् चचार पृथिवीं मुनिः ।
न च स्म लभते भार्यां वृद्धोऽयमिति शौनक ॥ ९

यदा निर्वेदमापन्नः पितृभिश्च प्रचोदितः ।
तदाऽरण्यं स गत्वोच्चैश् चुक्रोश भृशदुःखितः ॥ १०

यानि भूतानि सन्तीह जङ्गमस्थावराणि च ।
अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः ॥ ११

उग्रे तपसि वर्तन्तं पितरश्चोदयन्ति माम् ।
निविशस्वेति दुःखार्तास् तेषां प्रियचिकीर्षया ॥ १२

निवेशार्थ्यखिलां भूमिं कन्याभैक्षं चराम्यहम् ।
दरिद्रो दुःखशीलश्च पितृभिः सन्नियोजितः ॥ १३

यस्य कन्याऽस्ति भूतस्य गुणैः सम्यक् प्रकीर्तिता ।
प्रयच्छतु स मे कन्यां चरतः सर्वतोदिशम् ॥ १४

1. क-ख-ग—न भरेयं च 2. अ—कन्या

मम कन्या सनामा या भैक्षवस्योद्यता भवेत् ।
[1]हरेयं चैव यां नाहं तां मे कन्यां प्रयच्छत ॥ १५

ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः ।
तामादाय प्रवृत्तिं ते वासुकेः प्रत्यवेदयन् ॥ १६

तेषां श्रुत्वाऽथ नागेन्द्रस् तां कन्यां समलङ्कृताम् ।
प्रगृह्यारण्यमगमत् समीपं तस्य पन्नगः ॥ १७

[2]स तत्र भैक्षवत्कन्यां प्रादात्तस्मै महात्मने ।
[3]कालेन वासुकिर्ब्रह्मन् न स तां प्रत्यगृह्णत ॥ १८

असनामेति वै कृत्वा भरणे चाविचारिते ।
[4]मोक्षभावे स्थितश्चापि मन्दीभूतः परिग्रहे ॥ १९

ततो नाम स कन्यायाः पप्रच्छ भृगुनन्दन ।
वासुकिं हरणं चास्या न कुर्यामित्युवाच ह ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

॥ ५ ॥ आस्तीकपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

[अस्मिन्नध्याये २० श्लोकाः]

---

1. क-ख-ग—भ
2. क-ख-ग—तत्र तां
3. क-ख-ग—नागेन्द्रो
4. क-ख-ग—मोक्ष एव

॥ एकोनचत्वारिंशोऽध्यायः ॥

जरत्कारोरुद्वाह ॥ १ ॥ तस्यां गर्भसंभवः ॥ २ ॥ समयोल्लङ्घनेन क्रुद्धस्य मुनेः तपोऽर्थं गमनम् ॥ ३ ॥

सूतः—

वासुकिस्त्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा ।
सनामा तव कन्येयं स्वसा मे तपसान्विता ॥ १

हरिष्यामि च ते भार्यां प्रतीच्छेमां द्विजोत्तम ।
रक्षणं च करिष्येऽस्याः सर्वशक्त्या तपोधन ॥ २
स्वदर्थं रक्षिता चैषा मया मुनिवरप्रभो ॥ २॥

ऋषिः—

न भरिष्येऽहमेतां वै एष मे समयः कृतः ।
अप्रियं मा करिष्यच्च कृते चैनां त्यजाम्यहम् ॥ ३॥

सूतः—

प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति ।
जरत्कारुस्तदा वेश्म भुजगस्य जगाम ह ॥ ४॥

तत्र मन्त्रविदां श्रेष्ठस् तपोवृद्धो महा[1]मतिः ।
जग्राह पाणिं धर्मात्मा विधिमन्त्रपुरस्कृतम् ॥ ५॥

ततो वास[2]गृहे शुभ्रे पन्नगेन्द्रस्य धीमतः ।

1. क-ख-ग—तपाः 2. क-ख-ग—गृहं शुभ्रं

जगाम भार्यामादाय स्तूयमानो मनीषिभिः ॥ ६

शयनं तत्र वै कृत्स्नं [1]पराऽर्घ्यास्तरणावृतम् ।
स तत्र भार्यासहितो जरत्कारुरुवास ह ॥ ७

स तत्र समयं चक्रे भार्यया सह सत्तमः ॥ ७॥

जरत्कारुः—

विप्रियं मे न कर्तव्यं न च वाच्यं कदाचन ।
त्यजेयमप्रिये हि त्वां कृते वासं च ते गृहे ॥ ८॥

एतद्गृहाण वचनं मया यत्समुदीरितम् ॥ ९

सूत—

ततः परमसंविग्ना स्वसा नागपतेस्तु सा ।
अतिदुःखान्विता वाचं तमुवाचैवमस्विति ॥ १०

तथैव साच भर्तारं दुःखशीलमुपाचरत् ।
उपायैरश्वेतकाकीयैः प्रियकामा यशस्विनी ॥ ११

ऋतुकाले ततस्स्नाता कदाचिद्वासुकेस्स्वसा ।
भर्तारं तु यथान्यायम् उपतस्थे महामुनिम् ॥ १२

तत्र तस्यां समभवद् गर्भो ज्वलनसन्निभः ।
अतीव तपसा युक्तो वैश्वानरसमद्युतिः ॥ १३

शुक्लपक्षे यथा सोमो व्यवर्धत तथैव सः ।
ततः कतिपयाहस्सु जरत्कारुर्महातपाः ॥ १४

1. क-ख-ग—स्पर्ध्यास्तरणसंस्तृतम्

उत्सङ्गेऽस्याःशिरः कृत्वा सुष्वाप परिखिन्नवत् ।
तस्मिंश्च सुप्ते विप्रेन्द्रे सविताऽस्तमियाद्गिरिम् ॥ १५

अह्नः परिक्षये ब्रह्मंस् ततः साऽचिन्तयत्तदा ।
वासुकेर्भगिनी भीता धर्मलोपान्मनस्विनी ॥ १६

किं नु मे सुकृतं भूयाद् भर्तुरुत्थापनेन वा ।
दुःखशीलो हि धर्मात्मा कथं नास्यापराध्नुयाम् ॥ १७

कोपो वा धर्मशीलस्य धर्मलोपोऽथवा पुनः ।
धर्मलोपो गरीयान्वै स्यादित्यत्राकरोन्मनः ॥ १८

उत्थापयिष्ये यद्येनं ध्रुवं कोपो भविष्यति ।
धर्मलोपो भवेदस्य सन्ध्यातिक्रमणे ध्रुवम् ॥ १९

इति निश्चित्य मनसा जरत्कारुर्भुजंगमा ।
तमृषिं दीप्ततपसं शयानमनलोपमम् ॥ २०

उवाचेदं वचश्श्लक्ष्णं ततो मधुरभाषिणी ।
उत्तिष्ठ त्वं महाभाग सूर्योऽस्तमुपगच्छति ॥ २१

सन्ध्यामुपास्स्व भगवन् अपस्स्पृष्ट्वा महाव्रतः ।
प्रादुष्कृताग्निहोत्रोऽयं मुहूर्तो रम्यदारुणः ॥ २२

सन्ध्या प्रवर्तते चेयं पश्चिमस्यां दिशि प्रभो । २२॥

1. क-ख-ग—नास्या 2. क-ख-ग—मायां

एवमुक्तस्स भगवान् जरत्कारुर्महातपाः ।
भार्यां प्रस्फुरमाणोष्ठ इदं वचनमब्रवीत् ॥ २३॥

जरत्कारुः—

अवमानः प्रयुक्तोऽयं त्वया मम भुजंगमे ।
समीपे ते न वत्स्यामि गमिष्यामि यथागतम् ॥ २४॥

न हि तेजोऽस्ति वामोरु मयि सुप्ते विभावसोः ।
अस्तं गन्तुं यथाकालम् इति मे हृदि वर्तते ॥ २५॥

न चाप्यवमतस्येह वस्तुं रोचेत कस्य चित् ।
किं पुनर्धर्मशीलस्य मम वा मद्विधस्य वा ॥ २६॥

सूतः—

एवमुक्ता जरत्कारुर् भर्त्रा हृदयकम्पनम् ।
अब्रवीद्भुगिनी तत्र वासुकेस्तु निवेशने ॥ २७॥

जरत्कारुः—

नावमानात्कृतवती तवाहं प्रतिबोधनम् ।
धर्मलोपो न ते विप्र स्यादित्येवं कृतं मया ॥ २८॥

सूतः—

उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः ।
ऋषिः कोपसमाविष्टस् त्यक्तुकामो भुजंगमाम् ॥ २९॥

जरत्कारुः—

न मे वागनृतं प्राह गमिष्येऽहं भुजंगमे ।

समयो ह्येष मे पूर्वं त्वया सह मिथः कृतः ॥ ३०॥
सुखमध्युषितं भद्रे ब्रूयास्त्वं भ्रातरं शुभे ॥ ३१
इतो मयि गते भीरु गतस्स भगवानिति ।
त्वं चापि मयि निष्क्रान्ते न शोकं कर्तुमर्हसि ॥ ३२

सूतः—

इत्युक्ता साऽनवद्याङ्गी प्रत्युवाच मुनिं तदा ।
जरत्कारुं जरत्कारुश् चिन्ताशोकपरायणा ॥ ३३
बाष्पगद्गदया वाचा मुखेन परिशुष्यता ।
कृताञ्जलिर्वैरारोहा पर्यश्रुनयना ततः ॥ ३४
धैर्यमालम्ब्य वामोरूर् हृदयेन प्रवेपता ॥ ३४॥

जरत्कारु —

न मामर्हसि धर्मज्ञ परित्यक्तुमनागसीम् ।
धर्मे स्थितां स्थितो धर्मे सदा प्रियहिते रताम् ॥ ३५॥
प्रदाने कारणं यच्च मम तुभ्यं द्विजोत्तम ।
अपत्यार्थं तु मे भ्रात्रा ज्ञातीनां हितकाम्यया ॥ ३६॥
तदलब्धवतीं मन्दां किं मां वक्ष्यति वासुकिः ॥ ३७
मातृशापाभिभूतानां ज्ञातीनां मम सत्तम ।
अपत्यमीप्सितं त्वत्तस् तच्च तावन्न दृश्यते ॥ ३८
त्वत्तो ह्यपत्यलाभेन ज्ञातीनां मे शुभं भवेत् ॥ ३८॥

संप्रयोगो भवेन्नायं मम मोघस्त्वया द्विज ।
ज्ञातीनां सुखमिच्छन्ती भगवंस्त्वां प्रसादये ॥ ३९॥

इममव्यक्तरूपं मे गर्भमाधाय सत्तम ।
कथं त्यक्ष्यामि महाभाग गन्तुमिच्छस्यनागसीम् ॥ ४०॥

सूतः—

एवमुक्तस्तु स मुनिर् भार्यां वचनमब्रवीत् ।
यद्युक्तमनुरूपं च जरत्कारुं तपोधनः ॥ ४१॥

अस्त्येष गर्भः सुभगे तव वैश्वानरोपमः ।
ऋषिः परमधर्मात्मा वेदवेदाङ्गपारगः ॥ ४२॥

एवमुक्त्वा स धर्मात्मा जरत्कारुर्महामुनिः ।
उग्राय तपसे भूयो जगाम कृतनिश्चयः ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

॥ ५ ॥ आस्तीकपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

[अस्मिन्नध्याये ४३॥ श्लोकाः ।]

॥ चत्वारिंशोऽध्यायः ॥

आस्तीकोत्पत्तिः ॥ १ ॥

सूतः—

गतमात्रं तु भर्तारं जरत्कारुरवेदयत् ।
भ्रातुस्त्वरितमागत्य याथातथ्यं तपोधन ॥ १

ततस्स भुजगश्रेष्ठः श्रुत्वा सुमहदप्रियम् ।
उवाच भगिनीं दीनां तदा दीनतरस्स्वयम् ॥ २

वासुकिः—

जानासि भद्रे यत्कार्यं प्रदाने कारणं च यत् ।
पन्नगानां हितार्थाय पुत्रस्स्यात्ते ततो यदि ॥ ३

स सर्पसत्रात्किल नो मोक्षयिष्यति वीर्यवान् ।
एवं पितामहः पूर्वम् उक्तवान्मां सुरैस्सह ॥ ४

अप्यस्ति गर्भस्सुभगे तस्मात्ते मुनिसत्तमात् ।
न चेच्छाम्यफलं तस्य दारकर्म मनीषिणः ॥ ५

कामं च मम न न्याय्यं प्रष्टुं त्वां कार्यमीदृशम् ।
किंतु कार्यगरीयस्त्वात् तस्मादहमचूचुदम् ॥ ६

दुर्वारतां विदित्वा च भर्तुस्ते नियतात्मनः ।
नैनमन्वागमिष्यामि कदाचिद्धि शपेत्स माम् ॥ ७

आचक्ष्व भद्रे सर्वं त्वं भर्तुश्चैव विचेष्टितम् ।
शल्यमुद्धर मे घोरम् इदं हृदि चिरस्थितम् ॥ ८

सूतः—

जरत्कारुस्ततो वाक्यम् इत्युक्ता प्रत्यभाषत ।
आश्वासयन्ती सन्तप्तं वासुकिं पन्नगेश्वरम् ॥ ९

जरत्कारुः—

पृष्टो मयाऽपत्यहेतोः स महात्मा महातपाः ।

अस्तीत्युदरमुद्दिश्य ममेदं गतवांश्च सः ॥ १०

स्वैरेष्वपि न तेनाहं स्मरामि वितथं क्वचित् ।
उक्तपूर्वं कुतो वाक्यं सांपराये स वक्ष्यति ॥ ११

न संतापस्त्वया कार्यः कामं प्रति भुजंगमे ।
उत्पत्स्यति हि ते पुत्रो ज्वलनार्कसमद्युतिः ॥ १२

इत्युक्त्वा स हि मां भ्रातर् गतो भर्ता तपोवनम् ।
तस्माद्धेतु परं दुःखं तवेदं मनसि स्थितम् ॥ १३

सूतः—

एतच्छ्रुत्वा स नागेन्द्रो वासुकिः परया मुदा ।
एवमस्त्विति तद्वाक्यं भगिन्याः प्रत्यगृह्णत ॥ १४

सान्त्वमानार्थदानैश्च पूजया चानुरूपया ।
सोदर्यां पूजयामास स्वसारं पन्नगोत्तमः ॥ १५

ततस्स ववृधे गर्भो महातेजा रविप्रभः ।
यथा सोमो द्विजश्रेष्ठ शुक्लपक्षोदितो दिवि ॥ १६

यथाकालं तथा ब्रह्मन् प्रजज्ञे भुजगस्वसा ।
कुमारं देवगर्भाभं पितृमातृभयापहम् ॥ १७

ववृधे स च तत्रैव नागराजनिवेशने ।
वेदांश्चाधिजगे साङ्गान् भार्गवच्यवनात्मजात् ॥ १८

चरितव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः ।

नाम चास्याभवत्ख्यातं लोकेष्वस्तीक इत्युत ॥ १९

अस्तीत्युक्त्वा गतो यस्मात् पिता गर्भस्थमेव तम् ।
एवं तस्मादिदं तस्य नामास्तीकेति विश्रुतम् ॥ २०

स बाल एव तत्रस्थश् चरन्नमितबुद्धिमान् ।
गृहे पन्नगराजस्य प्रयत्नात्पर्य [1]रक्ष्यत ॥ २१

भगवानिव देवेशः शूलपाणिः पिनाकधृक् ।
विवर्धमानः सर्वांस्तान् पन्नगानप्यहर्षयत् ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ५ ॥ आस्तीकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[अस्मिन्नध्याये २२ श्लोकाः ।]

॥ एकचत्वारिंशोऽध्यायः ॥

मन्त्रिभिर्जनमेजयस्य परीक्षिच्चरित्रकथनम् ॥ १ ॥

---

[2] शौनकः—

यदपृच्छत्ततो राजा मन्त्रिणो जनमेजयः ।
पितुस्स्वर्गगतिं तन्मे विस्तरेण पुनर्वद ॥ १

---

1. क-ख-ग—पर्यरक्षत
2. क-ख-ग—सूतस्य वचनं श्रुत्वा शौनक प्राह विस्मितः
[अधिकः पाठः]

सूतः—

शृणु ब्रह्मन्यथापृष्टा मन्त्रिणो नृपतेस्तदा ।
आख्यातवन्तस्ते सर्वे निधनं तत्परीक्षितः ॥ २

जनमेजयः—

जानन्ति तु भवन्तस्तद् यथावृत्तं पितुर्मम ।
आसीद्यथा स निधनं गतः काले महायशाः ॥ ३

श्रुत्वा भवत्सकाशात्तु पितुर्वृत्तमशेषतः ।
कल्याणं प्रतिपत्स्यामि विपरीतं न जातु चित् ॥ ४

सूतः—

मन्त्रिणोऽथाब्रुवन्वाक्यं पृष्टास्तेन [1]महात्मना ।
सर्वधर्मविदः प्राज्ञा राजानं जनमेजयम् ॥ ५

मन्त्रिणः—

धर्मज्ञश्च प्रजापालो महात्मा च पिता तव ।
आसीदिह यथावृत्तः स महात्मा शृणुष्व तत् ॥ ६

चातुर्वर्ण्यं स्वधर्मस्थं स कृत्वा पर्यरक्षत ।
धर्मतो धर्मविद्राजा धर्मो विग्रहवानिव ॥ ७

[2]अरक्षत्पृथिवीं देवीं श्रीमानतुलविक्रमः ।
द्वेष्टारस्तस्य नैवासन् स च न द्वेष्टि कंचन ॥ ८

समस्सर्वेषु भूतेषु प्रजापतिरिवाभवत् ।

---

1. क-ख-ग—ससादरम् 2. क-ख-ग—अरक्षत्प्रथितः पृथ्वीं

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्मसु ॥ ९

स्थितास्सुमनसो राजंस् तेन राज्ञा स्वधिष्ठिताः ।
विधवानाथकृपणान् विकलांश्च बभार सः ॥ १०

सुदर्शः सर्वभूतानाम् आसीत्सोम इवापरः ।
तुष्टपुष्टजनश्श्रीमान् सत्यवाग्दृढविक्रमः ॥ ११

धनुर्वेदे च शिष्योऽभून् नृपश्शारद्वतस्य सः ।
जितेन्द्रियश्चात्मवांश्च मेधावी वृद्धसेविता ॥ १२
षड्वर्गजिन्महाबुद्धिर् नीतिकर्मविदुत्तमः ।

गोविन्दस्य प्रियश्चासीत् पिता ते जनमेजय ॥ १३

लोकस्य चैव सर्वस्य प्रिय आसीन्महायशाः ॥ १३॥
परिक्षीणेषु कुरुषु उत्तरायामजायत ।

परीक्षिदभवत्तेन सौभद्रस्यात्मजो बली ॥ १४॥
राजा धर्मार्थकुशलो युक्तस्सर्वगुणैर्नृपः ।

[1]प्रजा इमास्तव पिता षष्टिवर्षाण्यपालयत् ॥ १५॥
ततो दिष्टान्तमापन्नः सर्पेणानतिवर्तिनम् ॥ १६

ततस्त्वं पुरुषश्रेष्ठ धर्मेण प्रतिपेदिवान् ।

---

1. क-ख-ग—जितेन्द्रियश्चात्मवांश्च मेधावी वृद्धसंमतः ।
षड्वर्गजिन्महाप्राज्ञो नीतिधर्मविदुत्तमः ॥
[अधिकः पाठः]

इदं वर्षसहस्राय राज्यं कलियुगे गतम् ॥ १७

बाल एवाभिजातोऽसि सर्वभूतानु[1]कम्पनः ॥ १७॥

जनमेजयः—

नास्मिन्कुले जातु बभूव राजा
यो न प्रजानां प्रियकृत्प्रियश्च ।
विशेषतः प्रेक्ष्य [2]महीपतीनां
वृत्तं महावृत्तपरायणानाम् ॥ १८॥

कथं निधनमापन्नः पिता मम तथाविधः ।
आचक्षध्वं यथावन्मे श्रोतुमिच्छामि तत्त्वतः ॥ १९॥

सूतः—

एवं संचोदिता राज्ञा मन्त्रिणस्ते नराधिपम् ।
ऊचुस्सर्वे यथावृत्तं राज्ञः प्रियहिते रताः ॥ २०॥

मन्त्रिणः—

बभूव मृगयाशीलस् तव राजन्पिता सदा ॥ २१

यथा पाण्डुर्महाभागो धनुर्धरवरो युधि ॥ २१॥

अस्मास्वासज्य सर्वाणि राजकार्याण्यशेषतः ।
स कदाचिद्वनगतो मृगं विव्याथ पत्रिणा ॥ २२॥

विद्ध्वा चान्वचरत्तूर्णं स मृगं गहने वने ।
पदातिर्बद्धनिस्त्रिंशः शरपाणिर्धनुर्धरः ॥ २३॥

1. क-ख-ग—पालकः ॥ 2. क-ख-ग—पितामहानां

न चाससाद गहने मृगं नष्टं पिता तव ।

परिश्रान्तो वयस्थश्च षष्टिवर्षो जरान्वितः ॥ २४॥
क्षुधितस्स महारण्ये ददर्श मुनिमन्तिके ॥ २५

स तं पप्रच्छ राजेन्द्रो मुनिं मौनव्रतान्वितम् ।
न च किंचिदुवाचेदं स मुनिः पृच्छितोऽपि सन् ॥ २६

ततो राजा क्षुच्छ्रमार्तस् तं मुनिं स्थाणुवत्स्थितम् ।
मौनव्रतधरं शान्तं सद्यो मन्युवशं गतः ॥ २७

न बुबोध हितं राजा मौनव्रतधरं मुनिम् ।
स तं मन्युसमाविष्टो धर्षयामास ते पिता ॥ २८

मृतं सर्पं धनुष्कोट्या समुत्क्षिप्य धरातलात् ।
तस्य शुद्धात्मनः प्रादात् स्कन्धे भारतसत्तम ॥ २९

तं नोवाच स मेधावी राजानं साध्वसाधु वा ।
तस्यौ तथैव [1]नाक्रुध्यत् सर्पं स्कन्धेन धारयन् ॥ ३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
॥ ५ ॥ आस्तीकपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

[अस्मिन्नध्याये ३० श्लोकाः ।]

---

1. क-ख-ग—चाक्रुध्यत्

॥ द्विचत्वारिंशोऽध्यायः ॥

परीक्षिन्मन्त्रिसंवाद ॥ १ ॥

मन्त्रिण —

ततस्स राजा राजेन्द्र स्कन्धे तस्य भुजंगमम् ।
मुनेः क्षुत्क्षाम आसज्य स्वपुरं पुनरायया ॥ १

ऋषेस्तस्य तु पुत्रोऽभूद् [1]भुवि जातो महायशाः ।
शृङ्गी नाम महातेजास् तिग्मवीर्योऽतिकोपनः ॥ २

ब्रह्माणं सोऽप्युपागम्य मुनिः पूजां चकार ह ।
सोऽनुज्ञाय गतस्तस्य शृङ्गी शुश्राव तं तदा ॥ ३

सख्युस्सकाशात्पितरं पित्रा ते धर्षितं तदा ।
मृतं सर्पं तथासक्तं पित्रा ते जनमेजय ॥ ४

वहन्तं कुरुशार्दूल स्कन्धेनानपकारिणम् ।
तपस्विनं महात्मानं तं मुनिप्रवरं नृप ॥ ५

जितेन्द्रियं विशुद्धं च स्थितं कर्मण्यथाद्भुते[2] ।
तपसा द्योतितात्मानं स्वेष्वङ्गेषु यतं तदा ॥ ६

शुभाचारं शुभकथं सुस्थिरं तमलोलुपम् ।

1. क-ख-ग—गवि 2. क-ख-ग—तम्।

अक्षुद्रमनसूयं च वृद्धं मौनव्रते स्थितम् ।
शरण्यं सर्वभूतानां पित्रा [1]विप्रकृतं तव ॥ ७

शशापाथ स तच्छ्रुत्वा पितरं ते रुषान्वितः ।
ऋषेः पुत्रो महातेजा बालोऽपि स्थविरैर्वरः ॥ ८

स क्षिप्रमुदकं स्पृष्ट्वा रोषादिदमुवाच ह ।
पितरं तेऽभिसन्धाय तेजसा प्रज्वलन्निव ॥ ९

अनागसि गुरौ यो मे मृतं सर्पमवासृजत् ।
तं नागस्तक्षकः क्रुद्धस् तेजसा सादयिष्यति ॥ १०

सप्तरात्रादितः पापं पश्य मे तपसो बलम् ।
इत्युक्त्वा प्रययौ तत्र पिता यत्राऽस्य सोऽभवत् ॥ ११

दृष्ट्वा च पितरं तस्मै शापं तं प्रत्यवेदयत् ।
स चापि मुनिशार्दूलः प्रेषयामास ते पितुः ॥ १२

शप्तोऽसि मम पुत्रेण यत्तो भव महीपते ।
तक्षकस्त्वां महाराज [2]सप्तरात्रेण धक्ष्यति ॥ १३

श्रुत्वा तु तद्वचो घोरं पिता ते जनमेजय ।
यत्तोऽभवत्परित्रस्तस् तक्षकात्पन्नगोत्तमात् ॥ १४

ततस्तस्मिंस्तु दिवसे सप्तमे समुपस्थिते ।
राज्ञस्समीपं ब्रह्मर्षिः काश्यपो गन्तुमैच्छत ॥ १५

1. क-ख-ग—ते विकृतं तथा 2. क-ख-ग—तेजसा सादयिष्यति

तं ददर्शाथ नागेन्द्रस् तक्षकः काश्यपं तदा ।
तमब्रवीत्पन्नगेन्द्रः काश्यपं त्वरितं व्रजन् ॥ १६
क्व भवांस्त्वरितो याति किं च कार्यं चिकीर्षति ॥ १६॥

काश्यप·—

यत्र राजा कुरुश्रेष्ठः परीक्षिन्नाम वै द्विज ।
तक्षकेण भुजंगेन धक्ष्यते किल तत्र वै ॥ १७॥
गच्छाम्यहं तं त्वरितः सद्यः कर्तुमपज्वरम् ॥ १८
मयाऽभिमन्त्रितं चापि न सर्पो धर्षयिष्यति ॥ १८॥

तक्षकः—

किमर्थं तं मया दष्टं संजीवयितुमिच्छसि ।
ब्रूहि काममहं तत्ते दद्मि स्वं वेश्म गम्यताम् ॥ १९॥

1मान्त्रिणः—

धनलिप्सुरहं तत्र यामीत्युक्तश्च तेन सः ॥ २०
तमुवाच महात्मानं वारयन् श्लक्ष्णया गिरा ।
यावद्धनं प्रार्थयसे राज्ञस्तस्मात्ततोऽधिकम् ॥ २१

---

1. क-ख-ग—इत्युक्त्वा तक्षकस्तत्र सोऽदशद्वै वनस्पतिम् ।
स दष्टमात्रो नागेन भस्मीभूतोऽभवन्नगः ॥
काश्यपस्तु ततो राजन् संजीवयत तं नगम् ।
ततस्तं लोभयामास कामं ब्रूहीति तक्षकः ॥
ब्रूहि काममहं तेऽद्य दद्मि स्वं वेश्म गम्यताम् ॥
[अधिकः पाठः

गृहाण मत्त एव त्वं सन्निवर्तस्व चानघ ॥ २१॥
स एवमुक्तो नागेन काश्यपो द्विपदां वरः ।
लब्ध्वा वित्तं निववृते तक्षकात्पन्नगोत्तमात् ॥ २२॥
तस्मिन्प्रतिगते विप्रे छद्मनोपेत्य तक्षकः ॥ २३
तं नृपं नृपतिश्रेष्ठं पितरं धार्मिकं तव ।
प्रासादस्थं क्षणेनैव दग्धवान् विषवह्निना ॥ २४
ततस्त्वं पुरुषव्याघ्र विजयायाभिषेचितः ।
एवं दृष्टं श्रुतं चापि यथावन्नृपसत्तम ॥ २५
अस्माभिर्निखिलं वृत्तं कथितं तेऽतिदारुणम् ॥ २५॥
श्रुत्वा चैवं नृपश्रेष्ठ पार्थिवस्य पराभवम् ।
अस्य चर्षेरुदङ्कस्य विधत्स्व यदनन्तरम् ॥ २६॥

जनमेजय—

एतत्तु श्रोतुमिच्छामि ह्यटव्यां निर्जने वने ।
संवादं पन्नगेन्द्रस्य काश्यपस्य च यत्तदा ॥ २७॥
केन दृष्टं श्रुतं चापि भवतां श्रोत्रमागतम् ।
श्रुत्वा चाथ विधास्यामि पन्नगान्तकरीं मतिम् ॥ २८॥

मन्त्रिणः—

शृणु राजन्यथाऽस्माकं येनैतत्कथितं पुरा ।
समागतं द्विजेन्द्रस्य पन्नगेन्द्रस्य चाध्वनि ॥ २९॥

तस्मिन्वने[1]चरः कश्चिदिन्धनार्थाय पार्थिव ।
विचिन्वन्पूर्वमारूढः शुष्कशाखं वनस्पतिम् ॥ ३०॥
अबुध्यमानौ तत्रास्तां वृक्षस्थं पन्नगद्विजौ ।
स तु तेनैव वृक्षेण भस्मीभूतोऽभवत्तदा ॥ ३१॥
द्विजप्रभावाद्राजेन्द्र जीवितस्स वनस्पतिः ।
[2]तेन गत्वा नरश्रेष्ठ नगरेऽस्मिन्निवेदितम् ॥ ३२॥
यथा वृत्तं तु तत्सर्वं तक्षकस्य द्विजस्य च ।
एतत्ते कथितं राजन् यथावृत्तं यथाश्रुतम् ॥ ३३॥
श्रुत्वा च कुरुशार्दूल प्रकुरुष्व यथेप्सितम् ॥ ३४

सूतः—

मन्त्रिणां वचनं श्रुत्वा स राजा जनमेजयः ।
पर्यतप्यत दुःखार्तः प्रत्यपिङ्गत्करे करम् ॥ ३५
निश्श्वसन्नुष्णमसकृद् दीर्घं राजीवलोचनः ।
मुमोचाश्रूणि च तदा नेत्राभ्यां प्ररुदन्नृपः ॥ ३६
उवाच च महीपालो दुःखशोकसमन्वितः ॥ ३६॥
श्रुत्वैतद्भवतां वाक्यं पितुर्मे स्वर्गतिं प्रति ।
निश्चितेयं [3]मतिर्या वै तां निबोधत सत्तमाः ॥ ३७॥
अनन्तरमहं मन्ये तक्षकाय दुरात्मने ।

---

1. क-ख-ग—नरः 2. क-ख-ग—तेनागत्य
3. क-ख-ग—मम मतिर्या वै तां मे निबोधत ।

प्रतिकर्तव्यमित्येवं येन मे हिंसितः पिता ॥ ३८॥
ऋषेर्हि शृङ्गेर्वचनं कृत्वा दृष्ट्वा च पार्थिवम् ।
यदि गच्छेदसौ पापो ननु जीवेत्पिता मम ॥ ३९॥
परिहीयेत किं तस्य यदि जीवेत्स पार्थिवः ।
काश्यपस्य प्रयोगेण मन्त्रिणां सुनयेन च ॥ ४०॥
स च वारितवान्मोहात् काश्यपं द्विजसत्तमम् ।
[1]स सञ्जीवयितुं प्राप्तो राजानमपराजितम् ॥ ४१॥
महानतिक्रमो [2]ह्यस्य तक्षकस्य दुरात्मनः ।
[3]काश्यपस्याददाद्द्रव्यं न नृपं जीवयेदिति ॥ ४२॥
उदङ्कस्य प्रियं कुर्वन् आत्मनश्च महत्प्रियम् ।
भवतां चैव सर्वेषां यास्याम्यपचितिं पितुः ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

॥ ५ ॥ आस्तीकपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

[अस्मिन्नध्याये ४३॥ श्लोकाः ।]

---

1. क-ख-ग—संजिजीवयिषुं प्राप्तं
2. क-ख-ग—ह्येष
3. क-ख-ग—द्विजस्य योऽददाद्द्रव्यं मा नृपं

॥ त्रिचत्वारिंशोऽध्यायः ॥

सर्पसत्रोपक्रमः ॥ १ ॥ अग्नौ सर्पपतनम् ॥ २ ॥

सूतः—

एवमुक्त्वा ततश्श्रीमान् मन्त्रिभिश्चानुमोदितः ।
आरुरोह प्रतिज्ञां वै सर्पसत्राय पार्थिवः ॥ १

ब्रह्मन् भरतशार्दूलो राजा पारीक्षितस्तदा ।
पुरोहितमथाहूय ऋत्विजो वसुधाधिपः ॥ २

अब्रवीद्वाक्यसंपन्नः [1]संपन्नार्थतरं वचः । २॥

जनमेजयः—

यो मे हिंसितवांस्तातं तक्षकस्स दुरात्मवान् ।
प्रतिकुर्यां यथा तस्य तद्भवन्तो ब्रुवन्तु मे ॥ ३॥

अपि तत्कर्म विदितं भवतां येन पन्नगम् ।
तक्षकं संप्रदीप्तेऽग्नौ [2]प्राप्येयं सह बान्धवैः ॥ ४॥

यथा तेन पिता मह्यं पूर्वं दग्धो विषाग्निना ।
तथाऽहमपि तं पापं दग्धुमिच्छामि पन्नगम् ॥ ५॥

ऋत्विजः—

अस्ति राजन् महत् सत्रं तदर्थं देवनिर्मितम् ।

1. क-ख-ग—सम्पदर्थकरं 2. क-ख-ग—प्रापयेयं सबान्धवम् ।

सर्पसत्रमिति ख्यातं पुराणैः कथ्यते नृप ॥ ६॥
आहर्ता तस्य सत्रस्य त्वन्नान्योऽस्ति नराधिप ।
इति पौराणिकाः प्राहुर् अस्माकं चास्ति स ऋतुः ॥ ७॥

सूतः—

एवमुक्तस्स राजेन्द्रो मेने सर्पं हि तक्षकम् ।
हुताशनमुखं दीप्तं प्रविष्टं द्विजसत्तम ॥ ८॥
ततोऽब्रवीद्द्विजविदः कर्मज्ञान् ब्राह्मणांस्तदा ॥ ९

जनमेजयः—

आहरिष्यामि तत्सत्रं संभारास्संभ्रियन्तु मे ॥ ९॥

सूतः—

ततस्त ऋत्विजस्तस्य शास्त्रेण द्विजसत्तम ।
देशं तं प्रापयामासुर् यज्ञायतनकारणात् ॥ १०॥
[1]यथाविज्ञानविद्वांसः सर्वे बुद्धिं परां गताः ॥ ११
ऋद्ध्या परमया युक्तम् इष्टं द्विजगणैर्युतम् ।
प्रभूतधनधान्याढ्यम् ऋत्विग्भिस्सुनिवेदितम् ॥ १२
निर्माय चापि विधिवत् यज्ञायतनमुत्तमम् ।
राजानं दीक्षयामासुः सर्पसत्रा[2]य वै द्विजाः ॥ १३
इदं चासीत्तत्र पूर्वं सर्पसत्रे भविष्यति ।
निमित्तं महदुत्पन्नं यज्ञविघ्नकरं तदा ॥ १४

1. क-ख-ग—यथा यथा यज्ञविदस्सर्वे बुद्ध्या परं गताः ।
2. क-ख-ग—सत्रासये तदा ।

यज्ञस्यायतने तस्मिन् क्रियमाणे वचोऽब्रवीत् ।
स्थपतिर्बुद्धिसंपन्नो वास्तुविद्याविशारदः ॥ १५
इत्यब्रवीत्सूत्रधारः सूतः पौराणिकस्तदा ॥ १५॥
यस्मिन्देशे च काले च [1]मापनेयं प्रकीर्तितम् ।
ब्राह्मणं कारणं कृत्वा नायं संस्थाप्यते क्रतुः ॥ १६॥
एतच्छ्रुत्वा च राजा स प्राग्दीक्षाकाल अब्रवीत् ।
क्षत्तारं नेह मे कश्चिद् अज्ञातः प्रविशेदिति ॥ १७॥
ततः कर्म प्रववृधे[2] सर्पसत्रे विधानतः ।
पर्यक्रामंश्च विधिवत् स्वे स्वे कर्मणि याजकाः ॥ १८॥
परिधाय कृष्णवासांसि धूम्रसंरक्तलोचनाः ।
जुहुवुर्मन्त्रवच्चैव समिद्धं जातवेदसम् ॥ १९॥
कम्पयन्ति[3] स्म सर्वेषाम् उरगाणां मनांसि ते ।
सर्पानाजुहुवुस्तत्र सर्वानग्निमुखे तदा ॥ २०॥
ततस्सर्पा[4]स्समापेतुः प्रदीप्ते हव्यवाहने ।
विवेष्टमानाः कृपणा आह्वयन्तः परस्परम् ॥ २१॥
विस्फुरन्तश्च्यसन्तश्च वेष्टयन्तस्तथापरे ।
पुच्छैश्चैव शिरोभिश्च चित्रभानुं प्रपेदिरे ॥ २२॥

---

1. क-ख-ग—स्थापनेयं प्रवर्तिता ।
2. कं-ख-ग—ते 3. क-ख-ग—न्तश्च
4. क-ख-ग—स्ततस्समापेतुस्समिद्धे

श्वेताः कृष्णाश्च रक्ताश्च स्थविराश्शिशवस्तथा ।
रवन्तो भैरवं नादं पेतुर्दीप्ते विभावसौ ॥ २३॥

क्रोशो योजनमात्रो हि गोकर्णस्य प्रमाणतः ।
पतन्त्यजस्रं वेगेन चाम्रावम्रिमतां वर ॥ २४॥

एवं शतसहस्राणि प्रयुतान्यर्बुदानि च ।
[1]अवशानि विनष्टानि नागानां द्विजसत्तम ॥ २५॥

दर्दुरा इव तत्रान्ये हस्तिहस्त इवापरे ।
मत्ता इव च मातङ्गा महाकाया महाबलाः ॥ २६॥

उच्चावचाश्च बहवो नानावर्णा विषोल्बणाः ।
घोराश्च परिघप्रख्या दन्दशूका महाबलाः ॥ २७॥
प्रपेतुरम्बावुरगा मातृवाग्दण्डपीडिताः ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ५ ॥ आस्तीकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
[अस्मिन्नध्याये २८ श्लोकाः]

---

1. क-ख-ग—अग्नावेतानि नष्टानि पन्नगानां द्विजोत्तम ।

॥ चतुश्चत्वारिंशोऽध्यायः ॥

इन्द्रकृतं तक्षकाश्वासनम् ॥ १ ॥ वासुकेः स्वभगिन्या संवादः ॥२॥

शौनकः—

सर्पसत्रे महाराज्ञः पाण्डवेयस्य धीमतः ।
जनमेजयस्य केन्वासन् ऋत्विजः परमर्षयः ॥ १

के सदस्या बभूवुश्च तस्य सत्रे सुदारुणे ।
विषादजननेऽत्यर्थं पन्नगानां महाभये ॥ २

सर्वं विस्तरतस्तात भवाञ्छंसितुमर्हति ।
सर्पसत्रविधानज्ञा विज्ञेयास्तेऽपि सूतज ॥ ३

सूतः—

अहं ते कथयिष्यामि नामानीह मनीषिणाम् ।
य ऋत्विजस्सदस्याश्च तस्यासन्नृपतेस्तदा ॥ ४

तत्र होता बभूवाथ ब्राह्मणश्चण्डभार्गवः ।
च्यवनस्यान्वये जातः ख्यातो वेदविदां वरः ॥ ५

उद्गाता ब्राह्मणो वृद्धो विद्वान्कौ[1]त्सस्तु जैमिनिः ।
ब्रह्माऽभवच्छार्ङ्गरवोऽथाध्वर्युर्बोधपिङ्गलः ॥ ६

सदस्यश्चाभवद्व्यासः पुत्रशिष्यसमन्वितः ।

1. क-ख-ग—स्सोऽथ

उद्दालकः [1]कामठकः श्वेतकेतुश्च शाण्डिलः ॥ ७

असितो देवलश्चैव नारदः पर्वतस्तथा ।
आत्रेयः [2]कुण्डजठरौ द्विजः किरिकटस्तथा ॥ ८

वात्स्यः श्रुतश्रवा वृद्धस् तपस्वाध्यायशीलवान् ।
कहोलो देवशर्मा च मौद्गल्यश्शमठो[3]रगः ॥ ९

एते चान्ये च बहवो ब्राह्मणास्संशितव्रताः ।
सदस्याश्चाभवंस्तत्र सत्रे पारीक्षितस्य ह ॥ १०

जुह्वत्स्वृत्विक्ष्वथ तदा सर्पसत्रे महाक्रतौ ।
अहयः प्रापतंस्तत्र सर्वप्राणिभयावहाः ॥ ११

वसामेदोवहाः कुल्या नागानां संप्रवर्तिताः ।
ववौ गन्धस्तु तुमुलो दह्यतामनिशं तदा ॥ १२

पततां चैव नागानां विप्लुतानां तथाम्बरे ।
अश्रूयतानिशं शब्दो दह्यतां चाग्निना भृशम् ॥ १३

तक्षकस्तु स नागेन्द्रः पुरंदरनिवेशनम् ।
गतश्शुत्वैव राजानं दीक्षितं जनमेजयम् ॥ १४

यतस्सर्वं यथावृत्तम् आख्याय भुजगोत्तमः ।
अगच्छच्छरणं भी[4]तो नमस्कृत्वा पुरंदरम् ॥ १५

---

1. क-ख-ग—शमधरः श्वेतकेतुश्च पञ्चमः ।
2. क-ख-ग—कण्वजठरो द्विजः कटिघटिस्तथा ।
3. क-ख-ग—हरः 4. क-ख-ग—त आगस्कृत्वा

तमिन्द्रः प्राह सुप्रीतो न तवास्तीह तक्षक ।
भयं नागेन्द्र तस्माद्वै सर्पसत्रात् कथं चन ॥ १६

प्रसादितो मया पूर्वं तवार्थाय पितामहः ।
तस्मात्तव भयं नास्ति व्येतु ते मानसो ज्वरः ॥ १७

एवमाश्वासितस्तेन ततस्स भुजगोत्तमः ।
उवास भवने तत्र शक्रस्य मुदितस्सुखी ॥ १८

अजस्रं निपतत्स्वग्नौ नागेषु भृशदुःखितः ।
अल्पशेषपरीवारो वासुकिः पर्यतप्यत ॥ १९

कश्मलं प्राविशद्घोरं वासुकिः पन्नगोत्तमः ।
स घूर्णमानहृदयो भगिनीमिदमब्रवीत् ॥ २०

वासुकि —

दह्यन्तेऽङ्गानि मे भद्रे दिशो न प्रतिभान्ति च ।
सीदामीव च संमोहाद् घूर्णतीव च मे मनः ॥ २१

दृष्टिर्भ्रमति मेऽतीव हृदयं दीर्यतीव च ।
पतिष्याम्यवशोऽद्याहं तस्मिन्दीप्ते विभावसौ ॥ २२

पारीक्षितस्य यज्ञोऽसौ वर्ततेऽस्मज्जिघांसया ।
व्यक्तं मयाऽपि गन्तव्यं पितृराजनिवेशनम् ॥ २३

अयं स कालस्संप्राप्तो यदर्थमसि मे स्वसः ।
जरत्कारोः पुरा दत्ता सा त्राह्यस्मान् सबान्धवान् ॥ २४

अस्तीकः किल यज्ञं तं वर्तमानं भुजङ्गमे ।
प्रतिषेत्स्यति मां पूर्वं स्वयमाह पितामहः ॥ २५

तद्वत्से ब्रूहि वत्सं स्वं कुमारं वृद्धसंमतम् ।
ममाद्य त्वं सभृत्यस्य मोक्षार्थं वेदवित्तमम् ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

॥ ५ ॥ आस्तीकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

[अस्मिन्नध्याये २६ श्लोकाः]

॥ पञ्चचत्वारिंशोऽध्यायः ॥

अस्तीकेन वासुकेराश्वासनं सत्रगमनं च ॥ १ ॥ जनमेजययज्ञ-प्रशंसा च ॥ २ ॥

सूतः—

तत आहूय पुत्रं स्वं जरत्कारुर्भुजंगमा ।
वासुकेर्नागराजस्य वचनादिदमब्रवीत् ॥ १

जरत्कारुः—

अहं तव पितुः पुत्र भ्रात्रा दत्ता निमित्ततः ।
कालस्स चायं संप्राप्तस् तत्कुरुष्व यथातथम् ॥ २

अस्तीकः—

किंनिमित्तं मम पितुर् दत्ता त्वं मातुलेन मे ।

तन्ममाचक्ष्व तत्त्वेन श्रुत्वा कर्ताऽस्मि तत्तथा ॥ ३

सूतः—

तत आचष्ट सा तस्मै बान्धवानां हितैषिणी ।
भगिनी नागराजस्य जरत्कारुरविक्लवा ॥ ४

जरत्कारुः—

भुजंगानामशेषाणां माता कद्रूरिति स्मृता ।
तया शप्ता रुषितया सुता यस्मान्निबोध तत् ॥ ५

उच्चैःश्रवस्यश्वराजे [1]यन्मिथ्या कुरुते मम ।
विनतानिमित्तं पणिते दासभावाय पुत्रकाः ॥ ६

जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः ।
तत्र पञ्चत्वमापन्नाः पितृलोकं गमिष्यथ ॥ ७

तां च शप्तवतीमेवं साक्षाल्लोकपितामहः ।
एवमस्त्विति तद्वाक्यं प्रोवाचानुमुमोद च ॥ ८

वासुकिश्चापि तच्छ्रुत्वा पितामहवचस्तदा ।
अमृते मथिते तात देवाञ्छरणमीयिवान् ॥ ९

सिद्धार्थाश्च सुरास्सर्वे प्राप्यामृतमनुत्तमम् ।
भ्रातरं मे पुरस्कृत्य प्रजापतिमुपागमन् ॥ १०

ते तं प्रसादयामासुः देवास्सर्वे पितामहम् ॥ १०॥

1. क-ख-ग—यो मे न कुरुते वच ।

राज्ञा वासुकिना सार्धं स शापो न भवेदिति ॥ ११

देवाः—

वासुकिर्नागराजोऽयं दुःखितो ज्ञातिकारणात् ।
अभिशापस्य मात्रास्य भगवन्न भवेत्तदा ॥ १२

ब्रह्मा—

जरत्कारुर्जरत्कारुं यो भार्यां समवाप्स्यति ।
तत्र जातो द्विजः शापाद् भुजगान्मोक्षयिष्यति ॥ १३

जरत्कारु —

एतच्छ्रुत्वा तु वचनं वासुकिः पन्नगेश्वरः ।
प्रादान्माममरप्रख्य तव पित्रे महात्मने ॥ १४

प्रागेवानागते काले तत्र त्वं मय्यजायथाः ।
अयं स कालस्संप्राप्तो भवान्नस्त्रातुमर्हति ॥ १५

भ्रातरं चैव मे तस्मात् त्रातुमर्हसि पातकात् ।
अमोघं नः कृतं तत्स्यात् यदहं तव दीयते ॥ १६
पित्रे दत्ता विमोक्षार्थं कथं वा पुत्र मन्यसे ॥ १६॥

सूतः—

एवमुक्तस्तथेत्युक्त्वा सोऽस्तीको मातरं तदा ।
अब्रवीद्दुःखसंतप्तं वासुकिं जीवयन्निव ॥ १७॥

अहं त्वां मोक्षयिष्यामि वासुके पन्नगोत्तम ।
तस्माच्छापान्महासत्त्व सत्यमेतद्ब्रवीमि ते ॥ १८॥

स्वस्थो भव महाभाग न हि ते विद्यते भयम् ।
प्रयतिष्ये तथा सौम्य यथा श्रेयो भविष्यति ॥ १९॥

न मे वागनृतं प्राह स्वैरेष्वपि कुतोऽन्यथा ।
तं वै नृपवरं गत्वा दीक्षितं जनमेजयम् ॥ २०॥

वाग्भिर्मङ्गलयुक्ताभिस् तोषयिष्येऽद्य मातुल ।
यथा स यज्ञो नृपतेर् न भविष्यति सत्तम ॥ २१॥

[1]संभावय त्वं नागेन्द्र मयि सर्वं महाद्युते ।
न ते मयि मनो जातु मिथ्या भवितुमर्हति ॥ २२॥

वासुकिः—

अस्तीक परिघूर्णामि हृदयं मे विदीर्यते ।
दिशश्च न प्रजानामि ब्रह्मदण्डनिपीडितः ॥ २३॥

अस्तीक —

न सन्तापस्त्वया कार्यः कथंचित्पन्नगोत्तम ।
प्रदीप्ताग्नेः समुत्पन्नं नाशयिष्यामि ते भयम् ॥ २४॥

ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम् ।
नाशयिष्यामि माऽद्य त्वं भयं कार्षीः कथं चन ॥ २५॥

सूतः—

ततस्सवासुकेर्धीरम् अपनीय मनोज्वरम् ।

1. क-ख-ग—स संभावय नागेन्द्र मयि सर्वं महामते ।

आ[1]दाय चात्मनोऽङ्गेषु जगाम त्वरितो भृशम् ॥ २६॥
जनमेजयस्य तं यज्ञं सर्वैस्समुदितं गुणैः ।
मोक्षाय भुजगेन्द्राणाम् अस्तीको द्विजसत्तमः ॥ २७॥
स गत्वाऽपश्यदस्तीको यज्ञायतनमुत्तमम् ।
वृतं सदस्यैर्बहुभिः सूर्यवह्निसमप्रभैः ॥ २८॥
[2]स तत्र वारितो द्वास्थैर् अतिष्ठद्द्विजसत्तमः २९

अस्तीकः—

सोमस्य यज्ञो वरुणस्य यज्ञः
प्रजापतेर्यज्ञ आसीत्प्रयागे ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३०

शक्रस्य यज्ञश्शतसङ्ख्य उक्तस्
तथा पुरोस्तुल्यसङ्ख्यं शतं वै ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३१

यमस्य यज्ञो हरिमेधसश्च
यथा यज्ञो रन्तिदेवस्य राज्ञः ।

---

1. क-ख-ग—धाय
2. क-ख-ग—अभितुष्टाव तं यज्ञं प्रवेशार्थी द्विजोत्तमः ।
[अधिकः पाठः]

तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३२
गयस्य यज्ञः [1]शतबिन्दोश्च [2]राज्ञो
यज्ञस्तथा वैश्रवणस्य राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३३
नृगस्य यज्ञस्त्वजमीढस्य राज्ञो
यथा यज्ञो दाशरथेश्च राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३४
दिलीपराज्ञो नहुषस्य राज्ञो
नलस्य राज्ञश्शतबिन्दोश्च राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३५
[3]यज्ञश्श्रुतो यो दिवि देववर्यैर्
युधिष्ठिरस्याजमीढस्य राज्ञः ।

---

1. ख-ग—शशबिन्दोश्च 2. क-ख-ग—यज्ञो
3. क-ख-ग—यज्ञश्श्रुतो दिवि देवेषु राज्ञो
यौधिष्ठिरो हरिश्चन्द्रस्य यज्ञः ।
नलस्य यज्ञस्तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥
[अधिकः पाठः]

तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३६

कृष्णस्य यज्ञस्सत्यवत्यास्सुतस्य
[1]स्वयं स्वकर्म प्रचकार यत्र ।
तथा यज्ञोऽयं तव भारताग्र्य
पारीक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ ३७

इमे हि ते सूर्यहुताशवर्चसः
समासते वृत्रहणः क्रतौ यथा ।
[2]नैषां ज्ञेयं विद्यतेऽज्ञातमद्य
दत्तं चैषां न प्रणश्येत् कदाचित् ॥ ३८

ऋत्विक्समो नास्ति लोकेषु चैव
द्वैपायनेनेति विनिश्चितं मे ।
अथास्य शिष्या क्षिति[3]मासते ते
य ऋत्विजः कर्मसु स्वेषु दक्षाः ॥ ३९

विभावसुश्चित्रभानुर्महात्मा
हिरण्यरेता विश्वभुक्कृष्णवर्त्मा ।

---

1. क-ख-ग—यथा यज्ञो भारतस्य ययातेः।
2. क-ख-ग—नैषां ज्ञानं विद्यतेऽज्ञातमन्यद्
दत्तं चैभ्यो न प्रणश्येत् कथं चित् ।
3. क-ख-ग—माचरन्ति सर्वर्त्विजः कर्मसु ये सुदक्षा ॥

प्रदक्षिणावर्तशिखः प्रदीप्तो
हव्यं तवेदं हुतभुग्भुनक्ति ॥ ४०
नेह त्वदन्यो विद्यते जीवलोके
समो नृपः पालयिता प्रजानाम् ।
धृत्या च ते प्रीतमनास्सदाऽहं
त्वं वा राजा धर्मराजो यमो वा ॥ ४१
शक्रस्साक्षाद्वज्रपाणिर्यथेह
त्राता लोकेऽस्मिंस्त्वं तथैव प्रजानाम् ।
अतस्त्वं नाथः पुरुषेन्द्रेह लोके
न च त्वदन्यो गृहपतिरस्ति यज्ञे ॥ ४२
खट्वाङ्गनाभागदिलीपकल्प !
ययातिमान्धातृसमप्रभाव ! ।
आदित्यतेजःप्रतिमानतेजा
भीष्मो यथा राजसि सुव्रतत्वे ॥ ४३
वाल्मीकिवत्ते निभृतं च धैर्यं
वसिष्ठवत्ते नियतश्च कोपः ।
प्रभुत्वमिन्द्रेण समं मतं मे
द्युतिश्च नारायणवद्विभाति ॥ ४४
यमो यथा धर्मविनिश्चयज्ञः
कृष्णो यथा सर्वगुणोपपन्नः ।

श्रियो निकेतोऽसि तथा वसूनां
निधानभूतोऽसि तथा क्रतूनाम् ॥ ४५
दम्भोद्भवेनासि समो बलेन
रामो यथा शस्त्रविदस्त्रविच्च ।
[1]रुक्मद्रुमाभ्यामसि तुल्यतेजा
दुष्प्रेक्षणीयोऽसि भगीरथो यथा ॥ ४६

सूतः—

एवं स्तुतास्सर्व एव प्रसन्ना
राजा सदस्या ऋत्विजो हव्यवाहः ।
तेषां दृष्ट्वा भावितानीङ्गितानि
प्रोवाच राजा जनमेजयोऽथ ॥ ४७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ ५ ॥ आस्तीकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
[अस्मिन्नध्याये ४७ श्लोकाः]

॥ षट्चत्वारिंशोऽध्यायः ॥

अस्तीकस्य यज्ञसमाप्तिवरयाचनम् ॥ १ ॥

जनमेजयः—

बालो वाक्यं स्थविर इव प्रभाषते
नायं बालस्स्थविरो धर्मतो मे ।

1. क-ख-ग—और्वाद्विजाभ्या

इच्छाम्यहं वरमस्मै प्रदातुं
तन्मे विप्राः प्रवदध्वं समेताः ॥ १

सभासदः—

बालो विप्रो मान्य एवेह राज्ञा
यश्चाविद्वान् यश्च विद्वान् यथावत् ॥ १॥

प्रसादयैनं त्वमतो नरेन्द्र
द्विजातिवर्यं सकलार्थसिद्धये ।
सर्वान्कामांस्त्वत्त एवार्हतेऽद्य
यथा च नस्तक्षक एति शीघ्रम् ॥ २॥

सूतः—

व्याहर्तुकामे वरदे नृपे द्विजं
वरं वृणीष्वेति तमभ्युवाच ।
होता वाचा नातिहृष्टान्तरात्मा
कर्मण्यस्मिंस्तक्षको नैति तावत् ॥ ३॥

जनमेजयः—

यथा चेदं कर्म समाप्यते मे
यथा च नस्तक्षक एति शीघ्रम् ।
तथा भवन्तः प्रयतन्तु सर्वे
परं शक्त्या स हि मे विद्विषाणः ॥ ४॥

ऋत्विज.—

यथा शास्त्राणि नः प्राहुर् निमित्तानि तथैव च ।
स इन्द्रभवने राजंस् तक्षको भयपीडितः ॥ ५॥

[1]यथा सूतो लोहिताक्षो महात्मा
पौराणिको वेदितवान् पुरस्तात् ।
स राजानं प्राह हृष्टस्तदानीं
यथाहुर्विप्रास्तद्वदेतन्नरेन्द्र ॥ ६॥

सूतः—

[2]पुराणमागम्य ततो ब्रवीम्यहं
दत्तं तस्मै वरमिन्द्रेण राजन् ।
वसेह त्वं मत्सकाशे सुगुप्तो
न पावकस्त्वां प्रदहिष्यतीति ॥ ७॥

सूतः—

एतच्छ्रुत्वा दीक्षितस्तप्यमान
आस्ते होतारं चोदयन् कर्मकाले ।
[3]होता च यत्तस्स जुहाव मन्त्रैर्
यथाऽमरेन्द्रस्स्वयमेवाजगाम ॥ ८॥

---

1. क-ख-ग—आस्ते विषधरो नागो निहन्ता जनकस्य ते ।
[अधिकः पाठः]

2. अ—पौराणमागम्य ततो ब्रवीम

3. क-ख-ग—इन्द्रेण सार्धं तक्षकं पातयध्वं
विभावसोर्न तु मुच्येत नागः । [अधिकः पाठः]

आयातु चेन्द्रोऽपि सतक्षकः पतेद्
विभावसौ नागराजेन तूर्णम् ।
जम्भस्य हन्तेति जुहाव होता
तदा जगामाहिदत्ताभयः प्रभुः ॥ ९॥

विमानमारुह्य महानुभावः
सर्वैर्दिवैः परिसंस्तूयमानः ।
बलाहकैश्चाप्यनुगम्यमानो
विद्याधरैरप्सरसां गणैश्च ॥ १०॥

[1]तस्योत्तरीये निहितस्स नागो
भयोद्विग्नश्शर्म नैवाभ्यगच्छत् ।
ततो राजा मन्त्रविदोऽब्रवीत्पुनः
क्रुद्धो वाक्यं तक्षकस्यान्तमिच्छन् ॥ ११॥

जनमेजयः—

इन्द्रस्य भवने नागो यदि विप्राः! स तक्षकः ।
तमिन्द्रेणैव सहितं पातयध्वं विभावसौ ॥ १२॥

न त्यजेद्यदिदं चेन्द्रः स नागं तक्षकं तथा ॥ १३

सूतः—

जनमेजयेन राज्ञा तु चोदितस्तक्षकं प्रति ।

---

1. क-ख-ग—नागस्य नाशो मम चैव नाशो
भविष्यतीत्येव विचिन्त्यमानः ।

[अधिकः पाठः]

होता जुहाव तत्रस्थं तक्षकं पन्नगं तथा ॥ १४

हूयमाने तथा चैव तक्षकस्सपुरन्दरः ।
आकाशे ददृशे तत्र क्षणेन व्यथितस्तदा ॥ १५

पुरन्दरस्तु तं यज्ञं दृष्ट्वा तु भयमाविशत् ।
हित्वा तु तक्षकं नागं स्वमेव भवनं ययौ ॥ १६

इन्द्रे गते तु नागेन्द्रस् तक्षको भयमोहितः ।
मन्त्रशक्त्या तु सम्भ्रांर्चिस् समीपमवशोऽगमत् ॥ १७
तं दृष्ट्वा ऋत्विजस्तत्र वचनं चेदमब्रुवन् ॥ १७॥

ऋत्विजः—

अयमायाति वै तूर्णं तक्षकस्ते वशं गतः ।
श्रूयतेऽस्य महान्नादो [1]कुर्वतो भैरवं रवम् ॥ १८॥

नूनं मुक्तो वज्रभृता स नागो
[2]ततस्त्रस्तो मन्त्रविस्रस्तगात्रः ।
आघूर्णमानो ह समभ्युपैति
तीव्रान्निश्वासान्निश्वसन्पन्नगेन्द्रः ॥ १९॥

वर्तते तव राजेन्द्र कर्मैतद्विधिवत्प्रभो ।
अस्मै च द्विजमुख्याय वरं त्वं दातुमर्हसि ॥ २०॥

---

1 क-ख-ग—रुवतो भैरवं महत् ।
2. क-ख-ग—भ्रष्टश्चांगान्मन्त्रविस्रस्तकायः ।

राजा—

बालाभिरूपस्य तवाप्रमेय!
वरं प्रयच्छामि यथानुरूपम्।
वृणीष्व यत्तेऽभिमतं हृदिस्थं
तत्ते प्रदास्याम्यपि चेददेयम्॥ २१॥

सूतः—

पतिष्यमाणे नागेन्द्रे तक्षके जातवेदसि।
इदमन्तरमित्येवं तदास्तीकोऽभ्यभाषत॥ २२॥

अस्तीकः—

वरं ददासि चेन्मह्यं वृणोमि जनमेजय।
सत्रं ते विरमत्वेतन् न पतेयुरिहोरगाः॥ २३॥

सूतः—

एवमुक्तस्तदा राजा ब्रह्मन्पारीक्षितस्तदा।
नातिहृष्टमना वाक्यम् अस्तीकमिदमब्रवीत्॥ २४॥

सुवर्णं रजतं गाश्च यच्चान्यन्मन्यसे द्विज।
तत्ते दद्यां वरं ब्रह्मन् न निवर्तेत्क्रतुर्मम॥ २५॥

अस्तीकः—

सुवर्णं रजतं गाश्च न त्वां राजन्वृणोम्यहम्।
सत्रं ते विरमत्वेतत् स्वस्ति मातुः कुलस्य नः॥ २६॥

सूतः—

अस्तीकेनैवमुक्तस्तु राजा पारीक्षितस्तदा ।
पुनः पुनरुवाचेदम् अस्तीकं वदतां वरम् ॥ २७॥

अन्यं वरय भद्रं ते वरं द्विजवरोत्तम ।
[1]नायाचदयमप्यन्यद् वरं स भृगुनन्दन ॥ २८॥

ततो वेदविदस्तस्य सदस्यास्सर्व एव ते ।
राजानमूचुस्सहिता लभतां ब्राह्मणो वरम् ॥ २९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

॥ ५ ॥ आस्तीकपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

[अस्मिन्नध्याये २९॥ श्लोकाः]

॥ सप्तचत्वारिंशोऽध्यायः ॥

सर्पसत्रे हतानां नागानां नामकथनम् ॥ १ ॥

शौनकः—

ये सर्पास्सर्पसत्रेऽस्मिन् पतिता हव्यवाहने ।
तेषां नामानि सर्वेषां श्रोतुमिच्छामि सूतज ॥ १

---

1. क-ख-ग—अयाचत न चाप्यन्यद्वरं स भृगुनन्दन ।

सूतः—

सहस्राणि बहून्यस्मिन् प्रयुतान्यर्बुदानि च ।
न शक्यं परिसंख्यातुं बहुत्वाद्वेदवित्तम ॥ २

यथास्मृति तु नामानि पन्नगानां निबोध मे ।
उच्यमानानि मुख्यानां हुतानां जातवेदसि ॥ ३

वासुकेः कुलजांस्तावत् प्राधान्येन निबोध मे ।
नीला रक्तास्सिता घोरा महाकाया विषोल्बणाः ॥ ४

कोटिको नाम संपूर्णः [1]सदयालोभलीढकः ।
पिच्छपः कौणपश्शक्रः कोणवेगः प्रकालितः ॥ ५

हिरण्यबाहुश्शरणस् तक्षकः कालदन्तकः ।
एते वासुकिजा नागाः प्रविष्टा हव्यवाहनम् ॥ ६

तक्षकस्य कुले तावत् प्रवक्ष्यामि निबोध तान् ।
पुच्छण्वको मण्डलिको पिण्डभेत्ता च हेणकः ॥ ७

[2]उच्छिखस्सुरभारङ्गो वल्गभोऽथाविराहणः ।
सिलस्थालकणो मूकः सुकुमारः प्रवेपनः ॥ ८

मुद्गरश्शशरोमा च समरो वेगवान् हरः ।
एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम् ॥ ९

---

1. क-ख-ग—सदवालो हलीसकः ।
2. क-ख-ग—उच्छिकस्सुरभो रङ्गो वल्गभोऽथ विराहणः ।

पारावतः पारियात्रः पाण्डरो हरिणः कृशः ।
विहङ्गश्शरभो मोदः प्रमोदस्संहताशनः ॥ १०

ऐरावतकुलादेते पतिता हव्यवाहनम् ।
कौरव्यकुलजान्नागान् शृणु मे द्विजसत्तम ॥ ११

जटिलः कुण्डलः कुण्डो वेणिग्रन्थः कुमारकः ।
बाहुकश्शृङ्गयष्टिश्च धूर्तकः पोतपोतकौ ॥ १२

धृतराष्ट्रकुले जातान् शृणु नागान् यथातथम् ।
दन्दशूकान् महाकायान् वातवेगान् विषोल्बणान् ॥ १३

शङ्कुकर्णः पिङ्गलकः कुठारमुखसेवकौ ।
पूर्णाङ्गदः पूर्णमुखः प्रहस्तश्शकुनिर्हरिः ॥ १४

अमोथकः कामविकः खनसो मानसो नटः ।
भैरवो मन्त्रवेगश्च पिङ्गलश्चोडुपारगः ॥ १५

ऋषभो वेगवान्नाथः पिण्डारकमहाहनू ।
रक्ताङ्गस्सर्वसारङ्गस् समृद्धपटलाक्षकौ ॥ १६

वलाहको वारणकस् सुमित्रश्चित्रवेदितः ।
पराशकस्तरुणको मणिस्स्कन्धस्तथाऽऽरुणः ॥ १७
इति नागा मया ब्रह्मन् कीर्तिताः कीर्तिवर्धनाः ॥ १७॥

प्राधान्येन बहुत्वात्तु सर्वे ते परिकीर्तिताः ॥ १८
एतेषां पुत्रपौत्राश्च प्रसवस्य च सन्ततिः ।

न शक्याः परिसंख्यातुं ये दीप्तं पावकं गताः ॥ १९

सप्तशीर्षा द्विशीर्षाश्च पञ्चशीर्षास्तथापरे ।
दशशीर्षाश्शतशीर्षास् तथान्ये बहुशीर्षकाः ॥ २०

कालानलविषा घोरा हुताशनसमार्चिषः ।
महाकाया महावीर्याश् शैलशृङ्गसमुच्छ्रयाः ॥ २१

योजनायामविस्तारा द्वियोजनसमायताः ।
कामरूपाः कामबला दीप्तानलविषोल्बणाः ॥ २२

दग्धास्तत्र महासत्रे ब्रह्मदण्डेन पीडिताः ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

॥ ५ ॥ आस्तीकपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

[अस्मिन्नध्याये २२॥ श्लोकाः]

॥ अष्टचत्वारिंशोऽध्यायः ॥

यज्ञसमाप्तिः ॥ १ ॥ अस्तीकस्य सर्पेभ्यो वरलाभश्च ॥ २ ॥

सूतः—

इदमत्यद्भुतं चान्यदस्तीकस्य च शुश्रुमः ।
तथा वरैश्छन्द्यमानो राज्ञा पारीक्षितेन च ॥ १

इन्द्रहस्ताच्च्युतो नागस् स ख एव व्यवस्थितः ।
ततश्चिन्तापरो राजा बभूव जनमेजयः ॥ २

हूयमाने भृशं दीप्ते विधिवत्पावके तदा ।
[1]नष्टसंज्ञोऽभवन्नागस् तक्षको भयपीडितः ॥ ३

शौनक —

किं सूत तेषां विप्राणां मन्त्रग्रामो महात्मनाम् ।
[2]न प्रत्यपद्यताग्नौ यन् न पपात स तक्षकः ॥ ४

सूत —

तमिन्द्रहस्ताद्विस्रस्तं विसंज्ञं पन्नगोत्तमम् ।
अस्तीकस्तिष्ठ तिष्ठेति वाचस्तिस्रोऽभ्युदैरयत् ॥ ५

वितस्थे सोऽन्तरिक्षे च हृदयेन विदूयता ।
[3]यथा तिष्ठेति वै कश्चिन् नावगच्छेत्तथान्तरम् ॥ ६

ततो राजाऽब्रवीद्वाक्यं सदस्यैश्चोदितो भृशम् ।
काममेतद्भवत्वेवं यथास्तीकस्य भाषितम् ॥ ७

समाप्यतामिदं कर्म पन्नगास्सन्त्वनामयाः ।
प्रीयतामयमस्तीकस् सत्यं मम वचोऽस्तु तत् ॥ ८

ततो हलहलाशब्दः प्रीतिजस्समवर्धत ।
अस्तीकस्य वरे दत्ते तथैवोपरराम च ॥ ९

---

1. क-ख-ग—न स्म संप्राप तद्वह्नौ तक्षको
2. क-ख-ग—न प्रत्यभाद्यतोऽग्नौ
3. क-ख-ग—यदा तिष्ठेति चैवोक्तं तथा तस्थौ नभोऽन्तरे ।

स यज्ञः पाण्डवेयस्य राज्ञः पारीक्षितस्य ह ॥ ९॥

समापिते ततस्सत्रे विधिवद्विधिदर्शिभिः ।
प्रीतिमानभवद्राजा भारतो जनमेजयः ॥ १०॥

ऋत्विग्भ्यस्स सदस्येभ्यो ये तत्रासन्समागताः ।
तेभ्यश्च प्रददौ वित्तं शतशोऽथ सहस्रशः ॥ ११॥

लोहिताक्षाय सूताय तथा स्थपतये विभुः ॥ १२

येनोक्तं तत्र सत्राग्रे यज्ञस्य विनिवर्तनम् ।
निमित्तं ब्राह्मण इति तस्मै वित्तं ददौ बहु ॥ १३

ततश्चकारावभृथं विधिदृष्टेन कर्मणा ।
अस्तीकं प्रेषयामास [1]गृहानेव सुसत्कृतम् ॥ १४

राजा प्रीतमनाः प्रीतं कृतकृत्यं मनीषिणम् ॥ १४॥

पुनरागमनं कार्यम् इति चैनं वचोऽब्रवीत् ।
भविष्यसि सदस्यो मे वाजिमेधे महाक्रतौ ॥ १५॥

तथेत्युक्त्वा प्रदुद्राव स चास्तीको मुदा युतः ।
कृत्वा स्वकार्यमतुलं तोषयित्वा च पार्थिवम् ॥ १६॥

स गत्वा परमप्रीतो मातरं मातुलं च तम् ।
अभिगम्योपसंगृह्य यथावृत्तं न्यवेदयत् ॥ १७॥

---

1. क-ख-ग—विधाय वसुसत्कृतम्

एतच्छ्रुत्वा प्रीयमाणास्समेता
ये तत्रासन् पन्नगा वीतमोहाः ।
[1]अस्तीकं ते प्रीतिमन्तो बभूवुर्
आहुश्चैनं वरमिष्टं वृणीष्व ॥ १८॥

भूयोभूयस्सर्वतस्तेऽब्रुवंस्तं
किं ते प्रियं करवामाद्य विद्वन् ।
प्रीता वयं मोक्षिताश्चैव सर्वे
कामं किं ते करवामाद्य वत्स ॥ १९॥

अस्तीकः—

सायं प्रातस्सुप्रस[2]न्नात्मरूपो
लोके विप्रो मानवश्चेतरो वा ।
धर्माख्यानं ये वदेयुर्ममेदं
तेषां युष्मन्नैव किंचिद्भयं स्यात् ॥ २०॥

सूतः—

तैश्चाप्युक्तो भागिनेयः प्रसन्नैर्
एतत्सत्यं वचनं ते वराम ।
प्रीत्या युक्ता ईप्सितं सर्वतस्ते
कर्तारस्स्म प्रवणा भागिनेय ॥ २१॥

---

1. क-ख-ग—तेऽस्तीके च
2. क-ख-ग—न्ना: कुरूपाः, लोके विप्रेन्द्रा मानवाश्चेतरे च ।

जरत्कारोर्जरत्कार्वां समुत्पन्नो महायशाः ।
अस्तीकस्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु ॥ २२॥

[1]अस्तीकं चार्तिमन्तं च सुनीथं चापि यस्स्मरेत् ।
दिवा वा यदि वा रात्रौ नास्य सर्पभयं भवेत् ॥ २३॥

इत्येवं नागराजोऽथ सर्पाणां मध्यगस्तदा ।
उक्त्वा सहैव तैस्सर्पैस् स्वमेव भवनं ययौ ॥ २४॥

मोक्षयित्वा स भगवान् सर्पसत्राद्भुजङ्गमान् ।
जगाम काले धर्मात्मा दिष्टान्तं पुत्रपौत्रवान् ॥ २५॥

इत्याख्यानं मयाऽऽस्तीकं यथावत्तव कीर्तितम् ।
यत्कीर्तयित्वा सर्पेभ्यो न भयं विद्यते क्वचित् ॥ २६॥

श्रुत्वेदं धर्ममाख्यानम् आस्तीकं पुण्यवर्धनम् ।
अस्तीकस्य कवेर्विप्र! श्रीमच्चरितमादितः ॥ २७॥

[2]सर्वपापविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ।
गार्हस्थ्यं धर्ममखिलं प्रयायात् पुत्रपौत्रवान् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

॥ ५ ॥ आस्तीकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ आस्तीकपर्व समाप्तम् ॥

---

1. क-ख-ग—असितं 2. अ—कोशे अयं श्लोको नास्ति

॥ एकोनपञ्चाशत्तमोऽध्यायः ॥

(आदिवंशावतारणपर्व ॥ ६ ॥)

सूतस्य भारतकथाकथनप्रतिज्ञा ॥ १ ॥ व्यासेन वैशंपायनं प्रति भारतकथाकथनचोदना ॥ २ ॥

शौनकः—

भृगुवंशात्प्रभृत्येतत् त्वया मे कथितं महत् ।
आख्यानमखिलं तात भृशं प्रीतोऽस्मि तेन ते ॥ १

प्रवक्ष्यामि च भूयस्त्वां यथावत्सूतनन्दन ।
याः कथा व्याससंप्रोक्तास् ताश्च भूयः प्रचक्ष्व मे ॥ २

तस्मिन्परमदुष्प्रापे सर्पसत्रे महात्मनाम् ।
कर्मान्तरेषु विधिवत् सदस्यानां महाकवे ॥ ३

या बभूवुः कथाश्चित्रा येष्वर्थेषु यथातथम् ।
त्वत्त इच्छाम ताःश्रोतुं सूत त्वं वै विचक्षणः ॥ ५

सूतः—

कर्मान्तरेष्वकथयन् द्विजा वेदाश्रयाः कथाः ।
व्यासस्त्वकथयन्नित्यम् आख्यानं भारतं महत् ॥ ५

शौनकः—

महाभारतमाख्यानं पाण्डवानां यशस्करम् ।

जनमेजयेन यः पृष्टः कृष्णद्वैपायनस्तदा ॥ ६

श्रावयामास विधिवत् तदा कर्मान्तरेषु सः ।
तामहं विधिवत्पुण्यां श्रोतुमिच्छामि वै कथाम् ॥ ७

मनस्सागरसंभूतां महर्षेर्भावितात्मनः ।
कथयस्व सतां श्रेष्ठ परं कौतूहलं हि नः ॥ ८

सूतः—

हन्त तेऽहं प्रवक्ष्यामि महदाख्यानमुत्तमम् ।
कृष्णद्वैपायनमतं महाभारतमादितः ॥ ९

तज्जुषस्वोत्तममते कथ्यमानं मया द्विज ।
शंसितुं तन्मनोहर्षो ममापीह च वर्धते ॥ १०

श्रुत्वा तु सर्पसत्राय दीक्षितं जनमेजयम् ।
अभ्यागच्छदृषिर्विद्वान् कृष्णद्वैपायनस्तदा ॥ ११

जनयामास यं काली शक्तेः पुत्रात्पराशरात् ।
कन्यैव यमुनाद्वीपे पाण्डवानां पितामहम् ॥ १२

जातमात्रश्च यस्सद्यो ववृधे वेदवित्तमः ।
वेदांश्चाधिजगे साङ्गान् इतिहासांश्च सर्वशः ॥ १३

यं नाति तपसा कश्चिन् न वेदाध्ययनेन च ।
न व्रतेनोपवासेन न प्रशान्त्या न मन्युना ॥ १४

विव्यासैकं चतुर्धा यो वेदं वेदविदां वरः ।
परावरज्ञो ब्रह्मर्षिः कविस्सत्यव्रतश्शुचिः ॥ १५

यः पाण्डुं धृतराष्ट्रं च विदुरं चाप्यजीजनत् ।
शन्तनोस्संततिं सन्ताम् उद्धरिष्यन् महातपाः ॥ १६

जनमेजयस्य राजर्षेस् तस्मिन्सत्रे महात्मनः ।
विवेश शिष्यैस्सहितो वेदवेदाङ्गपारगैः ॥ १७

तत्र राजानमासीनं ददर्श जनमेजयम् ।
वृतं सदस्यैर्बहुभिर् देवैरिव शतक्रतुम् ॥ १८

तथा मूर्धावसिक्तैश्च नानाजनपदेश्वरैः ।
ऋत्विग्भिर्देवकल्पैश्च कुशलैर्यज्ञसंस्तरे ॥ १९

जनमेजयस्तु राजर्षिर् दृष्ट्वा तमृषिमागतम् ।
सगणोऽभ्युद्यतस्तूर्णं ततो भारतसत्तमः ॥ २०

काञ्चनं विष्टरं तस्मै स एव नृपतिस्स्वयम् ।
आसनं कल्पयामास यथा शक्रो बृहस्पतेः ॥ २१

तत्रोपविष्टं वरदं देवर्षिगणपूजितम् ।
पूजयामास राजेन्द्रः शास्त्रदृष्टेन कर्मणा ॥ २२

पाद्यमाचमनीयं च अर्घ्यं गां च विधानतः ।
पितामहाय कृष्णाय तद्दर्हाय न्यवेदयत् ॥ २३

प्रतिगृह्य च तां पूजां पाण्डवाञ्जनमेजयात् ।
गां चैव समनुज्ञाय मुनिः प्रीतोऽभवत्तदा ॥ २४

तथा तं पूजयित्वा तु यत्नेन प्रपितामहम् ।
उपोपविश्य प्रीतात्मा पर्यपृच्छदनामयम् ॥ २५

भगवानपि तं दृष्ट्वा दयालुः प्रतिनन्द्य च ।
सदस्यैः पूजितस्सर्वैस् सदस्यानप्यपूजयत् ॥ २६

तथा तं सत्कृतं सद्भिः कथान्ते जनमेजयः ।
इममर्थं कुरुश्रेष्ठः पर्यपृच्छत्कृताञ्जलिः ॥ २७

जनमेजयः—

कुरूणां पाण्डवानां च भवान्प्रत्यक्षदर्शिवान् ।
तेषां चरितमिच्छामि कथ्यमानमिह त्वया ॥ २८

कथं च भगवन्भेदस् तेषामासीन्महात्मनाम् ।
तच्च युद्धं कथं वृत्तं भूतान्तकरणं महत् ॥ २९

पितामहानां सर्वेषां दैवेनाविष्टचेतसाम् ।
इच्छामि तत्त्वतश्श्रोतुं भगवन्कुशलो ह्यसि ॥ ३०

सूतः—

तस्य तद्वचन श्रुत्वा कृष्णद्वैपायनस्तदा ।
[1]शशास शिष्यमासीनं वैशंपायनमन्तिके ॥ ३१

कुरूणां पाण्डवानां च यथा भेदोऽभवत्पुरा ।

---

1. क-ख-ग—उवाच वरदश्शिष्यं वैशम्पायनमन्तिकात् ।

तदस्मै सर्वमाचक्ष्व यन्मत्तश्श्रुतवानसि ॥ ३२

गुरोर्वचनमाज्ञाय स तु विप्रर्षभस्तदा ।
आचचक्षे ततस्सर्वम् इतिहासं पुरातनम् ॥ ३३

राज्ञे तस्मै सदस्येभ्यः क्षत्रियेभ्यश्च सर्वशः ।
भेदं राज्यविनाशं च कुरुपाण्डवयोस्तदा ॥ ३४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥
॥ ६ ॥ आदिवंशावतारणपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ३४ श्लोकाः]

॥ पञ्चाशत्तमोऽध्यायः ॥

वैशंपायनेन जनमेजयाय सङ्ग्रहेण भारतकथाकथनम् ॥ १ ॥

वैशंपायनः—

श्रृणु राजन् यथा वीरा भ्रातरः पञ्च पाण्डवाः ।
विरोधमन्वगच्छन्त धार्तराष्ट्रैर्दुरात्मभिः ॥ १

गुरवे प्राङ्नमस्कृत्वा मनोबुद्धिसमाधिभिः ।
संपूज्य च द्विजान्सर्वांस् तथान्यान्विदुषो जनान् ॥ २

महर्षेस्सर्वलोकेषु विश्रुतस्यास्य धीमतः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥ ३

श्रोतुं पात्रं तु राजंस्त्वं प्राप्येमां भारतीं कथाम् ।
गुरोर्वक्तुं परिस्पन्दो मुदा प्रोत्सहतीव माम् ॥ ४

शृणु राजन् यथा भेदः कुरुपाण्डवयोरभूत् ।
राज्यार्थे द्यूतसंभूतो वनवासस्तथैव च ॥ ५

यथा च युद्धमभवत् पृथिवीक्षयकारकम् ।
तत्तेऽहं संप्रवक्ष्यामि पृच्छते भरतर्षभ ॥ ६

मृते पितरि ते वीरा वनादेत्य स्वमन्दिरम् ।
नचिरादेव विद्वांसो वेदे धनुषि चाभवन् ॥ ७

तांस्तदा रूपसंपन्नान् [1]वीर्येण परमेण ह ।
नामृष्यन्कुरवो दृष्ट्वा पाण्डवान् धृतराष्ट्रजाः ॥ ८

ततो दुर्योधनः क्रूरः कर्णस्तस्य मते स्थितः ।
पाण्डवान्विविधोपायै राज्यहेतोरपीडयत् ॥ ९

ददावथ विषं पापो भीमाय धृतराष्ट्रजः ।
जरयामास तद्वीरस् त्वन्नेन सह भारत ॥ १०

प्रमाणकोट्यां क्रीडित्वा बद्ध्वा सुप्तमनागसम् ।
तथैव मध्ये गङ्गायाः प्रक्षिप्य पुरमाव्रजत् ॥ ११

यदाऽबुध्यत कौन्तेयस् तदा संछिद्य बन्धनम् ।
उदतिष्ठन्महातेजा भीमसेनो गतव्यथः ॥ १२

1. क-ख-ग—वीर्यौजः परिसंमितान् ।

आशीविषैः कृष्णसर्पैस् सुप्तं चैनमदंशयत् ।
सर्वेष्वेवाङ्गदेशेषु न ममार स शत्रुहा ॥ १३

उपायैर्विविधैः क्षुद्रस् संवृतैर्विवृतैरपि ।
पाण्डवान्पीडयामास न च किञ्चिदसाधयत् ॥ १४

तेषां स विप्रकारेषु तेषु तेषु महामतिः ।
मोक्षणे प्रतिघाते च विदुरोऽवहितोऽभवत् ॥ १५

स्वर्गस्थो जीवलोकस्य यथा शक्रस्सुखावहः ।
पाण्डवानां तथा नित्यं विदुरोऽपि सुखावहः ॥ १६

यदा तु विविधोपायैस् संवृतैर्विवृतैरपि ।
नाशक्नोद्विनिहन्तुं तान् दैवेनात्यन्तरक्षितान् ॥ १७

[1]ततो दुर्योधनः क्षुद्रः कर्णश्च सहसौबलः ।

---

1. क-ख-ग—सुतप्रियोचितं दृष्ट्वा पाण्डवानम्बिकासुतः ।
ततो विवासयामास राज्यभोगबुभुक्षया ॥
प्रस्थाने चाभवन्मित्रं क्षत्तः तेषां महात्मनाम् ।
ते प्रातिष्ठन्त नगरात् सहिता नागसाह्वयात् ॥
ततस्संप्राप्य कौन्तेयो नगरं वारणावतम् ।
न्यवसन्त महात्मानो माता सह परन्तपाः ॥
आदीप्य जातुषं वेश्म दग्ध्वा तत्र पुरोचनः ।
पाण्डवान् पीडयामास न किञ्चित् समसाधयत् ॥
मार्गभोजीव लोकस्य यथा शुक्रस्सुखावहः ।
पाण्डवानां तथा नित्यं विदुरोऽभूत् सुखावहः ॥
[अधिकः पाठः]

धृतराष्ट्रमनुज्ञाप्य जातुषं चक्रुरालयम् ॥ १८
तत्र तान् वासयामास पाण्डवानमितौजसः ॥ १८॥

अदाहयच्च विस्रब्धान् पावकेन पुनस्तदा ।
विदुरस्यैव वचनात् खनित्री विहिता तदा ॥ १९॥

मोक्षयामास वेगेन ते मुक्ताः प्राद्रवन्भयात् ॥ २०

ततो महावने घोरे हिडिम्बं नाम राक्षसम् ।
भीमसेनोऽवधीत्क्रुद्धो भुवि भीमपराक्रमः ॥ २१

प्राप्ता हिडिम्बी भीमेन यत्र जातो घटोत्कचः ॥ २१॥

अथ संधाय ते वीरा एकचक्रां व्रजंस्तदा ।
ब्रह्मरूपधरा भूत्वा मात्रा सह परंतपाः ॥ २२॥

तत्र ते ब्राह्मणार्थाय बकं हत्वा महाबलम् ।
ब्राह्मणैस्सहिता जग्मुः पाञ्चालानां पुरं ततः ॥ २३॥

तत्र ते द्रौपदीं लब्ध्वा बहून्मासान्सुखोषिताः ।
सहिता हस्तिनपुरं प्रत्याजग्मुररिन्दमाः ॥ २४॥

उक्तास्ते धृतराष्ट्रेण राज्ञा शान्तनवेन च ।
भ्रातृभिर्विग्रहस्तात कथं वो न भवेदिति ॥ २५॥

अस्माभिः खाण्डवप्रस्थे युष्मद्वासो विचिन्तितः ॥ २६

पुरं जानपदोपेतं सुविभक्तमहापथम् ।

[1]वासाय खाण्डवप्रस्थं व्रजध्वं गतमन्यवः ॥ २७

तयोस्ते वचनाज्जग्मुस् सह सर्वैस्सुहृज्जनैः ।
नगरं खाण्डवप्रस्थं रत्नमादाय भागशः ॥ २८

तत्र ते न्यवसन् राजन् संवत्सरगणान् बहून् ।
वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान् महीक्षितः ॥ २९

एवं धर्मप्रधानास्ते सत्यव्रतपरायणाः ।
अप्रमत्तास्स्थिताः क्षत्रे प्रतपन्तो हि तांस्तदा ॥ ३०

अजयद्भीमसेनस्तु दिशं प्राचीं महाबलः ।
उदीचीमर्जुनो वीरः प्रतीचीं नकुलस्तथा ॥ ३१

दक्षिणां सहदेवस्तु विजिग्ये परवीरहा ।
एवं चक्रुरिमां सर्वे वशे कृत्स्नां वसुन्धराम् ॥ ३२

पञ्चभिस्सूर्यसङ्काशैस् सूर्येण च वसुन्धराम् ।
षट्सूर्येव च बभ्राजे पाण्डवैस्सत्यविक्रमैः ॥ ३३

ततो निमित्ते कस्मिंश्चिद् धर्मराजो युधिष्ठिरः ।
वनं प्रस्थापयामास भ्रातरं वै धनञ्जयम् ॥ ३४

धैर्यात्सत्याच्च धर्माच्च विजयाच्चाधिकप्रियः ।
अर्जुनो भ्रातरं ज्येष्ठं नात्यवर्तत जातु चित् ॥ ३५

---

1. क-ख-ग—अस्माभिः खाण्डवप्रस्थे युष्मद्वासो विचिन्तितः ।

स वै संवत्सरं पूर्णं मासं चैव वने वसन् ।
तीर्थयात्रां च कृतवान् नागकन्यामवाप्य च ॥ ३६

पाण्ड्यस्य तनयां लब्ध्वा तत्र ताभ्यां सहोषितः ।
ततोऽगच्छद्धृषीकेशं द्वारवत्यां कदाचन ॥ ३७

तत्र लेभे च बीभत्सुर् भार्यां राजीवलोचनाम् ।
अनुजां वासुदेवस्य सुभद्रां भद्रभाषिणीम् । ३८

सा शचीव महेन्द्रेण श्रीः कृष्णेनेव सङ्गता ।
सुभद्रा युयुजे प्रीता पाण्डवेनार्जुनेन च ॥ ३९

तत्र सन्तर्पयामास कौन्तेयो हव्यवाहनम् ।
बीभत्सुर्वासुदेवेन सहितः खाण्डवे वने ॥ ४०

नातिभारोऽथ पार्थस्य केशवेनाभवत्सह ।
व्यवसायद्वितीयस्य विष्णोरिशत्रुवधेष्विव ॥ ४१

पार्थायाग्निर्ददौ तत्र गाण्डीवं धनुरुत्तमम् ।
इषुधी चाक्षयौ बाणै रथं च कपिलक्षणम् ॥ ४२

मोचयामास बीभत्सुर् मयं तत्र महासुरम् ।
स चकार सभां दिव्यां सर्वरत्नविभूषिताम् ॥ ४३

तस्यां दुर्योधनः क्षुद्रो लोभं चक्रे सुदुर्मतिः ।
ततोऽक्षैर्वञ्चयित्वा च सौबलेन युधिष्ठिरम् ॥ ४४

वनं प्रस्थापयामास सप्तवर्षाणि पञ्च च ।
अज्ञातमेकं राष्ट्रे तु ततो वर्षं त्रयोदशम् ॥ ४५

गते त्रयोदशे वर्षे याच्यमानास्त्वकं वसु ।
नालभन्त महाराज ततो युद्धमवर्तत ॥ ४६

ततस्ते सर्वमुत्साद्य हत्वा दुर्योधनं रणे ।
राज्यं विधूतभूयिष्ठं प्रत्यपद्यन्त पाण्डवाः ॥ ४७

इष्ट्वा क्रतूंश्च विविधान् अश्वमेधादिकान् बहून् ।
धृतराष्ट्रे गते स्वर्गं विदुरे पञ्चतां गते ॥ ४८

गमयित्वा स्त्रियस्स्वर्गं राज्ञाममिततेजसाम् ।
[1]वार्ष्णेये निलयं प्राप्ते विष्णुदारान् प्ररक्ष्य च ॥ ४९

महाप्रस्थानिकं गत्वा गतास्स्वर्गमनुत्तमम् ॥ ४९॥

एवमेतत्पुरावृत्तं तेषामक्लिष्टकर्मणाम् ।
भेदो राज्यविनाशश्च जयश्च जयतांवर ॥ ५०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चाशत्तमोऽध्यायः ॥ ५० ॥
॥ ६ ॥ आदिवंशावतारणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ५०॥ श्लोकाः ।]

---

1. क-ख-ग—स्वं धाम याते वार्ष्णेये कृष्णदारानरक्ष्य च ।

॥ एकपञ्चाशत्तमोऽध्यायः ॥

भारतप्रशंसा ॥ १ ॥ तच्छ्रवणादिफलकथनम् ॥ २ ॥

जनमेजयः—

कथितं वै समासेन त्वया सर्वं द्विजोत्तम ।
महाभारतमाख्यानं कुरूणां चरितं महत् ॥ १

कथां तेषां विचित्रार्थाम् इमां कथयति त्वयि ।
विस्तरश्रवणे जातं कौतूहलमतीव मे ॥ २

स भवान्विस्तरेणेमां पुनराख्यातुमर्हति ।
न हि तृप्यामि पूर्वेषां शृण्वन्नाचरितं महत् ॥ ३

न तत्कारणमल्पं हि धर्मज्ञा यत्र पाण्डवाः ।
अवध्यान् सर्वतो जघ्नुः प्रशस्यन्ते च मानवैः ॥ ४

किमर्थं ते नरव्याघ्राश् शान्तास्सन्तोऽप्यनागसः ।
प्रयुज्यमानान् संक्लेशान् क्षान्तवन्तो दुरात्मभिः ॥ ५

कथं नागायुतप्राणो बाहुशाली वृकोदरः ।
परिक्लिश्यन्नपि क्रोधं धृतवान्वै द्विजोत्तम ॥ ६

भ्रातॄणां क्लेशमायातं धृतवान् वै परन्तपः ॥ ६॥
कथं सा द्रौपदी कृष्णा क्लिश्यमाना दुरात्मभिः ।

शक्ता सती धार्तराष्ट्रान् नादहद्घोरचक्षुषा ॥ ७॥
कथं व्यतिक्रमं द्यूते पार्था माद्रीसुतौ तदा ।
अन्वव्रजन्नरव्याघ्रं वञ्च्यमाना दुरात्मभिः ॥ ८॥
कथं धर्मभृतां श्रेष्ठस् सुतो धर्मस्य धर्मवित् ।
अनर्हः परमं क्लेशं सोढवान्स युधिष्ठिरः ॥ ९॥
कथं च बहुलां सेनां पाण्डवः कृष्णसारथिः ।
अस्यन्नेकोऽनयत्सर्वां पितृलोकं धनंजयः ॥ १०॥
एतदाचक्ष्व मे सर्वं यथावृत्तं तपोधन ।
यद्यच्च कृतवन्तस्ते तत्र तत्र महारथाः ॥ ११॥

वैशंपायनः—

महर्षेस्सर्वलोकस्य पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥ १२॥
इदं शतसहस्रं हि श्लोकानां पुण्यकर्मणाम् ।
उपाख्यानैस्सह ज्ञेयं श्राव्यं भारतमुत्तमम् ॥ १३॥
संक्षेपेण तु वक्ष्यामि सर्वमेतन्नराधिप ॥ १४
अध्यायानां सहस्रे द्वे पर्वणां शतमेव च ।
श्लोकानां तु सहस्राणि नवतिश्च दशैव च ॥ १५
ततोऽष्टादशभिः पर्वैस् संगृहीतं महात्मना ॥ १५॥
य इदं श्रावयेद्विद्वान् यश्चेदं शृणुयान्नरः ।

स प्राप्य ब्रह्मणस्थानं देवैर्याति च तुल्यताम् ॥ १६॥

इदं हि वेदैस्समितं पवित्रं चोत्तमं महत् ।
श्राव्याणामुत्तमं श्राव्यं पुराणमृषिसंस्कृतम् ॥ १७॥

अस्मिन्नर्थश्च धर्मश्च निखिलेनोपदिश्यते ।
इतिहासे महापुण्ये बुद्धिश्च परमार्पिता ॥ १८॥

अक्षुद्रान् दानशीलांश्च सत्यशीलाननास्तिकान् ।
कार्ष्णं वेदमिमं विद्वान् ज्ञापयित्वाऽर्थमश्नुते ॥ १९॥

[1]मुच्यते भ्रूणहत्याया यच्चान्यद्दुजिनं भवेत् ।
इतिहासमिमं श्रुत्वा पुरुषोऽपि सुदारुणः ॥ २०॥

जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।
महीं विजयते सर्वां शत्रूंश्चापि पराजयेत् ॥ २१॥

इदं स्वस्त्ययनं श्रेष्ठम् इदं पुंसवनं महत् ।
[2]महिषीयुवराजाभ्यां श्रोतव्यं बहुशस्तथा ॥ २२॥

अर्थशास्त्रमिदं पुण्यं धर्मशास्त्रमिदं महत् ।
मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामिततेजसा ॥ २३॥

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित् ॥ २४॥

---

1. क-ख-ग—भ्रूणहत्याकृतं चापि पापं जह्यान् न संशयः ।
2. क-ख-ग—महर्षि

इदं हि ब्राह्मणैर्लोके आख्यातं ब्राह्मणेष्विह ॥ २५
संप्रत्याचक्षते चैव कथयिष्यन्ति चापरे ।
पुत्राश्शुश्रूषवस्सन्ति प्रेष्याश्च प्रियवादिनः ॥ २६
भरतानां महज्जन्म शृण्वन्तोह्यनसूयवः ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं पुण्यं तथैव च ॥ २७
शरीरेण कृतं पापं वाचा च मनसैव च ।
सर्वं त्यजति वै क्षिप्रम् इदं शृण्वन्नरस्तदा ॥ २८
कृष्णद्वैपायनेनेदं कृतं धर्मचिकीर्षुणा ।
कीर्तिं प्रथयता लोके पाण्डवानां यशस्विनाम् ॥ २९
अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥ २९॥
योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः ।
चतुरो वार्षिकान्मासान् सर्वपापैः प्रमुच्यते ॥ ३०॥
विज्ञेयस्सर्ववेदानां पारगो भारतं वदन् ॥ ३१
देवा ब्रह्मर्षयो यत्र पुण्या राजर्षयस्तथा ।
कीर्त्यन्ते हृतपाप्मानः कीर्त्यते केशवस्तथा ॥ ३२
त्रिभिर्वर्षैर्महाभागः कृष्णद्वैपायनोऽब्रवीत् ।
नित्योत्थितस्सदायोगी महाभारतमादितः ॥ ३३
यश्चेदं पठते विद्वान् सदा पर्वसु पर्वसु ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयं स गच्छति ॥ ३४

यस्तु राजा शृणोतीदम् अखिलामश्नुते महीम् ।
प्रसूते गर्भिणी पुत्रं कन्या चाशु प्रदीयते ॥ ३५

वणिजस्सिद्धयात्रास्स्युर् वीरा विजयमाप्नुयुः ।
आस्तिकान् श्रावयेन्नित्यं ब्राह्मणाननसूयकान् ॥ ३६

वेदविद्याव्रतस्नातान् क्षत्रियाञ्जयमास्थितान् ।
स्वधर्मनित्यान् वैश्यांश्च [1]श्रावयेत्क्षत्रसंश्रितान् ॥ ३७

एष धर्मः पुरा दृष्टः सर्वधर्मेषु भारत ।
ब्राह्मणाच्छ्रवणं राजन् विशेषेण विधीयते ॥ ३८

भूयो वा यः पठेन्नित्यं स गच्छेत्परमां गतिम् ।
श्लोकं वाप्यनुगृह्णीत तथाऽर्धश्लोकमेव वा ॥ ३९

अपि पादं पठेन्नित्यं न च निर्भारतो भवेत् ।
इह नैकाश्रयं जन्म राजर्षीणां महात्मनाम् ॥ ४०

इह मन्त्रपदं युक्तं धर्मं चानेकदर्शनम् ।
इह युद्धानि चित्राणि राज्ञां वृद्धिरिहैव च ॥ ४१

ऋषीणां च कथास्तात इह गन्धर्वरक्षसाम् ।
इह तत्तत्समासाद्य विहितो वाक्यविस्तरः ॥ ४२

तीर्थानां नाम पुण्यानां देशानां चेह कीर्तनम् ।
वनानां पर्वतानां च नदीनां सागरस्यच ॥ ४३

1. क-ख-ग—शूद्रांश्च द्विजसंश्रितान्

देशानां चैव [1]पुण्यानां पुराणां चैव कीर्तनम् ।
उपचारस्तथैवाग्र्यो वीर्यमप्यतिमानुषम् ॥ ४४

इह सत्कारयोगश्च भारते परमर्षिणा ।
रथाश्वेभनरेन्द्राणां कल्पना युद्धकौशलम् ॥ ४५

वाक्यजातिरनेका च सर्वमस्मिन् समर्पितम् ॥ ४५॥
यथा समुद्रोऽतिमहान् यथा च हिमवान् गिरिः ।

ख्यातौ रत्नाकरं तद्वन् महाभारतमुच्यते ॥ ४६॥
नाप्रीतिरुपपद्येत यथा प्राप्य त्रिविष्टपम् ।

पुण्यं तथेदमाख्यानं श्रुत्वा प्रीतिर्भवत्युत ॥ ४७॥
[2]कुलस्य वृद्धये राजन् आयुषे विजयाय च ॥ ४८

शृणु कीर्तयतः कृत्स्नम् इतिहासं पुरातनम् ॥ ४८॥
यश्चेदं श्रावयेत्पित्र्ये ब्राह्मणान्पादमन्ततः ।

अक्षय्यमन्नपानं तत् पितॄंस्तस्योपतिष्ठति ॥ ४९॥
प्रातर्यदेनः कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।

महाभारतमाख्याय पश्चात् संध्यां प्रमुच्यते ॥ ५०॥
रात्रौ यदेनः कुरुते इन्द्रियैर्ब्राह्मणश्चरन् ।

---

1. क-ख-ग—दिव्यानां पुराणां चैव कीर्तितम् ।
2. क-ख-ग—स्त्रियश्च शूद्राश्शृणुयुः पुरस्कृत्य द्विजोत्तमान् ।
प्राप्नुवन्ति यथोक्तानि फलान्यविकलानि च ॥
[अधिकः पाठः]

महाभारतमाख्याय पूर्वां सन्ध्यां प्रमुच्यते ॥ ५१॥

भारतानां महज्जन्म महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ ५२॥

त्रिभिर्वर्षैर्महाभागः कृष्णद्वैपायनोऽब्रवीत् ।
नित्योत्थितो महायोगी महाभारतमादितः ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

॥ ६ ॥ आदिवंशावतारणपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये ५३॥ श्लोकाः]

॥ द्विपञ्चाशत्तमोऽध्यायः ॥

पूरुवंशकथनम् ॥ १ ॥

वैशंपायनः—

पूरोर्वंशमहं धन्यं राज्ञाममिततेजसाम् ।
प्रवक्ष्यामि पितॄणां ते तेषां नामानि मे शृणु ॥ १

अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिस्संजज्ञे दक्षश्चैव प्रजापतिः ॥ २

अङ्गुष्ठाद्दक्षमसृजच् चक्षुभ्यां च मरीचिनम् ।

[1]मरीचेः काश्यपः पुत्रो दक्षस्य दुहिताऽदितिः ॥ ३

अदित्यां काश्यपस्य विवस्वान् । विवस्वतो मनुः।मनोरिला॥

इलायाः पुरूरवाः । पुरूरवस आयुः । आयुषो नहुषः । नहुषस्य ययातिः ॥ ५

ययातेर्द्वे भार्ये बभूवतुः । उशनसो दुहिता देवयानी, वृषपर्वणश्च दुहिता शर्मिष्ठा नाम ॥ ६

तत्रानुवंशो भवति—

यदुं च तुर्वशुं चोभौ देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ ७

तत्र यदोर्यादवाः । पूरोः पौरवाः । पूरोर्भार्या कौसल्या बभूव । तस्यामस्य जज्ञे जनमेजयः ॥ ८

[2]स त्रीन् हयमेधानाजहार । विश्वजिता चेष्ट्वा वनं प्रविवेश ॥

जनमेजयस्तु खलु सुनन्दां नामोपयेमे । तस्यामस्य जज्ञे प्राचीन्वान् ॥ १०

यः प्राचीं दिशं जिगाय यावत्सूर्योदयात् । तत्तस्य प्राचीन्वत्त्वम् ॥ ११

---

1. क-ख-ग—अङ्गुष्ठाद्दक्षमसृजच्चक्षुभ्यां च मरीचिनम् । [अधिकः पाठः]

2. क-ख-ग—त्रीन्हयमेधाना

प्राचीन्वांस्तु खल्वाइमकीमुपयेमे सुषावान्नाम । तस्यामस्य जज्ञे शय्यातिः ॥ १२

शय्यातिस्तु त्रिशङ्कोर्दुहितरं वराङ्गीं नामोपयेमे । तस्यामस्य जज्ञेऽहंपातिः ॥ १३

अहंपातिस्तु खलु कृतवीर्यदुहितरं भानुमतीं नामोपयेमे । तस्यामस्य जज्ञे सार्वभौमः ॥ १४

सार्वभौमस्तु खलु जित्वाऽऽजहार कैकयीं सुन्दरां नाम । तस्यामस्य जज्ञे [1]महाभौमः ॥[2] १५

महाभौमस्तु खलु प्रसेनजिद्दुहितरमुपयेमे सुयज्ञां नाम । तस्यामस्य जज्ञे अयुतानायी ॥ १६

यः पुरुषमेधे पुरुषाणामयुतमानयत्तत्तस्यायुतानायित्वम् ॥

अयुतानायी तु खलु पृथुश्रवसो दुहितरमुपयेमे भासां नाम । अस्यामस्य जज्ञेऽक्रोधनः ॥ १८

अक्रोधनस्तु कालिङ्गीं करण्डुं नामोपयेमे । तस्यामस्य जज्ञे देवातिथिः ॥ १९

---

1. क-ख-ग—जयत्सेनः

2. क-ख-ग—जयत्सेनस्तु खलु वैदर्भीमुपयेमे सुषावां नाम । तस्यामस्य जज्ञेऽराचीनः ॥
अराचीनस्तु खलु वैदर्भीमुपयेमे मर्यादां नाम । तस्यामस्य जज्ञे महाभौमः ॥
[अधिकः पाठः]

देवातिथिस्तु खलु वैदर्भीमुपयेमे मर्यादां नाम। तस्यामस्य जज्ञे ऋचः ॥ २०

ऋचस्तु खलु वामदेव्यामङ्गराजकन्यायामृक्षं पुत्रमजीजनत् ॥ २१

ऋक्षस्तु खलु [1]तक्षकदुहितरं ज्वलतां नामोपयेमे। तस्यामन्तिनारमजीजनत् ॥ २२

अन्तिनारस्तु सरस्वत्यां द्वादशवार्षिकं सत्रमाजहार। तमुदवसाने निर्वृत्ते सरस्वत्यभिगम्य भर्तारं वरयामास। तस्यां पुत्रं जनयामास त्रस्नुं नाम ॥ २३

अत्रानुवंशो भवति ॥

त्रस्नुस्सरस्वतीपुत्र अन्तिनारादजायत।
इलिलं जनयामास कालिन्द्यां त्रस्नुरात्मजम् ॥ २४

[2]इलिलस्तु रथन्तरायां दुष्यन्तादीन् पञ्च पुत्रानजीजनत् ॥

दुष्यन्तस्तु खलु लक्ष्मणां नाम भागीरथीमुपयेमे। तस्यामस्य जज्ञे जनमेजयः ॥ २६

स एव दुष्यन्तो विश्वामित्रदुहितरं शकुन्तलां नामोपयेमे। तस्यामस्य जज्ञे भरतः ॥ २७

---

1. क-ख-ग—तक्षदुहितरं ललां नाम।
2. क-ख-ग—इलिलस्तु खलु रथन्तर्यां जनमेजयमुत्पादयामास ॥२५
जनमेजयस्तु खलु कक्षीं नाम भागीरथीमुपयेमे। तस्यां दुष्यन्तादीन्पञ्च पुत्रानजीजनत् ॥ २६
दुष्यन्तस्तु विश्वामित्र दुहितरं—

तत्रेमौ श्लोकौ भवतः—

माता भस्त्रा पितुः पुत्रो यस्माज्जातस्स एव सः ।
भरस्व पुत्रं दौष्यन्ति सत्यमाह शकुन्तला ॥ २८

रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ २९

ततोऽस्य भरतत्वम् ॥ ३०

भरतस्तु खलु काशेयीं सार्वसेनीमुपयेमे सुनन्दां नाम । तस्यामस्य जज्ञे भुमन्युः ॥ ३१

भुमन्युस्तु दाशार्हीमुपयेमे सुपर्णां नाम । तस्यामस्य जज्ञे सुहोत्रः ॥ ३२

सुहोत्रस्तु खल्वैक्ष्वाकीमुपयेमे जयन्तीं नाम । तस्यामस्य जज्ञे हस्ती । य इदं पुरमावासयामास । तस्माद्धस्तिनपुरत्वम्॥

हस्ती तु त्रैगर्तीमुपयेमे यशोधरां नाम । तस्यामस्य जज्ञे विकुञ्जनः ॥ ३४

विकुञ्जनस्तु दाशार्हीमुपयेमे विन्दां नाम । तस्यामस्य जज्ञेऽजमीढः ॥ ३५

अजमीढस्य तु चतुर्विंशतिपुत्रशतं बभूव—कैकय्यां नागायां गान्धार्यां विमलायामृक्षायामिति । पृथग्वंशकर्तारो नृपतयः ॥ ३६

अजमीढादृक्षायां वंशकरस्संवरणो जज्ञे ॥ ३७

संवरणस्तु खलु वैवस्वतीं तपतीं नामोपयेमे । तस्यामस्य-
जज्ञे कुरुः ॥ ३८

कुरुस्तु दाशार्हीमुपयेमे शुभां नाम । तस्यामस्य जज्ञे
विडूरथः ॥ ३९

विडूरथस्तु खलु मागधीमुपयेमे संप्रियां नाम । तस्यामस्य
जज्ञेऽनश्वान् ॥ ४०

अनश्वांस्तु मागधीमुपयेमे सुवेषां नाम । तस्यामस्य जज्ञे
परीक्षित् ॥ ४१

परीक्षित्तु बाहुकामुपयेमेऽमृतां नाम । तस्यामस्य जज्ञे
भीमसेनः ॥ ४२

भीमसेनस्तु खलु कैकयीमुपयेमे सुकुमारीं नाम । तस्या-
मस्य जज्ञे पर्यश्रवाः । यमाहुः प्रतीप इति ॥ ४३

प्रतीपस्तु शैब्यामुपयेमे सुनन्दां नाम । तस्यां त्रीन् पुत्रानु-
त्पादयामास देवापिं शन्तनुं बाह्लीकं चेति ॥ ४४

देवापिस्तु खलु बाल एवारण्यं प्रविवेश । शन्तनुस्तु मही-
पालोऽभवत् ॥ ४५

तत्र श्लोको भवति—

यं यं कराभ्यां स्पृशति जीर्णं स सुखमश्नुते ।

पुनर्युवा च भवति तस्मात्तं शन्तनुं विदुः । तत्तस्य शन्तनुत्वम् ॥

शन्तनुस्तु खलु गङ्गां भागीरथीमुपयेमे । तस्यामस्य जज्ञे देवव्रतः । यमाहुर्भीष्म इति ॥ ४७

भीष्मस्तु पितुः प्रीतिचिकीर्षया सत्यवतीमानयामास मातरं । यामाहुः कालीति ॥ ४८

तस्यां पूर्वं पराशरात्कन्यागर्भो द्वैपायनः । तस्यामेव शन्तनोर्द्वौ पुत्रौ बभूवतुः चित्राङ्गदो विचित्रवीर्यश्च ॥ ४९

चित्राङ्गदस्त्वप्राप्तयौवन एव गन्धर्वेण निहतः । ततो विचित्रवीर्यो राजा बभूव ॥ ५०

विचित्रवीर्यस्तु खलु काशिराजस्य सुते अम्बिकाम्बालिके उदवहत् । स विचित्रवीर्योऽनुत्पन्नापत्य एव विदेहत्वं प्राप्तः ॥

ततो [1]गन्धवती चिन्तयामास, कथं नु खलु शन्तनोः पिण्डविच्छेदो न स्यादिति ॥ ५२

सा थ द्वैपायनं चिन्तयामास, सोऽग्रतस्थितः किं करवाणीति । तं सत्यवत्युवाच, भ्राता तेऽनपत्य एव स्वर्गतः, तस्यार्थेऽपत्यमुत्पादयेति ॥ ५३

स परमित्युवाच, स तत्र त्रीन्पुत्रानुत्पादयामास——धृतराष्ट्रं पाण्डुं विदुरं चेति ॥ ५४

1. क-ख-ग—सत्यवती

धृतराष्ट्रस्य राज्ञः पुत्राणां शतं बभूव गान्धर्यां वरदानात् तेषां च धार्तराष्ट्राणां चत्वारः प्रधानाः—दुर्योधनो दुश्शासनो विकर्णश्चित्रसेनश्चेति ॥ ५५

पाण्डोस्तु कुन्ती माद्रीति स्त्रीरत्ने बभूवतुः । स मृगयां चरन् मैथुनगतमृषिं मृगचारिणं बाणेनाजघान ॥ ५६

स बाणविद्ध उवाच पाण्डुम् ॥ ५७

अत्र श्लोको भवति—

योऽकृतार्थं हि मां क्रूर बाणेनाघ्ना मृगव्रतम् ।
तवाप्येतादृशो भावः क्षिप्रमेवागमिष्यति ॥ ५८

इति मृगव्रतचारिणा ऋषिणा शप्तः ॥ ५९

स विषण्णरूपः पाण्डुस्तं शापं परिहरन्नोपसर्पति भार्ये ॥

आह च स्वभार्याम् । स्वचापल्यादिदं प्राप्तवानहम् । श्रृणोमि नानपत्यस्य लोकास्सन्तीति । ममार्थे पुत्रानुत्पादयेति कुन्तीमुवाच ॥ ६१

सा पुत्रानुत्पादयामास धर्माद्युधिष्ठिरं मारुताद्भीमसेनमिन्द्रादर्जुनमिति ॥ ६२

स हृष्टरूपः पाण्डुरुवाच—

इयं ते सपत्नी ह्यनपत्या व्रीडिता साध्वी अस्यामपत्यमुत्पाद्यतामिति ॥ ६३

तस्यां नकुलसहदेवौ यमावश्विभ्यां जज्ञाते ॥ ६४

माद्रीं तु स्वलङ्कृतां दृष्ट्वा पाण्डुर्भावं चक्रे । स तां प्राप्यैव विदेहत्वं प्राप्तः ॥ ६५

तत्रैनं चितायामन्वारुरोह माद्री । कुन्तीं चोवाच यमयोरार्ययाऽप्रमत्तया भवितव्यमिति ॥ ६६

ततः पञ्च पाण्डवान् सह कुन्त्या हास्तिनपुरं नयन्ति स्म तपस्विनः ॥ ६७

तत्र भीष्माय धृतराष्ट्रविदुरयोः पाण्डोः स्वर्गगमनं याथातथ्यं निवेदयन्ति स्म तपस्विनः ॥ ६८

पाण्डवान् सह कुन्त्या जतुगृहे दाहयितुकामो धृतराष्ट्रात्मजोऽभूत् ॥ ६९

तांश्च विदुरो मोक्षयित्वा प्रीतोऽभवत् ॥ ७०

ततो हिडिम्बं हत्वा एकचक्रां जग्मुः कुशलिनः ॥ ७१

पाञ्चालविषयं गत्वा स्वयंवरे द्रौपदीं लब्ध्वाऽर्धराज्यं प्राप्येन्द्रप्रस्थनिवासिनस्तस्यां पुत्रानुत्पादयामासुर्द्रौपद्याम्—प्रतिविन्ध्यं युधिष्ठिरः, सुतसोमं वृकोदरः, श्रुतकर्माणमर्जुनः, शतानीकं नकुलः, श्रुतसेनं सहदेव इति ॥ ७२

शैव्यस्य कन्यां [1]देविकां नामोपयेमे युधिष्ठिरः । तस्यां पुत्रं जनयामास युधिष्ठिरो यौधेयं नाम ॥ ७३

1. क-ख-ग—देवकीं

भीमसेनस्तु खलु वाराणस्यां काशिराजकन्यां बलधरां नामोदवहत् स्वयंवरस्थां । तस्यामस्य जज्ञे [1]शर्वत्रातः ॥ ७४

भीमसेनस्तु पूर्वमेव हिडिम्बायां राक्षस्यां जनयामास घटोत्कचं नाम ॥ ७५

अर्जुनस्तु खलु द्वारवतीं गत्वा भगवतो वासुदेवस्य भगिनीं सुभद्रां नामोदवहत् । तस्यामभिमन्युं नाम पुत्रं जनयामास ॥ ७६

अर्जुनस्तु नागकन्यायामुलूप्यामिरावन्तं नाम पुत्रं जनयामास ॥ ७७

ततो मणलूरुपतिकन्यायां चित्राङ्गदायामर्जुनः पुत्रमुत्पादयामास बभ्रुवाहनं नाम ॥ ७८

नकुलस्तु खलु चैद्यां रेणुमतीं नामो[2]पयेमे । तस्यां पुत्रं जनयामास निरामित्रं नाम ॥ ७९

सहदेवस्तु खलु माद्रीमेव स्वयंवरे विजयां नामोदवहद्भार्याम् । तस्यां पुत्रं जनयामास सुहोत्रं नाम ॥ ८०

एते त्रयोदश पुत्राः पाण्डवानाम् ॥ ८१

विराटस्य दुहितरमुत्तरां नामाभिमन्युरुपयेमे । तस्यामस्य परासुर्गर्भोऽजायत ॥ ८२

तमुत्सङ्गे प्रतिजग्राह पृथिवी नियोगात्पुरुषोत्तमस्य ॥ ८३

1. क-ख-ग—सर्वत्रातः 2. क-ख-ग--दवहत्

[1]सौभद्रस्य षाण्मासिकं गर्भमहं जीवयामि पादस्पर्शादिति वासुदेव उवाच ॥ ८४

अहं जीवयामि कुमारमनन्तवीर्यं जात एवायमनुजातः । अभिमन्योस्सत्येन चेयं पृथिवी धारयत्विति वासुदेवस्य पादस्पर्शात्सजीवोऽजायत ॥ ८५

नाम तस्याकरोत्सुभद्रा—

परिक्षीणे कुले जात उत्तरायां परंतपः ।
परीक्षिदभवत्तस्मात् सौभद्रात्तु यशस्विनः ॥ ८६

[2]परीक्षित्तु खलु भद्रवतीं नामोपयेमे । तस्यां तव भवाञ्जनमेजयः ॥ ८७

जनमेजयात्तु भवतः खलु वपुष्टमायां पुत्रौ द्वौ शतानीकः [3]शङ्खश्च ॥ ८८

शतानीकस्तु खलु [4]वैदर्भीमुपयेमे । तस्यामस्य जज्ञे पुत्रोऽश्वमेधदत्तः ॥ ८९

इत्येष पूरोर्वंशस्तु पाण्डवानां च कीर्तितः ।
पूरोर्वंशमिमं श्रुत्वा सर्वपापैः प्रमुच्यते ॥ ९०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥
॥ ६ ॥ आदिवंशावतारणपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ११ श्लोकाः ७९ वाक्यानि च]

क-ख-ग— 1.—सुभद्रायाः 2. मुद्रवतीं 3. शङ्कुश्च 4. वैदेही

॥ त्रिपञ्चाशत्तमोऽध्यायः ॥

उपरिचरोपाख्यानम् ॥ १ ॥ तस्य गिरिकया विवाहः ॥ २ ॥ दाश-कन्योत्पत्तिः ॥ ३ ॥ तस्यां पराशराद्व्यासोत्पत्तिः ॥ ४ ॥

वैशंपायनः—

राजोपरिचरो नाम धर्मनित्यो महीपतिः ।
बभूव मृगयाशीलः शश्वत्स्वाध्यायवाञ्शुचिः ॥ १

स चेदिविषयं रम्यं वसुः पौरवनन्दनः ।
इन्द्रोपदेशाज्जग्राह स्पृहणीयं महीपतिः ॥ २

तमाश्रमे न्यस्तशस्त्रं निवसन्तं तपोरतिम् ।
देवराड्वज्रसहित उपतस्थे मरुद्गणैः ॥ ३

इन्द्रोऽहमिति धैर्येण तपसा चेत्यमन्यत ।
त्वं नो गतिर्महाराजन् इति वज्र्यवदन्मुहुः ॥ ४

तं वै देवपतिस्साक्षात् तपसस्स न्यवर्तत ॥ ४॥

इन्द्रः—

न संकीर्येत धर्मोऽयं पृथिव्यां पृथिवीपते ।
तं पाहि धर्मो हि धृतः कृत्स्नं पालयते जगत् ॥ ५॥

देवानहं पालयिता पालय त्वं हि मानुषान् ।
लौक्यं धर्मं पालय त्वं नित्ययुक्तस्समाहितः ॥ ६॥

धर्मयुक्तस्ततो लोकान् पुण्यालप्स्यसि शाश्वतान् ॥ ७

दिविष्ठस्य भुविष्ठस्त्वं सखा भूत्वा मम प्रियः ।
ऊधः पृथिव्या यो देशस् तमावस नराधिप ॥ ८

पशव्यश्चैव पुण्यश्च संस्थिरो धनधान्यवान् ।
सुरक्षश्चैव धन्यश्च भाग्यैर्भूरिगुणैर्युतः ॥ ९

अनन्य एष देशो हि धनरत्नादिभिर्युतः ।
वसो रक्षस्व वसुधां वस चेदिषु चेदिप ॥ १०

धर्मशीला जनपदास् ससंतोषाश्च साधवः ।
न च मिथ्या प्रलापोऽत्र स्वैरेष्वपि ततोऽन्यथा ॥ ११

न च पित्रा विभज्यन्ते नरा गुरुहिते रताः ।
युञ्जन्ति धुरि नो गाश्च कृशान् संधुक्षयन्ति च ॥ १२

सर्वे वर्णास्स्वधर्मस्थास् सदा चेदिषु मानवाः ।
न तेऽस्त्यविदितं किंचित् त्रिषु लोकेषु यद्भवेत् ॥ १३

देवोपभोग्यं दिव्यं च विमानं स्फाटिकं महत् ।
आकाशगं त्विदं दत्तं विमानमुपलप्स्यते । १४

त्वमेकस्सर्वमर्त्येषु विमानवरमास्थितः ।
चरिष्यस्युपरिस्थो वै देवो विग्रहवानिव ॥ १५

ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम् ।
धारयिष्यसि सङ्ग्रामे यां च शस्त्रैरविक्षतः ॥ १६

लाञ्छनं चैतदेवेह भविता ते नराधिप ।
इन्द्रमालेति विख्यातां धन्यामप्रतिमां वह ॥ १७

वैशम्पायनः—

यष्टिं च वैष्णवीं तस्मै ददौ वृत्रनिषूदनः ।
[1]शत्रूणामपि संहर्त्रीं शिष्टानां परिपालिनीम् ॥ १८

एवं संसान्त्व्य नृपतिं तपसस्संन्यवर्तयत् ।
प्रययौ दैवतैस्सार्धं कृत्वा कार्यं दिवौकसाम् ॥ १९

ततस्तु राजा चेदीनाम् इन्द्राभरणभूषितः ।
इन्द्रदत्तं विमानं तद् आस्थाय प्रययौ पुरीम् ॥ २०

[2]स तु शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा ।
प्रवेशं कारयामास सर्वोत्सववरं तदा ॥ २१

मार्गशीर्षे महाराज पूर्वपक्षे महामखम् ॥ २१॥
तदा प्रभृति चाद्यापि यष्ट्याः क्षितिपसत्तमैः ।
प्रवेशः क्रियते राजन् यथा तेन प्रवर्तितः ॥ २२॥
अपरेद्युस्ततश्चास्याः कुर्वन्त्येते ध्वजोच्छ्रयम् ।
अलङ्कृतायाः पुलकैर् गन्धमाल्यैश्च भूषणैः ॥ २३॥
माल्यदामपरिक्षिप्तां द्वात्रिंशत्किष्कुसंमिताम् ॥ २४
चतुर्विंशत्यङ्गुलात्मा हस्तः किष्कुरिति स्मृतः ।

1. क-ख-ग—इष्टप्रदानमुद्दिश्य 2. क-ख-ग—तस्याः

उद्धृत्य पीठके चापि द्वादशारत्निकोच्छ्रिते ॥ २५

महाराजतवासोभिः परिक्षिप्य ध्वजोत्तमम् ।
वासोभिरन्नपानैश्च पूजितैर्ब्राह्मणर्षभैः ॥ २६

पुण्याहवाचनं कृत्वा ध्वज उच्छ्रियते तदा ।
शङ्खभेरीमृदङ्गैश्च संनाहं चक्रिरे ततः ॥ २७

भगवान्पूज्यते चात्र यष्टिरूपेण वासवः ।
माणिभद्रादयो यक्षाः पूज्यन्ते दैवतैस्सह ॥ २८

नानाविधानि दानानि दत्त्वार्थिभ्यस्सुहृज्जनैः ।
अलङ्कृत्वा माल्यदामैर् वस्त्रैर्नानाविधैस्तथा ॥ २९

इतिभिस्सजलैस्सर्वे क्रीडित्वा नृपशासनात् ।
सभाजयित्वा राजानं कृत्वा नर्माश्रयाः कथाः ॥ ३०

रमन्ते नागरास्सर्वे तथा जानपदैस्सह ।
सूताश्च मागधाश्चैव रमन्ते नटनर्तकाः ॥ ३१

प्रीत्या तु नृपशार्दूल सर्वे चक्रुर्महोत्सवम् ।
सान्तःपुरस्सहामात्यस् सर्वाभरणभूषितः ॥ ३२

महाराजतवासांसि वासित्वा चेदिराट् तदा ।
रेजे चेदिपतिस्तत्र दिवि देवपतिर्यथा ॥ ३३

जातिभिस्तूलिकेनाक्तस् तदा स मुमुदे सदा ।
एवं जानपदास्सर्वे चक्रुरिन्द्रमखं तथा ॥ ३४

यथा चेदिपतिः प्रीतश् चकारेन्द्रमखं वसुः ॥ ३५

एतां पूजां महेन्द्रस्तु दृष्ट्वा वसुकृतां शुभाम् ।
हरिभिर्वाजिभिर्युक्तम् अन्तरिक्षगतं रथम् ॥ ३६

आस्थाय सह शच्या च वृतो ह्यप्सरसां गणैः ।
वसुना राजमुख्येन समागम्याब्रवीद्वचः ॥ ३७

इन्द्रः—

ये पूजयिष्यन्ति नरा राजानश्च मखं मम ।
कारयिष्यन्ति च मुदा यथा चेदिपतिर्नृप ॥ ३८

तेषां श्रीर्विभवश्चैव स्वराष्ट्राणां भविष्यति ।
तस्येप्सितो जनपदो मुदितश्च भविष्यति ॥ ३९

निरीतिकानि सस्यानि भवन्ति बहुधा नृप ।
राक्षसाश्च पिशाचाश्च न लुम्पन्ते कथंचन ॥ ४०

वैशंपायनः—

एवं महात्मना तेन महेन्द्रेण नराधिप ।
वसुः प्रीत्या मघवता महारा[1]जेति सत्कृतः ॥ ४१

एवं कृत्वा महेन्द्रस्तु जगाम स्वं निवेशनम् ॥ ४१॥

उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः ।
भूमिदानादिभिर्दानैर् यथायुक्ता भवन्ति वै ॥ ४२॥
[2]वरदानाल्लभन्ते च तथा शक्रोत्सवेन ते ॥ ४३

1. क-ख-ग—जोऽभिषेचित 2. क-ख-ग—वरदानं महायज्ञैः

इन्द्रप्रीत्या भूमिपतिश् चकारेन्द्रमखं वसुः ॥ ४३॥
संपूजितो मघवता वसुश्चेदिपतिस्तथा ।
पालयामास धर्मेण चेदिस्थः पृथिवीमिमाम् ॥ ४४॥
पुत्राश्चास्य महावीर्याः पञ्चासन्नमितौजसः ।
नानाराष्ट्रेषु च सुतान् स सम्राडभ्यषेचयत् ॥ ४५॥
महारथो मगधराड् विश्रुतो यो बृहद्रथः ।
प्रत्यग्रश्च कुशाम्बश्च यमाहुर्मणिवाहनम् ॥ ४६॥
[1]माज्जिलश्च यदुश्चैव राजन्यश्चापराजितः ।
एते पञ्च सुतास्तस्य राजर्षेर्भूरितेजसः ॥ ४७॥
न्यवेशयन्नामभिस्वैर् देशांश्चैव पुराणि च ।
वासवाश्चैव राजानस् सर्वे वंशकराः पृथक् ॥ ४८॥
वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके रथे ।
उपतस्थुर्महात्मानं गन्धर्वाप्सरसो नृपम् ॥ ४९॥
राजोपरिचरेत्येवम् अवोचन्पार्थिवा नृपम् ॥ ५०
पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः ।
अरौत्सीच्चेतनायुक्तः कामात्कोलाहलः किल ॥ ५१
गिरिं कोलाहलं तं तु पदा वसुरताडयत् ।
निश्चक्राम नदी तस्य प्रहारविवरेण सा ॥ ५२

1. क-ग—मर्च्चलश्च ; ख—मर्च्चिलश्च

तस्यां नद्यामजनयन्मिथुनं पर्वतस्त्वयम् ।
तस्माद्धि मोक्षणात्प्रीता नदी राज्ञे न्यवेदयत् ॥ ५३

महिषी भविता कन्या पौष्यस्सेनापतिर्भवेत् ॥ ५३॥

शुक्तिमत्या वचश्श्रुत्वा दृष्ट्वा तौ राजसत्तमः ॥ ५४

यः पुमानभवत्तत्र तं स राजर्षिसत्तमः ।
वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमम् ॥ ५५

चकार पत्नीं कन्यां तां दयितां गिरिकां नृपः ।
वसोः पत्नी तु गिरिका कामात् काले न्यवेदयत् ॥ ५६

ऋतुकालमनुप्राप्ता काले पुंसवने शुचिः ।
तदहः पितरश्चैनम् ऊचुर्जहि मृगानिति ॥ ५७

श्रुत्वा पितृवचः प्रीतस् तदा मतिमतां वरः ।
स पितॄणां नियोगं तम् अनतिक्रम्य पार्थिवः ॥ ५८

चचार मृगयां कामी गिरिकामेव संस्मरन् ॥ ५८॥

अशोकैश्चम्पकैश्चूतैस् तिलकैरतिमुक्तकैः ।
पुन्नागैः कर्णिकारैश्च वकुलैर्दिव्यपादपैः ॥ ५९॥

पनसैर्नारिकेलैश्च चन्दनैश्चार्जुनैस्तथा ।
एतैरन्यैर्महावृक्षैः पुण्यैस्स्वादुफलैर्युतम् ॥ ६०॥

कोकिलाकुलसन्नादं मत्तभ्रमरनादितम् ।

वसन्तकाले तत्पश्यन् वनं चैत्ररथोपमम् ॥ ६१॥
मन्मथाभिपरीतात्मा नापश्यद्गिरिकां तदा ॥ ६२
अपश्यन्कामसंतप्तश् चरमाणो यदृच्छया ।
पुष्पसंछन्नशाखाग्रं पल्लवैरुपशोभितम् ॥ ६३
अशोकस्तबकैश्छन्नं रमणीयं तदा नृपः ।
तरोरधस्ताच्छाखायां सुखासीनो नराधिपः ॥ ६४
मधुगन्धैश्च संपृक्तं पुष्पगन्धं मनोरमम् ।
वायुना प्रेर्यमाणं तम् आघ्राय मुदमन्वगात् ॥ ६५
चचार मृगयां कामी गिरिकामेव संस्मरन् ।
अतीव रूपसंपन्नां साक्षाच्छ्रियमिवापराम् ॥ ६६
[1]तस्य रेतः प्रचस्कन्द चरतो रुचिरे वने ॥ ६६॥
स्कन्नमात्रेण तद्रेतो वृक्षपर्णेन भूमिपः ।
प्रतिजग्राह मिथ्या मे न स्कन्देद्रेत इत्युत ॥ ६७॥
ऋतुश्च तस्याः पत्न्या मे न मोघस्यादिति प्रभुः ।
संचिन्त्यैव तदा राजा विचार्य च पुनः पुनः ॥ ६८॥
अमोघत्वं च विज्ञाय तेजसो राजसत्तमः ।
शुक्रप्रस्थापने कालं महिष्याः प्रसमीक्ष्य च ॥ ६९॥
अभिमन्त्र्याशु तच्छुक्रम् आरात्तिष्ठन्तमाशुगम्

1. क-ख-ग-भार्यां चिन्तयमानस्य मन्मथाग्निरवर्धत। [अधिकः पाठः]

सूक्ष्मधर्मार्थतत्त्वज्ञो ज्ञात्वा श्येनं ततोऽब्रवीत् ॥ ७०॥
मत्प्रियार्थमिदं सौम्य शुक्रं मम गृहं नय ।
गिरिकायाः प्रयच्छाशु तस्या ह्यार्तवमद्य मे ॥ ७१॥
गृहीत्वा तत्तदा श्येनस् तूर्णमुत्पत्य वेगवान् ।
वेगं परममास्थाय प्रदुद्राव विहंगमः ॥ ७२॥
तमपश्यदथायान्तं श्येनं श्येनस्तथाऽपरः ।
अभ्यद्रवच्च तं सद्यो दृष्ट्वैवामिषशङ्कया ॥ ७३॥
तुण्डयुद्धमथाकाशे तावुभौ संप्रचक्रतुः ।
युद्ध्यतोरपतद्रेतस् तच्चापि यमुनाम्भसि ॥ ७४॥
तत्राद्रिकेत्यभिख्याता ब्रह्मशापाद्वराप्सराः ।
मीनभावमनुप्राप्ता बभूव यमुनाचरी ॥ ७५॥
श्येनपादात् परिभ्रष्टं तद्वीर्यमथ वासवम् ।
जग्राह तरसोत्पत्य साऽद्रिका मत्स्यरूपिणी ॥ ७६॥
कदाचिदथ मत्स्यां तां बबन्धुर्मत्स्यघातिनः ॥ ७७
मासे च दशमे प्राप्ते तदा भारतसत्तम ।
उज्जह्रुरुदरात्तस्याः स्त्रीपुमांसौ च मानुषौ ॥ ७८
आश्चर्यभूतं मत्वा तत् राज्ञस्ते प्रत्यवेदयन् ।
कायान्मात्स्यादिमौ राजन् संभूतौ मानुषाविति ॥ ७९

तयोः पुमांसं जग्राह राजोपरिचरस्तदा ।
स मात्स्यो नाम राजाऽऽसीद् धार्मिकस्सत्यसङ्गरः ॥ ८०

साऽप्सरा मुक्तशापा च क्षणेन समपद्यत ॥ ८०॥

पुरोक्ता सा भगवता तिर्यग्योनिगताऽऽशु वै ।
मानुषौ जनयित्वा तु मुक्तशापा भविष्यसि ॥ ८१॥

सुतौ संजनयित्वा सा विशस्ता मत्स्यघातिभिः ॥ ८२

संत्यज्य मत्स्यरूपं सा दिव्यं रूपमवाप्य च ।
सिद्धर्षिचारणपथं जगामाथ वराप्सराः ॥ ८३

या कन्या दुहिता मत्स्या सा चासीन्मत्स्यगन्धिनी ।
राज्ञा दत्ता च दाशाय सुतेयं ते भवत्विति ॥ ८४

सा तु रूपसमायुक्ता सर्वैस्समुदिता गुणैः ॥ ८४॥

या तु सत्यवती नाम मत्स्यगात्राभिसंश्रयात् ।
आसीत्सा मत्स्यगन्धैव कंचित्कालं शुचिस्मिता ॥ ८५॥

शुश्रूषार्थं पितुर्नावं तां तु वाहयतीं जले ।
तीर्थयात्रां परिक्रामन् अपश्यद्वै पराशरः ॥ ८६॥

अतीव रूपसंपन्नां सिद्धानामपि काङ्क्षिताम् ।
दृष्ट्वैव स च तां धीमांश् चकमे चारुदर्शनाम् ॥ ८७॥

विद्वांस्तां वासवीं कन्यां कार्यवान् मुनिपुङ्गवः ।

संभवं चिन्तयित्वा तां ज्ञात्वा प्रोवाच शक्तिजः ॥ ८८॥
क्व कर्णधारो नौर्येन नीयते ब्रूहि भामिनि ॥ ८९

मत्स्यगन्धा

अनपत्यस्य दाशस्य सुता तत्प्रियकाम्यया ।
सहस्रजनसंपूर्णा नौर्मया वाह्यते द्विज ॥ ९०

पराशरः—

शोभनं वासवि शुभे किंचिन्नयसि वाह्यताम् ।
कलशं भविता भद्रे सहस्रार्धेन संमितम् ॥ ९१
अहं शेषो भविष्यामि नीयतामचिरेण नौः ॥ ९१॥

वैशंपायनः—

मत्स्यगन्धा तथेत्युक्त्वा नावं वाहयती जले ।
वीक्षमाणं मुनिं दृष्ट्वा प्रोवाचेदं वचस्तदा ॥ ९२॥

मत्स्यगन्धा—

मत्स्यगन्धेति मामाहुर् दाशराजसुतां जनाः ।
जन्म शोकाभितप्तायाः कथं ज्ञास्यसि कथ्यताम् ॥ ९३॥

पराशरः—

दिव्यज्ञानेन दृष्टं हि दृष्टमात्रेण ते वपुः ।
प्रणयोपबृंहणार्थाय वक्ष्ये वासवि तच्छृणु ॥ ९४॥
बर्हि[1]ष इति विख्याताः पितरस्सोमपास्तु ते ।

1. क-ख-ग—षद इति विख्याताः

तेषां त्वं मानसी कन्या अच्छोदा नाम विश्रुता ॥ ९५॥

अच्छोदं नाम तद्दिव्यं सरो यस्मात्समुत्थितम् ॥ ९६

[1]त्वया न दृष्टपूर्वास्तु पितरस्ते कदाचन ।
संभूता मनसा तेषां पितॄन् स्वान्नाभिजानती ॥ ९७

सा त्वन्यं पितरं वव्रे स्वानतिक्रम्य तान्पितॄन् ।
नाम्ना वसुरिति ख्यातं मनुपुत्रं महीश्वरम् ॥ ९८

अद्रिकाऽप्सरसा युक्तं विमाने दिवि विष्ठितम् ।
सा तेन व्यभिचारेण मनसा कामचारिणी ॥ ९९

पितरं प्रार्थयित्वाऽन्यं योगाद्भ्रष्टा पपात ह ।
अपश्यत्पतमाना सा विमानत्रयमन्तिकात् ॥ १००

त्रसरेणुप्रमाणांस्तांस् तत्रापश्यत् स्वकान् पितॄन् ।
सुसूक्ष्मानपरिव्यक्तान् अङ्गैरङ्गेष्विवाहितान् ॥ १०१

तातेति तानुवाचार्ता पतन्ती सा ह्यधोमुखी ।
तैरुक्ता सा तु माभैषीस् तेन सा संस्थिता दिवि ॥ १०२

ततः प्रसादयामास स्वान्पितॄन्दीनया गिरा ।
त ऊचुः पितरः कन्यां भ्रष्टैश्वर्यां व्यतिक्रमात् ॥ १०३

---

1. क-ख-ग—भगवान्पूज्यते यत्र हररूपेण शङ्करः ।
स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः ॥
[अधिकः पाठः]

भ्रष्टैश्वर्या स्वदोषेण तप्यसे त्वं शुचिस्मिते ॥ १०३॥
यैरारभन्ते कर्माणि शरीरैरिह देवताः ।
तैरेव तत्कर्मफलं प्राप्नुवन्ति स्म देवताः ॥ १०४॥
मनुष्यास्त्वन्यदेहेन शुभाशुभमिति स्थितिः ॥ १०५
सद्यः फलन्ति कर्माणि देवत्वे प्रेत्य मानुषे ॥ १०५॥
तस्मात्त्वं पतसे पुत्रि प्रेत्य त्वं प्राप्स्यसे फलम् ॥ १०६
पितृहीना तु कन्या त्वं वसोर्हि त्वं सुता मता ।
मत्स्ययोनौ समुत्पन्ना सुता राज्ञो भविष्यसि ॥ १०७
अद्रिका मत्स्यरूपाऽभूद् गङ्गायमुनसङ्गमे ।
पराशरस्य दायादं त्वं पुत्रं जनयिष्यसि ॥ १०८
स वेदमेकं ब्रह्मर्षिश् चतुर्धा विभजिष्यति ।
[1]महाभिषक्सुतस्यैव शन्तनोः कीर्तिवर्धनम् ॥ १०९
ज्येष्ठं चित्राङ्गदं वीरं चित्रवीर्यं च विश्रुतम् ।
एतानुत्पाद्य पुत्रांस्त्वं पुनरेवागमिष्यसि ॥ ११०
व्यतिक्रमात्पितॄणां च प्राप्स्यसे जन्म कुत्सितम् ।
अस्यैव राज्ञस्त्वं कन्या ह्यद्रिकायां भविष्यसि ॥ १११
अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ॥ १११॥
एवमुक्ता पुरा तैस्त्वं जाता सत्यवती शुभा ॥ ११२

1. क-ख-ग—महाराज्याभिषिक्तस्य

अद्रिकेत्यभिविख्याता ब्रह्मशापाद्वराप्सराः ।
मीनभावमनुप्राप्ता त्वां जनित्वा गता दिवम् ॥ ११३

तस्यां जातासि सा कन्या राज्ञो वीर्येण चैव हि ।
तस्माद्वासवि भद्रं ते याचे वंशकरं सुतम् ॥ ११४

वैशम्पायनः—
विस्मयाविष्टसर्वाङ्गी जातिस्मरणतां गता ।
साऽब्रवीत्पश्य भगवन् परे पारे स्थितानृषीन् ॥ ११५

आवयोश्च कथं ब्रह्मन् भविष्यति समागमः ।
एवं तयोक्ते भगवान् नीहारमसृजद्विभुः ॥ ११६

येन देशस्स सर्वस्तु तमोवृत इवाभवत् ॥ ११६॥

दृष्ट्वा सृष्टं तु नीहारं ततस्तं परमर्षिणा ।
विस्मिता[1]भूत्ततः कन्या व्रीडिता त्विदमब्रवीत् ॥ ११७॥

विद्धि मां भगवन्कन्यां सदा पितृवशानुगाम् ।
त्वत्संयोगाच्च दुष्येत कन्याभावो ममाऽनघ ॥ ११८॥

कन्यात्वे दूषिते चाहं कथं शक्ष्ये द्विजोत्तम ॥ ११९

गन्तुं गृहे गृहं चापि अहं नास्थातुमुत्सहे ।
एतत्संचिन्त्य भगवन् विधत्स्व यदनन्तरम् ॥ १२०

एवमुक्तवतीं तां तु प्रीतिमानृषिसत्तमः ।

---

1. क-ख-ग—साब्रवीत्कन्या व्रीडिता च मनस्विनी ।

उवाच मत्प्रियं कृत्वा पुनः कन्या भविष्यसि ॥ १२१
वृणीष्व च वरं भद्रे यं त्वमिच्छसि भामिनि ।
वृथा हि न प्रसादो मे भूतपूर्वश्शुचिस्मिते ॥ १२२
एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ।
स चास्यै वरदः प्रादाद् भगवान् काङ्क्षितं प्रभुः ॥ १२३
ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता ।
[1]जगाम सह संसर्गम् ऋषिणाऽद्भुतकर्मणा ॥ १२४
तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि ।
तस्यास्तु योजनाद्गन्धम् आजिघ्रन्ति नरा भुवि ॥ १२५
ततो योजनगन्धेति तस्या नाम परिश्रुतम् ॥ १२५॥

[2]वैशंपायनः—

एवं सत्यवती हृष्टा पूजां लब्ध्वा यथेप्सितः ।
पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा ॥ १२६॥
जज्ञे च यमुनाद्वीपे पाराशर्यस्स वीर्यवान् । १२७
जातमात्रस्स ववृधे सप्तवर्षोऽभवत्तदा ।
स्नात्वाभिवाद्य पितरं तस्थौ व्यासस्समाहितः ॥ १२८
स्वस्तीति वचनं चोक्त्वा ददौ कलशमुत्तमम् ।
गृहीत्वा कलशं पार्श्वे तस्थौ व्यासो महामुनिः ॥ १२९

1. क-ख-ग—लज्जानतमुखी भूत्वा मुनेरभ्याशमागता ॥ [अधिक पाठः]

2. क-ख-ग—ततो रम्ये वनोद्देशे दिव्यास्तरणसंवृतम् ।
वीरासनमुपास्थाय योगी ध्यानपरोऽभवत् ।

श्वेतपट्टगृहे रम्ये पर्यङ्के सोत्तरच्छदे ।
तूष्णींभूतां तदा कन्यां ज्वलन्तीं योगतेजसा ॥
दृष्ट्वा तां तु समाधाय विचार्य च पुनः पुनः ।
स चिन्तयामास मुनिः किं कृतं सुकृतं भवेत् ॥
शिष्टानां तु समाचार शिष्टाचार इति स्मृतः ।
श्रुतिस्मृतिविदो विप्राः धर्मज्ञा ज्ञानिनस्स्मृताः ॥
धर्मज्ञैर्विहितो धर्मः श्रौतस्स्मार्तो द्विधा द्विजैः ।
दानाग्निहोत्रमिज्या च श्रौतेस्यैव हि लक्षणम् ॥
स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ।
धर्मेतु धारणे धातुर्महत्त्वे चैव पठ्यते ॥
तत्रेष्टफलभाग्धर्मा आचार्यैरुपदिश्यते ।
अनिष्टफलभाक् चेति तैरधर्मो भविष्यति ॥
तस्मादिष्टफलार्थाय धर्ममेव समाचरेत् ।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यश्च धार्मिकः ॥
विवाहो ब्राह्मणानां तु गान्धर्वो नैव धार्मिकः ।
त्रिवर्णेतरजातीनां गान्धर्वासुरराक्षसाः ॥
पैशाचो न च कर्तव्यः पिशाचश्चाष्टमोऽधमः ।
समार्षां विक्रितां कन्यां मातुश्च कुलजां तथा ॥
वृद्धां प्रव्राजितां वन्ध्यां पतितां च रजस्वलाम् ।
अपस्मारकुले जातां पिङ्गलां कुष्ठिनीं व्रणीम् ॥
न चास्नातां स्त्रियं गच्छेद् इति धर्मानुशासनम् ।
पिता पितामहो भ्राता माता मातुल एव च ॥
उपाध्यायर्त्विजश्चैव कन्यादाने प्रभूत्तमाः ।
एतै र्दत्तां निषेवेत नादत्तामाददीत च ॥
इत्येव ऋषयः प्राहुर् विवाहे धर्मवित्तमाः ।
अस्या नास्ति पिता भ्राता माता मातुल एव च ॥
गान्धर्वेण विवाहेन न स्पृशामि यदृच्छया ।
क्रियाहीनं तु गान्धर्वं न कर्तव्यमनापदि ॥

यदस्यां जायते पुत्रो वेदव्यासो भवेदृषिः ।
क्रियाहीन कथं विप्रो भवेदृषिरुदारधीः ॥

वैशम्पायन·—

एवं चिन्तयतो भावैर् महर्षेर्भावितात्मनः ।
ज्ञात्वा चैवाभ्यवर्तन्त पितरो बर्हिषस्तदा ॥
तस्मिन् क्षणे ब्रह्मपुत्रो वसिष्ठोऽपि समेयिवान् ।
पूर्वं स्वागतमित्युक्त्वा वसिष्ठः प्रत्यभाषत ॥

पितृगणाः—

अस्माकं मानसीं कन्याम् अस्मच्छापेन वासवीम् ।
यदि चेच्छसि पुत्रार्थं कन्यां गृह्णीष्व मा चिरम् ॥
पितृणां वचनं श्रुत्वा वसिष्ठ प्रत्यभाषत ।
महर्षीणां वचस्सत्यं पुराणेऽपि मया श्रुतम् ॥
पराशरो ब्रह्मचारी प्रजार्थी मम वंशधृत् ।
एवं संभाषमाणे तु वसिष्ठे पितृभिस्सह ॥
ऋषयोऽभ्यागमंस्तत्र नैमिशारण्यवासिनः ।
विवाहं द्रष्टुमिच्छन्त शक्तिपुत्रस्य धीमतः ॥
अरुन्धती महाभागा अदृश्यन्त्या सहैव सा ।
विश्वकर्मकृतां दिव्यां पर्णशालां प्रविश्य सा ॥
वैवाहिकांस्तु संभारान् संकल्प्य च यथाक्रमम् ।
अरुन्धती सत्यवतीं वधूं संगृह्य पाणिना ॥
भद्रासने प्रतिष्ठाप्य इन्द्राणीं समकारयत् ।
आपूर्यमाणपक्षे तु वैशाख्यां सोमदैवते ॥
शुभग्रहे त्रयोदश्यां मुहूर्ते मैत्र आगते ।
विवाहकाल इत्युक्त्वा वसिष्ठो मुनिभिस्सह ॥
यमुनाद्वीपमासाद्य शिष्यैश्च मुनिपत्निभिः ।
स्थण्डिलं चतुरश्रंच गोमयेनोपलिप्य च ॥
अक्षतैः फलपुष्पैश्च स्वस्तिकै राम्रपल्लवैः ।
जलपूर्णघटैश्चैव सर्वतः परिशोभितम् ॥
तस्य मध्ये प्रतिष्ठाप्य वृत्यां मुनिवरं तदा ।

सिद्धार्थयवकल्कैश्च स्नातं सर्वौषधैरपि ॥
कृत्वार्जुनानि वस्त्राणि परिधाप्य महामुनिम् ।
वाचयित्वा तु पुण्याहम् अक्षतैस्तु समर्चितः ॥
गन्धानुलिप्तस्सूग्वीच सव्रतोऽथो वधूगृहे ।
अपदातिस्ततो गत्वा वधूज्ञातिभिरर्चितः ॥
स्नातामहतसंवीतां गन्धलिप्तां स्रगुज्ज्वलाम् ।
वधूं मङ्गलसंयुक्ताम् इषुहस्तां समीक्ष्य च ॥
उवाच वचनं काले कालज्ञस्सर्वधर्मवित् ।

वसिष्ठः—

प्रतिग्रहो दातृवशः श्रुतमेवं मया पुरा ॥
यथा वक्ष्यन्ति पितरस् तत्करिष्यामहे वयम् ।

वैशम्पायनः—

तद्धर्मिष्ठं यशस्यं च वचनं सत्यवादिनः ॥
श्रुत्वा तु पितरस्सर्वे निस्सङ्गा निष्परिग्रहाः ।
वसुं परमधर्मिष्ठम् आनीयेदं वचोऽब्रुवन् ॥
मत्स्ययोनौ समुत्पन्ना तव पुत्री विशेषतः ।
पराशराय मुनये दातुमर्हसि धर्मतः ॥

वसुः—

सत्यं मम सुता सा हि दाशराजेन पालिता ।
अहं प्रभुः प्रदाने तु प्रजापालः प्रजार्थिनाम् ॥

पितरः—

निराशिषो वयं सर्वे निस्सङ्गा निष्परिग्रहाः ।
कन्यादानेन संबन्धो दक्षिणाबन्ध उच्यते ॥
कर्मभूमिस्तु मानुष्यं भोगभूमिस्त्रिविष्टपम् ।
इह पुण्यकृतो यान्ति स्वर्गलोकं न संशयः ॥
इह लोके निष्कृतिनो नरकं यान्ति निर्घृणाः ।
दक्षिणाबन्ध इत्युक्ते उभे सुकृतदुष्कृते ॥
दक्षिणाबन्धसंयुक्ता योगिनः प्रपतन्ति ते ।

ततो दाशभयात्पत्नी स्नात्वा कन्या बभूव सा ।
अभिवाद्य मुनेः पादौ पुत्रं जग्राह पाणिना ॥ १३०
स्पृष्टमात्रे स निर्भर्त्स्य मातरं वाक्यमब्रवीत् ।
मम पित्रा तु संस्पर्शान्मातस्त्वमभवश्शुचिः ॥ १३१
अद्य दाशसुता कन्या न स्पृशेर्मामनिन्दिते ॥ १३१॥

वैशंपायनः—

व्यासस्य वचनं श्रुत्वा बाष्पपूर्णमुखी तदा ।

पूर्वतोऽनुवृत्तम्—

तस्मान्नो मानसीं कन्यां योगाद्भ्रष्टां विशां पते ॥
सुतात्वं तव संप्राप्तां सतीं भिक्षां ददस्व वै ।
इत्युक्त्वा पितरस्सर्वे क्षणादन्तर्हितास्तदा ॥

वैशम्पायनः—

याज्ञवल्क्यं समाहूय विवाहाचार्यमित्युत ।
वसुं चापि समाहूय वसिष्ठो मुनिभिस्सह ॥
विवाहं कारयामास श्रुतिदृष्टेन कर्मणा ।

वसुः—

पराशर महाप्राज्ञ तव दास्याम्यहं सुताम् ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥

वैशम्पायनः—

वसोस्तु वचनं श्रुत्वा याज्ञवल्क्यमते स्थितः ।
कृतकौतुकमङ्गल्यः पाणिना पाणिमस्पृशत् ॥
प्रभूताज्येन हविषा हुत्वा मन्त्रै र्हुताशनम् ।
त्रिरग्निं तु परिक्रम्य समभ्यर्च्य हुताशनम् ॥
महर्षीन् याज्ञवल्क्यादीन् दक्षिणाभिः प्रतप्य च ।
लब्धानुज्ञोऽभिवाद्याशु प्रदक्षिणमथाकरोत् ॥
पराशरे कृतोद्वाहे देवास्सर्षिगणास्तदा ।
हृष्टा जग्मुः क्षणादेव वेदव्यासो भवस्विति ॥

मनुष्यभावात्सा योषित् पतिता मुनिपादयोः ॥ १३२॥
ततः प्रसन्नो भगवान् पुत्रं प्रोवाच धर्मवित् ॥ १३३

पराशरः—

मा त्वमेवंविधं कार्षीर् नैतद्धर्म्यं मतं हि नः ।
दूष्यौ न मातापितरौ तथा पूर्वोपकारिणौ ॥ १३४

धारणाद्दुःखसहनात् तयोर्माता गरीयसी ॥ १३४॥
बीजक्षेत्रसमा[1]योगाद् यथा सस्यं प्रजायते ।

जायते च सुतस्तद्वत् पुरुषस्त्रीसमागमे ॥ १३५॥
मृगीणां पक्षिणां चैव अप्सराणां तथैव च ।

शूद्रयोन्यां च जायन्ते मुनयो वेदपारगाः ॥ १३६॥
ऋष्यशृङ्गो मृगीपुत्रः कण्वो बर्हिसुतस्तथा ।

अगस्त्यश्च वसिष्ठश्च ऊर्वश्यां जनितावुभौ ॥ १३७॥
सोमश्रवास्तु सप्र्यां तु अश्विनावश्वसंभवौ ।

स्कन्दस्स्कन्नेन शुक्रेन जातश्शरवणे पुरा ॥ १३८॥
एवमेव च देवानाम् ऋषीणां चैव संभवः ।

लोकवादप्रवृत्तिर्हि न मीमांस्या बुधैस्सदा ॥ १३९॥
वेदव्यास इति प्रोक्तः पुराणे च स्वयंभुवा ।
धर्मनेता महर्षीणां मनुष्याणां त्वमेव च ॥ १४०॥

---

1. क-ख-ग—योगे सस्यं जायति लौकिकम्

तस्मात्पुत्र न दूष्येत वासवी योगचारिणी ।
मत्प्रीत्यर्थं महाप्राज्ञ सस्नेहं वक्तुमर्हसि ॥ १४१॥

प्रजाहितार्थं संभूतो विष्णोर्भागो महानृषिः ।
तस्मात्त्वमातरं स्नेहात् प्रब्रवीहि तपोधन ॥ १४२॥

वैशंपायनः—

गुरोर्वचनमाज्ञाय व्यासः प्रीतोऽभवत्तदा ।
चिन्तयित्वा लोकवृत्तं मातुरङ्कमथाविशत् ॥ १४३॥

पुत्रस्पर्शात्तु लोकेषु नान्यत्सुखमतीव हि ।
व्यासं कमलपत्राक्षी परिष्वज्याश्रु वर्तयत् ॥ १४४॥

स्तन्यासारैः क्लिद्यमाना पुत्रमाघ्राय मूर्धनि ॥ १४५

वासवी—

पुत्रलाभात्परं लोके नास्तीह प्रसवार्थिनाम् ।
दुर्लभं चेति मन्येऽहं मया प्राप्तं महत्तपः ॥ १४६

महता तपसा तात महायोगबलेन च ।
मया त्वं हि महाप्राज्ञ लब्धोऽमृतमिवामरैः ॥ १४७

तस्मात्त्वं मामृषेः पुत्र त्यक्तुं नार्हसि सांप्रतम् ॥ १४७॥

वैशंपायनः—

एवमुक्तस्ततस्नेहाद् व्यासो मातरमब्रवीत् ॥ १४८

त्वया स्पृष्टः परिष्वक्तो मूर्ध्नि चाघ्रायितो मुहुः ।

एतावन्मात्रया प्रीता भविष्येथा नृपात्मजे ॥ १४९
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् ॥ १४९॥
स मातरमनुज्ञाप्य तपस्येव मनो दधे ॥ १५०
ततः कन्यामनुज्ञाय पुनः कन्या भवत्विति ।
पराशरोऽपि भगवान् पुत्रेण सहितो ययौ ॥ १५१
गत्वाश्रमपदं पुण्यम् अदृश्यन्त्याः पराशरः ।
जातकर्मादिसंस्कारं कारयामास धर्मतः ॥ १५२
कृतोपनयनो व्यासो याज्ञवल्क्येन भारत ।
वेदानधिजगौ साङ्गान् ओङ्कारेण त्रिमात्रया ॥ १५३
गुरवे दक्षिणां दत्त्वा तपः कर्तुं प्रचक्रमे ।
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् ॥ १५४
द्वीपे न्यस्तस्स यद्बालस् तस्माद्द्वैपायनोऽभवत् ॥ १५४॥
पादापसारिणं धर्मं विद्वान् स तु युगे युगे ।
आयुश्शक्तिं च मर्त्यानां युगाद्युगमवेक्ष्य च ॥ १५५॥
ब्रह्मर्षिब्राह्मणानां च तथाऽनुग्रहकाम्यया ।
विव्यास वेदान् यस्माच्च तस्माद्व्यास इति स्मृतः ॥ १५६॥
ततस्स महर्षिर्विद्वान् शिष्यानाहूय धर्मवित् ।
सुमन्तुं जैमिनिं पैलं शुकं चैव स्वमात्मजम् ॥ १५७॥
प्रभुर्वरिष्ठो वरदो वैशंपायनमेव च ।

वेदानध्यापयामास महाभारतपञ्चमान् ॥ १५८॥
[1]संहितास्तैः पृथक्त्वेन भारतस्य प्रकीर्तिताः ॥ १५९
ततस्सत्यवती हृष्टा जगाम स्वं निवेशनम् ।
तस्यास्त्वायोजनाद्गन्धम् आजिघ्रन्ति नरा भुवि ॥ १६०
दाशराजस्तु तद्गन्धम् आजिघ्रन्प्रीतिमावहत् । १६०॥

दाशः—

त्वामाहुर्मत्स्यगन्धेति कथं बाले सुगन्धता ।
अपास्य मत्स्यगन्धत्वं केन दत्ता सुगन्धता ॥ १६१॥

सत्यवती—

शक्तेः पुत्रो महाप्राज्ञः पराशर इति स्मृतः ॥ १६२
नावं वाहयमानाया मम दृष्ट्वा सुगर्हितम् ।
अपास्य मत्स्यगन्धत्वं योजनाद्गन्धतां ददौ ॥ १६३
ऋषेः प्रसादं दृष्ट्वा तु जनाः प्रीतिमुपागमन् ।
एवं लब्धो मया गन्धो न रोषं कर्तुमर्हसि ॥ १६४

वैशंपायनः—

दाशराजस्तु तद्वाक्यं प्रशशंस ननन्द च ।
एतत्पवित्रं पुण्यं च व्याससंभवमुत्तमम् ॥ १६५
इतिहासमिमं श्रुत्वा प्रजावन्तो भवन्ति वै॥ १६५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥
॥ ६ ॥ आदिवंशावतारणपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये १६५॥ श्लोकाः]

क-ख-ग—समाहितैः पृथक्त्वेन भारतं च प्रकीर्तितम् ।
वैशम्पायनः—

॥ चतुःपञ्चाशत्तमोऽध्यायः ॥

भीष्मादीनां पाण्डवादीनां च सङ्ग्रहेण जन्मकथनम् ॥ १ ॥

वैशंपायनः—

तथा भीष्मश्शान्तनवो गङ्गायाममितद्युतिः ।
वसुवीर्यात् समभवन्महावीर्यो महायशाः ॥ १

शूले प्रोतः पुराणर्षिर् अचोरश्चोरशङ्क्या ।
आणिमाण्डव्य इति वै विख्यातस्सुमहायशाः ॥ २

स धर्ममाहूय पुरा महर्षिरिदमुक्तवान् ।
इषीकया मया बाल्याद् एका विद्धा शकुन्तिका ॥ ३

किल्बिषं तद्भवेद्धर्म नान्यत्पापमहं स्मरे ।
तन्मे सहस्व समितं कस्मान्नेहाजयत्तपः ॥ ४

गरीयान्ब्राह्मणवधस् सर्वभूतवधाद्यतः ।
तस्मात्त्वं किल्बिषादस्माच् छूद्रयोनौ भविष्यसि ॥ ५

तेन [1]शापेन धर्मोऽपि शूद्रयोनावजायत ।
विद्वान् विदुररूपेण धार्मिकः किल्बिषात्ततः ॥ ६

संजयो मुनिकल्पस्तु जज्ञे सूतो गवल्गणात् ।
सूर्याच्च कुन्त्यां कन्यायां जज्ञे कर्णो महारथः ॥ ७

1. क-ख-ग—पापेन

सहजं कवचं बिभ्रत् कुण्डलद्योतिताननः ॥ ७॥
अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः ।
वसुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः ॥ ८॥
अनादिनिधनो देवस् साक्षाल्लोकेश्वरः प्रभुः ॥ ९
आदेरादिस्समस्तानां स कर्ता नकृतः प्रभुः ।
अव्यक्तमक्षरं ब्रह्म प्रधानं निर्गुणात्मकम् ॥ १०
आत्मानमव्ययं चैव प्रकृतेः प्रभवं परम् ।
पुरुषं विश्वकर्माणं सत्ययोगं ध्रुवाक्षरम् ॥ ११
[1]अनन्तमचलं मेरुं हंसं नारायणं प्रभुम् ।
धातारमजरं नित्यं यमाहुः परमव्ययम् ॥ १२
पुरुषस्स विभुः कर्ता सर्वभूतापितामहः ।
धर्मसंस्थापनार्थाय संजज्ञेऽन्धकवृष्णिषु ॥ १३
अस्त्रज्ञौ तु महावीर्यौ सर्वशास्त्रविशारदौ ।
सात्यकिः कृतवर्मा च नारायणमनुव्रतौ ॥ १४
सत्यकाद्वृदिकाचैव जज्ञातेऽस्त्रविशारदौ ॥ १४॥
भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्धत ।
महर्षेरुग्रतपसस् तस्माद्द्रोणो व्यजायत ॥ १५॥
गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ॥ १६

1. क-ख-ग—अनन्ततल्पं तं मेरुं

अश्वत्थाम्नश्च जननी कृपश्चैव महारथः ॥ १६॥

अश्वत्थामा ततो जज्ञे द्रोणादस्त्रभृतां वरः ।

धृष्टद्युम्नविनाशाय सृष्टो धात्रा महात्मना ॥ १७॥
तथैव धृष्टद्युम्नोऽपि साक्षादग्निसमद्युतिः ।

वैताने कर्मणि ततः पावकात्समजायत ॥ १८॥
वीरो द्रोणविनाशाय धनुषा सह वीर्यवान् ॥ १९

तथैव वेद्यां कृष्णापि जज्ञे तेजस्विनी शुभा ।
विभ्राजमाना वपुषा बिभ्रती रूपमुत्तमम् ॥ २०

प्रह्लादशिष्यो नग्नजित् सुबलश्चाभवत्तदा ।
तस्य प्रजा धर्मधात्री जज्ञे देवप्रकोपनात् ॥ २१

गान्धारराजात्सुबलाच् छकुनिस्सौबलस्तथा ।
दुर्योधनस्य माता च जज्ञातेऽर्थविदावुभौ ॥ २२

कृष्णद्वैपायनाज्जज्ञे धृतराष्ट्रो जनेश्वरः ।
क्षेत्रे विचित्रवीर्यस्य पाण्डुश्चैव महाबलः ॥ २३

पाण्डोस्तु जज्ञिरे पञ्च पुत्रा देवसमाः पृथक् ।
द्वयोस्स्त्रियोर्गुणज्येष्ठस् तेषामासीद्युधिष्ठिरः ॥ २४

धर्माद्युधिष्ठिरो जज्ञे मारुतात्तु वृकोदरः ।
इन्द्राद्धनंजयो जज्ञे सर्वशस्त्रविशारदः ॥ २५

जज्ञाते रूपसंपन्नावश्विभ्यां तु यमावपि ।
नकुलस्सहदेवश्च गुरुशुश्रूषणे रतौ ॥ २६

तथा पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः ।
दुर्योधनप्रभृतयो युयुत्सुचरमास्तथा ॥ २७

अभिमन्युस्सुभद्रायाम् अर्जुनादभ्यजायत ।
स्वस्रीयो वासुदेवस्य पौत्रः पाण्डोर्महात्मनः ॥ २८

पाण्डवेभ्यो हि पञ्चभ्यः कृष्णायां पञ्च जज्ञिरे ।
कुमारा रूपसंपन्नास् सर्वशस्त्रविशारदाः ॥ २९

प्रतिविन्ध्यो युधिष्ठिरात् सुतसोमो वृकोदरात् ।
अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ ३०

तथैव सहदेवाच्च श्रुतसेनः प्रतापवान् ।
हिडिम्बायां तु भीमस्य वने जज्ञे घटोत्कचः ॥ ३१

शिखण्डी द्रुपदाज्जज्ञे कन्या पुत्रत्वमागता ।
यां यक्षः पुरुषं चक्रे स्थाणुप्रियचिकीर्षया ॥ ३२

कुरूणां विग्रहे तस्मिन् समाजग्मुर्बहून्यथ ।
राज्ञां शतसहस्राणि योत्स्यमानानि संयुगे ॥ ३३

तेषामपरिमेयानि नामधेयानि सर्वशः ।

न शक्यं परिसंख्यातुं वर्षाणामयुतैरपि ॥ ३४

एते तु कीर्तिता मुख्या यैराख्यानमिदं ततम् । ३४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

॥ ६ ॥ आदिवंशावतारणपर्वणि 1षष्ठोऽध्यायः ॥ ६ ॥

[अस्मिन्नध्याये ३४॥ श्लोकाः ।]

॥ पञ्चपञ्चाशत्तमोऽध्यायः ॥

भूभारहरणायेन्द्रेणावतारार्थं नारायणप्रार्थना ॥ १ ॥

जनमेजयः—

य एते कीर्तिता ब्रह्मन् ये चान्ये नानुकीर्तिताः ।
सम्यक् तान् ज्ञातुमिच्छामि राज्ञश्चान्यान् सुवर्चसः ॥ १

यदर्थमिह संभूता देवकल्पा महारथाः ।
भुवि तान् मे महाभाग सम्यगाख्यातुमर्हसि ॥ २

वैशम्पायनः—

रहस्यं यदिदं राजन् देवानामृषितश्श्रुतम् ।
तत्तु ते कथयिष्यामि नमस्कृत्वा स्वयंभुवे ॥ ३

त्रिस्सप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां पुरा ।
जामदग्न्यस्तपस्तेपे महेन्द्रे पर्वतोत्तमे ॥ ४

---

1. क-ख-ग—कोशेषु अत्रैव पंचमाध्यायसमाप्तिः—

तदा निःक्षत्रिये लोके भार्गवेण कृते सति ।
ब्राह्मणान्क्षत्रिया राजन् गर्भार्थिन्योऽभिचक्रमुः ॥ ५

ताभिस्सह समापेतुर् ब्राह्मणास्संशितव्रताः ।
ऋतावृतौ नरव्याघ्र न कामान्नानृतौ तथा ॥ ६

तेभ्यस्तु लेभिरे गर्भान् क्षत्रियास्तास्सहस्रशः ।
ततस्सुषुविरे राजन् क्षत्रियान् वीरसत्तमान् ॥ ७

कुमारांश्च कुमारीश्च पुनः क्षत्रियवृद्धये ॥ ७॥
एवं तद्ब्राह्मणैः क्षत्रं क्षत्रियासु तपस्विभिः ।
जातमृध्यत धर्मेण सुदीर्घेणायुषान्वितम् ॥ ८॥

चत्वारोऽपि तदा वर्णा बभूवुर्ब्राह्मणोत्तमाः ॥ ९

अभ्यगच्छंस्ततो नारीं नाकामान्नानृतौ तथा ॥ ९॥
तथैवान्यानि भूतानि तिर्यग्योनिगतान्यपि ।
ऋतौ हि दारान् गच्छन्ति सर्वाणि भरतर्षभ ॥ १०॥

ततोऽवर्धन्त धर्मेण सहस्रशतजीविनः ॥ ११

ताः प्रजाः पृथिवीपाल धर्मव्रतपरायणाः ।
आधिभिर्व्याधिभिश्चैव विमुक्ता[1]स्सुखमाप्नुयुः ॥ १२

अथेमां [2]सागरापाङ्गां नरेन्द्रेन्द्र धरां किल ।
अध्यतिष्ठत् पुनः क्षत्रं सशैलवनकाननाम् ॥ १३

1. क-ख-ग—शतशो नराः 2. क-ख-ग—सागरोपान्तां

प्रशासति पुनः क्षत्रे धर्मेणेमां वसुन्धराम् ।
ब्राह्मणाद्यास्ततो वर्णा लेभिरे मुदमुत्तमाम् ॥ १४

कामक्रोधोद्भवान्दोषान् निरस्य च नराधिपाः ।
धर्मेण दण्डं दण्डयेषु दण्डयन्तोऽन्वपालयन् ॥ १५

तथा धर्मपरे क्षत्रे सहस्राक्षश्शतक्रतुः ।
स्वादु देशे च काले च ववर्षाप्याययन्प्रजाः ॥ १६

न बाल एव म्रियते तदा कश्चिन्नराधिप ।
न च स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनः ॥ १७

एवमायुष्मतीभिस्तु प्रजाभिर्भरतर्षभ ।
इयं सागरपर्यन्ता समापूर्यत मेदिनी ॥ १८

ईजिरे च महायज्ञैः क्षत्रिया भूरिदक्षिणैः ।
साङ्गोपनिषदान्वेदान् विप्राश्चाधीयिरे तदा ॥ १९

न च विक्रीणते ब्रह्म ब्राह्मणाश्च तदा नृप ।
न च शूद्रसमभ्याशे वेदानुच्चारयन्त्युत ॥ २०

कारयन्तः कृषिं गोभिस् तथा वैश्याः क्षिताविह ।
परामयुक्षन्त धुरि कृशाङ्गां चाप्यजीवयन् ॥ २१

फेनपांश्च तथा वत्सान् न दुहन्ति स्म मानवाः ।
न कूटमानैर्वणिजः पण्यं विक्रीणते तदा ॥ २२

कर्माणि च नरव्याघ्र धर्मोपेतानि मानवाः ।
धर्ममेवानुपश्यन्तश् चक्रुर्धर्मपरायणाः ॥ २३
स्वकर्मनिरताश्चासन् सर्वे वर्णा नराधिप ।
धर्ममेवानुवर्तन्ते न पश्यन्ति स्म किल्बिषम् ॥ २४
बभूवुः कर्मसु स्वेषु सम्यक् सर्वाः प्रजास्थिताः ।
एवं तदा नरव्याघ्र धर्मो न ह्रसते क्वचित् ॥ २५
काले [1]गावः प्रसूयन्ते नार्यश्च भरतर्षभ ।
फलन्त्यृतुषु वृक्षाश्च पुष्पाणि च फलानि च ॥ २६
एवं कृतयुगे सम्यग् वर्तमाने तदा नृप ।
आपूर्यत मही कृत्स्ना प्राणिभिर्बहुभिर्भृशम् ॥ २७
ततः[2]समुदिते लोके मानुषैर्भरतर्षभ ।
असुरा जज्ञिरे क्षेत्रे राज्ञां मनुजपुङ्गव ॥ २८
आदित्यैर्हि तदा दैत्या बहुशो निर्जिता युधि ।
ऐश्वर्याद्भ्रंशिताश्चैव संबभूवुः क्षिताविह ॥ २९
इह देवत्वमिच्छन्तो मानुषेषु [3]तपस्विनः ।
जज्ञिरे भुवि भूतेषु तेषु तेष्वसुरा विभो ॥ ३०
गोष्वश्वेषु च राजेन्द्र खरोष्ट्र[4]महिषेषु च ।
क्रव्यादेषु च भूतेषु गजेषु च मृगेषु च ॥ ३१

1. क-ख-ग—नैव
2. क-ख-ग —प्रमुदिते लोके मानुषे
3. क-ख-ग—मन
4. क-ख-ग—मानुषेषु च

जातैरिह महीपाल जायमानैश्च तैर्मही ।
न शशाकात्मनात्मानम् इयं धारयितुं तदा ॥ ३२

अथ जाता महीपालाः केचिन्मदबलान्विताः ।
दितेः पुत्रा दनोश्चैव देवलोकादिह च्युताः ॥ ३३

वीर्यवन्तोऽवलिप्तास्ते नानारूपधरा महीम् ।
इमां सागरपर्यन्तां परीयुररिमर्दनाः ॥ ३४

ब्राह्मणान्क्षत्रियान्वैश्यांस् तथा [1]शूद्रानपीडयन् ।
अन्यानि चैव भूतानि पीडयामासुरोजसा ॥ ३५

त्रासयन्तो विनिघ्नन्तस् तांस्तान् भूतगणांश्च ते ।
विचेरुस्सर्वतो राजन् महीं शतसहस्रशः ॥ ३६

आश्रमस्थान्महर्षींश्च धर्षयन्तस्ततस्ततः ।
अब्रह्मण्या वीर्यमदा मत्ता मद[2]बलेन च ॥ ३७

एवं वीर्य[3]बलोत्सिक्तैर् भूरियं तैर्महासुरैः ।
पीड्यमाना महीपाल ब्रह्माणमुपचक्रमे ॥ ३८

[4]न हीमां सवनां राजन् नानाकाननगां महीम् ।
तदा धारयितुं शे[5]कुराक्रान्तां दानवैर्बलात् ॥ ३९

ततो मही महीपाल भारार्ता भयपीडिता ।

क-ख-ग— 1. शूद्रांश्चैव प्रपीडयन् 2. बलान्विताः 3. मदोन्मत्तैः
4. न हीमान्सवना राजन् नानारूपान्मही तदा ।

5. ख-ग—शोके आक्रान्ता

जगाम शरणं देवं सर्व[1]लोकपितामहम्॥ ४०

सा सं[2]युतं महाभागैर् देवद्विजमहर्षिभिः ।
ददर्श देवं ब्रह्माणं लोककर्तारमव्ययम् ॥ ४१

गन्धर्वैरप्सरोभिश्च वन्दिकर्मसु निष्ठितैः ।
वन्द्यमानं मुदोपेतैर् ववन्दे चैनमेत्य सा ॥ ४२

अथ विज्ञापयामास भूमिस्तं शरणैषिणी ।
सन्निधौ लोकपालानां सर्वेषामेव भारत ॥ ४३

[3]तत्प्रयाणात्पुरा तस्या भूमेः कृत्यं स्वयंभुवः ।
पूर्वमेवाभवद्राजन् विदितं परमेष्ठिना ॥ ४४

स्रष्टा हि जगतः कस्मान्न संबुध्येत भारत ।
सुरासुराणां [4]सर्वेषां मानुषाणां मनोगतम् ॥ ४५

तामुवाच महा[5]तेजा भूमिं भूमिपतिर्विभुः ।
प्रभवस्सर्वभूतानाम् ईशश्शंभुः प्रजापतिः ॥ ४६

यदर्थमसि संप्राप्ता मत्सकाशं वसुन्धरे ।
तदर्थं सन्नियोक्ष्यामि सर्वानेव दिवौकसः ॥ ४७

उत्तिष्ठ गच्छ वसुधे स्वस्थानमिति साऽगमत् ।
इत्युक्त्वा स महीं देवो ब्रह्मा राजन्विसृज्य च ॥ ४८

क-ख-ग— 1. भूत 2. वृ 3. तत्प्रसादादृते 4. लोकानामशेषाणां 5. राज

आदिदेश तदा सर्वान् विबुधान्भूतकृत्स्वयम् ॥ ४८॥

अस्या भूमेर्निरसितुं भारं भागैः पृथक्पृथक् ।
अस्यामेव प्रसूयध्वं तिरोधायेति चाब्रवीत् ॥ ४९॥

तथैव च समानीय गन्धर्वाप्सरसां गणान् ।
उवाच भगवान्सर्वान् इदं वचनमुत्तरम् ॥ ५०॥

स्वैस्स्वैरंशैः प्रसूयध्वं यथेष्टं मानुषेष्विति ॥ ५१

अथ शक्रादयस्सर्वे श्रुत्वा सुरगुरोर्वचः ।
तथ्यमथ्यं च पथ्यं च तस्य ते जगृहुस्तदा ॥ ५२

अथ ते सर्वशोंशैस्स्वैर् गन्तुं भूमिं कृतक्षणाः ।
नारायणममित्रघ्नं वैकुण्ठमुपचक्रमुः ॥ ५३

[1]यस्स चक्रगदापाणिः पीतवासास्सितप्रभः ।
पद्मनाभस्सुरारिघ्नः पृथुचार्वञ्चितेक्षणः ॥ ५४

तं भुवश्शोधनायेन्द्र उवाच पुरुषोत्तमम् ।
अंशेनावतरस्वेति तथेत्याह च तं हरिः ॥ ५५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥
॥ ६ ॥ आदिवंशावतारणपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[अस्मिन्नध्याये ५५ श्लोकाः ।]
॥ आदिवंशावतारणपर्व समाप्तम् ॥

---

1. क-ख-ग—शङ्ख

॥ षट्पञ्चाशत्तमोऽध्यायः ॥

(अथ संभवपर्व)

अदित्यादिदक्षकन्यावंशकथनम् ॥ १ ॥

वैशंपायनः--

अथ नारायणेनेन्द्रश् चकार सह संविदम् ।
अवतर्तुं महीं स्वर्गाद् भागशस्सहितस्सुरैः ॥ १

आदिश्य च स्वयं शक्रः सर्वानेव दिवौकसः ।
निर्जगाम पुनस्तस्मात् साक्षान्नारायणस्य ह ॥ २

ते सुरारिविनाशाय सर्वलोकहिताय च ।
अवतेरुः क्रमेणेयं महीं स्वर्गादिवौकसः ॥ ३

ततो ब्रह्मर्षिवंशेषु राजर्षीणां कुलेषु च ।
जज्ञिरे राजशार्दूल यथाकामं दिवौकसः ॥ ४

[1]दानवान् राक्षसांश्चैव गन्धर्वान् पन्नगांस्तथा ।
पुरुषादान्यनेकानि जघ्नुस्सत्वान्यनेकशः ॥ ५

दानवानां च ये मुख्यास् तथा भुजगरक्षसाम् ।
ये तान् बलस्थान् बाल्येऽपि जघ्नुर्भरतसत्तम ॥ ६

1. क-ख-ग—दानवा राक्षसाश्चैव गन्धर्वाः पन्नगास्तथा ।

जनमेजयः—

देवदानवसङ्घानां गन्धर्वाप्सरसां तथा ।
[1]मानवानां च सर्वेषां तथा वै यक्षरक्षसाम् ॥ ७

श्रोतुमिच्छामि तत्त्वेन संभवं कृत्स्नमादितः ।
प्राणिनां चैव सर्वेषां सर्वशस्सर्वविद्ध्यसि ॥ ८

वैशंपायनः—

हन्त ते कथयिष्यामि नमस्कृत्य स्वयंभुवे ।
सुरादीनामहं सम्यक्[2]संभवं कृत्स्नमादितः ॥ ९

ब्रह्मणो मानसाः पुत्रा विदिताष्षण्महर्षयः ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ १०

मरीचेः काश्यपः पुत्रः काश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥ ११

अदितिर्दितिर्दनुः काला अनायुस्सिंहिका मुनिः ।
क्रोधा ध्रुवाह्यरिष्टा च विनता कपिला तथा ॥ १२

कद्रूश्च पुरुषव्याघ्र दक्षकन्याश्च भारत ।
एतासां वीर्यसंपन्नं पुत्रपौत्रमनन्तकम् ॥ १३

अदित्यां द्वादशाऽऽदित्यास् संभूता भुवनेश्वराः ।
ये राजन्नामतस्तांस्ते कीर्तयिष्यामि भारत ॥ १४

---

1. क-ख-ग—मानुषेषु च सर्वेषां तथाहं
2. क-ख-ग—लोकानां प्रभवाप्ययौ ।

धाता मित्रोऽर्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥ १५
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ॥ १५॥
जघन्यजश्च सर्वेषाम् आदित्यानां गुणाधिकः ॥ १६
एक एव दितेः पुत्रो हिरण्यकशिपुस्स्मृतः ।
नाम्ना ख्यातास्तु तस्यैते पञ्च पुत्रा महात्मनः ॥ १७
प्रह्लादः पूर्वजस्तेषां संह्लादस्तदनन्तरम् ।
अनुह्लादस्तृतीयोऽभूत् तस्माच्च शिबिबाष्कलौ ॥ १८
प्रह्लादस्य त्रयः पुत्राः ख्यातास्सर्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति विश्रुताः ॥ १९
विरोचनस्य पुत्रोऽभूद् बलिरेकः प्रतापवान् ।
बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः ॥ २०
चत्वारिंशद्दनोः पुत्राः ख्यातास्सर्वत्र भारत ।
तेषां प्रथमजो राजन् विप्रचित्तिर्महायशाः ॥ २१
शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुताः ।
असिलोमा च केशी च दुर्जयश्चैव दानवः ॥ २२
अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्यवान् ।
तथा गगनमूर्धा च वेगवान् केतुमांश्च यः ॥ २३
स्वर्भानुरश्वोऽश्वपतिर् वृषपर्वाऽङ्गजस्तथा ॥ २३॥

अश्वग्रीवश्च सूक्ष्मश्च गुल्गुण्डश्च महाबलः ।
खस्रवश्चैकचित्तश्च विरूपाक्षो महासुरः ॥ २४॥
निचन्द्रश्च निकुम्भश्च कुपथः कापथस्तथा ॥ २५
शारदश्शरभश्चैव सूर्याचन्द्रमसौ तथा ।
इत्याख्याता दनोर्वंशे दानवाः परिकीर्तिताः ॥ २६
अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ तथा ॥ २६॥
इमे च वंशाः प्रथितास् सत्यवन्तो महाबलाः ।
दनोः पुत्रान्वये जाता दश दानवपुङ्गवाः ॥ २७॥
एकाक्षो मृतपो वीरः प्रलम्बनरकावपि ।
वातापिश्शत्रुसहनस् सदश्चैव महासुरः ॥ २८॥
गविष्ठश्च दनायुश्च दीर्घजिह्वश्च दानवः ।
असङ्ख्येयास्स्मृतास्तेषां पुत्रपौत्राश्च भारत ॥ २९॥
सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कसूदनम् ।
सुचन्द्रं चन्द्रहर्तारं तथा चन्द्रविमर्दनम् ॥ ३०॥
क्रूरस्वभावं क्रूरायाः पुत्रपौत्रमनन्तकम् ।
गणः क्रोधवशो नाम क्रूरकर्माऽरिमर्दनः ॥ ३१॥
अनायुषः पुनः पुत्राश् चत्वारोऽसुरसंमताः ।
विक्षरश्च प्रवीरश्च पुत्रश्चैव महासुरः ॥ ३२॥
कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः ।
भुवि ख्याता महावीर्या दानवेषु परन्तप ॥ ३३॥

विनाशनश्च क्रोधश्च क्रोधहन्ता च वीर्यवान् ।
विवर्धनश्च क्रोधश्च कालकेया महासुराः ॥ ३४॥

असुराणामुपाध्यायश् शुक्रो भृगुसुतोऽभवत् ।
ख्याताश्चोशनसः पुत्राश् चत्वारोऽसुरयाजकाः ॥ ३५॥

त्वष्टा परस्तथात्रिश्च द्वावन्यौ भद्रकर्मिणौ ।
तेजसा सूर्यसंकाशा ब्रह्मलोकप्रभावनाः ॥ ३६॥

इत्येष वंशप्रभवः कथितस्ते तरस्विनाम् ।
असुराणां सुराणां च पुराणे संश्रुतो मया ॥ ३७॥

एतेषां यदपत्यं तु न शक्यं तदशेषतः ।
प्रसंख्यातुं महीपाल गणभूतमनन्तकम् ॥ ३८॥

तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ ।
आरुणिर्वारुणिश्चैव वैनतेया इति स्मृताः ॥ ३९॥

शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्मश्च कुलजश्चैव कादृवेया महाबलाः ॥ ४०॥

भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ।
गोपतिर्धृतराष्ट्रश्च सूर्यवर्चाश्च सप्तमः ॥ ४१॥

पुत्रवानर्कवर्णश्च पृथुगश्चापि विश्रुतः ।
भीमाश्चित्ररथश्चैव विख्यातस्सर्वविद्वशी ॥ ४२॥

---

1. अ –श्शुक्रपुत्रास्त्वकैरृषिः ।

तथा गाधिशिरा राजन् धृष्टद्युम्नश्चतुर्दशः ।
कलः पञ्चदशश्चैव नारदश्चैव षोडशः ॥ ४३॥

इत्येते देवगन्धर्वा मुनयः परिकीर्तिताः ॥ ४४
ततस्तु भूतान्यन्यानि कीर्तयिष्यामि भारत ॥ ४४॥

अनवद्यानुपगमां मदिरां मार्गणप्रियाम् ।
अनलां सुभगां भासाम् इति प्रावा व्यजायत ॥ ४५॥

सिद्धिः पूर्णश्च बर्ही च पूर्णाशश्च महायशाः ।
ब्रह्मचारी रतिगुणः सुपर्णश्चैव सप्तमः ॥ ४६॥

विश्वावसुश्च भानुश्च सुभद्रो दशमस्तथा ।
इत्येते देवगन्धर्वाः प्रावेयाः परिकीर्तिताः ॥ ४७॥

इमं त्वप्सरसां वंशं विदितं पुण्यलक्षणम् ॥ ४८
अरिष्टा सुमहाभागा देवी देवर्षितः पुरा ।
अलम्बुसा मिश्रकेशी विद्युद्वर्णा दुलानघा ॥ ४९

अरुणा रक्षिता चैव रम्भा तद्वन्मनोरमा ।
असिता च सुबाहुश्च सुव्रता सुभुजा तथा ॥ ५०

[1]हंसो ज्येष्ठस्त्वरिष्टाया विख्यातश्च महाहनुः ।
हाहा हूहूस्तुम्बुरुश्च चत्वारो ग (न्ध)र्वसत्तमाः ॥ ५१

---

1. क-ख-ग—जानी बाहुश्च विख्याता हाहा हूहूः पुनस्तथा ।
तुम्बुरुश्चैव चत्वारस् स्मृता गन्धर्वसत्तमाः ॥

अमृतं ब्राह्मणा गावो गन्धर्वाप्सरसस्तथा ।
अपत्यं कपिलायास्तु पुराणे परिकीर्तितम् ॥ ५२

इति ते सर्वदेवानां संभवः कथितो मया ।
यथावत्संपरिख्यातो गन्धर्वाप्सरसां तथा ॥ ५३

भुजंगानां सुपर्णानाम् असुराणां तथैवच ।
गवां च ब्राह्मणानां च श्रीमतां पुण्यकर्मणाम् ॥ ५४

आयुष्यं चैव पुण्यं च धन्यं श्रुतिसुखावहम् ।
श्रोतव्यं चैव सततं श्राव्यं चैवानसूयता ॥ ५५

इमं तु वंशं नियमेन यः पठन्
महात्मनां ब्राह्मणवर्यसन्निधौ ।
अपत्यलाभं लभते च पुष्कलं
श्रियं यशः प्रेत्य च शोभनां गतिम् ॥ ५६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

॥ ७ ॥ संभवपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[अस्मिन्नध्याये ५६ श्लोकाः]

॥ सप्तपञ्चाशत्तमोऽध्यायः ॥

ऋष्यादिवंशकथनम् ॥ १ ॥

वैशंपायनः—

ब्रह्मणो मानसाः पुत्रा विदिताष्षण्महर्षयः ।
एकादश तथा रुद्राः स्थाणोश्चैवेति मानसाः ॥ १

मृगव्याधश्च शर्वश्च निर्ऋतिश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः ॥ २

भवनश्चेश्वरश्चैव कपाली च महाद्युतिः ।
स्थाणुर्भवश्च भगवान् रुद्रा एकादश स्मृताः ॥ ३

मरीचिरङ्गिराश्चात्रिः पुलस्त्यः पुलहः क्रतुः ।
षडेते ब्रह्मणः पुत्रा वीर्यवन्तो महर्षयः ॥ ४

त्रयस्त्वङ्गिरसः पुत्रा लोके सर्वत्र विश्रुताः ।
बृहस्पतिरुचथ्यश्च संवर्तश्च दृढव्रताः ॥ ५

अत्रेस्तु बहवः पुत्राश् श्रूयन्ते मनुजाधिप ।
सर्वे वेदविदस्सिद्धाश् शान्तात्मानो महर्षयः ॥ ६

राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा ।
पुलहस्य मृगास्सिंहाः व्याघ्रा यक्षा महामृगाः ॥ ७

क्रतोः क्रतुसमाः पुत्राः पतङ्गसहचारिणः ।
विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः ॥ ८

अङ्गुष्ठाद्दक्षिणाद्दक्ष उत्पन्नो भगवानृषिः ।
ब्रह्मणः पृथिवीपाल पुत्रः पुत्रवतां वरः ॥ ९

महर्षेस्तस्य भार्या तु वामाङ्गुष्ठादजायत ।
तस्यां पञ्चाशतं कन्यास् स एवाजनयत्प्रभुः ॥ १०

तास्सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः ।
पुत्रिकास्थापयामास स्रष्टुः पुत्रः प्रजापतिः ॥ ११

ददौ स दश धर्माय सप्तविंशतिमिन्दवे ।
दिव्येन विधिना राजन् कश्यपाय त्रयोदश ॥ १२

नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे ।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिश्श्रद्धा क्रिया तथा ॥ १३

बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश ।
भार्या ह्येताश्च धर्मस्य विहिताश्च स्वयंभुवा ॥ १४

सप्तविंशतिस्सोमस्य पत्न्यो लोकपरिश्रुताः ।
कालस्य नयने युक्ता धर्मपत्न्यश्शुचिव्रताः ॥ १५

सर्वा नक्षत्रयोगिन्यो लोकयात्राविधौ स्थिताः ॥ १५॥

पितामहान्मुनिर्देवस् तस्य पुत्रः प्रजापतिः ।
तस्याष्टौ वसवः पुत्रास् तेषां वक्ष्यामि विस्तरम् ॥ १६॥

धरो ध्रुवश्चन्द्रमाश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः ॥ १७॥

धूम्रायाश्च धरः पुत्रो ब्रह्मविद्यासुतो ध्रुवः ।
चन्द्रमाश्च मनस्विन्याः श्वसायाः श्वसनस्तथा ॥ १८॥

रसायाश्च रसः पुत्रश् शाण्डिल्याया हुताशनः ।
प्रत्यूषश्च प्रभासश्च प्रभासायास्सुतौ स्मृतौ ॥ १९॥

धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ।
आपस्य पुत्रो [1]वा तस्य श्रुतश्शान्तो मुनिस्तथा ॥ २०॥
ध्रुवस्य पुत्रो भगवान् [2]कालो लोकप्रकाशनः ॥ २१

सोमस्य तु सुतो वर्चा वर्चस्वी येन जायते ।
मनोहरायाश्शिशिरः प्राणोऽथ रमणस्तथा ॥ २२

अग्नेस्स्मृतस्सुतो ज्योतिश् श्रुतश्शान्तस्तथा मुनिः ।
अग्नेः पुत्रः कुमारस्तु श्रीमाञ्छरवणालयः ॥ २३

तस्य शाखो विशाखश्च नैगमेषश्च पृष्ठतः ।
कृत्तिकास्तन्यपानैश्च कार्तिकेय इति स्मृतः ॥ २४

अनिलस्य शिवा भार्या तस्याः पुत्रः पुरोजयः ।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ॥ २५

---

1. क-ग—वातण्ड्यः श्रम श्शान्तो
2 क-ख-ग—लोकालोकप्रकाशनः

प्रत्यूषसो विदुः पुत्र ऋषिर्नाम्ना तु देवलः ।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ॥ २६

बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्सर्वम् असक्ता विचरत्युत ॥ २७

प्रभासस्य तु भार्या सा वसूनामष्टमस्य च ।
प्रासूत विश्वकर्माणं सर्वशिल्पवतां वरम् ॥ २८

विश्वकर्मा महाभागो जज्ञे शिल्पी प्रजापतिः ।
कर्ता शिल्पिसहस्राणां त्रिदशानां च वर्धकी ॥ २९

भूषणानां च सर्वेषां कर्ता सर्वविदां वरः ।
यो दिव्यानि विमानानि देवतानां चकार ह ॥ ३०

मनुष्याश्चोपजीवन्ति तस्य शिल्पं महात्मनः ।
पूजयन्ति च तं नित्यं विश्वकर्माणमव्ययम् ॥ ३१

स्तनं तु दक्षिणं भित्त्वा ब्रह्मणः परमेष्ठिनः ।
निस्सृतो भगवान्धर्मस् सर्वलोकसुखावहः ॥ ३२

त्रयस्तस्य वराः पुत्रास् सर्वभूतमनोरमाः ।
शमः कामश्च हर्षश्च तेजसा लोकधारिणः ॥ ३३

कामस्य तु रतिर्भार्या शमस्य प्रीतिरङ्गना ।
नन्दी तु भार्या हर्षस्य यत्र लोकाः प्रतिष्ठिताः ॥ ३४

मरीचेः काश्यपः पुत्रः काश्यपस्य सुरासुराः ।

जज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः ॥ ३५

त्वाष्ट्री तु सवितुर्भार्या बडबारूपधारिणी ।
असूयत महाभागा सान्तरिक्षेऽश्विनावुभौ ॥ ३६

द्वादशैवादितेः पुत्राश् शक्रमुख्या नराधिप ।
तेषामवरजो विष्णुर् यत्र लोकाः प्रतिष्ठिताः ॥ ३७

त्रयस्त्रिंशत इत्येते देवास्तेषामहं तव ।
अन्वयं संप्रवक्ष्यामि पक्षैश्च कुलतो गणान् ॥ ३८

रुद्राणामपरः पक्षः साध्यानां मरुतां तथा ।
वसूनां भार्गवं विद्याद् विश्वान्देवांस्तथैव च ॥ ३९

वैनतेयस्तु गरुडो बलवानरुणस्तथा ।
बृहस्पतिश्च भगवान् आदित्येष्वेव गण्यते ॥ ४०

अश्विनौ गुह्यकान्विद्धि सर्वौषध्यस्तथा पशून् ।
एष देवगणो राजन् कीर्तितस्तेऽनुपूर्वशः ॥ ४१

यत्कीर्तयित्वा मनुजः [1]सर्वपापैः प्रमुच्यते ॥ ४१॥

ब्रह्मणो हृदयं भित्त्वा निर्गतो भगवान्भृगुः ॥ ४२

भृगोः पुत्रः कविर्विप्रश् शुक्रः कविसुतस्स्मृतः ॥ ४२॥

त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे नयानये ।
स्वयंभुवा नियुक्तस्सन् भुवनं परिधावति ॥ ४३॥

1. क-ख-ग—प्रजामिष्टामवाप्नुयात् ।

योगाचार्यो महाविद्यो दैत्यानामभवद्गुरुः ।
सुराणामहिते युक्तो ब्रह्मचारी यतव्रतः ॥ ४४॥

तस्मिन्नियुक्ते विभुना योगक्षेमाय भार्गवे ।
अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम् ॥ ४५॥

च्यवनं दीप्ततपसं धर्मात्मानं यतव्रतम् ।
यस्स रोषाच्च्युतो गर्भो मातुः क्षेमाय भारत ॥ ४६॥

[1]मानुषी तु पुरा याऽऽसीत् तस्य पत्नी मनीषिणः ।
और्वस्तस्या ऋषिः पुत्र ऊरुं भित्त्वा विनिर्गतः ॥ ४७॥

महाबलो महातेजा बाल एव गुणैर्युतः ।
ऋचीकस्तस्य पुत्रस्तु जमदग्निरथोऽभवत् ॥ ४८॥

जमदग्नेस्तु चत्वार आसन्पुत्रा महात्मनः ।
रामस्तेषां जघन्योऽभूद् अजघन्यैर्गुणैर्वृतः ॥ ४९॥

सर्वशस्त्रास्त्रकुशलः क्षत्रियान्तकरो वशी ॥ ५०

और्वस्यासीत्पुत्रशतं जमदग्निपुरोगमम् ।
तेषां पुत्रसहस्राणि बभूवुर्भुवि विस्तराः ॥ ५१

[2]द्वौ पुत्रौ ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति वै जगत् ।
लोके धाता विधाता च चरतो मनुना सह ॥ ५२

तयोस्तु भगिनी ज्येष्ठा लक्ष्मीः पद्मगृहा शुभा ॥ ५२॥

1. क-ख-ग—मारीषा तु मनोः कन्या 2. यौ पुत्रौ तु भृगोस्त्वन्यौ

तस्यास्तु मानसाः पुत्रा वचसा व्योमचारिणः ॥ ५३

वरुणस्य भार्या ज्येष्ठाऽभूच्छुक्राद्देवी व्यजायत ।
तस्याः पुत्रशतं विद्धि सुरां च सुरनन्दिनीम् ॥ ५४

प्रजानामन्नकामानाम् अन्योन्यपरिभक्षणात् ।
अधर्मस्तत्र संजातस् सर्वभूतविनाशनः ॥ ५५

तस्यापि निर्ऋतिर्भार्या नैर्ऋता ये तु राक्षसाः ।
घोरास्तस्यास्त्रयः पुत्राः पापकर्मरतास्सदा ॥ ५६

भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा ॥ ५६॥

श्येनां क्रौञ्चीं च भासीं च धृतराष्ट्रीं तथा शुकीम् ॥ ५७

ताम्राऽपि सुषुवे कन्याः पञ्चैता लोकविश्रुताः ॥ ५७॥

[1]द्वौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ ॥ ५८

भार्यारुणस्य श्येनी तु वीर्यवन्तौ महाबलौ ।
सम्पातिं जनयामास तथैव च जटायुषम् ॥ ५९

भार्या गरुत्मतश्चैव भासी क्रौञ्ची तथा शुकी ।
चतुर्थी धृतराष्ट्री च तास्वपत्यं निबोध मे ॥ ६०

क्रौञ्ची तु सुषुवे क्रौञ्चान् भासी भासान् व्वजायत ॥ ६०॥

---

1. क-ख-ग—उलूकान्सुषुवे क्रौञ्ची भासी भासान्व्यजायत ॥
श्येनी श्येनांश्च गृध्रांश्च जनयामास तेजसा ॥
[अधिकः पाठः]

धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ।
चक्रवाकांश्च भद्रं ते विजज्ञे भरतर्षभ ॥ ६१॥

शुकी विजज्ञे धर्मज्ञ शुकानेव यशस्विनी ।
कल्याणगुणसंपन्ना सर्वलक्षणपूजिता ॥ ६२॥

ततः क्रोधवशा नाम विजज्ञे भरतर्षभ ।
मृगीं च मृगमन्दां च हरीं भद्रमदामपि ॥ ६३॥

मातङ्गीं त्वथ शार्दूलीं श्वेतां सुरभिमेव च ।
सर्वलक्षणसंपन्नां सुरसां च यशस्विनीम् ॥ ६४॥

अपत्यं तु मृगास्सर्वे मृग्या नरवरात्मज ।
ऋक्षाश्च मृगमन्दायास् सृमराश्चमरा अपि ॥ ६५॥

ततस्त्वैरावतं नागं जज्ञे भद्रमदा सुतम् ।
ऐरावतस्सुतस्तस्या देवनागो महागजः ॥ ६६॥

हर्याश्च हरयोऽपत्यं वानराश्च मनस्विनः ।
गोलाङ्गूलाश्च भद्रं ते विज्ञातव्या हरीसुताः ॥ ६७॥

प्रजज्ञे त्वथ शार्दूली सिंहान् व्याघ्रांश्च भारत ।
द्वीपिनश्च सुतास्तस्याः सर्वे चैव महाबलाः ॥ ६८॥

मातङ्गास्त्वथ मातङ्ग्या अपत्यानि नराधिप ।
दिशागजं तु श्वेताक्षं श्वेताऽजनयदाशुगम् ॥ ६९॥

तथा दुहितरौ राजन् सुरभिर्वै व्यजायत ।

रोहिणीं चैव भद्रं ते गन्धर्वीं तु यशस्विनीम् ॥ ७०॥
रोहिण्यां जज्ञिरे गावो गन्धर्व्यो वाजिनस्सुताः ॥ ७१
सुरसाऽजनयत्सर्पान् [1]छतमेकशिरोधरान् ।
[2]सुरसा कन्यका जातास् तिस्रः कमललोचनाः ॥ ७२
वनस्पतीनां वृक्षाणां वीरुधां चैव मातरः ।
[3]अनला रुहा च द्वे प्रोक्ते वीरुधां चैव तास्स्मृताः ॥ ७३
गृह्णन्ति ये विना पुष्पं फलानि तरवः पृथक् ।
[4]अनलासुतास्ते विज्ञेयास् तानेवाहुर्वनस्पतीन् ॥ ७४
पुष्पैः फलग्रहान्वृक्षान् रुहायाः प्रसवान्विभो ॥ ७४॥
लतागुल्मानि वल्ल्यश्च त्वक्सारतृणजातयः ।
वीरुधायाः प्रजास्तास्युर् अत्र वंशस्समाप्यते ॥ ७५॥
सर्वपुण्यफलान् वृक्षान् अनलापि व्यजायत ।
अनला तु शुकीपुत्री कद्रुवा सुरसा सुता ॥ ७६॥
अरुणस्य भार्या श्येनी तु वीर्यवन्तौ महाबलौ ।
सम्पातिं जनयामास तथैव च जटायुषम् ॥ ७७॥
द्वौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ ॥ ७८
इत्येष सर्वभूतानां महतां मनुजाधिप ।
संभवः कीर्तितस्सम्यक् पूतो भवति पापतः ॥ ७९

क-ख-ग— { 1. कद्रू राजंस्तु पन्नगान् । 2. इरायाः
3. लतारुहे 4. लता

यं श्रुत्वा पुरुषस्सम्यक् सर्वपापात्प्रमुच्यते ।
सर्वज्ञतां च लभते रतिमग्र्यां च विन्दति ॥ ८०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥
॥ ७ ॥ संभवपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ८० श्लोका.]

॥ अष्टपञ्चाशत्तमोऽध्यायः ॥

देवानां दानवानां च भूमावंशावतारकथनम् ॥ १ ॥

जनमेजयः—

[1]देवानां दानवानां च यक्षाणामथ रक्षसाम् ।
सिंहव्याघ्रमृगाणां च पन्नगानां पतत्रिणाम् ॥ १
अन्येषां चैव भूतानां सर्वेषां भगवन्नहम् ।
श्रोतुमिच्छामि तत्त्वेन मानुषेषु महात्मनाम् ॥ २
जन्म कर्म च भूतानां सर्वेषामनु पूर्वशः ॥ २॥

वैशंपायनः—

मानुषेषु मनुष्येन्द्र संभूता ये दिवौकसः ।
नामतो बलतश्चैव तांस्ते वक्ष्यामि सर्वशः ॥ ३॥
प्रथमं दानवांश्चैतांस् तेऽद्य वक्ष्यामि सर्वशः ॥ ४

1. क-ख-ग—सुराणामसुराणां च

विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः ।
जरासन्ध इति ख्यातस् स आसीन्मनुजर्षभः ॥ ५

दितेः पुत्रस्तु यो राजन् हिरण्यकशिपुः पुरा ।
स जज्ञे मानुषे लोके शिशुपालो नरर्षभ ॥ ६

संह्लादस्तु महावीर्यः प्रह्लादस्यानुजस्तु यः ।
स शल्य इति विख्यातो जज्ञे बाह्लीकपुङ्गवः ॥ ७

अनुह्लादस्तु तेजस्वी योऽभूत्ख्यातो जघन्यजः ।
[1]धृष्टकेतुरिति ख्यातस् स बभूव नरेश्वर ॥ ८

यस्तु राजन्शिबिर्नाम दैतेयः परिकीर्तितः ।
द्रुम इत्यभिविख्या[2]तस् स आसीन्मनुजेश्वरः ॥ ९

बाष्कलो नाम यस्तेषाम् आसीदसुरपुङ्गवः ।
भगदत्त इति ख्यातस् स आसीन्मनुजेश्वरः ॥ १०

अयश्शिरा अश्वशिरा अयश्शङ्कुश्च वीर्यवान् ।
तथा गगनमूर्धा च वेगवांश्चैव पञ्चमः ॥ ११

पञ्चैते जज्ञिरे राजन् वीर्यवन्तो महासुराः ।
केकयेषु महात्मानः पार्थिवर्षभसत्तमाः ॥ १२

केतुमानिति विख्यातो यस्ततोऽन्यः प्रतापवान् ।
अमितौजा इति ख्यातस् स जज्ञे मनुजर्षभ ॥ १३

---

1. अ. धृत । 2. क-ख-ग—तो जज्ञे वीरस्स पार्थिवः ।

स्वर्भानुरिति विख्यातश् श्रीमान् यस्तु महासुरः ।
उग्रसेन इति ख्यातस् सोग्रकर्मा नराधिप ॥ १४

यस्त्वश्व इति विख्यातस् स च शस्त्रभृतां वरः ।
अशोको नाम राजासीन्महावीर्यपराक्रमः ॥ १५

तस्मादवरजो यस्तु राजन् अश्वपतिस्स्मृतः ।
दैतेयस्सोऽभवद्राजा हार्दिक्यो मनुजर्षभः ॥ १६

वृषपर्वेति विख्यात आसीद्यस्तु महासुरः ।
दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥ १७

अगजस्त्वनुजो राजन् य आसीद्वृषपर्वणः ।
स मल्ल इति विख्यातः पृथिव्यामभवन्नृपः ॥ १८

अश्वग्रीव इति ख्यातस् सत्यवाक्यो महासुरः ।
रोचमान इति ख्यातः पृथिव्यामभवन्नृपः ॥ १९

सूक्ष्मस्तु सुमती राजन् कीर्तिमान् यः प्रकीर्तितः ।
बृहन्त इति विख्यातः क्षितावासीत् स पार्थिवः ॥ २०

[1]हुतण्ड इति विख्यातो य आसीदसुरोत्तमः ।
सेना[2]बन्धुरिति ख्यातस् स बभूव नराधिपः ॥ २१

खस्रवो नाम यस्तेषाम् असुराणां पुरोगमः ।

1. क-ख-ग—कुम्भाण्ड 2. क-ख-ग—बिन्दु

रिपुजिन्नाम राजर्षिर् बभूव भुवि विश्रुतः ॥ २२

एकचक्र इति ख्यातो य आसीच्च महासुरः ।
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ ॥ २३

विरूपाक्षस्तु दैतेयश् चित्रयोधी महासुरः ।
चित्रवर्मेति विख्यातः क्षितावासीत्स पार्थिवः ॥ २४

हरस्त्वतिरथो राजन् आसीद्यो दानवर्षभः ।
सुव्राहुरिति विख्यातस् स जज्ञे मनुजर्षभः ॥ २५

[1]अहरस्तु महातेजाश् शत्रुपक्षभयंकरः ।
बाह्लिको नाम राजाऽऽ सीद् बभूव प्रथितः क्षितौ ॥ २६

निचन्द्रश्चातिवक्त्रस्तु य आसीद्दानवोत्तमः ।
सुचन्द्र इति विख्यातो भूमावासीत् स पार्थिवः ॥ २७

निकुम्भस्त्वजितस्संख्ये महा[2]नसुरसत्तमः ।
भूमौ भूमिपतिश्रेष्ठो देवाधिक इति श्रुतः ॥ २८

शरभो नाम यस्तेषां दैतेयानां महासुरः ।
पौरवो नाम राजर्षिस् स बभूव नरेष्विह ॥ २९

कापथस्तु महावीरो बभूव किल योऽसुरः ।
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः । ३०

---

1. क-ख-ग—चित्रयोधी महाराजन् आसीद्यो दानवर्षभः ॥
[अधिकः पाठः]

2. क-ख—मतिरजायत

[1]क्रथस्तु राजन्राजर्षिः क्षितौ जज्ञे महासुरः ।
पार्वतेय इति ख्यातः काञ्चनाचलसन्निभः ॥ ३१

द्वितीयश्शरभस्तेषाम् असुराणां बभूव यः ।
प्रह्लादो नाम बाह्लीको जज्ञे भूपः परन्तप ॥ ३२

चन्द्रस्तु दितिजश्रेष्ठो लोके ताराधिपो मतः ।
चन्द्रवर्मेति विख्यातः काम्भोजानां नराधिपः ॥ ३३

अर्क इत्यभिविख्यातो यस्तु दानवपुङ्गवः ।
[2]इषीको नाम राजाऽऽसीद् बभूव ऋषिसत्तमः ॥ ३४

[3]मृतपा इति विख्यातो य आसीदसुरोत्तमः ।
[4]पश्चिनामपकं विद्धि तं नृपं नृपसत्तम ॥ ३५

गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः ।
द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः ॥ ३६

मयूर इति विख्यातश् श्रीमान् यस्तु महासुरः ।
स विश्व इति विख्यातो बभूव पृथिवीपतिः ॥ ३७

दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभः ।
काशिराज इति ख्यातः पृथिव्यां प्रथितो नृपः ॥ ३८

---

1. क-ख-ग—क्रुद्धस्तु
2. क-ख—ऋषिको नाम राजर्षिः (ग)-ऋषीको नाम
3. क-ग—प्रतापा-ख—प्रतपा 4. क-ख—पश्चिमानूपकं

सिंहिका सुषुवे यं तु ग्रहं चन्द्रार्कमर्दनम् ।
[1]क्रथ इत्यभिविख्यातस् स बभूव नराधिपः ॥ ३९

सुपर्ण इति विख्यातस् तस्मादवरजस्तु यः ।
क्रोधकीर्तिरिति ख्यातः प्रथिव्यां प्रथितो नृपः ॥ ४०

चन्द्रहर्तेति यस्तेषां कीर्तितः प्रवरोऽसुरः ।
[2]नरको नाम राजर्षिः पृथिव्यां सोऽभवन्नृपः ॥ ४१

[3]विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः ।
[4]जनको नाम राजर्षिस् स बभूव महीपतिः ॥ ४२

अनायुषस्तु पुत्राणां चतुर्णां प्रवरोऽसुरः ।
विक्षरो नाम [5]राजर्षिर् वसुमित्रोऽभवन्नृपः ॥ ४३

द्वितीयो विक्षरो यस्तु नराधिप महासुरः ।
[6]वरस्सुराष्ट्राधिपतिर् विश्रुतस्सोऽभवन्नृपः ॥ ४४

प्रवीर इति विख्यातो यस्त्वासीदसुरोत्तमः ।
पौण्ड्रको [7]मेरुसङ्काशो बभूव स नराधिपः ॥ ४५

वृत्र इत्यभिविख्यातो यस्तु राजन् महासुरः ।
मणिमान्नाम राजर्षिस् स बभूव नराधिपः ॥ ४६

---

1. क-ख-ग—क्रुद्ध
2. क-ख—शुनको
3. क-ख- विशासनस्तु
4. क-ख-ग—जानकिर्नाम
5. क-ख-ग—तेजस्वी
6. क-ख-ग—पां सुराष्ट्राधिप इति
7. क-ख-ग—नाम इत्येव संबभूव

क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः ।
दण्ड इत्यभिविख्यातस् स बभूव नराधिपः ॥ ४७

क्रोधवर्धन इत्येव यस्त्वन्यः परिकीर्तितः ।
दण्डधार इति ख्यातस् सोऽभवन्मनुजेश्वरः ॥ ४८

[1]कालकेयास्तु ये पुत्रास् तेषामष्टौ नराधिपाः ।
जज्ञिरे राजशार्दूल शार्दूलसमविक्रमाः ॥ ४९

मागधेषु जयत्सेनश् श्रीमानासीत्स पार्थिवः ।
अष्टानां प्रवरस्तेषां कालेयानां महासुरः ॥ ५०

द्वितीयस्तु ततस्तेषां श्रीमान् हरिहयोपमः ।
अपराजित इत्येव स बभूव नराधिपः ॥ ५१

तृतीयस्तु महाराज महाबाहुर्महासुरः ।
निषादाधिपतिर्ज्ञेयो भुवि भीमपराक्रमः ॥ ५२

तेषामन्यतमो यस्तु चतुर्थः परिकीर्तितः ।
श्रेणिमानिति विख्यातः क्षितौ राजर्षिसत्तमः ॥ ५३

पञ्चमस्तु बभूवैषां प्रवरो यो महासुरः ।
[2]महीजात इति ख्यातो बभूव हि परन्तपः ॥ ५४

षष्ठस्तु मतिमान्यो वै तेषामासीन्महासुरः ।
अभिरूप इति ख्यातः क्षितौ राजर्षिसत्तमः ॥ ५५

1. क-ख-ग—कालेयानां तु 2. क-ख—महीज इति विख्यातो बभूवेह

सप्तमस्तु बभूवैषां प्रवरो यो महासुरः ।
समुद्रसेनस्तु नृपः[1]ख्यातो नाम्ना महाबलः ॥ ५६

विश्रुतस्सागरान्तायां क्षितौ धर्मार्थतत्त्ववित् ॥ ५६॥

बृहन्नामाष्टमस्तेषां कालेयानां महासुरः ।
बभूव राजा धर्मात्मा सर्वभूतहिते रतः ॥ ५७॥

गणः क्रोधवशो नाम यस्तु राजन् प्रकीर्तितः ।
ततस्संजज्ञिरे वीराः क्षिताविह नराधिपाः ॥ ५८॥

नन्दिकः कर्णवेष्टश्च सिद्धार्थः क्रीडकस्तथा ।
सुवीरश्च सुबाहुश्च महावीरोऽथ बाह्लिकः ॥ ५९॥

क्रोधो विचित्रः सुरसश् श्रीमान्नीलश्च भूमिपः ।
वीरधामा च कौरव्य भूरिबालश्च नामतः ॥ ६०॥

दन्तवक्त्रश्च नामासीद् दुर्जयश्चैव नामतः ।
रुक्मी च नरशार्दूल राजा च जनमेजयः ॥ ६१॥

आषाढो वायुवेगश्च भूरितेजास्तथैव च ।
एकलव्यस्सुमित्रस्तु वार्ष्णेयानोऽथ गोमुखः ॥ ६२॥

करूशकाश्च राजानः क्षेमधूर्तिस्तथैव च ।
श्रुतायुर्धर्मपश्चैव बृहत्सेनस्तथैव च ॥ ६३॥

क्षेमोग्रतीर्थः कुहकः कलिङ्गेषु नराधिपः ।

---

1. क-ख-ग—तेषामेवाभवद्गणात् ।

मतिमांश्च मनुष्याणाम् ईश्वरश्चातिविक्रमः ॥ ६४॥
गणात्क्रोधवशादेव राजपूगः क्षिताविह ।
जातः पुरा महाराज महाकीर्तिर्महाबलः ॥ ६५॥
कालनेमिरिति ख्यातो योऽसावसुरसत्तमः ।
स कंस इति विख्यात उग्रसेनसुतो बली ॥ ६६॥
यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः ॥ ६७॥
बृहस्पतेर्बृहत्कीर्तिर् देवर्षेर्विद्धि भारत ।
अंशाद्द्रोणं समुत्पन्नं भारद्वाजमयोनिजम् ॥ ६८॥
धन्विनां नृपशार्दूल यस्स सर्वास्त्रवित्तमः ॥ ६९
बृहत्कीर्तिर्महातेजास् स जज्ञे मनुजेष्विह ॥ ६९॥
धनुर्वेदे च वेदे च यं तं वेदविदो विदुः ।
वरिष्ठमिष्टकर्माणं द्रोणं स्वकुलवर्धनम् ॥ ७०॥
महादेवान्तकाभ्यां च कामात्क्रोधाच्च भारत ।
एकत्वमुपपद्यादौ जज्ञे वै मानुषेष्विह ॥ ७१॥
अश्वत्थामा महावीर्यश् शत्रुपक्षभयंकरः ।
वीरः कमलपत्राक्षः क्षितावासीन्नराधिप ॥ ७२॥
जज्ञिरे वसवस्त्वष्टौ गङ्गायां शन्तनोस्सुताः ।
वसिष्ठस्य च शापेन नियोगाद्वासवस्य च ॥ ७३॥

तेषामवरजो भीष्मः कुरूणामभयङ्करः ।
मतिमान्वेदविद्वांश्च सर्वभूतभयङ्करः ॥ ७४॥

जामदग्न्येन रामेण [1]सर्वशस्त्रभृतां वरः ।
अयुध्यत महातेजा भार्गवेण महात्मना ॥ ७५॥

यस्तु राजन् कृपो नाम ब्रह्मर्षिरभवत्क्षितौ ।
रुद्राणां गणतो विद्धि संभूतममितौजसम् ॥ ७६॥

शकुनिर्नाम यस्त्वासीद् राजा लोके महारथः ।
द्वापरं विद्धि तं राजन् संभूतमरिमर्दनम् ॥ ७७॥

सात्यकिस्सत्यसन्धस्तु योऽसौ वृष्णिकुलोद्वहः ।
पक्षात्स जज्ञे मरुतां देवानामरिमर्दनः ॥ ७८॥

द्रुपदश्चापि राजर्षिस् तत एवाभवद्गणात् ।
मानुषे नृप लोकेऽस्मिन् सर्वशस्त्रभृतां वरः ॥ ७९॥

ततश्च कृतवर्माणं विद्धि राजन् [2]मरुद्गणात् ।
जातमभ्यधिकर्माणं क्षत्रियर्षभसत्तमम् ॥ ८०॥

मरुतां तु गणाद्विद्धि स जज्ञे रिपुमर्दनः ।
विराटो नाम राजर्षिः परराष्ट्रविमर्दनः ॥ ८१॥

अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः ।
स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्धनः ॥ ८२॥

---

1. क-ख-ग—यस्स धर्मभृतां वरः 2. क-ख-ग—न्नराधिपम्

धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनादपि ।
दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः ॥ ८३॥
मातुर्दोषेणैव चर्षेर् अन्ध एव व्यजायत ॥ ८४
धर्मात्तु सुमहाभागं पुत्रं पुत्रवतां वरम् ।
विदुरं विद्धि लोकेऽस्मिञ् जातं धर्मभृतां वर॥ ८५
मरुतां तु गणाद्विद्धि सर्वशस्त्रभृतांवरः ।
पाण्डुर्जज्ञे महाभागस् तव पूर्वपितामहः ॥ ८६
कलेरंशात्तु संजज्ञे भुवि दुर्योधनो नृपः ।
दुर्बुद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः ॥ ८७
जगतो यश्च सर्वस्य विद्वेषकरपूरुषः ।
यस्सर्वान् घातयामास पृथिव्यां पुरुषाधमः ॥ ८८
येन युद्धं समुद्दिष्टं भूतान्तकरणं महत् ॥ ८८॥
पौलस्त्यभ्रातरस्सर्वे जज्ञिरे मनुजेष्विह ।
शतं दुःशासनादीनां सर्वेषां क्रूरकर्मणाम् ॥ ८९॥
दुर्मुखो दुःसहश्चैव ये चान्ये नानुकीर्तिताः ।
दुर्योधनसहायास्ते पौलस्त्या भरतर्षभ ॥ ९०॥
धर्मस्यांशात्तु राजानं विद्धि राजन् युधिष्ठिरम् ।
भीमसेनं च वातस्य देवराजस्य चार्जुनम् ॥ ९१॥
अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि ।

नकुलं सहदेवं च सर्वभूतमनोहरौ ॥ ९२॥

यस्सुवर्चा इति ख्यातस् सोमपुत्रः प्रतापवान् ।
अभिमन्युर्बृहत्कीर्तिर् अर्जुनस्य सुतोऽभवत् ॥ ९३॥

अग्नेरंशात्तु विद्धि त्वं धृष्टद्युम्नं महारथम् ।
शिखण्डिनमथो राजं स्त्रीपुंसं विद्धि गुह्यकम् ॥ ९४॥

द्रौपदेयास्तु ये पञ्च बभूवुर्भरतर्षभ ।
विश्वान् देवगणान्विद्धि तान्राजन् भरतर्षभ ॥ ९५॥

आमुक्तकवचः कर्णो यस्तु जज्ञे महारथः ।
दिवाकरस्य तं विद्धि देवर्षेरंशमुत्तमम् ॥ ९६॥

यस्तु नारायणो देवो देवदेवस्सनातनः ।
तस्यांशो मानुषेष्वासीद् वासुदेवः प्रतापवान् ॥ ९७॥

शेषस्यांशस्तु नागस्य बलदेवो महाबलः ।
सनत्कुमारं प्रद्युम्नं विद्धि राजन् महौजसम् ॥ ९८॥

एवमन्ये मनुष्येन्द्र बहवोंशा दिवौकसाम् ।
जज्ञिरे वसुदेवस्य कुले कुलविवर्धन ॥ ९९॥

गणस्त्वप्सरसां यो वै महाराज प्रकीर्तितः ।
तस्य भागः क्षितौ जज्ञे नियोगाद्वासवस्य च ॥ १००॥

तानि षोडशदेवीनां सहस्राणि नराधिप ।

बभूवुर्मानुषे लोके नारायणपरिग्रहाः ॥ १०१॥

श्रियस्तु भागस्संजज्ञे रत्यर्थं पृथिवीतले ॥ १०२
द्रुपदस्य कुले कन्या वेदिम[1]ध्यादनिन्दिता ॥ १०२॥

नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी ।
पद्मायताक्षी सुश्रोणी स्वञ्चितायतमूर्धजा ॥ १०३॥

सर्वलक्षणसंपन्ना वैदूर्यमणिसंनिभा ।
पञ्चानां पुरुषेन्द्राणां चित्तप्रमथनी रहः ॥ १०४॥

सिद्धिस्स्मृतिश्च ये देव्यौ पञ्चानां मातरौ तु ते ।
कुन्ती माद्री च जज्ञाते [2]माद्री तु सुबलात्मजा ॥ १०५॥

इति देवासुराणां ते गन्धर्वाप्सरसां तथा ।
अंशावतरणं राजन् राक्षसानां च कीर्तितम् ॥ १०६॥

ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः ।
महात्मनां यदूनां च ये जाता विपुले कुले ॥ १०७॥

एते तु मुख्याः कथिता मया ते राजसत्तम ।
धन्यं यशस्यमायुष्यं पुण्यं च विजयावहम् ॥ १०८॥

इदमंशावतरणं श्रोतव्यमनसूयया ॥ १०९

---

1. क-ख-ग—त्समुत्थिता
2. अ—मुनिस्तु

अंशावतरणं श्रुत्वा देवगन्धर्वरक्षसाम् ।
प्रभवाप्ययवित् प्राज्ञो न कृच्छ्रेष्ववसीदति ॥ ११०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

॥ ७ ॥ संभवपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[अस्मिन्नध्याये ११० श्लोकाः]

॥ एकोनषष्टितमोऽध्यायः ॥

कुरुवंशकथनम् ॥ १ ॥ संक्षेपेण ययात्युपाख्यानम् ॥ २ ॥

1जनमेजयः—

त्वत्तश्श्रुतमिदं सर्वं देवदानवरक्षसाम् ।
अंशावतरणं सम्यग् गन्धर्वाप्सरसां तथा ॥ १

1. क-ख-ग—जनमेजयः—
पुत्रं ययातेः प्रब्रूहि पूरुं धर्मभृतां वरम् ।
आनुपूर्व्येण ये चान्ये पूरुवंशविवर्धनाः ॥ १
विस्तरेण पुनर्ब्रूहि दौष्यन्तिं जनमेजयम् ।
संबभूव यथा राजा भरतो द्विजसत्तम ॥ २
वैशम्पायनः—
पूरुर्नृपतिशार्दूल यथैवास्य पिता नृप ।
धर्मनित्यस्थितो राज्ये शक्रवीर्यपराक्रमः ॥ ३
प्रवीरश्शतगर्ज्यौ च त्रयः पुत्रा महाबलाः ।
पूरोः पौष्यामजायन्त प्रवीरस्तस्य वंशभाक् ॥ ४

नमस्युरभवत्तस्माच् छूरश्शैब्यसुतस्ततः ।
पृथिव्यां सागरान्तायां राजा राजीवलोचनः ॥ ५
सुभ्रूश्चाभयदो वाजी सौवीरतनयास्त्रयः ।
नमस्योरभवन् पुत्राश् शश्वत्सर्वे महाबलाः ॥ ६
असुन्तं वसुनाभं च गर्भौ रम्यौ यशस्विनौ ।
शूरानभयदो राजा जनयामास वीर्यवान् ॥ ७
वीर्यवान्मन्वतेः पुत्रो रथन्तर्यामजायत ।
शूरश्च दृढधन्वाच वपुष्मांश्च नरोत्तमः ॥ ८
रुद्राश्वं पृषदश्वं च रथदश्वं गयं मनुम् ।
यवीयाञ्जनयामास गन्धर्वान्भूरिविक्रमान् ॥ ९
रुद्राश्वस्य महाबाहो दशाप्सरसि सूनवः ।
यज्वानो जज्ञिरे पुत्राः प्रजावन्तो यशस्विनः ॥ १०
ऋतेपुरथ कक्षेपुः कृपणेपुश्च वीर्यवान् ।
स्थण्डिलेषु वनेषुश्च स्थलेषुश्च महाबलः ॥ ११
तेजोदुर्बलवान्धीमान् रथेषुश्चेन्द्रविक्रमः ।
धर्मेषुस्सन्ततेषुश्च दशमो देवविक्रमः ॥ १२
अनावृष्ट्या सुतास्तात राजसूयाश्वमेधिनः ।
अन्तिनारस्ततो राजन् विद्वांश्च प्रथितोऽभवत् ॥ १३
त्रस्नुं मोघं प्रतिरथं द्रुमञ्चातिरथं युधि ।
एतान्वै सुषुवे साध्वी अन्तिनाराद्यशस्विनी ॥ १४
तेषां त्रस्नुर्महावीर्यः पौरवं वंशमुद्वहन् ।
आजहार यशो दीप्तं जिगाय च वसुन्धराम् ॥ १५
इलिलं सुषुवे त्रस्नो र्यमुना च यशस्विनी ।
सोऽपि कृत्स्नामिमां भूमिं विजिग्ये जयतां वर ॥ १६
अथ तस्यामृषीन्पञ्च पञ्चभूतोपमांस्तथा ।
इलिलो जनयामास दुष्यन्तप्रमुखान् सुतान् ॥ १७
दुष्यन्तमनघं शूरं प्रशूरं चाथ पञ्चमम् ।
तेषां ज्येष्ठो महाराज दुष्यन्तो दुर्जयो युधि ॥ १८
दुष्यन्ताल्लक्ष्मणायां तु जज्ञे वै जनमेजयः ।

इमं तु भूय इच्छामि कुरूणां वंशमादितः ।
कथ्यमानं त्वया ब्रह्मन् विप्रर्षिगणसन्निधौ ॥ २

वैशंपायनः—
धर्मार्थकामसहितं राजर्षीणां प्रकीर्तितम् ।
पवित्रं कीर्त्यमानं मे निबोधेमं मनीषिणाम् ॥ ३
प्रजापतेस्तु दक्षस्य मनोर्वैवस्वतस्य च ।
भरतस्य कुरोः पूरोराजमीढस्य चान्वये ॥ ४
यादवानामिमं वंशं पौरवाणां च सर्वशः ।
तथैव भारतानां च पुण्यं स्वस्त्ययनं महत् ॥ ५
धन्यं यशस्यमायुष्यं कीर्तयिष्यामि तेऽनघ ॥ ५॥
तेजोभिरुदितास्सर्वे महर्षिसमतेजसः ॥ ६
दश प्रचेतसः पुत्रास् सन्तः पूर्वजनास्स्मृताः ।
मूर्धजेनाग्निना ह्येते पूर्वं दग्धा महौजसः ॥ ७
तेभ्यः प्रचेतसो जज्ञे दक्षो दक्षादिमाः प्रजाः ।
संभूताः पुरुषव्याघ्र स हि लोकपितामहः ॥ ८
वैरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान् ॥ ९

पूर्वतोऽनुवृत्तम्—
शकुन्तलायां भरतो दौष्यन्तिरभवत्सुतः ॥ १९
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ १९॥
॥ इति संभवपर्वणि चतुर्थोऽध्यायः ॥

[अधिकः पाठः]

सहस्रसङ्ख्यान्सहितान् दक्षपुत्रांश्च नारदः ।
मोक्षमध्यापयामास [1]येन स्युरजरामराः ॥ १०

ततः पञ्चाशतं कन्याः पुत्रिकास्समजीजनत् ।
प्रजापतिः प्रजा दक्षः सिसृक्षुर्जनमेजय ॥ ११

ददौ दश स धर्माय काश्यपाय त्रयोदश ।
कालस्य नयने युक्तास् सप्तविंशतिमिन्दवे ॥ १२

त्रयोदशानां पत्नीनां या तु दाक्षायणी शुभा ।
मारीचः काश्यपस्त्वस्याम् अदित्यां समजीजनत् ॥ १३

इन्द्रादीन् वीर्यसंपन्नान् विवस्वन्तमथापि च ।
विवस्वतस्सुतो जज्ञे यमो वैवस्वतः प्रभुः ॥ १४

मार्ताण्डस्य यमी चापि सुता राजन् व्यजायत ।
मार्ताण्डस्य मनुर्धीमान् अजायत सुतः प्रभुः ॥ १५

मनोर्वंशो मानवानां तथाऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥ १६

ततोऽभवत्तदा राजन् ब्रह्म क्षत्रेण संहितम् ।
ब्राह्मणा मानवास्तेषां साङ्गं वेदमधारयन् ॥ १७

वेनं त्रस्नुं नरिष्यन्तं नाभागेक्ष्वाकुमेव च ।
करूशमथ शर्याातिं तथैवाष्टमीमिलाम् ॥ १८

1. क-ख-ग—साङ्ख्यज्ञानमनुत्तमम् ।

[1]वृषघ्नं नवमं प्राहुः क्षत्रधर्मपरायणान् ।
तथैवारिष्टदशमान् मनोः पुत्रान्महाबलान् ॥ १९

पञ्चाशत्तु मनोः पुत्रास् तथाचान्येऽभवन्क्षितौ ॥ १९॥

अन्योन्यभेदात्ते सर्वे विनेशुरिति नश्श्रुतम् ॥ २०

पुरूरवास्ततो विद्वान् इलायां समपद्यत ।
सैव तस्याभवन्माता पिता चेति हि नश्श्रुतम् ॥ २१

अष्टादश सहस्राणि द्वीपानभ्रन् पुरूरवाः ।
अमानुषैर्वृतान्सर्वान् उषसस्स महायशाः ॥ २२

विप्रैस्स विग्रहं चक्रे वीर्योन्मत्तः पुरूरवाः ।
जहार च स विप्राणां रत्नान्युत्क्रोशतामपि ॥ २३

सनत्कुमारस्तं राजन् ब्रह्मलोकादुपेत्य ह ।
अनुदर्शं ततश्चक्रे प्रत्यगृह्णान्न चाप्यसौ ॥ २४

ततस्स ऋषिभिः क्रुद्धः सद्यश्शप्तो ह्यनश्यत ॥ २४॥

लोभान्वितो बलमदान्नष्टसंज्ञो नराधिपः ।
स च गन्धर्वलोकस्थ उर्वश्या सहितो विराट् ॥ २५॥

आनिनाय क्रियार्थेऽग्निम् एकं वै येन च त्रिधा ॥ २६

षट् [2]सुता जज्ञिरे चैलाद् आयुर्धीमान्नरस्तथा ।

---

1. क-ख-ग—पृषद्रं
2. क-ख-ग—पुत्रा जज्ञिरेऽथैलादायुर्धीमानमावसुः ।

महायुश्च शतायुश्च [1]सुतायुश्चोर्वशीसुताः ॥ २७
नहुषं वृद्धशर्माणम् अजरायुमनेनसम् ।
स्वर्भानवीसुतानेतान् आयोः पुत्रान्प्रचक्षते ॥ २८
आयुषो नहुषः पुत्रो धीमान् सत्यपराक्रमः ।
राज्यं शशास सुमहद् धर्मेण पृथिवीपतिः ॥ २९
पितॄन्देवानृषीन्विप्रान् गन्धर्वोरगराक्षसान् ।
नहुषः पालयामास ब्रह्मक्षत्रमथो विशः ॥ ३०
स हत्वा शत्रुसंघातान् ऋषीन् करमदापयत् ।
पशुवच्चैव तान् पृष्ठे वाहयामास वीर्यवान् ॥ ३१
कारयामास चेन्द्रत्वम् अभिभूय दिवौकसः ॥ ३१॥
तेजसा तपसा चैव विक्रमेणौजसा तथा ।
विभ्रिष्टो नहुषश्शप्तस् सद्यो ह्यजगरोऽभवत् ॥ ३२॥
यातिं ययातिं संयातिम् आयातिं यातिमुद्भवम् ।
नहुषो जनयामास षट् सुतान् प्रियवासवः ॥ ३३॥
ययातिर्नाहुषस्सम्राड् आसीत्सत्यपराक्रमः ।
स पालयामास महीम् ईजे बहुविधैस्सवैः ॥ ३४॥
अतिशक्त्या पितॄनर्चन् देवांश्च प्रयतस्सदा ।
अन्वगृह्णात्प्रजास्सर्वा ययातिरपराजितः ॥ ३५॥

1. क-ख-ग—श्रु

तस्य पुत्रा महेष्वासास् सर्वैस्समुदिता गुणैः ।
देवयान्यां महाराज शर्मिष्ठायां च जज्ञिरे ॥ ३६॥

देवयान्यां व्यजायेतां यदुस्तुर्वशुरेव च ।
द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे ॥ ३७॥

स शाश्वतीस्समा राजन् प्रजा धर्मेण पालयत् ॥ ३८

जरां गच्छन्महाघोरां नाहुषो रूपनाशिनीम् ।
जरा[1]भिदूषितः पुत्रान् राजा वचनमब्रवीत् ॥ ३९

यदुं पूरुं तुर्वशुं च द्रुह्युं चानुं च भारत ॥ ३९॥

यौवनेनाचरन्कामान् युवा युवतिभिस्सह ।
विहर्तुमहमिच्छामि साह्यं कुरुत पुत्रकाः ॥ ४०॥

तं पुत्रो दैवयानेयः पूर्वजो यदुरब्रवीत् ।
किमत्र भवता कार्यम् अस्माभिर्यौवनेन च ॥ ४१॥

ययातिरब्रवीत्तं च जरा मे प्रतिगृह्यताम् ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ ४२॥

यजतो दीर्घसत्रैर्मे शापाच्चोशनसो मुनेः ।
कामार्थः परिहीनो वै तप्येऽहं तेन पुत्रकाः ॥ ४३॥

मामकेन शरीरेण राज्यमेकः प्रशास्तु वः ।

1. क-ख-ग—भिभूतःपुत्रान् स

[1]अहं त्वभिनववयोयुक्तः काममवाप्नुयाम् ॥ ४४॥
न ते तस्य प्रत्यगृह्णन् यदुप्रभृतयो जराम् ।
तमब्रवीत्ततः पूरुः कनीयान्सत्यविक्रमः ॥ ४५॥
राजंश्चराभिनववयाः कामान्यौवनगोचरान् ।
अहं जरां समास्थाय राज्ये स्थास्यामि तेज्ञया ॥ ४६॥
एवमुक्तस्स राजर्षिस् तपोवीर्यसमाश्रयात् ।
संचारयामास जरां तदा पुत्रे महात्मनि ॥ ४७॥
पौरवेणाथ वयसा राजा यौवनमास्थितः ।
यायातेनापि वयसा राज्यं पूरुरकारयत् ॥ ४८॥
ययातिरपि पत्नीभ्यां दीर्घकालं विहृत्य च ।
विश्वाच्या सहितो रेमे पुनश्चैत्ररथे वने ॥ ४९॥
नाभ्यगच्छत्तदा तृप्तिं कामानां स महायशाः ।
अवेक्ष्य मनसा तथ्याम् इमां गाथां ततो जगौ ॥ ५०॥
न जातु कामः कामानाम् उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ५१॥
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवस्त्रियः ।
नालमेकस्य तत्सर्वम् इति मत्वा शमं व्रजेत् ॥ ५२॥
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।

1. क-ख-ग—अहं तन्वाऽभिनवया युवा

कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ५३॥
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ ५४॥
इत्यवेक्ष्य महाराजः कामानां फल्गुतां नृप ॥ ५५
ततो वर्षसहस्रान्ते ययातिरपराजितः ।
अतृप्त एव कामानां पूरुं पुत्रमुवाच ह ॥ ५६
त्वया दायादवानस्मि त्वं मे वंशकरस्सुतः ।
पौरवोऽयं वंश इति ख्यातिं लोके गमिष्यति ॥ ५७
ततस्स नृपशार्दूल पूरुं राज्येऽभिषिच्य च ।
कालेन महता पश्चात् कालधर्ममुपेयिवान् ॥ ५८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ ७ ॥ संभवपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ५८ श्लोकाः]

॥ अथ षष्टितमोऽध्यायः ॥

ययातिचरित्रोपक्रमः ॥ १॥ कचेन शुक्रात्सञ्जीविनीविद्याप्राप्तिः॥२॥ शुक्रेण सुरापाननिषेधः ॥ ३ ॥

जनमेजयः—
ययातिः पूर्वजोऽस्माकं दशमो यः प्रजापतेः ।
कथं स शुक्रतनयां लेभे परमदुर्लभाम् ॥ १

एतदिच्छाम्यहं श्रोतुं [1]वदतो द्विजसत्तम ।
आनुपूर्व्येण ये चान्ये राजानो वंशधारिणः ॥ २

वैशंपायनः—

ययातिर्नाहुषो राजा देवराजसमः क्षितौ ।
तं शुक्रवृषपर्वाणौ वव्राते वरमुत्तमम् ॥ ३

तत्तेऽहं संप्रवक्ष्यामि पृच्छते जनमेजय ।
देवयान्याश्च संयोगं ययातेर्नाहुषस्य च ॥ ४

सुराणामसुराणां च भेदो वै समजायत ।
ऐश्वर्यं प्रति संघर्षात् त्रैलोक्यस्य च कारणात् ॥ ५

देवा दैत्यैर्योत्स्यमाना वव्रिरेऽङ्गिरसं मुनिम् ।
पौरोहित्येन राज्यार्थं काव्यमौशनसं परे ॥ ६

ब्राह्मणौ तावुभौ नित्यम् अन्योन्यस्पर्धिनौ भृशम् ॥ ६॥
तत्र देवा निजघ्नुर्यान् दानवान् युधि संगतान् ।
तान्पुनर्जीवयामास काव्यो विद्याबलाश्रयात् ॥ ७॥
ततस्ते पुनरुत्थाय योधयांचक्रिरे सुरान् ॥ ८

असुरास्तु निजघ्नुर्यान् सुरान्समरमूर्धनि ।
तान्नैवं जीवयामास बृहस्पतिरुदारधीः ॥ ९

न हि वेद स तां विद्यां यां काव्यो वेत्ति वीर्यवान् ।

1. अ—व्यासतो

सञ्जीविनीं ततो देवा विषादमगमन् परम् ॥ १०

ते देवास्तु भयोद्विग्नाः काव्यादौशनसात्तदा ।
ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ॥ ११

भजमानान्भजस्वास्मान् कुरु साह्यमनुत्तमम् ॥ ११॥

या वै विद्या निवसति ब्राह्मणेऽमिततेजसि ।
शुक्रे तामाहर क्षिप्रं भागभाङ्नो भविष्यसि ॥ १२॥

वृषपर्वसमीपे तु शक्तो द्रष्टुं त्वया द्विजः ॥ १३

रक्षते दानवांस्तत्र न स रक्षत्यदानवान् ।
तमाराधयितुं शक्तो भवान्पूर्ववया मुनिः ॥ १४

देवयानीमौशनसीं भक्त्याऽऽराधय सुव्रत ॥
त्वमाराधयितुं शक्तो नान्यः कश्चन विद्यते ॥ १५

शीलदाक्षिण्यमाधुर्यैर् आचारैश्च दमेन च ।
देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवम् ॥ १६

तथेत्युक्त्वा कचः प्रायान्मुहूर्ते लघुमात्रके ।
तदा हि पूजितो देवैस् समीपं वृषपर्वणः ॥ १७

स गत्वा त्वरितो राजन् देवैस्संप्रेषितः कचः ।
असुरेन्द्रपुरे शुक्रम् अभिवाद्येदमब्रवीत् ॥ १८

ऋषेरङ्गिरसः पौत्रः पुत्रश्चाहं बृहस्पतेः ।
नाम्ना कच इति ख्यातं शिष्यं गृह्णातु मां भवान् ॥ १९

ब्रह्मचर्यं चरिष्यामि त्वत्समीपे यदात्थ माम् ।
अनुमन्यस्व मां ब्रह्मन् सहस्रं परिवत्सरम् ॥ २०

शुक्रः—

कच स्वागतमद्याहम् अभिगृह्णामि ते वचः ।
अर्चयिष्येऽहमर्च्यं त्वाम् अर्चितोऽस्तु बृहस्पतिः ॥ २१

वैशंपायनः—

कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम् ।
आदिष्टं भृगुपुत्रेण शुक्रेणोशनसा स्वयम् ॥ २२

व्रतं तु व्रतकाले स यथोक्तं स गृहीतवान् ।
आराधयन्नुपाध्यायं देवयानीं च भारत ॥ २३
नित्यमाराधयिष्यंस्तां युवा यौवनगां मुनिः ॥ २३॥

[1]संप्रीणयन्देवयानीं कन्यां संप्राप्तयौवनाम् ।
पुष्पैः फलैः प्रेषणैश्च तोषयामास भार्गवीम् ॥ २४॥

तत्सहस्रं गुरुगवां रक्षित्वा वन्यमाहरत् ।
गायन्नृत्यंश्च बहुशो देवयानीमतोषयत् ॥ २५॥

देवयान्यपि तं विप्रं नियतव्रतचारिणम् ।
अनुगायमाना ललना रहः पर्यचरत्तथा ॥ २६॥

गाय[2]कं चैव नृत्यन्तं दातारं प्रियवादिनम् ।

---

1. क-ख-ग—स शीलयन्
2. क-ख-ग—न्तं चैव शुल्कं च (श्लक्ष्णं च)

नार्यो नरं कामयन्ते रूपिणं स्रग्विणं तथा ॥ २७॥

पञ्चवर्षशतान्येवं कचस्य चरतो व्रतम् ।
तत्रातीयुरथो बुद्ध्वा दानवास्तं ततः कचम् ॥ २८॥

ततस्ते गास्तु रक्षन्तं दानवास्संशितव्रतम् ।
जघ्नुर्बृहस्पते रोषाद् विद्यारक्षार्थमेव च ॥ २९॥

हत्वा सालावृकेभ्यस्तं प्रायच्छंस्तिलशः कृतम् ॥ ३०
ततो गावो निवृत्तास्ता अगोपास्त्वं निवेशनम् ॥ ३०॥

सा दृष्ट्वा रहिता गास्तु कचेनाभ्यागता वनात् ।
उवाच वचनं काले देवयान्यथ भारत ॥ ३१॥

देवयानी—

आहुतं चाग्निहोत्रं ते सूर्यश्चास्तं गतः प्रभो ।
अगोपाश्चागता गावः कचस्तात न दृश्यते ॥ ३२॥

व्यक्तं हतो मृतो वापि कचस्तात भविष्यति ।
तं विना न च जीवेयं कचं सत्यं ब्रवीमि ते॥॥ ३३॥

शुक्रः—

अमुमेहीति शब्देन कचं संजीवयाम्यहम् ॥ ३४

वैशंपायनः—

ततस्संजीविनीं विद्यां प्रयुज्य कचमाह्वयत् ॥ ३४॥

भित्त्वा भित्त्वा शरीराणि वृकाणां स विनिष्पतत् ॥ ३५

आहूतः प्रादुरभवत् कचो हृष्टोऽथ विद्यया ।
हतोऽहमिति चाचष्ट पृष्टो भार्गवकन्यया ॥ ३६

कचः—

समित्पुष्पकुशादीनि काष्ठभारं च भामिनि ।
गृहीत्वा श्रमभारार्तो वटवृक्षं समाश्रितः ॥ ३७

गावश्च सहितास्सर्वा वृक्षच्छायामुपाश्रिताः ।
असुरास्तत्र मां दृष्ट्वा कस्त्वमित्यभ्यचोदयन् ॥ ३८

बृहस्पतिसुतश्चाहं कच इत्यभिविश्रुतः ।
इत्युक्तमात्रे मां [1]जघ्नुश् शतशश्च समन्ततः ॥ ३९

दत्त्वा सालावृकेभ्यस्ते सुखं जग्मुस्स्वमालयं ।
आहूतो विद्यया भद्रे भार्गवेण महात्मना ॥ ४०
त्वत्समीपमिहायातः कथंचिद्धृतजीवितः ॥ ४०॥

स पुनर्देवयान्योक्तः पुष्पाण्याहर मे द्विज ॥ ४१
तथा सोऽपि गतः [2]केचिद् दानवास्तं ददर्शिरे ॥ ४१॥

पुनस्तं [3]बाधयित्वाऽऽशु समुद्रेऽम्भस्यमज्जयन् ॥ ४२
गते पुनः कचे कन्या पित्रे तं संन्यवेदयत् ॥ ४२॥

विप्रेण पुनराहूतो विद्यया ब्राह्मणेन सः ।

---

1. क-ख-ग—हत्वा पेषीकृत्वा च दानवाः ॥
2. क-ख-ग—काले दानवा ददृशुर्वने ।
3. क-ख-ग—पेषयित्वा तु समुद्रेऽम्भस्यभिश्रयन् ।

पुनरागम्य तद्वृत्तं न्यवेदयत तत्तथा ॥ ४३॥

देवयानी पुनस्तं तु कदाचिद्वन्यमाहर ।
उक्तोऽगच्छद्वनं तत्र ददृशुर्दानवाः पुनः ॥ ४४॥

ततस्तृतीये हत्वा तं दग्ध्वा पिष्ट्वा च चूर्णशः ।
प्रायच्छन् ब्राह्मणायैव सुरापायासुरास्तथा ॥ ४५॥

[1]देवयानी शङ्कमाना दृष्ट्वा पितरमब्रवीत् ।
पुष्पाहारः प्रेषणकृत् कचस्तात न दृश्यते ॥ ४६॥

व्यक्तं हतो मृतो वापि कचस्तात महातपाः ॥ ४७

[2]शुक्रः—

विद्ययोत्थाप्यमानोऽपि नाभ्येति करवाणि किम् ।

बृहस्पतेस्सुतः पुत्रि कचः प्रेतगतिं गतः ॥ ४८
विद्यया जीवितो ह्येष नागतः करवाणि किम् ॥ ४८॥

तन्मा शुचो मा रुदो देवयानि
न त्वादृशी मर्त्यमनुप्रशोचेत् ।

---

1. क-ख-ग—अपिबत्सुरया सार्धं कचभस्म भृगूद्वहः ।
सा सायन्तनवेलायाम् अगोपा गास्समागताः ॥
[अधिकः पाठः]

2. ख—श्रुत्वा पुत्रीवचः काव्यो मन्त्रेणाहूतवान्कचम् ।
ज्ञात्वा बहिष्ठमज्ञात्वा स्वकुक्षिस्थं कचं नृप ॥
[अधिकः पाठः]

सुराश्च विश्वे च जगच्च सर्वम्
उपस्थितां वैकृतिमामनन्ति ॥ ४९॥

देवयानी—
यस्याङ्गिरा वृद्धतमः पितामहो
बृहस्पतिश्चापि पिता महर्षिः ।
ऋषेः पुत्रं तव शिष्यं कथं तु
पितर्न शोचामि कथं न रुद्याम् ॥ ५०॥

स ब्रह्मचारी च तपोधनश्च
नित्योत्थितः कर्मसु चैव दक्षः ।
कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये
प्रियो हि मे तात कचोऽभिरूपः ॥ ५१॥

शुक्रः—
असंशयं मामसुरा द्विषन्ति
ये शिष्यं मेऽनागसं सूदयन्ति ॥ ५२
अब्राह्मणं लोकमिच्छन्ति पापा
रौद्रा यथा वा प्रस्तुतान्दानवैर्हि ।
अप्यस्य पापस्य भवेदिहान्तः
कं ब्रह्महत्या न दहे[1]द्धि तूर्णम् ॥ ५३

वैशंपायनः—
संचोदितो देवयान्या महर्षिः पुनराह्वयत् ।

1. क-ख-ग—दपीन्द्रम्।

संरम्भेणैव काव्यो हि बृहस्पतिसुतं कचम् ॥ ५४

कचोऽपि राजन् स महानुभावो
विद्याबलाल्लब्धमतिर्महात्मा ।
गुरोर्हितो विद्यया चोपहूतश्
शनैर्वाक्यं जठरे व्याजहार ॥ ५५

कचः—

प्रसीद भगवन्मह्यं कचोऽहमभिवादये ।
यथा बहुमतः पुत्रस् तथा मन्यतु मां भवान् ॥ ५६

वैशंपायनः—

तमब्रवीत्केन पथोपनीतो
ममोदरे तिष्ठसि ब्रूहि विप्र ।
अस्मिन्मुहूर्ते ह्यसुरान्विनाश्य
गच्छामि देवानहमद्य विप्र ॥ ५७

कचः—

तव प्रसादान्न जहाति मां स्मृतिः
[1]स्मरे च सर्वं यथावद्वेद्मि वृत्तम् ।
नत्वेव तु स्यात्तपसो व्ययो मे
ततः क्लेशं घोरमिमं सहामि ॥ ५८

असुरैस्सुरायां भवतोऽस्मि दत्तो
हत्वा दग्ध्वा चूर्णयित्वा च काव्य ।

1. क-ख-ग—सर्वैस्सर्वं वेद्मि यथा च वृत्तम् ।

ब्राह्मीं मायामासुरी त्वद्य माया
त्वयि स्थिते कथमेवातिवर्तेत् ॥ ५९

शुक्रः—

किं ते प्रियं करवाण्यद्य वत्से
वधेन मे जीवितं स्यात्कचस्य ।
नान्यत्र कुक्षेर्मम भेदाद्विदृश्येत्
कन्ये कचो मद्गतो देवयानि ॥ ६०

देवयानी—

द्वौ मे शोकावग्निकल्पौ दहेतां
कचस्य नाशस्तव चैवोपघातः ।
कचस्य नाशे मम शर्म नास्ति
तवोपघाते जीवितुं नास्मि शक्ता ॥ ६१

शुक्रः—

संसिद्धिरूपोहि बृहस्पतेस्सुतस्
स त्वां भक्तो भजते देवयानी ।
विद्यामिमां प्राप्नुहि जीविनीं त्वं
न चेदिन्द्रः कचरूपी त्वमद्य ॥ ६२

न निवर्तेत्पुनर्जीवन् कश्चिदन्यो ममोदरात् ।
ब्राह्मणं वर्जयित्वैव तस्माद्विद्यामवाप्नुहि ॥ ६३

पुत्रो भूत्वा भावय भावितो माम्
अस्मच्छरीरादुपनिष्क्रम्य तात ।
समीक्षेथा धर्मवतीमवेक्षां
गुरोस्सकाशात्प्राप्य विद्यां सविद्यः ॥ ६४

वैशंपायनः—

गुरोस्सकाशात्समवाप्य विद्यां
भित्त्वा पार्श्वं निर्विचक्राम विप्रः ।
कचोऽभिरूपो दक्षिणं ब्राह्मणस्य
शुक्लात्यये पौर्णमास्यामिवेन्दुः ॥ ६५

दृष्ट्वा शयानं ब्राह्मणं ब्रह्मराशिम्
उत्थापयामास मृतं कचोऽपि ।
विद्यां सिद्धां तामवाप्याभिवाद्य
ततः कचस्तं गुरुमित्युवाच ॥ ६६

कचः—

यः श्रोत्रयोरमृतं सन्निषिञ्चेद्
विद्यामविद्यस्य यथा मम त्वम् ।
तं मन्येऽहं पितरं मातरं च
तस्मै न द्रुह्येत्कृतमस्य जानन् ॥ ६७

ऋतस्य दातारमनुत्तमस्य
निधिं निधीनां चतुरन्वयानाम् ।

ये नाद्रियन्ते गुरुमर्चनीयं
पापांलोकांस्ते व्रजन्त्यप्रतिष्ठाः ॥ ६८

वैशंपायनः—

श्रृण्वत्सु भूतेष्विदमाह काव्यः
समुत्थितो ब्रह्मराशिः पुराणः ।
सुरापानाद्ब्रह्मनां प्राप्य तीव्रां
संज्ञानाशं च ययौ नृशंसम् ॥ ६९

दृष्ट्वा कचं चापि तथा सजीवितं
पीत्वा सुरां सुरया मोहितस्सन् ।
समन्युरुत्थाय महानुभावस्
तदोशना विप्रहितं चिकीर्षुः ॥ ७०

काव्यस्स्वयं वाक्यमिदं जगाद
सुरापानं वै प्रतिशङ्कमानः ॥ ७०॥

यो ब्राह्मणोऽद्यप्रभृतीह कश्चि-
न्मोहात्सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मो ब्रह्महा चैव स स्याद्
अस्मिंल्लोके गर्हितस्स्यात्परे च ॥ ७१॥

मया चेमां विप्रधर्मोक्तसीमां
मर्यादां वै स्थापितां सर्वलोके ।

सन्तो विप्राश्शुश्रुवांसो गुरूणां
देवा लोकाश्चापि शृण्वन्तु सर्वे ॥ ७२॥

इतीदमुक्त्वा तु महानुभावस्
तपोनिधीनां निधिरप्रमेयः ।
तान्दानवान्देवविमूढबुद्धीन्
इदं समाहूय ततोऽभ्युवाच ॥ ७३॥

आचक्षे वो दानवा बालिशास्थ
सिद्धः कचो यास्यति मत्सकाशे ।
सञ्जीविनीं प्राप्य विद्यां महार्थां
तुल्यप्रभावो ब्रह्मणा ब्रह्मभूतः ॥ ७४॥

योऽकार्षीद्दुष्करं कर्म देवानां कारणात्कचः ।
न च कीर्तिर्जरां गच्छेद् याज्ञीयश्च भविष्यति ॥ ७५॥

गुरोरुष्य सकाशे तु दश वर्षशतानि च ।
अनुज्ञातः कचो गन्तुम् इयेष त्रिदशालयम् ॥ ७६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

॥ ७ ॥ संभवपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[अस्मिन्नध्याये ७६॥ श्लोकाः ।]

॥ एकषष्टितमोऽध्यायः ॥

कचदेवयान्योः परस्परशापदानम् ॥ १ ॥

वैशंपायन.—

समावृत्तव्रतं तं तु विसृष्टं गुरुणा कचम् ।
प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदम् ॥ १

ऋषेरङ्गिरसः पौत्र वृत्तेनाभिजनेन च ।
भ्राजसे विद्यया चैव तपसा च [1]दमेन च ॥ २

ऋषिर्यथाङ्गिरा मान्यः पितुस्तव महातपाः ।
तथा मान्यश्च पूज्यश्च तव भूयो बृहस्पतिः ॥ ३

एवं ज्ञात्वा विजानीहि यद्ब्रवीमि तपोधन ।
व्रतस्थे नियमोपेते यथा वर्ताम्यहं त्वयि ॥ ४

स समावृत्तविद्यो मां भक्तां भजितुमर्हसि ।
गृहाण पाणिं विधिवन्मम मन्त्रपुरस्कृतम् ॥ ५

कचः—

पूज्यो मान्यश्च भगवान् यथा तव पिता मम ।
तथा त्वमनवद्याङ्गि पूजनीयतमा मम ॥ ६

आत्मप्राणैः प्रिय[2]तमा भार्गवस्य शुचिस्मिते ।

---

1. अ—श्रुतेन च
2. क-ख-ग—तरा भार्गवस्य महात्मनः ।

त्वं भद्रे [1]धर्मतः पूज्या गुरुपुत्री मता मम ॥ ७
गुरोर्गरीयसी विद्या तस्माद्गुरुतरा मम ।
न मामर्हसि कल्याणि वक्तुमेवं शुचिस्मिते ॥ ८
यथा मम गुरुर्नित्यं मान्यश्शुक्रः पिता तव ।
देवयानि तथा त्वं हि नैवं वक्तुमिहार्हसि ॥ ९

देवयानी—

गुरुपुत्रस्य पुत्रो हि ननु त्वमसि मे पितुः ।
तस्मान्मान्यश्च पूज्यश्च ममापि त्वं द्विजोत्तम ॥ १०
असुरैर्हन्यमाने च कच त्वयि पुनः पुनः ।
तदाप्रभृति या प्रीतिस् तां त्वं मा विस्मरस्व मे ॥ ११
सौहृदेनानुरक्तां च भक्तां भजितुमर्हसि ।
न मामर्हसि धर्मज्ञ त्यक्तुं भक्तामनाथवत् ॥ १२

कचः—

अनियोज्ये नियोक्तुं मां देवयानि न चार्हसि ।
प्रसीद मह्यं सुभ्रु त्वं गुरोर्गुरुतरा शुभे ॥ १३
यत्रोषितं विशालाक्षि त्वया चन्द्रनिभानने ।
तत्राहमुषितो भद्रे कुक्षौ काव्यस्य भामिनि ॥ १४
मम त्वं भगिनी भद्रे मैवं वोचश्शुभानने ।
सुखमस्म्युषितो भद्रे न मन्युर्विद्यते मम ॥ १५

1. क-ख-ग--सर्वतः पूज्या गुरुपुत्रि सदा मम ।

आपृच्छे त्वां गमिष्यामि शिवमाशंस मे पथि ।
अविरोधेन धर्मस्य स्मर्तव्योऽहं कथान्तरे ॥ १६
अप्रमत्तोत्थिता नित्यम् आराधय गुरुं मम ॥ १६॥

देवयानी—

[1]धर्मकार्ये तु युञ्जाना कन्या संप्राप्तयौवना ।
धर्ममेव प्रयुञ्जाना प्रत्याख्याता त्वयानघ ॥ १७॥
तस्मात् कच न ते विद्या सिद्धिमेषा गमिष्यति ॥ १८

कचः—

गुरुपुत्रीति कृत्वाऽहं प्रत्याचक्षे न दोषतः ।
गुरुणा चाननुज्ञातो धर्मतः प्रब्रवीम्यहम् ॥ १९
आर्षं धर्मं ब्रुवाणोऽहं देवयानि यथा त्वया ।
शप्तोऽ[2]स्म्यनर्हश्शापस्य कामतोऽस्मि न धर्मतः ॥ २०
तस्माद्भवत्या यः कामो न तथा स भविष्यति ।
ऋषिपुत्रो न ते कश्चिद् द्विजः पाणिं ग्रहीष्यति ॥ २१
फलिष्यति च वै विद्या नेति यच्चात्थ मामिह ।
अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति ॥ २२

वैशंपायनः—

एवमुक्त्वा द्विजश्रेष्ठो देवयानीं कचस्तदा ।

---

1. क-ख-ग—यदि मां धर्मकामार्थं त्वं प्रत्याख्यास्यसि चेदिह । [अधिकः पाठः]
2. क-ख-ग—ह्यनर्थः पापस्य कामतोऽद्य

त्रिदशेशालयं शीघ्रं जगाम द्विजसत्तमः ॥ २३

तमागतमभिप्रेत्य देवा इन्द्रपुरोगमाः ।
[1]बार्हस्पत्यं सभाज्येदं कचमाहुर्मुदान्विताः ॥ २४

देवाः—

यत्त्वमस्माद्धितं कर्म कृतवान् परमाद्भुतम् ।
न ते यशो जरां गन्ता भागभाक्त्वं भविष्यसि ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

॥ ७ ॥ संभवपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[अस्मिन्नध्याये २५ श्लोकाः]

॥ द्विषष्टितमोऽध्यायः ॥

वस्त्रमिश्रणेन शर्मिष्ठादेवयान्योर्विवादः ॥ १ ॥ शर्मिष्ठया देवयान्याः कूपे पातनम् ॥ २ ॥ ययातिना कूपादुद्धरणं देवयान्याः ॥ ३॥

वैशंपायनः—

कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः ।
कचादधीत्य तां विद्यां कृतार्था भरतर्षभ ॥ १

ततो देवास्समागम्य शतक्रतुमथाब्रुवन् ।
कालस्ते विक्रमस्या[2]यं यथा श्रेष्ठो भविष्यसि ॥ २

---

1. क-ख-ग—बृहस्पतिं 2. क-ख-ग—य जहि शत्रून् पुरन्दर ।

एवमुक्तस्तु [1]भगवान् सह तैस्त्रिदिवेश्वरः ।
तथेत्युक्त्वापचक्राम सोऽपश्यत वने स्त्रियः ॥ ३

क्रीडन्तीनां तु कन्यानाम् आरामे नन्दनोपमे ।
वायुभूतस्स वस्त्राणि सर्वाण्येव व्यमिश्रयत् ॥ ४

ततो जलात्समुत्तीर्य कन्यास्तास्सहितास्तदा ।
वस्त्राणि जगृहुस्तानि यथाऽऽसन्नान्यनेकशः ॥ ५

तत्र वासो देवयान्याश् शर्मिष्ठा जगृहे तदा ।
[2]मतिभ्रमादजानन्ती दुहिता वृषपर्वणः ॥ ६

ततस्तयोर्मिथस्तत्र विरोधस्समजायत ।
देवयान्याश्च राजेन्द्र शर्मिष्ठायाश्च तत्कृते ॥ ७

देवयानी—

कस्माद्गृह्णासि मे वस्त्रं शिष्यभूता ममासुरि ।
[3]संमताचारहीनाया न ते श्रेयो भविष्यति ॥ ८

शर्मिष्ठा—

आसीनं च शयानं च पिता ते पितरं मम ।
स्तौति वन्दति चाभीक्ष्णं नीचैस्स्थित्वा विनीतवत् ॥ ९

स्तुवतो दुहिता त्वं वै याचतः प्रतिगृह्णतः ।
सुताहं स्तूयमानस्य ददतोऽप्रतिगृह्णतः ॥ १०

---

1. क-ख-ग —सहितस्त्रिदशैर्मघवांस्तदा ।
2. क-ख-ग—व्यतिक्रमम 3. क-ख-ग—समुदा

आधून्वस्व विधून्वस्व दुह्य कुप्य च या किल ।
अनायुधा सायुधाया रिक्ता क्षुभ्यसि भिक्षुकी ॥ ११
लप्स्यसे प्रतियोद्धारं न च त्वां गणयाम्यहम् ।
प्रतिकूलं वदसि चेद् इतःप्रभृति याचकि ॥ १२
आकृष्य मम दासीभिः प्रस्थाप्यसि बहिर्बहिः ॥ १२॥

वैशंपायनः—

तां मूर्च्छितां देवयानीं हत्वा हत्वा च वाससी ।
शर्मिष्ठा प्राक्षिपत् कूपे ततस्त्वंपुरमाविशत् ॥ १३॥
हतेयमिति विज्ञाय शर्मिष्ठा पापनिश्चया ।
अनवेक्ष्य ययौ वेश्म क्रोधवेगपरायणा ॥ १४॥
प्रविश्य स्वगृहं स्वस्था धर्ममासुरमास्थिता ॥ १५
अथ तं देशमागच्छद् ययातिर्नहुषात्मजः ।
श्रान्तयुग्यहयश्श्रीमान् मृगलिप्सुः पिपासितः ॥ १६
स नाहुषः प्रेक्षमाण उदपानं गतोदकम् ।
ददर्श कन्यां रूपेण दीप्तामग्निशिखामिव ॥ १७
तां दृष्ट्वा रूपसम्पन्नां सर्वालङ्कारभूषिताम् ।
सर्वलक्षणसम्पन्नाम् अपृच्छत्स नराधिपः ॥ १८
तामपृच्छत्स दृष्ट्वैव कन्याममरवर्चसम् ।
सान्त्वयित्वा नरश्रेष्ठ उवाच परवल्गुना ॥ १९

ययातिः—

का त्वं ताम्रनखा श्यामा सुमृष्टमणिकुण्डला ।
दीर्घं ध्यायसि चात्यर्थं कस्माच्छ्वसिषि चातुरा ॥ २०
कथं च पतिताद्यस्मिन् कूपे वीरुत्तृणावृते ।
शुभे सुता वै कस्य त्वं वद सर्वं सुमध्यमे ॥ २१

देवयानी—

यो देवैर्निहतान् दैत्यान् उत्थापयति विद्यया ।
तस्य शुक्रस्य कन्याऽहम् इदमासादितं मया ॥ २२
पृच्छसे मां कस्त्वमसि रूपवीर्यबलान्वितः ।
ब्रूह्यत्रागमनं किं वा श्रोतुमिच्छामि तत्त्वतः ॥ २३

ययातिः—

अहं ययातिर्नाहुषश् श्रान्तोऽद्य मृगलिप्सया ।
कूपे तृणावृते भद्रे दृष्टवानस्मि त्वामिह ॥ २४

देवयानी—

एष मे दक्षिणो राजन् पाणिस्ताम्रनखाङ्गुलिः ।
समुद्धर गृहीत्वा तं कुलीनस्त्वं हि मे मतः ॥ २५
भूयोऽपि त्वामुपागम्य वीर्यवन्तं मनस्विनम् ।
अस्मान्मां संशयाद्राजन् मोक्षयाशु विशांपते ॥ २६

वैशंपायनः—

स्त्री चैषा ब्राह्मणी चेति विज्ञायैनां स नाहुषः ।

गृहीत्वा दक्षिणं पाणिम् उज्जहार ततोऽवटात् ॥ २७
उद्धृत्य चैनां तरसा तस्मात्कूपान्नराधिपः ।
गच्छ भद्रे यथाकामं न भयं विद्यते तव ॥ २८
इत्युच्यमाना नृपतिं देवयानी तमुत्तरम् ।
उवाच मां त्वमादाय गच्छ शीघ्रं प्रियो हि मे ॥ २९
गृहीताहं त्वया पाणौ तस्माद्भर्ता भविष्यसि ॥ २९॥
इत्येवमुक्तो नृपतिर् आह क्षत्रकुलोद्भवः ।
त्वं भद्रे ब्राह्मणी तस्मान्मया नार्हसि सङ्गमम् ॥ ३०॥
सर्वलोकगुरुः काव्यस् त्वं तस्य दुहिताऽसि वै ।
तस्मादपि भयं मेऽद्य तस्मात्कल्याणि नार्हसि ॥ ३१॥

देवयानी—

यदि मद्वचनादद्य मां नेच्छसि नराधिप ।
त्वामेव वरये पित्रा पश्चाज्ज्ञास्यसि गच्छसि ॥ ३२॥

वैशंपायनः—

अमन्त्रयित्वा सुश्रोणीं ययातिस्स्वपुरं ययौ ॥ ३३
नृपे तु गतमात्रे सा देवयानी शुचिस्मिता ।
क्वचिदार्ता च रुदती वृक्षमाश्रित्य तिष्ठति ॥ ३४
[1]चिरायितायां दुहितरि भगवानाह भार्गवः ।
धात्रि त्वमानय क्षिप्रं देवयानीं शुचिस्मिताम् ॥ ३५

1. क-ख-ग—ततश्चिरायमाणां तु दुहितारं द्विजोत्तम ।

इत्युक्तमात्रे सा धात्री त्वरिता ह्रयितुं गता ॥ ३५॥
यत्र यत्र सखीभिस्सा गता पदममार्गत ॥ ३६
सा ददर्श तथा दीनां श्रमातां रुदतीं स्थिताम् ॥ ३६॥

धात्री—

वृत्तं ते किमिदं भद्रे शीघ्रं वद पिताऽऽह्वयत् ।
धात्रीमाह समाहूय शर्मिष्ठा वृजिनं कृतम् ॥ ३७॥

देवयानी—

त्वरितं चूर्णिके गच्छ सर्वमाचक्ष्व मे पितुः ।
नहीदानीं प्रवेक्ष्यामि नगरं वृषपर्वणः ॥ ३८॥

वैशंपायनः—

[1]त्वरितं चूर्णिका गत्वा प्रविवेश पुरोत्तमम् ।
[2]द्विजप्रवरमासाद्य वचनं चेदमब्रवीत् ॥ ३९॥
आचचक्षे महा[3]प्राज्ञं देवयानीं वने हताम् ।
शर्मिष्ठया महाभाग दुहित्रा वृषपर्वणः ॥ ४०॥
श्रुत्वा दुहितरं [4]काव्यो हतां शर्मिष्ठया ततः ।
[5]त्वरमाणोऽनु मार्गान् स निश्चक्राम पुरोत्तमात् ॥ ४१॥

1. क-ख-ग—सा तदा त्वरितं गत्वा चूर्णिकाऽसुरमन्दिरम् ।
2. क-ख-ग—दृष्ट्वा काव्यमुवाचेदं संभ्रमाविष्टचेतना ॥
3. क-ख-ग—प्राज्ञ देवयानी वने हता ।
4. क-ख-ग—काव्यस्तत्र शर्मिष्ठया हताम् ।
5. क-ख-ग—त्वरया निर्ययौ दुर्गान्मार्गमाणस्सुतां वने ॥

सोऽनुगत्वा पदं दुःखान्मार्गमाणस्सुतां वने ॥ ४२
दृष्ट्वा दुहितरं काव्यो देवयानीं तदा वने ।
बाहुभ्यां संपरिष्वज्य दुःखितो वाक्यमब्रवीत् ॥ ४३
आत्मदोषैर्हि गच्छन्ति सर्वे दुःखसुखे जनाः ।
पुरा दुश्चरितं मन्ये तस्मात्ते निष्कृतिः कृता ॥ ४४

देवयानी—

दुष्कृतिर्वास्तु वा मास्तु शृणुष्वावहितो मुने ॥ ४४॥
शर्मिष्ठया यदुक्तं दुहित्रा वृषपर्वणः ।
सत्यं किलैतत् स्तोता त्वं दैत्यानामसि गायकः ॥ ४५॥
एवं मामाह शर्मिष्ठा शिष्या तव महामुने ॥ ४६
एवं हि मे कथयति शर्मिष्ठा वार्षपर्वणी ।
वचनं तीक्ष्णपरुषं क्रोधरक्तेक्षणं भृशम् ॥ ४७
स्तुवतो दुहिताऽसि त्वं याचतः प्रतिगृह्णतः ।
सुताहं स्तूयमानस्य ददतोऽप्रतिगृह्णतः ॥ ४८
इति मामाह शर्मिष्ठा दुहिता वृषपर्वणः ।
क्रोधसंरक्तनयना दर्पपूर्णानना ततः ॥ ४९
यद्यहं स्तुवतस्तात दुहिता प्रतिगृह्णतः ।
प्रह्लादयिष्ये शर्मिष्ठाम् इत्युक्ता हि सखी मया ॥ ५०
उक्ताप्येवं भृशं क्रुद्धा मां गृह्य विजने वने ।

कूपे प्रक्षेपयामास प्रक्षिप्यैव गृहं ययौ ॥ ५१

शुक्रः—

स्तुवतो दुहिता न त्वं वन्दिनः प्रतिगृह्णतः ।
अस्तोतुस्स्तूयमानस्य दुहिता देवयान्यसि ॥ ५२

वृषपर्वा च तद्वेद शक्रो राजा च नाहुषः ।
अचिन्त्यं ब्रह्म निर्द्वन्द्वम् ऐश्वर्यं हि फलं मम ॥[1] ५३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥

॥ ७ ॥ संभवपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[अस्मिन्नध्याये ५३ श्लोकाः]

॥ त्रिषष्टितमोऽध्यायः ॥

शुक्रदेवयानीसंवादः ॥ १ ॥

शुक्रः—

मम विद्या हि निर्द्वन्द्वा ऐश्वर्यं हि फलं मम ।
दैन्यं शाठ्यं च द्वेष्यं च नास्ति मे यदधर्मतः ॥ १

---

1. क-ग—गायन्नाहं तदा वेह न स्तोता न च वन्दिता ।
ब्राह्मणोऽहं च निर्द्वन्द्वमैश्वर्यं हि बलं मम ॥
दैन्यं शाठ्यं च जैह्म्यं च नास्ति मे तत्त्वतश्शुभे ॥
[अधिकः पाठः]

[1]यो वै परेषामाक्रोशान् अतिवादांस्तितिक्षते ।
दैवयानि विजानीहि तेन सर्वमिदं जितम् ॥ २

यस्समुत्पतितं क्रोधं निगृह्णाति भयादिव ।
स यन्तेत्युच्यते सद्भिर् हयो रश्मिषु लम्बते ॥ ३

यस्समुत्पतितं क्रोधम् अक्रोधेन व्यपास्यति ।
यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ ४

यो वै मन्युं धार[2]यते अपवादांस्तितिक्षते ।
यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥ ५

यो[3]यजेताश्वमेधेन मासि मासि शतं समाः ।
तस्मादक्रोधनश्श्रेष्ठः कामक्रोधौ न पूजितौ ॥ ६

क्रुद्धस्य निष्फलान्येव दानयज्ञतपांसि च ।
तस्मादक्रोधने यज्ञतपोदानं महाफलम् ॥ ७

न पूतो न तपस्वी च न यज्वा न च कर्मवित् ।
क्रोधस्य यो वशं गच्छेत् तस्य लोकद्वयं न च ॥ ८

पुत्रभृत्यसुहृन्मित्रभार्या धर्मश्च सत्यता ।
तस्यैतान्यपयास्यन्ति क्रोधशीलस्य निश्चितम् ॥ ९

यं कुमाराः कुमार्यश्च वैरं कुर्युस्स्त्रियोऽपि वा ।

---

1. क-ख-ग—यः परेषां नरो नित्यम
2. क-ख-ग—यति योऽति वादांस्तितिक्षति ।
3. क-ख-ग—यजेत परिश्रान्तो

स तैर्वैरं न कुर्वीत विद्वांस्तस्य तदा बलम् ॥ १०

देवयानी—

वेदाहं तात बालोऽपि धर्माणां यद्यदन्तरम् ।
आक्रोशे चातिवादे च बुध्येऽहं गुरुलाघवम् ॥ ११

[1]अतिप्रवृद्धरोषस्य धर्ममुत्सृज्य तत्त्वतः ।
[2]शिष्यस्याशिष्यवृत्तेर्हि न क्षन्तव्यं बुभूषया ॥ १२

शिष्ये चाचार्यवृत्तिं हि विसृज्य विपथं गते ।
तस्मात्संकीर्णवृत्तेषु वासो मम न रोचते ॥ १३

दह्यमानास्सुतीव्रेण नीचाः परयशोऽग्निना ।
अशक्तास्तद्गतिं गन्तुं ततो निन्दां प्रकुर्वते ॥ १४

पुमांसं येऽभिनिन्दन्ति वृत्तेनाभिजनेन वा ।
न तेषु निवसेत्प्राज्ञश् श्रेयोऽर्थी पापबुद्धिषु ॥ १५

ये त्वेनमभिनन्दन्ति वृत्तेनाभिजनेन वा ।
तेषु साधुषु वस्तव्यं स वासः श्रेष्ठ उच्यते ॥ १६

सुयन्त्रितावरा नित्यं विहीनाश्च धनैर्नराः ।
दुर्वृत्ताः पापकर्माणश् चण्डाला धनिनोऽपि वा ॥ १७

न हि जात्या हि चण्डालास् स्वकर्मविहितैर्विना ।
धनाभिजनविद्यासु सक्ताश्चण्डालधर्मिणः ॥ १८

---

1. क-ख-ग—स्ववृत्तिमननुष्ठाय
2. क-ख-ग—वृत्तिर्हि न क्षन्तव्या बुभूषता ॥

अकारणाद्ये द्विष्यन्ति परिवादं वदन्ति च ।
न तत्रास्य निवासोऽस्ति पाप्मभिः पापतां व्रजेत् ॥ १९

सुकृते दुष्कृते वाऽपि यत्र सज्जति यो नरः ।
ध्रुवं रतिर्भवेत्तत्र तस्माद्दोषं न रोचयेत् ॥ २०

वाचा दुरुक्तं तातेह दुहित्रा वृषपर्वणः ।
नातो दुःखतरं मन्ये त्रिषु लोकेष्वपि ध्रुवम् ॥ २१

निस्संशयो विशेषेण परुषं मर्मकृन्तनम् ।
सुहृन्मित्रजनास्तेषु सौहृदं न च कुर्वते ॥ २२

यस्सपत्ने श्रियं दीप्तां हीनश्रीः पर्युपासते ।
अवमानमवाप्नोति शनैर्नीचेषु सङ्गतः ॥ २३

वाक्सायका वदनान्निष्पतन्ति
यैराहतश्शोचति रात्र्यहानि ।
शनैर्दुःखं शस्त्रविषाग्निजातं
तान्पण्डितो नावसृजेत्परेषु ॥ २४

संरोहति शरैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
॥ ७ ॥ संभवपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

॥ चतुष्षष्टितमोऽध्यायः ॥

शुक्रवृषपर्वणोः संवादः ॥ १ ॥ शर्मिष्ठया देवयानीदास्याङ्गीकारः ॥

वैशंपायनः—

ततः काव्यो गुरुश्रेष्ठस् समन्युरुपगम्य च ।
[1]प्रविश्यान्तः पुरं शुक्रो वन्दितो वृषपर्वणा ॥ १
वृषपर्वाणमासीनम् इत्युवाचाविचारयन् ॥ १॥
अधर्मश्चरितो राजन् सद्यः फलति गौरिव ।
पुत्रेषु वा नप्तृषु वा न चेदात्मनि पश्यति ॥ २॥
फलतीत्यब्रवं पापं गुरुभुक्तमिवोदरे ।
अधीयानं हितं राजन् क्षमावन्तं जितेन्द्रियम् ॥ ३॥
यदघातयथा विप्रं कचमाङ्गिरसं तदा ।
अपापशीलं धर्मज्ञं शुश्रूषुं मद्गृहोषितम् ॥ ४॥
शर्मिष्ठया देवयानी क्रूरमुक्ता बहु प्रभो !
विप्रकृत्य च संरम्भात् कूपे क्षिप्ता मनस्विनी ॥ ५॥
सा न कल्पेत वासाय तया वा रहितः कथम् ।
वसेयमिह तस्मात्ते त्यजामि विषयं नृप ॥ ६॥

1. क-ख-ग—स प्रविश्यासने शुक्रस् सन्दष्टोष्ठपुटो रुषा ।

वृषपर्वन्निबोधेदं त्यक्ष्यामि त्वां सबान्धवम् ।
मा शोचीर्वृषपर्वंस्त्वं मा रुधस्त्वं विशांपते ॥ ७॥

स्थातुं ते विषये राजन् न शक्ष्यामि तया विना ।
तस्या गतिर्गतिर्मह्यं प्रियमस्याः प्रियं मम ॥ ८॥

वृषपर्वा—

यदि ब्रह्मन् घातयामि यदि वा क्रोशयाम्यहम् ।
शर्मिष्ठया देवयानीं तेन गच्छाम्यसद्गतिम् ॥ ९॥

शुक्रः—

अहो मामभिजानासि दैत्य मिथ्याप्रलापिनम् ।
तथेममात्मनो दोषं मयि कर्तुं चिकीर्षसि ॥ १०॥

वृषपर्वा—

नाधर्मं न मृषोक्तं वा त्वयि जानामि भार्गव ।
त्वयि धर्मं च सत्यं च विजानामि प्रसीद मे ॥ ११॥

यद्यस्मानपहाय त्वम् इतो गच्छसि भार्गव ।
समुद्रं संप्रवेक्ष्यामि पूर्वं मद्बान्धवैस्सह ॥ १२॥

पातालमथवा चाग्निं नान्यदस्ति परायणम् ।
यद्येव देवान् गच्छेस्त्वं मां च त्यक्त्वा महाधिप ॥ १३॥
सर्वत्यागं ततः कृत्वा प्रविशामि हुताशनम् ॥ १४

शुक्रः—

समुद्रं प्रविश त्वं वा अग्निं प्रज्वलितं तथा ।
दुहितुर्नाप्रियं सोढुं शक्तोऽहं दयिता हि मे ॥ १५

प्रसाद्यतां देवयानी जीवितं यत्र मे स्थितम् ।
प्रसन्ना देवयानी चेत् प्रियं नान्यतरं मम ॥ १६

योगक्षेमकरस्तेऽहम् इन्द्रस्येव बृहस्पतिः ॥ १६॥

वृषपर्वा—

यत्किंचिदसुरेन्द्राणां वसु विद्यति भार्गव ।
मम हस्तिगवाश्वं च तस्य त्वं मम चेश्वरः ॥ १७॥

शुक्रः—

यत्किंचिदस्ति द्रविणं दैत्येन्द्राणामिहासुर ।
तस्येश्वरोऽहं यदि चेद् देवयानी प्रसाद्यताम् ॥ १८॥

वैशंपायनः—

शुक्रस्य वचनं श्रुत्वा वृषपर्वा सबान्धवः ।
देवयानीं प्रसीदेति पपात भुवि पादयोः ॥ १९॥

देवयानी—

यदि त्वमीश्वरस्तात राज्ञो वित्तस्य भार्गव ।
नाभिजानामि तत्तेऽहं राजा तु वदतु स्वयम् ॥ २०॥

वृषपर्वा—

स्तुत्यो वन्द्यश्च सततं मया तातश्च ते शुभे ॥ २१

यत्काममभिकामाऽसि देवयानि शुचिस्मिते ।
तत्तेऽहं संप्रदास्यामि यदि चेदपि दुस्त्यजम् ॥ २२

देवयानी—

दासीं कन्यासहस्रेण शर्मिष्ठामभिकामये ।
अनुगच्छेत्तु सा मां हि यत्र दास्यति मे पिता ॥ २३

वृषपर्वा—

उत्तिष्ठ हंसगतिके शर्मिष्ठां शीघ्रमानय ।
यच्च कामयते कर्तुं देवयानी करोतु तत् ॥ २४

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ २५

वैशम्पायनः—

ततो धात्री गृहं गत्वा शर्मिष्ठां वाक्यमब्रवीत् ।
उत्तिष्ठ भद्रे शर्मिष्ठे ज्ञातीनां सुखमावह ॥ २६

त्यजति ब्राह्मणश्शिष्यान् देवयान्या प्रचोदितः ।
सा यं कामयते कामं देवयानी कुरुष्व तत् ॥ २७

शर्मिष्ठा—

यं सा कामयते कामं करवाण्यहमद्य तम् ।
मा कश्चोपगमेच्छुक्रो देवयान्या प्रचोदितः ॥ २८

वैशंपायनः—

ततः कन्यासहस्रेण वृता शिबिकया तदा ।
पितुर्नियोगात्त्वरिता निश्चक्राम पुरोत्तमात् ॥ २९

शर्मिष्ठा—

अहं दासीसहस्रेण दासी ते परिचारिका ।
अनु त्वां तत्र यास्यामि यत्र दास्यति ते पिता ॥ ३०

देवयानी—

स्तुवतो दुहिता चाहं वन्दिनः प्रतिगृह्णतः ।
स्तूयमानस्य दुहिता कथं दासी भविष्यसि ॥ ३१

शर्मिष्ठा—

येन केन चिदार्तानां ज्ञातीनां यत्सुखावहम् ।
सर्वमादृत्य कर्तव्यम् एष धर्मस्सनातनः ॥ ३२

एवं कृत्वा करिष्यामि यन्मां वक्ष्यसि शोभने ।
अतस्त्वामनुयास्यामि यत्र दास्यति ते पिता ॥ ३३

वैशंपायनः—

प्रतिश्रुते दासभावे दुहित्रा वृषपर्वणः ।
देवयानी नृपश्रेष्ठ पितरं तमथाब्रवीत् ॥ ३४

देवयानी—

प्रविशाम पुरं तात तुष्टाऽस्मि द्विजसत्तम ।
अमोघं तव विज्ञानम् अस्ति विद्याबलं च ते ॥ ३५

वैशम्पायनः—

एवमुक्तो दुहित्रा स भृगुश्रेष्ठो महातपाः ।
प्रविवेश पुरं हृष्टः पूजितस्सर्वदानवैः ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
॥ ७ ॥ संभवपर्वणि नवमोऽध्यायः ॥ ९ ॥
[अस्मिन्नध्याये ३६ श्लोकाः]

॥ पञ्चषष्टितमोऽध्यायः ॥

शुक्राज्ञया ययातेः शर्मिष्ठा देवयान्योर्विवाहः ॥ १ ॥

वैशंपायनः—

अथ [1]दीर्घेण कालेन देवयानी नृपोत्तम ।
वनं तदेव निर्याता क्रीडार्थं वरवर्णिनी ॥ १

तेन दासीसहस्रेण सार्धं शर्मिष्ठया तदा ।
तमेव देशं संप्राप्ता यथाकामं चचार सा ॥ २

ताभिस्सखीभिस्सहिताः सर्वाभिर्मुदिता भृशम् ।
क्रीडित्वोपरतास्सर्वाः पिबन्त्यो मधु माध्विकम् ॥ ३

खादन्त्यो विविधान् भक्ष्यान् विदंशन्त्यः फलानि च ॥ ३॥

---

1. क-ख-ग—दीर्घस्य कालस्य

पुनश्च नाहुषो राजा मृगलिप्सुः [1]पिपासया ।
तमेव देशं संप्राप्तो जलार्थी श्रमकर्शितः ॥ ४॥
ददर्श देवयानीं च शर्मिष्ठां ताश्च योषितः ।
पिबन्तीर्वलमानाश्च सर्वाभरणभूषिताः ॥ ५॥
आसने प्रवरे दिव्ये सर्वाभरणभूषिते ।
उपविष्टां सुकेशान्तां देवयानीं शुचिस्मिताम् ॥ ६॥
रूपेणाप्रतिमां तासां स्त्रीणां मध्ये वराङ्गनाम् ।
आसनाच्च ततः किंचिद् विहीनां हेमभूषिताम् ॥ ७॥
असुरेन्द्रसुतां चापि निषण्णां चारुहासिनीम् ।
ददर्श पादौ विप्रायास् संवहन्तीमनिन्दिताम् ॥ ८॥
गायन्त्यश्चैव नृत्यन्त्यो वादयन्त्यश्च भारत ।
दृष्ट्वा ययातिं ललना लज्जयाऽवनता स्थिताः ॥ ९॥

ययातिः—

युवां कन्यासहस्रेण द्वे कन्ये परिवारिते ।
गोत्रे च नामधेये च श्रोतुमिच्छामि वामहम् ॥ १०॥

देवयानी—

आख्यास्याम्यहमादत्स्व वचनं मे नरोत्तम ।
शुक्रो नामासुरगुरुस् सुतां जानीहि तस्य माम् ॥ ११॥

1. क-ख-ग—यदृच्छया

इयं च मे सखी दासी यत्राहं तत्र भामिनी ।
दुहिता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः ॥ १२॥

ययातिः—

कथं नु ते सखी दासी कन्येयं वरवर्णिनी ।
नैव देवी न गन्धर्वी न यक्षी न च किन्नरी॥ १३॥

[1]नैवंरूपा मया नारी दृष्टपूर्वा महीतले ।
श्रीरिवायतपद्माक्षी सर्वलक्षणशोभिता ॥ १४॥

असुरेन्द्रसुता कन्या सर्वालङ्कारभूषिता ।
दैवेन विहता सुभ्रूर् उताहो तपसाऽपि वा ॥ १५॥

अन्यथैषाऽनवद्याङ्गी दासी [2]ते न भविष्यति ॥ १६

देवयानी—

सर्व एव नरव्याघ्र विधानमनुवर्तते ।
विधानविहितं मत्वा मा विचारय सुव्रत ॥ १७

राजवद्रूपवेषौ ते ब्राह्मीं वाचं बिभर्षि च ।
को नाम त्वं कुतश्चासि कस्य पुत्रश्च शंस मे ॥ १८

ययातिः—

ब्रह्मचर्येण सर्वान् वै साङ्गान् वेदान् विदाम्यहम् ।
राजाऽहं राजपुत्रश्च ययातिरिति विश्रुतः ॥ १९

1. अं—एवंरूपा मया देवि 2. क-ख-ग—नेह

देवयानी—

केनास्यर्थेन नृपते इमं देशमुपागतः ।
जिघृक्षुर्वा रिपुं कंचिद् अथवा मृगलिप्सया ॥ २०

ययातिः—

मृगलिप्सुरहं भद्रे पानीयार्थमिहागतः ।
बहुधाऽप्यनुयुक्तोऽस्मि तन्माऽनुज्ञातुमर्हसि ॥ २१

देवयानी—

अहं दासीसहस्रेण दास्या शर्मिष्ठया सह ।
त्वदधीनाऽस्मि भद्रं ते साधु भर्ता च मे भव ॥ २२

वैशंपायनः—

असुरेन्द्रसुतामीक्ष्य तस्यां सक्तेन चेतसा ।
शर्मिष्ठा महिषी मह्यम् इति मत्वा वचोऽब्रवीत् ॥ २३

ययातिः—

[1]विद्धि नागसि भद्रं ते न त्वमर्हसि भामिनि ।
[2]अदेवार्हा हि राजानो देवयानि पितुस्तव ॥ २४

परभार्या स्वसा [3]श्रेष्ठा सगोत्रा पतिता स्नुषा ।
[4]अपराभिगमाऽस्वस्था [5]अकल्याः कीर्तिता बुधैः ॥ २५

देवयानी—

संसृष्टं ब्रह्मणा क्षत्रं क्षत्रं च ब्रह्मसंहितम् ।

---

1. क-ख-ग—विद्ध्यौशनसि 2. क-ख-ग—अविवाह्या हि
3. क-ख-ग—ज्येष्ठा 4. ख—अवरा भिक्षुका 5. क-ख-ग—अगम्याः

तयोरत्यन्तता नास्ति एकान्तरतमौ हि तौ ॥ २६
ऋषिस्त्वमृषिपुत्रश्च नाहुषाङ्ग वहस्व माम् ॥ २६॥

ययातिः—

एकत्रैवोद्भवा वर्णाश् चत्वारोऽपि वराङ्गने ।
पृथग्धर्माः पृथक्शौचास् तेषां च ब्राह्मणो वरः ॥ २७॥

देवयानी—

पाणिर्मे नाहुषाऽयं वै न पुंभिस्सेवितः पुरा ।
त्वमेव चाग्रहीरग्रे वृणोमि त्वामहं ततः ॥ २८॥

कथं नु मे मनस्विन्याः पाणिमन्यः पुमान् स्पृशेत् ।
गृहीतमृषिपुत्रेण स्वयं पूर्वं नृप त्वया ॥ २९॥

ययातिः—

क्रुद्धादाशीविषाच्छस्त्राज् ज्वलनात्सर्वतोमुखात् ।
दुराधर्षतरो विप्रः पुरुषेण विपश्चिता ॥ ३०॥

देवयानी—

कथमाशीविषाच्छस्त्राज् ज्वलनात्सर्वतोमुखात् ।
दुराधर्षतरो विप्र इत्यात्थ भरतर्षभ ॥ ३१॥

ययातिः—

एकमाशीविषो हन्ति शस्त्रमेकं हनिष्यति ।
सराष्ट्रं सबलं हन्ति विप्रः कोपेन संयुतः ॥ ३२॥

दुराधर्षतरो विप्रस् तस्माद्भीरु मतो मम ॥ ३३

क्वचिदाशीविषो हन्याच् छस्त्रमन्यन्निकृन्तति ।
यदृच्छयाऽग्निर्दहति मनसा हन्ति वै द्विजः ॥ ३४

अतो न दत्तां पित्रा त्वां भद्रे न वरयाम्यहम् ॥ ३४॥

देवयानी—

दत्तां वहस्व राजेन्द्र पित्रा राजन् वृतो मया ।
अयाचतो भयं नास्ति दत्तां च प्रतिगृह्णतः ॥ ३५॥

तिष्ठ राजन् मुहूर्तं तु प्रेषयिष्याम्यहं पितुः ।
गच्छ त्वं धात्रिके शीघ्रं ब्रह्मकल्पमिहानय ॥ ३६॥

स्वयंवरे वृतं शीघ्रं निवेदय च नाहुषम् ॥ ३७

वैशंपायनः—

त्वरितं देवयान्या तु प्रेषितं पितुरात्मनः ।
श्रुत्वैव च वचस्तत्र दर्शयामास भार्गवः ॥ ३८

दृष्ट्वैव चागतं विप्रं ययातिः पृथवीपतिः ।
ववन्दे ब्राह्मणं काव्यं प्राञ्जलिः प्रणतस्थितः ॥ ३९

देवयानी—

राजाऽयं नाहुषस्तात दुर्गमे पाणिमस्पृशत् ।
नान्यपूर्वंगृहीतं मे तेनाहमभया कृता ॥ ४०
नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे ॥ ४०॥

शुक्रः—

अन्यो धर्मः प्रियस्त्वन्यो वृतस्ते नाहुषः पतिः ।

[1]वृतो राजन् वृणीष्वेमां महिषीं नहुषात्मज ॥ ४१॥

स्वयं ग्रहे महान्दोषो ब्राह्मण्यां वर्णसंकरात् ।

गृहाणेमां मया दत्तां महिषीं नहुषात्मज ॥ ४२॥

ययातिः—

अधर्मो न स्पृशेदेष महान् मामिह भार्गव ।

वर्णसङ्करतो ब्रह्मन् भयादेतद्ब्रवीम्यहम् ॥ ४३॥

शुक्रः—

अधर्मात्त्वां विमुञ्चामि वरय त्वं यथेप्सितम् ।

तस्मात्तु पापान्मा भैषीर् अहं पापं नुदामि ते ॥ ४४॥

वहस्व भार्यां धर्मेण देवयानीं सुमध्यमाम् ।

अनया सह संप्रीतिम् अतुलां त्वमवाप्स्यसि ॥ ४५॥

इयं कुमारी दुहिता शर्मिष्ठा वृषपर्वणः ।

तां पूजयेथा मा चैनां शयने वै समाह्वय ॥ ४६॥

रहस्येनां समाहूय न वदेर्न च संस्पृशेः ।

वहस्व भार्यां भद्रं ते यथा काममवाप्स्यसि ॥ ४७॥

वैशम्पायनः—

तथेत्युक्त्वा ययातिस्तु तत्सर्वमकरोत्प्रभुः ।

---

1. क-ख-ग—कचशापात्त्वया पूर्वं नान्यद्भवितुमर्हति ।

[अधिकः पाठः]

विवाहं विधिवत्कृत्वा प्रदक्षिणमथाकरोत् ॥ ४८॥
ययातिस्स्वपुरं यायाद् अनुज्ञातो महात्मना ॥ ४९

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५॥
॥ ७ ॥ संभवपर्वणि दशमोऽध्यायः ॥ १० ॥
[अस्मिन्नध्याये ४९ श्लोकाः]

॥ षट्षष्टितमोऽध्यायः ॥

देवयान्याः पुत्रोत्पत्तिः ॥ १ ॥ अशोकवनिकायां शर्मिष्ठाया ययातिसमागमात्पुत्रोत्पत्तिः ॥ २ ॥

वैशंपायनः—

ययातिस्स्वपुरं गत्वा पताकाभिरलङ्कृतम् ।
प्रविश्यान्तः[1]पुरं तत्र देवयानीं न्यवेशयत् ॥ १

देवयान्याश्चानुमते सुतां तां वृषपर्वणः ।
अशोकवनिकाभ्याशे गृहं कृत्वा न्यवेशयत् ॥ २

वृतां दासीसहस्रेण शर्मिष्ठामसुरात्मजाम् ।
वासोभिरन्नपानैश्च संविभज्य सुसत्कृताम् ॥ ३

देवयान्या तु सहितो ययातिर्नहुषात्मजः ।
प्रीत्या परमया युक्तो मुमुदे शाश्वतीस्समाः ॥ ४

1. अ—पुरे

अशोकवनिकामध्ये देवयानी समागता ।
शर्मिष्ठया सा क्रीडित्वा रमणीये मनोरमे ॥ ५

तत्रैव तां तु निर्दिश्य राज्ञा सह ययौ गृहम् ।
एवमेव सह प्रीत्या मुमुदे बहुकालतः ॥ ६

विजहार बहून्देशान् देववन्मुमुदे भृशम् ॥ ६॥

ऋतुकाले तु संप्राप्ते देवयानी शुचिस्मिता ।
लेभे गर्भं प्रथमतः कुमारश्च व्यजायत ॥ ७॥

गते वर्षसहस्रे तु शर्मिष्ठा वार्षपर्वणी ।
सा तु काले ऋतुस्नाता भर्तारं समचिन्तयत् ॥ ८॥

शुद्धा स्नाता तु शर्मिष्ठा सर्वालङ्कारभूषिता ।
अशोकशाखामालम्ब्य सुफुल्लैस्स्तबकैर्वृताम् ॥ ९॥

आदर्शे मुखमुद्वीक्ष्य भर्तुर्दर्शनलालसा ।
शोकमोहसमाविष्टा वचनं चेदमब्रवीत् ॥ १०॥

अशोक शोकापनुद शोकोपहतचेतसाम् ।
त्वन्नामानं कुरु क्षिप्रं प्रियसंदर्शनाद्धि माम् ॥ ११॥
एवमुक्तवती सा तु शर्मिष्ठा पुनरब्रवीत् ॥ १२

ऋतुकालश्च मे प्राप्तो न च भर्ताऽस्ति कश्चन ।
किं प्राप्तं किं नु कर्तव्यं किं कृत्वा सुकृतं भवेत् ॥ १३

देवयानी प्रजाताऽसौ यथा संप्राप्तयौवना ।
देवयानी पुण्यकृता तस्या भर्ता हि नाहुषः ॥ १४
यथा तस्या भवेद्भर्ता ममाप्येष तथा भवेत् ।
राज्ञा पुत्रफलं देयम् इति मे निश्चिता मतिः ॥ १५
अपीदानीं स धर्मात्मा यायान्मे दर्शनं पुनः ।
केशे बध्वा तु राजानं याचेऽहं सदृशं पतिम् ॥ १६
गृहे मुदा देवयानी पुत्रमीक्ष्य पुनः पुनः ।
क्रीडत्यन्तःपुरे तस्याः कचित्क्षणमवाप सः ॥ १७
अथ निष्क्रम्य राजर्षिस् तस्मिन् काले यदृच्छया ।
अशोकवनिकाभ्याशे शर्मिष्ठां प्रेक्ष्य तिष्ठति ॥ १८
दृष्ट्वा तमेकं रहसि शर्मिष्ठा चारुहासिनी ।
प्रत्युद्गम्याञ्जलिं कृत्वा राजानं वाक्यमब्रवीत् ॥ १९

शर्मिष्ठा—

सोमस्येन्द्रस्य विष्णोर्वा यमस्य धनदस्य च ।
तव वा नाहुष कुले कस्स्त्रियं स्प्रष्टुमर्हति ॥ २०
रूपाभिजनशीलैर्हि त्वं राजन् वेत्थ मां सदा ।
त्वां याचे संप्रसाद्याहं [1]तं तु मे दातुमर्हसि ॥ २१

ययातिः—

वेद्मि त्वां शीलसंपन्नां दैत्यकन्यामनिन्दिताम् ।

1. क-ख-ग—सुतं देहि नराधिप ।

रूपेण ते न पश्यामि सूच्यग्रमपि निन्दितम् ॥ २२

तदाप्रभृति दृष्ट्वा त्वां स्मराम्यनिशमुत्तमे ।

अब्रवीदुशना काव्यो देवयानीं सदा वह ॥ २३

नेयमाह्वयितव्या ते शयने वाऽन्यथापि वा ।

देवयान्याः प्रियं कृत्वा शर्मिष्ठामपि पोषय ॥ २४

शर्मिष्ठा—

न नर्मयुक्तमनृतं हिनस्ति

न स्त्रीषु राजन्न विवाहकाले ।

प्राणात्यये सर्वधनापहारे

पञ्चानृतान्याहुरपातकानि ॥ २५

पृष्टं तु साक्ष्ये प्रवदन्तमन्यथा

[1]मिथ्या तदर्थं चरितं नरेन्द्र ।

एकार्थतायां च समाहितायां

मिथ्या वदन्तं ह्यनृतं हिनस्ति ॥ २६

अनृतं नानृतं स्त्रीषु परिहासविवाहयोः ।

आत्मप्राणार्थघातेषु तदेवोत्तमतां व्रजेत् ॥ २७

ययातिः—

राजा प्रमाणं भूतानां विनश्येत मृषा वदन् ।

अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्तुमुत्सहे ॥ २८

1. क-ख-ग—वदन्ति मिथ्योपहतं नरेन्द्र ।

शर्मिष्ठा—

उभौ हि च पती लोके पतिस्सख्याः पतिश्च यः ।
समं विवाहमित्याहुस् सख्या मेऽसि पतिर्वृतः ॥ २९

त्रय एवाधना राजन् भार्या दासस्सुतस्तथा ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥ ३०

सह दत्तास्मि काव्येन देवयान्या महर्षिणा ।
पूज्या पोषयितव्येति न मृषा कर्तुमर्हसि ॥ ३१

सुवर्णमणिरत्नानि वस्त्राण्याभरणानि च ।
याचितॄणां ददासि त्वं गोभूम्यादीनि यानि च ॥ ३२

बाहिकं दानमित्युक्तं न शरीराश्रितं नृप ।
दुष्करं पुत्रदानं च आत्मदानं च दुष्करम् ॥ ३३

शरीरदानात्तत्सर्वं दत्तं भवति नाहुष ।
यस्य यस्य यथा कामस् तस्य तस्य ददाम्यहम् ॥ ३४

इत्युक्त्वा नगरे राजंस्त्रिकालं घोषितं त्वया ॥ ३४॥

अनृतं तत्तु राजेन्द्र वृथा घोषितमेव च ।
तत्सत्यं कुरु राजेन्द्र यथा वैश्रवणस्तथा ॥ ३५॥

ययातिः—

दास्यामि याचते नित्यम् इति मे व्रतमाहितम् ।
त्वं च याचसि मां कामं ब्रूहि किं करवाणि ते ॥ ३६॥

धनं वा यदि वा किंचिद् राज्यं वाऽपि शुचिस्मिते ॥ ३७

वैशंपायनः—

अधर्मात्त्राहि मां राजन् धर्मं च प्रतिपादय ।

नान्यं वृणे पुत्रकामात् पुत्रात्परतरं न च ॥ ३८

त्वत्तोऽपत्यवती लोके चरेयं धर्ममुत्तमम् ।

पुत्रार्थं भर्तृपोषार्थं स्त्रियस्सृष्टास्स्वयंभुवा ॥ ३९

अपतिश्चापि या कन्या अनपत्या च या भवेत् ।

तस्या जन्म वृथा लोके गतिस्तस्या न विद्यते ॥ ४०

देवयान्या भुजिष्याऽस्मि वश्या च तव भार्गवि ।

सा चाहं च त्वया राजन् भरणीये भजस्व माम् ॥ ४१

वैशंपायनः—

एवमुक्तस्तु राजा स तथ्यमित्येव जज्ञिवान् ।

काव्याच्च देवयान्याश्च भीतो धर्मभयादपि ॥ ४२

पूजयामास शर्मिष्ठां धर्मे च [1]प्रतिपादयन् ।

ऋत्विक्पुरोहिताचार्यैर् मन्त्रिभिश्चापि संवृतः ॥ ४३

कृत्वा विवाहं विधिवद् दत्वा ब्राह्मणदक्षिणाम् ।

पुण्ये नक्षत्रसंयोगे मुहूर्ते द्विजपूजिते ॥ ४४

समागम्य च शर्मिष्ठां यथा काममवाप्य च ।

अन्योन्यं पूजयित्वा तु जग्मतुस्तौ यथागतम् ॥ ४५

1. क-ख-ग—प्रत्यपादयत्

तस्मिन् समागमे सुभ्रूश् शर्मिष्ठा चारुहासिनी ।
लेभे गर्भं प्रथमतस् तस्माद्राजर्षिसत्तमात् ॥ ४६

प्रजज्ञे च ततः काले क्रियाः कृत्वा विशेषतः ।
कुमारं देवगर्भाभं राजीवनिभलोचनम् ॥ ४७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
॥ ७ ॥ संभवपर्वणि एकादशोऽध्यायः ॥ ११ ॥
[अस्मिन्नध्याये ४७ श्लोकाः ।]

॥ सप्तषष्टितमोऽध्यायः ॥

शर्मिष्ठादेवयान्योः पुनः पुत्रोत्पत्तिः ॥ १ ॥ शर्मिष्ठापुत्रान् ययाति जान् ज्ञात्वा शुक्रसमीपे गमनम् ॥

वैशंपायनः—

तस्मिन्नक्षत्रसंयोगे शुक्ले पुण्यर्क्षगेन्दुना ।
स राजा मुमुदे सम्राट् तया शर्मिष्ठया सह ॥ १

ययातिः—

प्रजानां श्रीरिवा[1]भ्या मे शर्मिष्ठा ह्यभवद्वधूः ।
पन्नगीवोग्ररूपेयं देवयानी ममह्यभूत् ॥ २
पर्जन्य इव सस्यानां देवानाममृतं यथा ।

---

1. क-ग—भ्याशे

तद्वन्ममापि संभूता शर्मिष्ठा वार्षपर्वणी ॥ ३
इत्येवं मनसा ध्यात्वा देवयानीमवर्जयत् ॥ ३॥

वैशम्पायनः—

श्रुत्वा कुमारं जातं तु देवयानी शुचिस्मिता ।
चिन्तां बहुविधां चक्रे शर्मिष्ठां प्रति भारत ॥ ४॥
अभिगम्य तु शर्मिष्ठां देवयानी तथाऽब्रवीत् । ५

देवयानी—

किमिदं वृजिनं सुभ्रु कृतं ते कामलुब्धया ॥ ५॥

शर्मिष्ठा—

ऋषिरभ्यागतः कश्चिद् धर्मात्मा वेदपारगः ।
स मया वरदः कामी याचितो धर्मसंहितः ॥ ६॥
अपत्यार्थे स तु मया वृतो वै चारुहासिनि ।
नाहमन्यायतः कामम् आचरेयं शुचिस्मिते ॥ ७॥
तस्मादृषेर्ममापत्यम् इदं सत्यं शुचिस्मिते ॥ ८

देवयानी—

शोभनं भीरु सत्यं चेद् अथ विज्ञायते द्विजः ।
गोत्रनामाभिजनतो वेत्तुमिच्छामि तं द्विजम् ॥ ९

शर्मिष्ठा—

ओजसा तेजसा चैव दीप्यमानं यथा रविम् ।
तं दृष्ट्वा मम संप्रष्टुं शक्तिर्नासीच्छुचिस्मिते ॥ १०

देवयानी—

यद्येतदेवं शर्मिष्ठे न मन्युर्विद्यते मम ।
अपत्यं यदि ते लब्धं श्रेष्ठं श्रेष्ठाच्च भामिनि ॥ ११

वैशम्पायनः—

अन्योन्यमेवं संभाष्य संप्रहस्य च ते भृशम् ।
जगाम भार्गवी वेश्म तथ्यमित्यवजज्ञुषी ॥ १२

ययातिर्देवयान्यां तु पुत्रावजनयन्नृपः ।
यदुं च तुर्वशुं चैव इन्द्रविष्णू इवापरौ । १३

तस्मिन् काले तु राजर्षिर् ययातिः पृथिवीपतिः ।
तां च माध्वीकसंयुक्तां मदिरां मदवर्धनीम् ॥ १४

पाययामास शुक्रस्य तनयां रक्तपिञ्जराम् ॥ १४॥
पीत्वा पीत्वा च मदिरां देवयानी मुमोह सा ॥ १५

रुदती गायमाना च नृत्यन्ती च मुहुर्मुहुः ।
बहु प्रलपती देवी राजानमिदमब्रवीत् ॥ १६

राजवद्रूपवेषौ ते किमर्थं त्वमिहागतः ।
केन कार्येण संप्राप्तो निर्जनं गहनं वनम् ॥ १७

द्विजश्रेष्ठ नृपश्रेष्ठो ययातिश्चोग्रदर्शनः ।
तस्मादितः पलायस्व हितमिच्छसि चेद्द्विज ॥ १८

इत्येवं प्रलपन्तीं तां देवयानीं तु नाहुषः ।

भर्त्सयामास वचनैरपापां हर्षवर्धनीम् ॥ १९

ततो वर्षवरान्मूकान् पङ्गून् वृद्धान् सपिण्डकान् ।
रक्षणे देवयान्याश्च पोषणे च शशास तान् ॥ २०

ततस्तु नाहुषो राजा शर्मिष्ठां प्राप्य बुद्धिमान् ।
रेमे च सुचिरं कालं तया शर्मिष्ठया सह ॥ २१

तस्मादेव तु राजर्षेश् शर्मिष्ठा वार्षपर्वणी ।
[1]द्रुह्युं चानुं च पूरुं च त्रीन् कुमारानजीजनत् ॥ २२

ततः काले तु कस्मिंश्चिद् देवयानी वराङ्गना ।
ययातिसहिता देवी जगाम प्रमदावनम् ॥ २३

सा ददर्श वने तत्र कुमारान् देवरूपिणः ।
क्रीडमानान् सुविस्रब्धान् विस्मिता चेदमब्रवीत् ॥ २४

देवयानी—

कस्यैते दारका राजन् देवपुत्रोपमाश्शुभाः ।
वर्चसा तेजसा चैव सदृशा मे मतास्तव ॥ २५

वैशंपायनः—

एवं पृष्ट्वा तु राजानं कुमारान् प्राप्य पृच्छति ॥ २६

तस्मिन्काले तु तच्छ्रुत्वा धात्री तेषां वचोऽब्रवीत् ॥ २६॥

---

1. क-ख-ग- शर्मिष्ठाकामुको राजा यदासीत्तद्गताकुलः ।
मदिराविवशां कृत्वा रेमे शर्मिष्ठयाऽन्वहम् ॥
[अधिकः पाठः]

किं न ब्रूत कुमारा वः पितरं वै द्विजर्षभम् ॥ २७

कुमाराः—

ऋषिश्च ब्राह्मणश्चैव द्विजातिश्चैव नः पिता ।
शर्मिष्ठा नानृतं ब्रूयाद् देवयानि क्षमस्व नः ॥ २८

देवयानी—

किंनामधेयगोत्रो वः पुत्रकाः ब्राह्मणः पिता ।
विब्रूत तत्त्वतः क्षिप्रं कश्चासौ क च वर्तते ॥ २९
प्रब्रूत मे यथातत्त्वं श्रोतुमिच्छामि तं ह्यहम् । २९॥

वैशंपायनः—

एवमुक्ताः कुमारास्ते देवयान्या सुमध्यया ।
तेऽदर्शयन् प्रदेशिन्या तमेव पितरं नृपम् ॥ ३०॥
शर्मिष्ठां मातरं चैव तस्याचख्युश्च दारकाः ॥ ३१
तदा रहः पृच्छमानास् तथ्यमूचुश्च दारकाः ।
इत्युक्त्वा सहिता देव्या राजानमुपचक्रमुः ॥ ३२
नाभ्यनन्दत तान् राजा देवयान्यास्तदाऽन्तिके ॥ ३२॥
रुदन्तस्ते तु शर्मिष्ठाम् अभ्ययुर्बालकास्तदा ॥ ३३
अविब्रुवन्ती किंचिच्च राजानं चारुलोचना ।
नातिदूराच्च राजानम् अतितिष्ठदवाङ्मुखी ॥ ३४
श्रुत्वा तेषां तु बालानां प्रणयं पार्थिवं प्रति ।

लब्ध्वा तु तत्त्वतो देवी शर्मिष्ठामिदमब्रवीत् ॥ ३५
दृष्ट्वा तु तेषां बालानां सव्रीड इव पार्थिवः ।
प्रतिवक्तुमशक्तोऽभूत् तूष्णींभूतोऽभवन्नृपः ॥ ३६
गृहीत्वा तु करे रोषाच् छर्मिष्ठां पुनरब्रवीत् ॥ ३६॥

देवयानी—

अभ्यागच्छति मां कश्चिद् ऋषिरित्येवमब्रवीः ।
ययातिमेवं नूनं त्वं प्रोत्साहयसि भामिनि ॥ ३७॥
पूर्वमेव मया प्रोक्तं त्वया तु वृजिनं कृतम् ॥ ३८
मय्यधीना सती कस्माद् अकार्षीर्विप्रियं मम ।
तदेवासुरकर्म त्वं चरन्ती न बिभेषि मे ॥ ३९

शर्मिष्ठा—

यदुक्तमृषिरित्येव तत्सत्यं चारुहासिनि ।
न्यायतो धर्मतश्चैव चरन्ती न बिभेमि ते ॥ ४०
यदा त्वया वृतो राजा वृत एव तदा मया ।
सखीभर्ता हि धर्मेण भर्ता भवति शोभने ॥ ४१
पूज्या च मम मान्या च ज्येष्ठा साध्वी च ब्राह्मणी ।
त्वत्तो हि मे पूज्यतरो राजर्षिः किं न वेत्थ तत् ॥ ४२
त्वत्पित्रा मम गुरुणा सह दत्ते उभे शुभे ।
तव भर्ता च पूज्यश्च पोष्यां पोषयतीह माम् ॥ ४३

वैशंपायनः—

एवं श्रुत्वा ततो वाक्यं देवयान्यब्रवीदिदम् ॥ ४३॥
रमस्वेह यथाकामं देव्या शर्मिष्ठया सह ॥ ४४
राजन्नाद्येह वत्स्यामि विप्रियं मे कृतं त्वया ॥ ४४॥
इति जज्वाल कोपेन देवयानी ततो भृशम् ॥ ४५
निर्दहन्तीव सव्रीडां शर्मिष्ठां समुदीक्ष्य च ।
अपविध्य तु सर्वाणि भूषणान्यसितेक्षणा ॥ ४६
सहसोत्पतितां राजा दृष्ट्वैव सहसोत्थितः ।
त्वरया सकाशं काव्यस्य प्रस्थितां व्यथिताननाम् ॥ ४७
अनुववाज संभ्रान्तः पृष्ठतस्सान्त्वयन्नृपः ॥ ४७॥
न न्यवर्तत चैवं सा क्रोधसंरक्तलोचना ॥ ४८
अविब्रुवन्ती किंचिच्च राजानं चारुदर्शना ।
आचिरादिव संप्राप्ता काव्यस्योशनसोऽन्तिकम् ॥ ४९
सा तु दृष्ट्वैव पितरम् अभिवाद्येदमब्रवीत् ।
अनन्तरं ययातिस्तु पूजयामास भार्गवम् ॥ ५०

देवयानी—

अधर्मेण जितो धर्मः प्रवृत्तमधरोत्तरम् ।
शर्मिष्ठयाऽतिवृत्ताऽस्मि दुहित्रा वृषपर्वणः ॥ ५१
त्रयोऽस्यां जनिताः पुत्रा राज्ञा तेन ययातिना ।

दुर्भगाया मम द्वौ तु पुत्रौ तात ब्रवीमि ते ॥ ५२

धर्मिष्ठ इति विख्यात एष राजा कुरूद्वह ।
अतिक्रान्तश्च मर्यादां काव्यैतत्कथयामि ते ॥ ५३

शुक्रः—

धर्मज्ञस्सन् महाराज यो धर्मं नाकृथास्स्वयम् ।
तस्माज्जरा त्वां नचिराद् धर्षयिष्यति दुर्जया ॥ ५४

ययातिः—

ऋतुं वै याचमानाया भगवन्नान्यचेतसा ।
दुहितुर्दानवेन्द्रस्य धर्म्यमेतत्कृतं मया ॥ ५५

[1]इत्थं वै याचमानाया न ददाति पुमान् वृतः ।
भ्रूणहेत्युच्यते ब्रह्मन् सदा वै ब्रह्मवादिभिः ॥ ५६

अभिकामां स्त्रियं चैव गम्यां रहसि याचितः ।
उपैति यस्स्वधर्मेषु किल्बिषी न च सः पुमान् ॥ ५७

यद्यद्याचति मां कश्चित् तत्तद्देयमिति व्रतम् ।
त्वया च सापि दत्ता मे नान्यं नाथमिहेच्छति ॥ ५८

मत्वैतन्मे धर्म इति कृतं ब्रह्मन् क्षमस्व माम् ॥ ५८॥

इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह ।
अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान् ॥ ५९॥

---

1 क-ख-ग —ऋतुं

शुक्रः—

न त्वहं प्रत्यवेक्ष्यस्ते मय्यधीनोऽसि पार्थिव ।
मिथ्याचारस्य धर्मेषु जरा भवति नाहुष ॥ ६०॥

वैशंपायनः—

क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषस्तदा ।
पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यत ॥ ६१॥

ययातिः—

अतृप्तो यौवनस्याहं देवयान्यां भृगूद्वह ।
प्रसादं कुरु मे ब्रह्मन् जरेयं मा विशेत माम् ॥ ६२॥

शुक्रः—

नाहं मृषा ब्रवीम्येनां जरां प्राप्तोऽसि भूमिप ।
जरां त्वेनां त्वमन्यस्मै संक्रामय यदीच्छसि ॥ ६३॥

ययातिः—

राज्यभाक्स भवेद्ब्रह्मन् पुण्यभाक्कीर्तिभाक् तथा ।
यो मे दद्याद्वयः पुत्रस् तद्भवाननुमन्यताम् ॥ ६४॥

शुक्रः—

संक्रामयिष्यसि जरां यथेष्टं नहुषात्मज ।
मामनुध्याय भावेन न च पापमवाप्स्यसि ॥ ६५॥

वयो दास्यति ते पुत्रो यस्स राजा भविष्यति ।
आयुष्मान् कीर्तिमांश्चैव बहुपत्यस्तथैव च ॥ ६६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
॥ ७ ॥ संभवपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[अस्मिन्नध्याये ६६॥ श्लोकाः]

॥ अष्टषष्टितमोऽध्यायः ॥

स्वजरामनङ्गीकुर्वतां यदुप्रभृतीनां ययातिना शापः ॥ १ ॥ तामङ्गीकुर्वतः पूरोर्वरदानम् ॥ २ ॥

वैशंपायनः—

जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः ॥ १

ययातिः—

जरावली च मे तात पलितानि च पर्यगुः ।
काव्यस्योशनसश्शापान्न च तृप्तोऽस्मि यौवने ॥ २

त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ ३

पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा स्वं प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ४

यदुः—

सितश्मश्रुशिरां दीना जरया शिथिलीकृतः ।
वलीसन्ततगात्रश्च दुर्दर्शो दुर्बलः कृतः ॥ ५

अशक्तः कार्यकरणे परिभूतश्च यौवने ।
सहोपजीविभिश्चैव तां जरां नैव कामये ॥ ६

ययातिः—

यो मे त्वं हृदयाज्जातो वयस्त्वं न प्रयच्छसि ।
तस्मादराज्यभाक्तात प्रजा वै ते भविष्यति ॥ ७

वैशम्पायनः—

प्रत्याख्यातस्स राजा तु तुर्वशुं प्रत्युवाच ह ॥ ७॥

ययाति.—

तुर्वशो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ॥ ८॥

पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ।
स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ९॥

तुर्वशुः—

न कामये जरां तात कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिप्राणविनाशिनीम् ॥ १०॥

ययातिः—

यो मे त्वं हृदयाज्जातो वयस्त्वं न प्रयच्छसि ।

[1]तुर्वशो त्वं प्रियं कामं नैतत्सम्पत्स्यसे क्वचित् । ११॥
अराजा भोजशब्दं तु तत्रावाप्स्यसि सान्वयः ।
तस्मात्प्रजासमुच्छेदं तुर्वशो तव यास्यति ॥ १२॥
सङ्कीर्णाचारधर्मेषु प्रतिलोमचरेषु च ।
म्लेच्छेषु पिशिताशेषु मूढो राजा भविष्यसि ॥ १३॥
गुरुदारप्रसक्तेषु तिर्यग्योनिगतेषु च ।
[2]छिन्नधर्मस्वरूपेषु व्याधेषु जनयिष्यसि ॥ १४॥

वैशंपायनः—

एवं स तुर्वशुं शप्त्वा ययातिस्सुतमात्मनः ।
शर्मिष्ठायास्सुतं द्रुह्युम् इदं वचनमब्रवीत् ॥ १५॥

ययातिः—

द्रुह्यो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
[3]पूर्णे वर्षसहस्रे तु प्रतिदास्यामि यौवनम् ॥ १६॥

द्रुह्युः—

जीर्णहिशशुवदादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं न बुध्यति च कालतः ॥ १७॥

---

1. क-ख-ग—यत्रोडुप्लवसन्तारास्तत्र नित्यं भविष्यसि । [अधिकः पाठः]
2 क-ख-ग—पशुधर्मेष्वधर्मेषु
3. क-ख-ग—यौवनेन चरेयं वै विषयांस्तवपुत्रक । [अधिकः पाठः]

न च कृत्यं करोत्येष तां जरां नाभिकामये ॥ १८

ययातिः –

यो मे त्वं हृदयाज्जातो वयस्त्वं न प्रयच्छसि ।
जरादोषस्त्वयोक्तोऽयं तस्मात्त्वं नाभिपत्स्यसे ॥ १९

प्रजाश्च यौवनं प्राप्ता विनशिष्यन्त्यतस्तव ।
अग्निप्रस्पन्दनपरस् त्वं चाप्येवं भविष्यसि ॥ २०

1ययातिः –

अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रं वै चरेयं तव रूपधृक् ॥ २१

पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा च प्रतिपत्स्ये वै पाप्मानं जरया सह ॥ २२

अनुः—

न हस्तिनं नरो नाश्वं जीर्णो भुङ्क्ते न पीठकम् ।
बाग्दुर्भगाऽस्य भवति तां जरां नैव कामये ॥ २३

ययातिः–

यो मे त्वं हृदयाज्जातो वयस्त्वं न प्रयच्छसि ।
हस्त्यश्वरथमुख्यानाम् अध्वा न स्यात्कदाचन ॥ २४

---

1. क-ख-ग—अराजा तव जातश्च भविष्यति च दुर्मते ।
एवं ब्रुवन्तं शप्त्वाथ ययातिस्सुतमात्मनः ।
शर्मिष्ठायास्सुतं चानुम् इदं वचनमब्रवीत् ॥
[अधिकः पाठः]

हस्तिनां पीठकानां वा गर्दभानां तथैव च ।
उष्ट्राणां च गवां चैव शिबिकायास्तथैव च ॥ २५
यद्वाऽन्यद्वाहनं किञ्चिद् देवो हन्यात् क्वचित्क्वचित् ।
अराजा तव जातश्च भविष्यति च दुर्मते ॥ २६

वैशम्पायनः—

प्रत्याख्यातश्चतुर्भिस्तु [1]शपित्वा तान् यदृच्छया ।
पूरोस्सकाशमगमज् ज्ञात्वा पूरु[2]मलिङ्गिनम् ॥ २७

ययातिः—

पूरो त्वं मे प्रियः पुत्रस् त्वं गरीयान् भविष्यसि ।
जरा वली च मे तात पलितानि च पर्यगुः ॥ २८
काव्यस्योशनसश्शापान्न च तृप्तोऽस्मि यौवने ।
पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ॥ २९
यथाकालं चरेयं वै विषयान् वयसा तव ॥ २९॥
पूर्णे वर्षसहस्रे तु [3]प्रतिदास्यामि यौवनम् ।
स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ ३०॥

वैशंपायनः —

एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।
यदात्थ मां महाराज तत्करिष्यामि ते वचः ॥ ३१॥
गुरोर्वै वचनं पुण्यं स्वर्ग्यमायुष्करं नृणाम् ।
गुरुप्रसादात् त्रैलोक्यम् अन्वशासच्छतक्रतुः ॥ ३२॥

---

1. क-ख-ग—शप्त्वा तान्यद्यादिच्छया
2. क-ख-ग—मलङ्घनम्
3. अ—प्रतिपत्स्यामि

गुरोरनुमतिं प्राप्य सर्वान् कामानवाप्नुयात् ।
प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह ॥ ३३॥
यावदिच्छसि वा जीवं तावत्तां धारयाम्यहम् ।
गृहाण यौवनं मत्तश् चर कामान् यथेप्सितान् ॥ ३४॥
जरयाऽहं प्रतिच्छन्नो वसे रूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथात्थ माम् ॥ ३५॥

ययातिः—

पूरो प्रीतोऽस्मि भद्रं ते प्रतिश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥ ३६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
॥ ७ ॥ संभवपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
[अस्मिन्नध्याये ३६॥ श्लोकाः ।]

॥ एकोनसप्ततितमोऽध्यायः ॥

विषयानुभवेन ययातेर्वैराग्यप्राप्तिः ॥ १ ॥ पूरोः ययातिना यौवनप्रत्यर्पणम् ॥ २ ॥ तस्य राज्याभिषेकः ॥ ३ ॥ ययातेर्वनं प्रति गमनम् ॥ ४ ॥ यदुप्रभृतीनां वंशकथनम् ॥ ५ ॥

वैशंपायनः—

पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
रूपयौवनसंपन्नः कुमार [1]स्समपद्यत ॥ १

---

1. क-ख-ग—इव सोऽभवत्

प्रीतियुक्तो नृपश्रेष्ठश् चचार विषयान् प्रियान् ॥ १॥

यथाकामं यथोत्साहं यथाकालं यथासुखम् ।
धर्माविरुद्धं राजेन्द्रो यथा भवति सोऽन्वभूत् ॥ २॥

देवानतर्पयद्यज्ञैश् श्राद्धैस्तद्वत्पितॄनपि ।
दीनान्धकृपणान् वृद्धान् अनाथांश्चाभ्यपूजयत् ॥ ३॥

अतिथीनन्नपानैश्च विशश्च परिपालनैः ।
आनृशंस्येन शूद्रांश्च दस्यून्निग्रहणेन च ॥ ४॥

[1]धर्मेण स्वप्रजास्सर्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥ ५॥

स राजा सिंहविक्रान्तो युवा विषयगोचरः ।
अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥ ६॥

स संप्राप्य सुखान् कामांस् तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रं तत् सस्मार मनुजाधिपः ॥ ७॥

परिसंख्याय कालज्ञः कलाः काष्ठाश्च वीर्यवान् ।
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥ ८॥

ययातिः—

यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव ॥ ९॥

---

1. अ-ख—धर्मेण च

तेजसा तव सत्पुत्र पूर्णं यौवनमुत्तमम् ।
पूरो प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ॥ १०॥

राज्यं च मे गृहाणेदं यावदिच्छसि यौवनात् ।
तावद्दीर्घायुषा भुङ्क्ष्व त्वं हि मे प्रियकृत्सुतः ॥ ११॥

वैशंपायनः—

प्रतिपेदे जरां राजा ययातिर्नहुषात्मजः ।
यौवनं प्रतिपेदे च पूरुस्त्वं पुनरात्मवान् ॥ १२॥

अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम् ।
ब्राह्मणप्रमुखाः पौरा इदं वचनमब्रुवन् ॥ १३॥

कथं शुक्रस्य नप्तारं देवयान्यास्सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रदास्यसि ॥ १४॥

यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वशुः ।
शर्मिष्ठायास्सुतो द्रुह्युर् अनुः पूरुश्च पार्थिव ॥ १५॥

कथं ज्येष्ठानतिक्रम्य यवीयान् राज्यमर्हति ।
एतत्संबोधयामस्त्वां धर्मं त्वमनुपालय ॥ १६॥

ययातिः—

ब्राह्मणप्रमुखा वर्णास् सर्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथं चन ॥ १७॥

मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रस्सतां मतः ॥ १८॥

मातापित्रोर्वचनक्रुद्धितश्च विभवस्य च ।
स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु ॥ १९॥
पुदिति नरकस्याख्या दुःखं हि नरकं विदुः ।
पुतस्त्राणात्ततः पुत्रम् इहेच्छन्ति परत्र च ॥ २०॥
आत्मनस्सदृशः पुत्रः पितृदेवर्षिपूजने ।
यो बहूनां गुणकरस् स पुत्रो ज्येष्ठ उच्यते ॥ २१॥
[1]ज्येष्ठांशभाक् स गुणकृद् इह लोके परत्र च ॥ २२
श्रेयान् पुत्रो गुणोपेतस् स पुत्रो नेतरो वृथा ।
वदन्ति धर्मं धर्मज्ञाः पितृणां पुत्रकारणात् ॥ २३
यदुनाऽहमवज्ञातस् तथा तुर्वशुना पुनः ।
द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥ २४
पूरुणा मे कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादो धृता येन जरा मम ॥ २५
[2]भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम् ॥ २५॥

---

1. ख-ग—मूकोऽन्धो बधिरः श्लिली स्वधर्मं नानुतिष्ठति ।
चौरः किल्बिषिकः पुत्रो ज्येष्ठो न ज्येष्ठ उच्यते ॥
[अधिकः पाठः]

2. क-ख-ग—वेदोक्तं संभवं मह्यम् अनेन हृदयोद्भवम् ।
तस्य जातमिदं कृत्स्नम् आत्मा पुत्र इति श्रुतिः ॥
मम कामस्य च कृतः पूरुणा पितृरूपिणा ।
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ॥
पुत्रो यस्त्वानुवर्तेत स राजा पृथिवीपतिः ।
यो वानुवर्ती पुत्राणां स पुत्रो दायभाग्भवेत् ॥
[अधिकः पाठः

पौराः—

[1]यः पुत्रो गुणसंपन्नो मातापित्रोर्हितस्सदा ।
सर्वमर्हति कल्याणं कनीयानपि स प्रभो ॥ २६॥
वेदे धर्मार्थशास्त्रेषु मुनिभिः कथितं पुरा ॥ २७
अर्हः पूरुरिदं राज्यं यस्सुतः प्रियकृत्तव ।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् ॥ २८

वैशंपायनः—

पौरजानपदैस्तुष्टैर् इत्युक्तो नाहुषस्तदा ।
अभ्यषिञ्चत्तदा पूरुं ययातिर्द्विजपूर्वकम् ॥ २९
यदुं च तुर्वशुं चोभौ द्रुह्युं चैव सहानुजम् ।
अन्तेष्वथ विनिक्षिप्य नाहुषस्स्वात्मजान् सुतान् ॥ ३०
दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः ।
पुरात् स निर्ययौ तस्माद् ब्राह्मणैस्तापसैस्सह ॥ ३१
यदोस्तु यादवा जातास् तुर्वशोर्यवनास्सुताः ।
द्रुह्योरपि सुता भोजा अनोस्तु म्लेच्छजातयः ॥ ३२
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ।
इदं वर्षसहस्राय राज्यं कारयिता प्रभो ॥ ३३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
॥ ७ ॥ संभवपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[अस्मिन्नध्याये ३३ श्लोकाः]
पूर्वयायातं समाप्तम्

---

1. क-ख-ग—स पुत्रो गुणसंयुक्तो हितकृत्सततं गुरोः ।

॥ सप्ततितमोऽध्यायः ॥

ययातेः स्वर्गगमनम् ॥ १ ॥

वैशंपायनः—

एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥ १

उषित्वा च वने वासं ब्राह्मणैस्तापसैस्सह ।
फलमूलाशनो भूत्वा ततस्स्वर्गमितो गतः ॥ २

स गतस्स्वर्गवासार्थं निवसन् सुखमुत्तमम् ।
कालेन नातिमहता पुनश्शक्रेण पातितः ॥ ३

साधुभिस्संगतिं लब्ध्वा पुनस्स्वर्गमुपेयिवान् ॥ ३॥

जनमेजयः—

स्वर्गतश्च पुनर्ब्रह्मन् निवसन् देववेश्मनि ।
कालेन नातिमहता शक्रेण च्यावितः कथम् ॥ ४॥

निवसन्प्रच्युतस्स्वर्गाद् अप्राप्तो मेदिनीतलम् ।
स्थित आसीदन्तरिक्षे स तदेति श्रुतं मया ॥ ५॥

तत एव पुनश्चापि गतस्स्वर्गमिति श्रुतम् ॥ ६

तदा सार्धं हि वसुना श्रीमता चाष्टकेन च ।
प्रतर्दनेन शिबिना समेत्य किल संसदि ॥ ७

कारणेन दिवं केन संप्राप्तो द्विजसत्तम ॥ ७॥

सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः ।
कथ्यमानं त्वया विप्र विप्रर्षिगणसन्निधौ ॥ ८॥

राजा देवसमो ह्यासीद् ययातिः पृथिवीपतिः ।
वर्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥ ९॥

तस्य विस्तीर्णयशसस् सत्यकीर्तेर्महात्मनः ।
चरितं श्रोतुमिच्छामि दिवि चेह च सर्वशः ॥ १०॥

वैशंपायनः—

हन्त ते कथयिष्यामि ययातेरुत्तरां कथाम् ।
दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम् ॥ ११॥

ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसम् ।
राज्येऽभिषिच्य मुदितः प्रवव्राज वनं तदा ॥ १२॥

अन्तेष्वथ विनिक्षिप्य पुत्रान्वै पूरुपूर्वजान् ।
फलमूलाशनो राजा वने संन्यवसच्चिरम् ॥ १३॥

संयतात्मा जितक्रोधस् तर्पयन्पितृदेवताः ।
अग्निं च विधिवज्जुह्वन् वानप्रस्थविधानतः ॥ १४॥

अतिथीन् पूजयामास वन्येन हविषा द्विजान् ।
शिलोञ्छवृत्तिमादाय शेषान्नकृतभोजनः ॥ १५॥

पूर्णे वर्षसहस्रं च एवंवृत्तिरभून्नृपः ॥ १६

अब्भक्षश्शरदस्त्रिंशद् आसीन्नियतवाङ्मनाः ।
ततश्च वायुभक्षोऽभूत् संवत्सरमतन्द्रितः ॥ १७
पञ्चाग्निमध्ये च तपस् तेपे संवत्सरं पुनः ।
एकपादः स्थितश्चापि षण्मासानभवत्तदा ॥ १८
एवमेव तदाब्दानां पर्यायेण गतस्सदा ।
महायोगी गतस्स्वर्गं जगाम प्रेत्य रोदसी ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
॥ ७ ॥ संभवपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

[अस्मिन्नध्याये १९ श्लोकाः]

॥ एकसप्ततितमोऽध्यायः ॥

इन्द्रययातिसंवादः ॥ १ ॥

वैशंपायनः—
स्वर्गतस्स तु राजेन्द्रो निवसन् देववेश्मनि ।
पूजितस्त्रिदशैस्साध्यैर् मरुद्भिर्वसुभिस्तथा ॥ १
देवलोकाद्ब्रह्मलोकं संचरन् पुण्यकृद्वशी ।
पूजितस्त्रिदशैस्साध्यैर् ययातिरतिधार्मिकः ॥ २
अवसत्पृथिवीपालो दीर्घकालमिति श्रुतः ॥ २॥

स कदाचिन्नृपश्रेष्ठो ययातिश्शक्रमागमत् ।
कथान्ते तत्र शक्रेण स पृष्टः पृथिवीपतिः ॥ ३॥

इन्द्रः—

यदा पूरुस्तव रूपेण राजञ्-
जरां गृहीत्वा विचचार भूमौ ।
तदा राज्यं संप्रदायैव तस्मै
त्वया किमुक्तः कथयेह सत्यम् ॥ ४॥

ययातिः—

गङ्गायमुनयोर्मध्ये कृत्स्नोऽयं विषयस्तव ।
मध्ये पृथिव्यास्त्वं राजा भ्रातरोऽन्ताधिपास्तव ॥ ५॥

न च कुर्यान्नरो दैन्यं शाठ्यं क्रोधं तथैव च ।
जैह्म्यं च मत्सरं वैरं सर्वत्रैव न कारयेत् ॥ ६॥

मातरं पितरं चैव विद्वांसं च तपोधनम् ।
क्षमावन्तं च देवेन्द्र नावमन्येत बुद्धिमान् ॥ ७॥

शक्तस्तु क्षमते नित्यम् अशक्तः क्रुध्यते नरः ।
दुर्जनस्सुजनं द्वेष्टि दुर्बलो बलवत्तरम् ॥ ८॥

रूपवन्तमरूपी च धनवन्तं च निर्धनः ।
अकर्मी कर्मिणं द्वेष्टि धार्मिकं च न धार्मिकः ॥ ९॥

निर्गुणो गुणवन्तं च शक्रैतत्कलिलक्षणम् ।
विपरीतं च राजेन्द्र एतेषु कृतलक्षणम् ॥ १०॥

ब्राह्मणो वाऽथ राजा वा वैश्यो वा शूद्र एव वा ।
प्रशस्तेषु प्रसक्ताश्चेत् प्रशस्यन्ते यशस्विनः ॥ ११॥

तस्मात्प्रशस्ते देवेन्द्र नरस्सक्तमना भवेत् ।
अलोकज्ञा ह्यप्रशस्ता भ्रातरस्ते ह्यबुद्धयः ॥ १२॥

अन्ताधिपतयस्सर्वे ह्यभवन् गुरुशासनात् । १३

इन्द्रः—
त्वं हि वै धर्मदो राजन् कथ्यसे धर्ममुत्तमम् ।
कथयस्व पुनर्मेऽद्य लोकवृत्तान्तमुत्तमम् ॥ १४

ययातिः—
अक्रोधनः क्रोधनेभ्यो विशिष्टस्
तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषाश्च प्रधाना
विद्वांस्तथैवाविदुषः प्रधानः ॥ १५

आक्रुश्यमानो नाक्रोशेन्मन्युरेवातितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ १६

नारुन्तुदस्स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।
ययाऽस्य वाचा पर उद्विजेत
न तां वदेदुशतीं पापलोक्याम् ॥ १७

अरुन्तुदं परुषं रूक्षवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यम् ।
क्षिप्रंह्यलक्ष्मीर्भजते नरं तं
मुखे निबद्धां निकृतिं वहन्तम् ॥ १८

सद्भिः पुरस्तादथ पूजितस्स्यात्
सद्भिस्सदा पृष्ठतो रक्षितस्स्यात् ।
सदाऽसतामतिवादांस्तितिक्षेत्
सतां वृत्तं चाददीतार्यवृत्तिः ॥ १९

वाक्सायका वदनान्निष्पतन्ति
यैराहतश्शोचति रात्र्यहानि ।
परस्य वा मर्मसु ये पतन्ति
तान् पण्डितो नावसृजेत्परेषु ॥ २०

नैतादृशं संवननं त्रिषु लोकेषु विद्यते ।
दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥ २१

तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् ।
पूज्यान् संपूजयेन्नित्यं न याचेच्च कदा चन ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
॥ ७ ॥ संभवपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[अस्मिन्नध्याये २२ श्लोका.]

॥ द्विसप्ततितमोऽध्यायः ॥

स्वर्गतो ययातेः पतनं । अष्टकप्रश्नश्च ॥ १ ॥

इन्द्रः—

सर्वाणि कर्माणि समाप्य राजन्
गृहं परित्यज्य वनं गतोऽसि ।
तत् त्वां पृच्छामि नहुषस्य पुत्र
केनासि तुल्यस्तपसा ययाते ॥ १

ययातिः—

हं देवमनुष्येषु न गन्धर्वमहर्षिषु ।
त्मनस्तपसा तुल्यं कंचित् पश्यामि वासव ॥ २

इन्द्रः—

यदाऽवमंस्थाः सदृशाञ्छ्रेयसश्च
वरीयसश्चापि निजप्रभावात् ।
तस्माल्लोकाश्चान्तवन्तश्च ये ते
क्षीणे पुण्ये पतितोऽस्यद्य राजन् ॥ ३

ययातिः—

सुर्षिगन्धर्वनरावमानात्
क्षयं गतो मे यदि शक्र लोकः ।

इच्छेयं वै सुरलोकाद्विहीनः
सतां समीपे पतितुं देवराज ॥ ४

इन्द्रः—

सतां सकाशे पतितोऽसि राजंश्
च्युतः प्रतिष्ठां यत्र लब्धोऽसि भूयः ।
एवं विदित्वा नाहुष मा स्म सर्वान्
वाचाऽवमंस्थाः सदृशाञ्श्रेयसश्च ॥ ५

वैशम्पायनः—

ततः प्रभूतामरराजजुष्टात्
पुण्याल्लोकात् पतमानं ययातिम् ।
संप्रेक्ष्य राजर्षिरथाष्टकस्तं
उवाच सद्धर्मविधानगोप्ता ॥ ६

अष्टकः—

कस्त्वं युवा वासवतुल्यरूपः
स्वतेजसा दीप्यमानो यथाऽग्निः ।
पतस्युदीर्णाम्बुधरान्धकारात्
खात् खेचराणां प्रवरो यथाऽर्कः ॥ ७

दृष्ट्वा च त्वां सूर्यपथात् पतन्तं
वैश्वानरार्कद्युतिमप्रमेयम् ।

किं नु स्विदेतत्पततीति सर्वे
वितर्कयन्तः परिमोहितास्स्मः ॥ ८

दृष्ट्वा च त्वां विष्ठितं देवमार्गे
शक्रार्कविष्णुप्रतिमप्रभावम् ।
अभ्युद्गतास्त्वां वयमद्य सर्वे
तत्वं पाते तव जिज्ञासमानाः ॥ ९

न चापि त्वां धृष्णुमः प्रष्टुमग्रे
न च त्वमस्मान् पृच्छसे ये वयं स्मः ।
तत्त्वां पृच्छामः कमनीयरूप
कस्य त्वं वा किंनिमित्तं त्वमागाः ॥ १०

भयं तु ते ह्येतु विषादमोहौ
त्यजाशु देवेन्द्रसमानुरूप ।
त्वां वर्तमानं हि सतां सकाशे
नालं प्रसोढुं बलवृत्रहन्ता ॥ ११

सन्तः प्रतिष्ठा हि सुखच्युतानां
सतां सदैवामरराजकल्प ।
सुसङ्गतास्थावरजङ्गमेशाः
प्रतिष्ठितस्त्वं सदृशेषु सत्सु ॥ १२

प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः ।
प्रभुस्सूर्यः प्रकाशित्वे सतामभ्यागतः प्रभुः ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
॥ ७ ॥ संभवपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये १३ श्लोकाः ।]

॥ त्रिसप्ततितमोऽध्यायः ॥

यथाते. स्वनामकथनपूर्वकं अष्टकेन सह संवादः ॥ १ ॥ तत्र यथातिना स्वस्य स्वर्गादधःपतनकारणकथनम् ॥ २ ॥

यथातिः—

अहं ययातिर्नहुषस्य पुत्रः
पूरोः पिता सर्वभूतावमानात् ।
प्रभ्रंशितस्सुरर्षिसिद्धलोकाद्
इतश्च्युतः प्रपताम्यल्पपुण्यः ॥ १

अहं हि पूर्वो वयसा भवद्भ्यस्
तेनाभिवादं भवतां न प्रयुञ्जे ।
यो विद्यया तपसा जन्मना वा
वृद्धस्स पूज्यो भवति द्विजानाम् ॥ २

अष्टकः—

अविद्वांश्चेद्वयसा यस्सवृद्धः
इतीह राजन्नाभिवाद्यः कथञ्चित् ।
यो वै विद्वान् वयसा न स्म वृद्धः
स वै पूज्यो भवति द्विजानाम् ॥ ३

ययातिः—

प्रतिकूलं कर्मणां पापमाहुस्
तद्वर्तने प्रापणे पापलोक्यम् ।
तस्मात् सन्तो नातिवर्तन्ति चैतद्
यदात्मैषामप्यनुकूलवादी ॥ ४

अष्टकः—

अभूद्धनं मे विपुलं महद्वै
विवेष्टमानो नाधिगन्ता तदस्मि ।
एवं प्रधार्यात्महिते निविष्टो
यो वर्तते नावजानाति जीवन् ॥ ५

महाधनो यो यजते स्म यज्ञैर्
यस्सर्वविद्यासु विनीतबुद्धिः ।
वेदानधीत्य तपसा योज्य देहं
दिवं स यायात् पुरुषो वीतमोहः ॥ ६

न जातु हृष्येन्महता धनेन
वेदानधीयीत नाहंकृतस्स्यात् ॥ ६॥

नानाभावा बहवो जीवलोके
दैवाधीना नष्टचेष्टाधिकाराः ।
तत्प्राप्येत न विहन्येत धीरो
दिष्टं बलीय इति मत्वाऽऽत्मबुद्ध्या ॥ ७॥

सुखं हि जन्तुर्यदि वाऽपि दुःखं
दैवाधीनं विन्दति नात्मशक्त्या ।
तस्माद्दिष्टं बलवन्मन्यमानो
न संज्वरेन्नातिहृष्येत्कदाचित् ॥ ८॥

दुःखे न तप्येत सुखे न हृष्येत्
समेन वर्तेत स दैव धीरः ॥ ९

ययातिः—

भये न मुह्याम्यष्टकाहं कदाचित्
सन्तापो मे मनसो नास्ति कश्चित् ।
धाता यथा मां विदधाति लोके
ध्रुवं तथाऽहं भवितेति मत्वा ॥ १०

संस्वेदजादुद्भिजादण्डजाद्वा
सरीसृपाः कृमयोऽथाप्सु मत्स्याः ।
तथाऽमानस्तृणकाष्ठं च सर्वे
दिष्टक्षये स्वां प्रकृतिं भजन्ति ॥ ११

अनित्यतां सुखदुःखस्य मत्वा
बुद्ध्या कस्मादष्टक संपतेयम् ।
किं कुर्यां वै किं च कृत्वा न तप्ये
तस्मात्सन्तापं वर्जयाम्यप्रमत्तः ॥ १२

दुःखे न खिद्येन्न सुखेन माद्येत्
समेन वर्तेत स धीरधर्मा ।
दिष्टं बलीयस्समवेक्ष्य बुद्ध्या
न सज्जते चात्र भृशं मनुष्यः ॥ १३

दृष्टो हि मे परमश्चापि लोकः
प्राप्ता लोकास्सर्वतो नास्ति निष्ठा ॥ १३॥

अष्टकः—

ये ये लोकाः पार्थिवेन्द्र प्रधानाः
स्वयं भुक्ता यं च कालं यथावत् ।
तं मे राजन् ब्रूहि सर्वं यथावत्
क्षेत्रज्ञवद्भाषसे त्वं हि धर्मम् ॥ १४॥

ययातिः—

राजाऽहमासमिह सार्वभौमस्-
ततो लोकान् महतोऽहं जयेयम् ।

तत्रावसं वर्षसहस्रमात्रं
ततो लोकमपरमभ्युपेतः ॥ १५॥

ततः पुरीं पुरुहूतस्य रम्यां
सहस्रद्वारां शतयोजनान्ताम् ।
[1]अध्यवसं वर्षसहस्रमात्रं
ततो लोकमपरमभ्युपेतः ॥ १६॥

ततो दिव्यमजरं प्राप्य लोकं
प्रजापतेर्लोकमन्यैर्दुरापम् ।
तत्रावसं वर्षसहस्रमात्रं
ततो लोकमपरमभ्युपेतः ॥ १७॥

देवस्य देवस्य निवेशने च
विजित्य लोकानवसं यथेष्टम् ।
संपूज्यमानस्त्रिदशैस्समेतैस्-
तुल्यप्रभावद्युतिरीश्वराणाम् ॥ १८॥

तथाऽवसं नन्दने कामरूपी
संवत्सराणामयुतं शतानाम् ।
सहाप्सरोभिर्विहरन् पुण्यगन्धान्
पश्यन्नगान् पुष्पिताग्रान् सुरूपान् ॥ १९॥

1. क-ख-ग—अध्यावसं

तत्रस्थं मां देव सुखेषु सक्तं
कालेऽतीते महति ततोऽतिमात्रम् ।
दूतो देवानामब्रवीदुग्ररूपो
ध्वंसेत्युच्चैश्चिः प्लुतेन स्वरेण ॥ २०॥

एतावन्मे विदितं राजसिंह
ततो भ्रष्टोऽहं नन्दनात् क्षीणपुण्यः ।
वाचोऽश्रौषं चान्तरिक्षे सुराणाम्
अनुक्रोशाच्छोचतां मानवेन्द्र ॥ २१॥

अहो कष्टं क्षीणपुण्यो ययातिः
पतत्यसौ पुण्यकृत्पुण्यकीर्तिः ।
तानब्रुवं पतमानस्तथाऽहं
सतां मध्ये निपतेयं कथं नु ॥ २२॥

तैराख्याता भवतां यज्ञभूमिः
समीक्ष्यैनां त्वरितमुपागतोऽस्मि ।
हविर्गन्धं देशिकं यज्ञभूमेर्
धूमापाङ्गं प्रतिगृह्णन् प्रतीतः ॥ २३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ ७ ॥ संभवपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
[अस्मिन्नध्याये २३॥ श्लोकाः ।]

।। चतुस्सप्ततितमोऽध्यायः ।।

मृतस्य स्वर्गादिभोगानन्तरं पुनर्जननप्रकारकथनम् ॥ १ ॥

अष्टकः—

तथा वसन्नन्दने कामरूपी
संवत्सराणामयुतं शतानाम् ।
किं कारणं कार्तयुगप्रधान
हित्वापि तद्येन धरां प्रपन्नः ।। १

ययातिः—

संबन्धिनो ज्ञातिसुहृज्जनाश्च
क्षीणे वित्ते संत्यजन्तीह मर्त्यम् ।
तथा चैनं क्षीणपुण्यं मनुष्यं
त्यजन्ति सद्यस्सेश्वरा देवसङ्घाः ।। २

अष्टकः—

कथं तत्र क्षीणपुण्या भवन्ति
संमुह्यते मेऽत्र मनोऽतिमात्रम् ।
के वा विशिष्टाः कस्य धामोपयान्ति
तन्मे ब्रूहि क्षेत्रवित् त्वं मतो मे ।। ३

ययातिः—

इमं भौमं नरकं ते पतन्ति
लालप्यमाना नरदेव सर्वे ।
ते कङ्कगोमायुबलाशनार्थं
क्षीणे पुण्ये बहुशः प्रव्रजन्ति ॥ ४

तस्मादेतद्वर्जनीयं नरेण
दुष्टं लोके गर्हणीयं च कर्म ।
आख्यातं ते पार्थिव सर्वमेतद्
भूयश्चेदानीं वद किं ते वदामि ॥ ५

अष्टकः—

यदा समन्तात्पतितं तुदन्ति
वयांसि गृध्राः पिशिताशनाश्च ।
कथं भवन्ति कथमाविर्भवन्ति
न भौममन्तं नरकं शृणोमि ॥ ६

ययातिः—

ऊर्ध्वं देहा[1]द्ब्रह्मणा जृम्भमाणाद्
व्यक्तं पृथिव्यामिह संचरन्तः ।
इमं भौमं नरकं ते पतन्ति
नावेक्षन्ते वर्षपूगाननेकान् ॥ ७

1. क-ख-ग—ब्राह्मणा जृम्भमाणाः

षष्टिं सहस्राणि पतन्ति व्योम्नः
तथाऽशीतिं चोपरिवत्सराणि ।
तान्वै तुदन्ति प्रपतन्तं प्रपातं
भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ॥ ८

अष्टकः—
यदेनसा ते पततस्तुदन्ति
भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ।
कथं भवन्ति कथमाविर्भवन्ति
कथंभूता गर्भभूता भवन्ति ॥ ९

ययातिः—
अस्रं रेतः पुष्परसानुवृत्तम्
अन्वेति तावत् पुरुषेण सृष्टम् ।
तच्चैतस्यां रज आपद्यते वै
स गर्भभूतस्समुपैति तत्र ॥ १०

वनस्पतींश्चौषधीश्चाविशन्ति
आपो वायुः पृथिवी चान्तरिक्षम् ।
चतुष्पदां द्विपदां सर्वमेव
रसा भूता गर्भभूता भवन्ति ॥ ११

अष्टकः—
अन्यो हि वैनं विदधातीह गर्भम्
उताहोस्वित् स्वेन कामेन याति ।

आपद्यमानो नरयोनिमेताम्
आचक्ष्व मे संशयात् प्रब्रवीमि ॥ १२

शरीरदेहातिसमुच्छ्रयं च.
चक्षुश्श्रोत्रे लभते केन संज्ञाम् ।
एतत्तत्त्वं सर्वमाचक्ष्व पृष्टः
क्षेत्रज्ञं त्वां तात मन्याम सर्वे ॥ १३

ययातिः—

वायुस्समुत्कर्षति गर्भयोनिम्
ऋतौ रेतः पुष्परसानुवृत्तम् ।
स तत्र तन्मात्रकृताधिकारः
क्रमेण संवर्धयतीह गर्भम् ॥ १४

स जायमानो निगृहीतगात्रः
प्रज्ञातानिष्ठायतनो मनुष्यः ।
स श्रोत्राभ्यां वेदयतीह शब्दं
सम्यग्रूपं पश्यति चक्षुषा च ॥ १५

घ्राणेन गन्धं जिह्वया वै रसं च
त्वचा स्पर्शं मनसा देवभावान् ।
इत्यष्टकैतान् विहितांश्च विद्धि
सहात्मनः प्राणभृतश्शरीरे ॥ १६

अष्टकः—

यस्संस्थितः पुरुषो दह्यते वा
निहन्यते वा विनिकृष्यते वा ।
अभावभूतस्स विनाशमेत्य
केनात्मना चेतयते पुरस्तात् ॥ १७

ययातिः—

हित्वा सोऽसून् सुप्तवन्निष्टनित्वा
पुरोधाय स्वं सुकृतं दुष्कृतं च ।
अन्यां योनिं पवमानानुसारी
हित्वा देहं भजते राजसिंह ॥ १८

पुण्यां योनिं पुण्यकृतो भजन्ते
पापां योनिं पापकृतो भजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ॥ १९

चतुष्पदा द्विपदाष्षट्पदाश्च
तथा राजन् गर्भभूता भवन्ति ।
आख्यातमेतन्निखिलेन सर्वं
भूयस्तु किं पृच्छसि राजसिंह ॥ २०

अष्टकः—

किंस्वित् कृत्वा लभते तात लोकान्
मर्त्यश्श्रेष्ठांस्तपसा विद्यया च ।

तन्मे पृष्टश्शंस सर्वं यथावच्
छुभांल्लोकान् येन गच्छेत् क्रमेण ॥ २१

ययातिः—

तपश्च दानं च यशो दमश्च
ह्रीरार्जवं सर्वभूतानुकम्पा ।
नश्यन्ति मानेन तथाऽभिभूताः
पुंसस्सदैवेति वदन्ति सन्तः ॥ २२

अधीयानः पण्डितंमन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
तस्यान्तवन्तश्च भवन्ति लोका
न चास्य तद्ब्रह्म फलं ददाति ॥ २३

चत्वारि कर्माण्यभयङ्कराणि
भयं प्रयच्छन्त्ययथाकृतानि ।
मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ॥ २४

न मानमान्यो मुदमाददीत
न सन्तापं प्राप्नुयाच्चावमानात् ।
तं साधवः पूजयन्तीह लोके
नासाधवस्साधुबुद्धिं लभन्ते ॥ २५

इति दद्यादिति यजेद् इत्यधीयीत मे व्रतम् ।
इत्यस्मीति भयान्याहुस् तानि वर्ज्यानि नित्यशः ॥ २६

ये नाश्रमान् वेदयन्ते पुराणाः
मनीषिणो मनसा संविभक्तान् ।
तन्निश्रेयस्तैजसं रूपमेत्य
परां शान्तिं प्राप्नुते प्रत्यगेव ॥ २७

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥

॥ ७ ॥ संभवपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

[अस्मिन्नध्याये २७ श्लोकाः]

॥ पञ्चसप्ततितमोऽध्यायः ॥

ब्रह्मचर्याद्याश्रमविषयकाष्टकययातिप्रश्नप्रतिवचनम् ॥ १ ॥

अष्टकः—

चरन् गृहस्थः कथमेति देवान्
कथं भिक्षुः कथमाचार्यकर्मा ।
वानप्रस्थस्सत्पथे सन्निविष्टो
कथमेतस्मिन् संप्रति वेदयन्ति ॥ १

ययातिः—

आहूताध्यायी गुरुकर्मस्वचोद्यः
पूर्वोत्थायी चरमं चोपशायी ।
मृदुर्दान्तो धृतिमानप्रमत्तः
स्वाध्यायशीलस्सिध्यति ब्रह्मचारी ॥ २

धर्मागतं प्राप्य धनं यजेत
दद्यात् सदैवातिथीन् भोजयेच्च ।
अनाददानश्च परैरदत्तं
सैषा गृहस्थोपनिषत्पुराणी ॥ ३

स्ववीर्यजीवी वृजिनान्निवृत्तो
दाता परेभ्यो न परोपतापी ।
मृगैस्सचारी वनजान्नभोजी
तादृङ्मुनिस्सिद्धिमुपैत्यरण्ये ॥ ४

अशिल्पजीवी न गृहस्थश्च नित्यं
जितेन्द्रियस्सर्वतो विप्रमुक्तः ।
अनौकसारी लघुरल्पाशनश्च
चरन् देशानेकचरस्स भिक्षुः ॥ ५

राज्या यया चाभिजिताश्च लोका
भवन्ति कामाविजितास्सुखाश्च ।

तामेव रात्रिं प्रयतेत विद्वान्
अरण्यनित्यो भवितुं यतात्मा ॥ ६

दशैव पूर्वानपरान्दशैव
[1]ज्ञातीन् सहात्मानमथैकविंशम् ।
अरण्यनित्यस्सुकृते दधाति
विमुच्यारण्ये स्वशरीरधातून् ॥ ७

अष्टकः—

[2]कथं स्विद्वसतोऽरण्यं कति मौनानि चाप्युत ।
भवन्तीति तदाचक्ष्व श्रोतुमिच्छामहे वयम् ॥ ८

ययातिः—

अरण्ये वसतो यस्य ग्रामो भवति पृष्ठतः ।
ग्रामे निवसतोऽरण्यं स मुनिस्स्याज्जनाधिप ॥ ९

अष्टकः—

कथंस्विद्वसतोऽरण्ये ग्रामो भवति पृष्ठतः ।
ग्रामे वा वसतोऽरण्यं कथं भवति पृष्ठतः ॥ १०

ययातिः—

न ग्राम्यमुपयुञ्जीत य आरण्यो मुनिर्भवेत् ।
तथाऽस्य वसतोऽरण्ये ग्रामो भवति पृष्ठतः ॥ ११

---

1. घ—ज्ञातिस्तथात्मानमथैकविंशत्
2. घ—कतिस्विदेव मुनयो मौनानि कति चाप्युत

अनग्निरनिकेतश्च अगोत्रचरणो मुनिः ।
कौपीनाच्छादनी चीरी सर्वस्वादुविवर्जितः ॥ १२

यावत्प्राणाभिसन्धानं तावदिच्छेच्च भोजनम् ।
तथाऽस्य वसतो ग्रामेऽरण्यं भवति पृष्ठतः ॥ १३

यस्तु कामान् परित्यज्य [1]त्यक्त्वा कर्म जितेन्द्रियः ।
आतिष्ठेच्च मुनिर्मौनं स लोके सिद्धिमाप्नुयात् ॥ १४

धौतदन्तं कृत्तनखं सदा [2]स्नातं दयापरम् ।
असितं सितकर्मस्थं कस्तं नार्चितुमर्हति ॥ १५

तपसा कर्शितः क्षामः क्षीणमांसास्थिशोणितः ।
यदा भवति निर्द्वन्द्वो मुनिर्मौनं समास्थितः ॥ १६
अथ लोकमिमं जित्वा लोकं विजयते परम् ॥ १६॥

आस्येन तु य आहारं गोवन्मृगयते मुनिः ।
अथास्य लोकः पूर्वो यस् सोऽमृतत्वाय कल्पते ॥ १७॥

सामान्यधर्मस्सर्वेषां क्रोधो लोभो द्रुहाऽक्षमा ॥ १८

विहाय मत्सरं स्तैन्यं गर्वं दम्भं च पैशुनम् ।
क्रोधं लोभं ममत्वं च यस्य नास्ति स धर्मवित् ॥ १९

अष्टकः—

नित्यस्नायी ब्रह्मचारी गृहस्थो वनगो मुनिः ।

---

1. घ—त्यक्तुकामो 2. घ—स्नानमलंकृतम्

नाधर्ममशनात्प्राप्येत् कथं ब्रूहीह पृच्छते ॥ २०

ययातिः—

अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ॥ २१

इत्येवं कारणाज्ज्ञेयम् अष्टकैतच्छुभाशुभम् ॥ २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
॥ ७ ॥ संभवपर्वणि विंशोऽध्यायः ॥ २० ॥
[अस्मिन्नध्याये २१॥ श्लोकाः]

॥ षट्सप्ततितमोऽध्यायः ॥

स्वर्गाच्च्युतस्य ययातेरष्टकादियज्ञभूमिं प्रत्यागमननिमित्तकथनम् ॥ १ ॥ अष्टकप्रतर्दनयोर्ययातिना संवादः ॥ २ ॥

अष्टकः—

कतरस्त्वेतयोः पूर्वं देवानामेति साम्यताम् ।
उभयोर्धावतो राजन् सूर्याचन्द्रमसोरिव ॥ १

ययातिः—

अनिकेतो गृहस्थेषु कामवृत्तेष्वसंयतः[1] ।
ग्राम एव वसन्भिक्षुस् तयोः पूर्वतरं गतः ॥ २

---

1. घ—षु संयतः

अवाप्य दीर्घमायुस्तु यः प्राप्तो विकृतिं चरेत् ।
तप्यते यदि तत्कृत्वा चरेत्सोऽन्यत्तपस्तथा ॥ ३

पापानां कर्मणां नित्यं बिभीयाद्यस्तु मानवः ।
सुखमप्याचरन्नित्यं सोऽत्यन्तं सुखमेधते ॥ ४

यद्वै नृशंसं तदसत्यमाहुर्
यत्सेवते धर्ममथार्थबुद्धिः[1] ।
अस्वोऽप्यनाशी च तथैव राजंस्
तदार्जवं स समाधिस्तदार्यम् ॥ ५

अष्टकः—

केनासि दूत प्रहितोऽद्य राजन्
युवा स्रग्वी दर्शनीयस्सुवर्चाः ।
कुत आगतः कतरस्यां दिशि त्वम्
उताहोस्वित्पार्थिव स्थानमस्ति ॥ ६

ययातिः—

इमं भौमं नरकं क्षीणपुण्यः
प्रवेष्टुमुर्वीं गगनाद्विप्रहीणः ।
विद्वांश्चैवं मतिमानार्यबुद्धिर्
ममाभवत्कर्मलोक्यं च सर्वम् ॥ ७

1. घ—नर्थ

उक्त्वाऽहं वः प्रपतिष्याम्यनन्तरं
त्वरयन्ति मां ब्राह्मणा लोकपालाः ॥ ७॥

सतां सकाशे तु वृतः प्रपातस्
ते सङ्गता गुणवन्तश्च सर्वे ।
शक्राच्च लब्धो हि वरो मयैष
पतिष्यता भूमितले नरेन्द्र ॥ ८॥

अष्टकः—

पृच्छामि त्वां प्रपतन्तं प्रपातं
[1]ये मे लोकास्तत्र राजेन्द्र सन्ति ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ ९॥

ययातिः—

यावत्पृथिव्यां व्रीहियवं गवाश्वं
सहारण्यैः पशुभिः पार्वतैश्च ।
तावन्तो लोका दिवि राजन् स्थिता वै
तदा विजानीहि नरेन्द्रसिंह ॥ १०॥

अष्टकः—

तांस्ते ददामि मा प्रपत प्रपातं
ये मे लोका दिवि राजेन्द्र सन्ति ।

1. घ—यदि लोका मे पार्थिवास्तत्र सन्ति

यद्यन्तरिक्षे यदि वा दिवि श्रितास्
तानाक्रमस्व क्षिप्रमभिप्लवसाह ॥ ११॥

ययातिः—

नास्मद्विधः क्षत्रियवंशजातः
प्रतिग्रहे वर्तते क्षत्रमुख्य ।
यथा प्रदेयं सततं द्विजेभ्यस्
तथाऽददं पूर्वमहं द्विजेभ्यः ॥ १२॥

नाब्राह्मणः कृपणं जातु जीवेद्
दद्यान्न याचेदिति क्षत्रधर्मः ।
सोऽहं यदा कृतपूर्वं चरेयं
विवित्समानः किमुतात्र साधु ॥ १३॥

प्रतर्दनः—

पृच्छामि त्वां काशिराजोऽहमस्मि
प्रतर्दनोऽहं यदि मे सन्ति लोकाः ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
[1]क्षेप्तव्यं त्वां तस्य धर्मस्य मन्ये ॥ १४॥

ययातिः—

ये सन्ति लोका बहवस्ते नरेन्द्र
एकैकशस्सप्त समैव तानि ।

---

1. घ—स तानाक्रमस्व प्रददाम्यहं ते ।
घ—कोशे, 15, 16, श्लोकौ न दृश्येते ॥

मधुच्युतो घृतसिक्ता विशोकास्
ते तावन्तस्त्वां प्रतिपालयन्ति ॥ १५॥

प्रतर्दनः—

तांस्ते ददानि मा प्रपत प्रपातं
ये मे लोकास्तव ते वै भवन्तु ।
यद्यन्तरिक्षे यदि वा दिवि श्रितास्
तानाक्रमस्व प्रददाम्यहं ते ॥ १६॥

ययातिः—

न तुल्यतेजास्सुकृतं कामयेत
योगक्षेमं पार्थिव पार्थिवस्सन् ।
[1]दैवादेशादापदं प्राप्य विद्वांश्
चरेन्नृशंसं न हि जातु राजा ॥ १७॥

धर्म्यं मार्गं चेतयानो यशस्यं
कुर्यान्नृपो धर्ममवेक्षमाणः ।
न मद्विधो धर्मबुद्धिं [2]विजानन्न
कुर्यादेवं कृपणं मां यथाऽऽत्थ ॥ १८॥

कुर्यात्तथा वै न कृतं यदन्यैर्
विवित्समानः किमिवात्र साधु ॥ १९

1. घ—दैवादेव आपदः 2. घ—प्रजानां

धर्माधर्मौ सुविनिश्चित्य सम्यक्
कार्याकार्येष्वप्रमत्तश्चरेद्यः ।
स वै धीमान् सत्यसन्धः कृतात्मा
राजा भवेल्लोकपालो महिम्ना ॥ २०

यदा भवेत्संशयो धर्मकार्ये
कामार्थे वा यत्र विन्दन्ति सम्यक् ।
कार्यं तत्र प्रथमं धर्मकार्यं
यन्नो विरुध्यादर्थकामौ स धर्मः ॥ २१

वैशंपायनः—

ब्रुवाणमेवं नृपतिं ययातिं
नृपोत्तमो वसुमनाश्चाब्रवीत्तम् ॥ २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

॥ ७ ॥ संभवपर्वणि एकविंशोऽध्यायः ॥ २१ ॥

[अस्मिन्नध्याये २१॥ श्लोकाः]

॥ सप्तसप्ततितमोऽध्यायः ॥

वसुमनसः शिबेश्च ययातिना संवादः ॥ १ ॥ पुनरष्टकययाति संवादः ॥ २ ॥

वसुमनाः—

पृच्छामि त्वां वसुमनैक्ष्वाकवो [1]स्मि
यदि सन्ति लोका दिवि मे स्युर्नरेन्द्र ।
यद्यन्तरिक्षे यदि वा पृथिव्यां
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १

ययातिः—

यद्यन्तरिक्षं पृथिवीं दिशश्च
यत्तेजसा तपते भानुमांश्च ।
लोकास्तावन्तो दिवि संस्थिता वै
ते नान्तवन्तः प्रतिपालयन्ति ॥ २

वसुमनाः—

तांस्ते ददामि मा प्रपत प्रपातं
ये मे लोकास्तव ते वै भवन्तु ।
क्रीणीष्वैतां तृणकेनापि तावत्
प्रतिग्रहो [2]यदि वै ते न दृष्टः ॥ ३

1. अ—स्ति 2. क-ख-ग-घ—हस्ते यदि वै न दृष्टः ॥

ययातिः—

न मिथ्याऽहं विक्रयं वै स्मरामि
यथा गृहीतं शिशुके शङ्कमानः ।
कुर्यां न चैवाकृतपूर्वमन्यैर्
विवित्समानः किमुतात्र साधु ॥ ४

वसुमनाः—

तान्सर्वलोकान् प्रतिपद्यस्व राजन्
मया दत्तान् यदि नेष्टः क्रयस्ते ।
न चाहं तान् प्रतिपद्ये च [1]मत्वा
यत्र गन्ता त्वमपहायात्मलोकम् ॥ ५

ययातिः—

यदा त्वमिन्द्रप्रतिमप्रभावस्
ते चाप्यनन्ता नरदेव लोकाः ।
तथाऽन्यलोके न रमेऽन्यदत्ते
[2]तस्मादहं नाभिनन्दामि दायम् ॥ ६

शिबिः—

पृच्छामि त्वां शिबिरौशीनरोऽस्मि
मम लोका ये पार्थिवास्तत्र सन्ति ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ ७

---

1. घ—दत्वा यत्रागन्ता 2. घ—तस्मात्तदा नाभिनन्दा ययाचम् ।

ययातिः—

[1]नेमान्वाचा हृदयेन चापि
परीप्स[2]मानस्तव मन्ये नरेन्द्र ।
ते चानन्ता दिवि लोकाश्रितास्ते
विद्युद्रूपास्स्वनवन्तो नरेन्द्र ॥ ८

शिबिः—

तांस्ते ददामि मा प्रपत प्रपातं
ये मे लोका दिवि राजेन्द्र सन्ति ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
तानाक्रमस्व प्रददाम्यहं ते ॥ ९

ययातिः—

यथा त्वमिन्द्रप्रतिमप्रभावस्
ते वाप्यनन्ता नरदेव लोकाः ।
[3]तथा न दत्ते न रमेऽन्यलोके
तस्माच्छिबे नाभिनन्दामि दायम् ॥ १०

अष्टकः—

न चेदेकैकशो राजंल्लोकान्नः प्रतिगृह्णसि ।
सर्वे प्रदाय भवतो गन्तारो [4]नगरं वयम् ॥ ११

---

1. घ—न त्वा वाचा हृदयेनापि राजा
2. घ—मानो नावमन्ये नरेन्द्र ।
3. घ—तान्यस्य लोके न रमेऽन्यदत्ते 4. घ—नरकं

ययातिः—

[1]यदर्हाय ददध्वं यत् सन्तस्सत्यानृशंस्यतः ।
अहं तु नाभिगृह्णामि यत्कृतं न मया पुरा ॥ १२

अष्टकः—

कस्यैते प्रतिदृश्यन्ते रथाः पञ्च हिरण्मयाः ।
उच्चैस्सन्तः प्रकाशन्ते ज्वलन्तो ऽग्निशिखा इव ॥ १३

ययातिः—

युष्मानेते वहिष्यन्ति रथाः पञ्च हिरण्मयाः ।
उच्चैस्सन्तः प्रकाशन्ते ज्वलन्तो ऽग्निशिखा इव ॥ १४

वैशंपायनः—

अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ।
हयस्य यानि चाङ्गानि हुत्वा च यथाक्रमम् ॥ १५

होताऽध्वर्युस्तथोद्गाता ब्रह्मणा सह भारत ।
अग्नौ प्रास्यन्ति विधिवत् समस्ताष्षोडशर्त्विजः ॥ १६

---

1. घ—तदर्हाय तद्दद्ध्वं स प्रहितोऽद्य राजन्
यस्स्रग्वी दर्शनीयस्सुवर्चाः ।
कुत आगतः कतरस्यां दिशि त्वम्
उताहोस्वित्पार्थिवस्यान्नमस्ति ॥
ययातिः—
इमं भौमं नरकं क्षीण्यपुण्यः
प्रवेष्टुं महीं गगनात् प्रहीणम् ।
विद्यां च देवं मतिमानबुद्धिर्
मा मा भवस्सत्यानृशंस्यतः ॥ [अधिकः पाठः]

धूमगन्धं वपायास्तु ये जिघ्रन्ति नराधिपाः ।
विमुक्तपापाः पूतास्ते तत्क्षणेनाभवन्नराः ॥ १७

एतस्मिन्नन्तरे चैव माधवी तु तपोधना ।
मृगधर्मपरीताङ्गी परिणामे मृगव्रतम् ॥ १८

मृगैस्सह चरन्ती सा मृगाहारविचेष्टिता ।
यज्ञवाटं मृगगणैः प्रविश्य भृशविस्मिता ॥ १९

आघ्रायन्ती धूमगन्धं मृगैरेव चचार सा ॥ १९॥

यज्ञवाटमटन्ती सा पुत्रांस्तानपराजितान् ।
पश्यन्ती यज्ञमाहात्म्यं मुदं लेभे च माधवी ॥ २०॥

असंस्पृशन्तं वसुधां ययातिं नाहुषं तदा ।
दिविष्ठं प्राप्तमाज्ञाय ववन्दे पितरं तदा ॥ २१॥

ततो वसुमनापृच्छन्मातरं वै तपस्विनीम् ॥ २२

वसुमनाः—

भवत्या यत्कृतमिदं वन्दनं वरवर्णिनि ।
कोऽयं देवोऽथवा राजा यदि जानासि मे वद ॥ २३

माधवी—

शृणुष्वं सहिताः पुत्रा नाहुषोऽयं पिता मम ।
ययातिर्मम पुत्राणां मातामह इति श्रुतः ॥ २४

पूरुं मे भ्रातरं राज्ये समावेश्य दिवं गतः ।

केन वा कारणेनैव इह प्राप्तो महायशाः ॥ २५

वैशंपायनः—

तस्यास्तद्वचनं श्रुत्वा स्थानभ्रष्टेति चाब्रवीत् ॥ २५॥

सा पुत्रस्य वचश्श्रुत्वा संभ्रमाविष्टचेतना ।
माधवी पितरं प्राह दौहित्रपरिवारितम् ॥ २६॥

माधवी—

तपसा निर्जितांल्लोकान् प्रतिगृह्णीष्व मामकान् ॥ २७

पुत्राणामिव पौत्राणां धर्मादधिगतं धनम् ।
स्वार्थमेव वदन्तीह [1]ऋषयो वेदपारगाः ॥ २८

तस्माद्दानेन तपसा अस्माकं दिवमाव्रज ॥ २८॥

ययातिः—

यदि धर्मफलं ह्येतच् छोभनं भविता तथा ।
दुहित्रा चैव दौहित्रैस् तारितोऽहं महात्मभिः ॥ २९॥

तस्मात्पवित्रं दौहित्रम् अद्यप्रभृति पैतृके ।
भविष्यति न सन्देहः पितृणां प्रीतिवर्धनम् ॥ ३०॥

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ॥ ३१॥

भोक्तारः परिवेष्टारः श्राविताराः पवित्रकाः ॥ ३२
दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।

---

1. घ—मुनयो धर्मपाठकाः

स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ॥ ३३
तिलाः पिशाचाद्[1]रक्षन्ति दर्भा रक्षन्ति राक्षसा[2]त् ।
रक्षन्ति श्रोत्रियाः पंक्तिं यतिभिर्भुक्तमक्षयम् ॥ ३४
लब्ध्वा पात्रं तु विद्वांसं श्रोत्रियं सुव्रतं शुचिम् ।
स कालः कालतो दत्तं नान्यथा काल इष्यते ॥ ३५

वैशंपायनः—

एवमुक्त्वा ययातिस्तु पुनः प्रोवाच बुद्धिमान् ।
सर्वे ह्यवभृथस्नातास् त्वरध्वं कार्यगौरवात् ॥ ३६

अष्टकः—

आतिष्ठस्व रथं राजन् विक्रमस्व विहायसम् ।
वयमप्यत्र यास्यामो यदा कालो भविष्यति ॥ ३७

ययातिः—

सर्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम् ।
एष नो विरजाः पन्था दृश्यते देव[3]वर्त्मनः ॥ ३८

वैशंपायनः—

अष्टकश्च शिबिश्चैव काशेयश्च प्रतर्दनः ।
ऐक्ष्वाकवो वसुमनाश् चत्वारो भूमिपाश्च ह ॥ ३९
सर्वे ह्यवभृथस्नातास् स्वर्गतास्साधवस्सह ॥ ३९॥
तेऽधिरुह्य रथान् सर्वे प्रयाता नृपसत्तमाः ।

1. अ-क-न् र 2. अ-क—न् 3. घ—सद्मनः

आक्रमन्तो दिवं भाभिर् धर्मेणावृत्य रोदसी ॥ ४०॥

अष्टकः—

अहं मन्ये स्वर्गतानां वरिष्ठः
सखा चेन्द्रस्सर्वथा वै महात्मा ।
कस्मादेष शिबिरौशीनरोऽयम्
एकोऽत्यगात् सर्वथ[7]ऽस्मानपोह्य ॥ ४१॥

ययातिः—

अददद्याचमानाय यावद्वित्तमविन्दत ।
उशीनरस्य पुत्रोऽयं तस्माच्छ्रेष्ठो हि नश्शिबिः ॥ ४२॥

दानं तपस्सत्यमथाऽपि धर्मो
ह्रीश्रीः क्षमा सौम्यभावस्तितिक्षा ।
राजन्नेतान्यप्रमत्तस्य राज्ञः
शिबेस्स्थितान्यानृशंस्यं च बुद्धौ ॥ ४३॥

एवं वृत्तो ह्रीनिषेधश्च यस्मात्
तस्माच्छिबिरत्यगाद्वै रथेन ॥ ४४

वैशंपायनः—

अथाष्टकः पुनरेवान्वपृच्छ-
न्मातामहं कोतुकादिन्द्रकल्पम् ॥ ४४॥

पृच्छामि त्वां नृपते ब्रूहि सत्यं
पितासि कस्यासि सुतश्च कस्य ।

कृतं त्वया यच्च न तस्य कर्ता
लोके त्वदन्यः क्षत्रियो ब्राह्मणो वा ॥ ४५॥

ययातिः—

ययातिरस्मि नहुषस्य पुत्रः
पूरोः पिता सार्वभौमस्त्विहासम् ।
गुह्यं महार्थं मामकेभ्यो ब्रवीमि
मातामहोऽहं भवतां प्रकाशम् ॥ ४६॥

सर्वामिमां [1]पृथिवीं निर्जिगाय
हस्ते लब्धामददां ब्राह्मणेभ्यः ।
मेध्यानश्वानेकशफान्सुरूपांस्
तदा देवाइशतयज्वेत्यवोचन् ॥ ४७॥

अदामहं पृथिवीं ब्राह्मणेभ्यः
पूर्णामिमामखिलैर्वाहनैश्च ।
गोभिस्सुवर्णैश्च धनैश्च मुख्यैस्-
तत्रासनानां शतमर्बुदानि ॥ ४८॥

सत्येन वेद्यां च वसुन्धरायां
तथैवाग्निर्ज्वलितो मानुषेषु ।
न मे वृथा व्याहृतमेव वाक्यं
सत्यं हि सन्तः प्रतिपूजयन्ति ॥ ४९॥

1. घ—पृथिवीमर्थपूर्णां प्रस्थे बध्वा ह्याददात्

[1]सत्येन लोका मुनयश्च सङ्घाः
सत्येन पूज्या इति मे मनोगतम् ॥ ५०

अष्टक:—
यो नस्स्वर्गजितस्सर्वान् यथावृत्तं न्यवेदयत् ।
अनसूयुर्द्विजाग्र्येभ्यः लभेन्नस्सर्वलोकताम् ॥ ५१

वैशंपायनः—[2]
एवं राजा स महात्मा ह्यतीव
स्वैदौहित्रै[3]स्स्मारितो मातृवाक्यात् ।
त्यक्त्वा महीं परमोदारकर्मा
स्वर्गं गतः कर्मभि[4]र्नेष्त्रुपेतः ॥ ५२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
॥ ७ ॥ संभवपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
[अस्मिन्नध्याये ५२ श्लोका]
उत्तरयायातं समाप्तम् ॥

॥ अष्टसप्ततितमोऽध्यायः ॥

पूरुवंशकथनम् ॥ १ ॥

जनमेजयः—
पुत्रं ययातेः प्रब्रूहि पूरुं धर्मभृतां वरम् ।
आनुपूर्व्येण ये चान्ये पूरोर्वंशविवर्धनाः ॥ १

1. घ—सर्वे च देवा मुनयश्च सर्वे
2. घ—ययाति
3. घ—तारितोऽमितसाकं
4. र्व्याप्य पृथ्वीम् ।

विस्तरेण पुनर्ब्रूहि दौष्यन्तेर्जनमेजयात् ।
संबभूव यथा राजा भरतो राजसत्तमः ॥ २

वैशंपायनः—

पूरुर्नृपतिशार्दूलो यथैवास्य पिता नृप ।
धर्मनित्यः स्थितो राज्ये शक्रतुल्यपराक्रमः ॥ ३

प्रवीरश्शतरुग्द्यौश्च त्रयः पुत्रा महाबलाः ।
पूरोः पौष्यामजायन्त प्रवीरस्तत्र वंशभाक् ॥ ४

नम[1]स्युरभवत्तस्माच् छूरश्शैब्यां सुतो महान् ।
पृथिव्यां सागरान्तायां राजा राजीवलोचनः ॥ ५

सुभ्रूस्संहननो वाग्मी सौवीरीतनयात्त्रयः ।
नम[2]स्योरभवन्पुत्राश् शूरास्सर्वे महारथाः ॥ ६

सुन्वन्तं वसुनाभ च [3]गर्गरम्यौ यशस्विनौ ।
शूरानभयदान् राजा जनयामास वीर्यवान् ॥ ७

यवीयान् सुन्वतः पुत्रो रथन्तर्यामजायत ।
शूरश्च दृढधन्वा च वपुष्मान् स नृपोत्तमः ॥ ८

रुद्राश्वं पृषदश्वं च रथदश्वं गयं मनुम् ।
यवीयाञ्जनयामास गन्धर्वान्भीमविक्रमान् ॥ ९

रुद्राश्वस्य महाबाहोर् दशाप्सरसि सूनवः ॥ ९॥

1. क-ग—न्यु 2. क-ग—न्यो 3. क-ख-ग—गर्भ

[1]ऋतेपुरथ कक्षेपुः कृपणेपुश्च वीर्यवान् ।
स्थण्डिलेपुर्जलेपुश्च स्थलेपुश्च महाबलः ॥ १०॥

[2]तेजोपुर्बलवान्धीमान् रथेपु[3]श्चन्द्रविक्रमः ।
धर्मपुस्सन्ततेपुश्च दशमो देवविक्रमः ॥ ११॥

अनाधृष्यास्सुतास्तात राजसूयाश्वमेधिनः ।
अन्तिनारस्ततो राजा विद्वांश्चर्तेपुतोऽभवत् ॥ १२॥

त्रस्नुं मोघं प्रतिरथं द्रुमं चाप्रतिमं युधि ।
एतान्वै सुषुवे साध्वी ह्यन्तिनारा[4]यशस्विनी॥ १३॥

तेषां त्रस्नुर्महावीर्यः पौरवं वंशमुद्वहन् ।
आजहार यशो दीप्तं जिगाय च वसुन्धराम् ॥ १४॥

इलिलं सुषुवे त्रस्नोर् यमुना वै तपस्विनी ॥ १५
सो ऽपि कृत्स्नामिमां भूमिं विजिग्ये जयतां वरः ॥ १५॥

रथन्तर्यामृषीन् पञ्च पञ्चभूतोपमांस्तथा ।
इलिलो जनयामास दुष्यन्त[5]प्रमुखांस्तथा ॥ १६॥

दुष्यन्तं शूरभीमौ च [6]पुपूरुं वसुमेव च ॥ १७

---

1. क-ख-ग-घ—यज्वानो जज्ञिरे पुत्राः प्रजावन्तो यशस्विनः ।
सर्वे सर्वास्त्रविदुषस्सर्वे सत्यपरायणाः ॥
[अधिकः पाठः]

2. क-ग—तेजेपुः 3. ख-ग-घ—श्चेन्द्र 4. घ—त् सरस्वती
5. क-ख-ग-घ—प्रमुखान्सुतान् 6. क-ख-ग-घ—प्रपूर्वं

तेषां ज्येष्ठो महाराज दुष्यन्तो दुर्जयो युधि ।
दुष्यन्ताल्लक्ष्मणायां तु जज्ञे वै जनमेजयः ॥ १८

शकुन्तलायां भरतो दौष्यन्तिरभवत्सुतः ।
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

॥ ७ ॥ संभवपर्वणि त्रयोदशोऽध्यायः ॥ २३ ॥

[अस्मिन्नध्याये १९ श्लोकाः]

॥ ऊनाशीतितमोऽध्यायः ॥

दुष्यन्तसाम्राज्यवर्णनम् ॥ १ ॥

जनमेजयः—

भगवन् विस्तरेणेह भरतस्य महात्मनः ।
जन्म कर्म च शुश्रूषोस् तन्मे शंसितुमर्हसि ॥ १

वैशंपायनः—

पौरवाणां वंशकरो दुष्यन्तो नाम वीर्यवान् ।
पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ॥ २

चतुर्भागं भुवः कृत्स्नं यो भुङ्क्ते मनुजेश्वरः ।
समुद्रवसनांश्चापि देशान् स समितिंजयः ॥ ३

[1]म्लेच्छानाटव्यजांश्चापि यो भुङ्क्ते रिपुमर्दनः ।
रत्नाकरान् समुद्रांश्च चातुर्वर्ण्यजनावृतान् ॥ ४

न वर्णसङ्करो राजन् नाकृष्टकरकृज्जनः ।
न पापकृत् कश्चिदासीत् तस्मिन् राजनि शासति ॥ ५

धर्म्यां वृत्तिं सेवमानाः कामार्थौ च प्रपेदिरे ।
तदा नरवरव्याघ्र तस्मिन् जनपदेश्वरे ॥ ६

नासीच्चोरभयं तात न क्षुधाभयमण्वपि ।
नासीद्व्याधिभयं चापि तस्मिञ्जनपदेश्वरे ॥ ७

स्वैर्धर्मैं रेमिरे [2]वर्णा ह्यन्यकर्मणि निस्स्पृहाः ।
तमाश्रित्य महीपालम् आसंश्चैवाकुतोभयाः ॥ ८

कालवर्षी च पर्जन्यस् सस्यानि फलवन्ति च ।
सर्वरत्नसमृद्धा च मही पशुमती तथा ॥ ९

स चाद्भुतमहावीर्यो वज्रसंहननो युवा ।
उद्यम्य मन्दरं दोर्भ्यां हरेत् सवनकाननम् ॥ १०

धनुष्यस्त्रे गदायुद्धे सर्वप्रहरणेषु च ।
नागस्कन्धेऽश्वपृष्ठे च बभूव परिनिष्ठितः ॥ ११

बले विष्णुसमश्चासीत् तेजसा भास्करोपमः ।
अक्षोभ्यत्वे ऽर्णवसमः सहिष्णुत्वे धरासमः ॥ १२

1. घ—आम्लेच्छाटविकांश्चैव 2. ख-घ—दैवे देवकर्मणि निष्ठिताः

सर्वतस्स महीपालः प्रसन्नपुरराष्ट्रवान् ।
भूयो धर्मपरैर्भावैर् मुदितं जनमावसत् ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

॥ ७ ॥ संभवपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

[अस्मिन्नध्याये १३ श्लोकाः ।]

॥ अशीतितमोऽध्यायः ॥

मृगयार्थं दुष्यन्तस्यारण्यगमनम् ॥ १ ॥

वैशंपायनः—

स कदाचिन्महाबाहुः प्रभूतबलवाहनः ।
वनं जगाम गहनं हयनागशतैर्वृतः ॥ १

खड्गशक्तिधरैर्वीरैर् गदामुसलपाणिभिः ।
प्रासतोमरहस्तैश्च ययौ योधशतैर्वृतः ॥ २

सिंहनादैश्च योधानां शङ्खदुन्दुभिनिस्वनैः ।
रथनेमिस्वनैश्चैव सनागवरबृंहितैः ॥ ३

ह्रेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटनिस्वनैः ।
आसीत्किलकिलाशब्दस् तस्मिन्गच्छति पार्थिवे ॥ ४

प्रासादवरशृङ्गस्था वरयां नृपशोभया ।
ददृशुस्तं स्त्रियस्तत्र नृपमात्मयशस्करम् ॥ ५

शक्रोपममभित्रघ्नं परवारणवारणम् ।
पश्यन्तस्त्रीगणास्तत्र शक्तिपाणिं स्म मेनिरे ॥ ६

अयं स पुरुषव्याघ्रो रणेऽद्भुतपराक्रमः ।
यस्य बाहुबलं प्राप्य न भवन्त्यसुहृद्गणाः ॥ ७

इति वाचो ब्रुवन्त्यस्तास् स्त्रियः प्रेम्णा नराधिपम् ।
तुष्टुवुः पुष्पवृष्टीश्च ससृजुस्तस्य मूर्धनि ॥ ८

तत्र तत्र च विप्रेन्द्रैस् स्तूयमानस्समन्ततः ।
निर्ययौ परया प्रीत्या वनं मृगजिघांसया ॥ ९

आबालमनुजग्मुस्तं पौरजानपदास्तदा ।
न्यवर्तन्त ततः पश्चाद् अनुज्ञाता नृपेण ह ॥ १०

सौवर्णप्रतिमेनाथ रथेन वसुधाधिपः ।
महीमापूरयामास घोषेण त्रिदिवं तदा ॥ ११

स गच्छन् ददृशे धीमान् नन्दनप्रतिमं वनम् ।
बिल्वार्कखदिराकीर्णं कपित्थवटसंकुलम् ॥ १२

विषमं पर्वतप्रस्थैर् अश्मभिश्च समाचितम् ।
निर्जलं निर्मनुष्यं च बहुयोजनमायतम् ॥ १३

मृगसङ्घैर्वृतं घोरैर् अन्यैश्चापि वनेचरैः ॥ १३॥

तद्वनं मनुजव्याघ्रस् सभृत्यबलवाहनः ।
लोडयामास दुष्यन्तस् सूदयन् विविधान् मृगान् ॥ १४॥

बाणगोचरसंप्राप्तांस् तत्र व्याघ्रगणान् बहून् ।
पातयामास दुष्यन्तो निर्बिभेद च सायकैः ॥ १५॥

दूरस्थान् सायकैः कांश्चिद् अभिनत्स नरर्षभः ।
अभ्याशमागतांश्चान्यान् खड्गेन निरकृन्तत ॥ १६॥

कांश्चिदेणान् स निर्जघ्ने शक्त्या शक्तिमतां वरः ।
गदामण्डलतत्त्वज्ञश् चचारामितविक्रमः ॥ १७॥

तोमरैरसिभिश्चापि गदामुसलकर्पणैः ।
चचार निघ्नन् वै वन्यान् स्वैरचारान् वनद्विपान् ॥ १८॥

राज्ञा चाद्भुत[1]वीर्येण यौधैश्च समरप्रियैः ।
[2]वध्यमानं महारण्यं तत्यजुश्च महामृगाः ॥ १९॥

तत्र विद्रुतसङ्घानि हतयूथपतीनि च ।
मृगयूथान्यथो भीत्या शब्दं चक्रुरनेकशः ॥ २०॥

शुष्कां चापि नदीं गत्वा जलनैराश्यकर्शिनः ।
व्यायामक्लान्तहृदयाः पतन्ति स्म विचेतसः ॥ २१॥

क्षुत्पिपासापरीताश्च श्रान्ताश्च पतिता भुवि ।

---

1. अ-क-ख—वंशेन 2. घ—लोड्य

कैश्चित्तत्र नरव्याघ्रैर् अभक्ष्यन्त बुभुक्षितैः ॥ २२॥

कोचिदग्निमथोत्पाद्य समिद्ध्य च वनेचराः ।
भक्षयन्ति स्म मांसानि प्रतप्य विधिवत्तदा ॥ २३॥

तत्र केचिद्गजा [1]मात्रा बलिनश्शस्त्रविक्षताः ।
संकुच्याग्रकरान् भीताः प्राद्रवन्ति स्म वेगिताः ॥ २४॥

शकृन्मूत्रं सृजन्तश्च क्षरन्तश्शोणितं बहु ।
वन्या गजवरास्तत्र ममृदुर्मनुजान् बहून् ॥ २५॥

तद्वनं बलमेघेन शरासारेण संवृतम् ।
व्यरोचन् महिषाकीर्णं राज्ञा हतमहामृगम् ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥
॥ ७ ॥ संभवपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
[अस्मिन्नध्याये २६॥ श्लोकाः ।]

॥ एकाशीतितमोऽध्यायः ॥

मृगयाप्रसङ्गेन दुष्यन्तस्य कण्वाश्रमगमनम् ॥ १ ॥

वैशंपायनः—

ततो मृगसहस्राणि हत्वा सबलवाहनः ।
ततो मेघघनप्रख्यं सिद्धचारणसेवितम् ॥ १

1. ग-घ—मत्ता

वनमालोकयामास नगराद्योजनद्वये ॥ १॥

मृगाननुचरन् वन्यान् श्रमेण परिपीडितः ।
मृगाननुचरंश्चापि वेगेनाश्वानचोदयत् ॥ २॥

राजा मृगप्रसङ्गेन वनमध्यं विवेश ह ।
एक एवोत्तमबलः क्षुत्पिपासासमन्वितः ॥ ३॥

तद्वनस्यान्तमासाद्य सोऽपश्यद्धरिणं ततः ॥ ४

तञ्चाप्यतीत्य नृपतिर् उत्तमाश्रमसंवृतम् ।
मनःप्रह्लादजननं मनोरममतीव च ॥ ५

शीतमारुतसंयुक्तं जगामान्यन्महद्वनम् ।
पुष्पितैः पादपैः कीर्णम् अतीव सुखशाद्वलम् ॥ ६

विपुलं मधुरारावैर् नादितं विहगैस्तदा ।
विवृद्धविटपैर्वृक्षैस् सुखच्छायैस्समावृतम् ॥ ७

षट्पदाघूर्णिततलं लक्ष्म्या परमया युतम् ॥ ७॥

नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी ।
षट्पदैर्वाप्यनाकीर्णो न कश्चित्काननेऽभवत् ॥ ८॥

विहङ्गैर्नादितं पुष्पैर् अलङ्कृतमतीव च ।
सर्वर्तुकुसुमैर्वृक्षैर् अतीव सुखशाद्वलम् ॥ ९॥

मनोरमं महेष्वासो विवेश वनमुत्तमम् । १०

मारुतान्दोलितास्तत्र द्रुमाः कुसुमशोभिताः ।
पुष्पवृष्टिं विचित्रां तु व्यसृजंस्ते पुनः पुनः ॥ ११

दिवस्पृशोऽथ संघुष्टाः पक्षिभिर्मधुरस्वरैः ।
विरेजुः पादपास्तत्र विचित्रकुसुमाम्बराः ॥ १२

तेषां पत्रप्रवालेषु पुष्पभारावनामिषु ।
रुवन्ति रावं विहगाष् षट्पदैस्सहिता मृदु ॥ १३

तत्र प्रदेशांश्च बहून् कुसुमोत्करमण्डितान् ।
लतागृहपरिक्षिप्तान् मनसः प्रीतिवर्धनान् ॥ १४

संपश्यन् स महातेजा बभूव मुदितस्तदा ॥ १४॥

परस्पराश्लिष्टशिखैर् अङ्घ्रिपैः कुसुमाचितैः ।
अशोभत वनं मत्तैर् महेन्द्रध्वजसन्निभैः ॥ १५॥

सिद्धचारणसङ्घैश्च गन्धर्वाप्सरसां गणैः ।
सेवितं वनमत्यर्थं मत्तवानरकिन्नरैः ॥ १६॥

सुखशीतस्सुगन्धश्च पुष्परेणुवहोऽनिलः ।
परिक्रामन् वने वृक्षान् उपैति च रिरंसया ॥ १७॥

एवंगुणसमायुक्तं ददर्श स वनं नृपः ।
नदीकच्छोद्भवं कान्तम् उच्छ्रितध्वजसन्निभम् ॥ १८॥

प्रेक्षमाणो वनं तत्तु सुप्रहृष्टविहङ्गमम् ।

1. अ—क

आश्रमप्रवरं रम्यं ददर्श च मनोरमम् ॥ १९॥

नानामृगसमाकीर्णं संप्रज्वलितपावकम् ।
यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितम् ॥ २०॥

अग्न्यगारैश्च बहुभिः पुष्पसंस्तरसं[1]स्कृतैः ।
महीकच्छै[2]र्बृहद्भिश्च विभ्राजितमतीव च ॥ २१॥

मालिनीमभितो राजन् नदीं पुण्य[3]सुखावहाम् ।
नैकपक्षिगणाकीर्णां तपोवनमनोरमाम् ॥ २२॥

तत्र व्यालमृगान् सौम्यान् पश्यन् प्रीतिमवाप सः ॥ २३॥

त चाप्रतिरथश्रीमान् आश्रमं प्रत्यपूजयत् ।
देवलोकप्रतीकाशं सर्वतस्सुमनोहरम् ॥ २४

नदीमाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः ।
सर्वप्राणभृतां तत्र जननीमिव विष्ठिताम् ॥ २५

सचक्रवाकपुलिनां पुष्पफेनप्रवाहिनीम् ।
सकिन्नरगणावासां वानरर्क्षनिषेविताम् ॥ २६

पुण्यस्वाध्यायसंघुष्टां नियमव्रतचारिणाम् ।
मत्तवारणशार्दूलभुजगेन्द्रनिषेविताम् ॥ २७

तस्यास्तीरे भगवतः काश्यपस्य महात्मनः ।

---

1. क-ख-ग—वृतम; घ—स्तृतैः 2. क-ख-घ—मंहद्भिश्च
3. अ—सरोरुहाम्

आश्रमप्रवरं पुण्यं महर्षिगणसेवितम् ॥ २८

[1]नदीमाश्रमसंबद्धां तत्राश्रमपदं तथा ।
चकाराभिप्रवेशाय मतिं स नृपतिस्तदा ॥ २९

अलङ्कृतं द्वीपवत्या मालिन्या[2]ऽतीव रम्यया ।
नरनारायणस्थानं गङ्गयेवोपशोभितम् ॥ ३०

मत्तबर्हिणसंघुष्टं प्रविवेश महद्वनम् ॥ ३०॥

तत्स चैत्ररथप्रख्यं समुपेत्य जनेश्वरः ।
अतीव गुणसंपन्नम् अनिर्देश्यं च चक्षुषाम् ॥ ३१॥

महर्षिं काश्यपं द्रष्टुम् अथ कण्वं तपोधनम् ॥ ३२
रथनागाश्वसंबाधां पदातिजनसङ्कुलाम् ।
अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ॥ ३३

दुष्यन्तः—

मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनम् ।
काश्यपं स्थीयतामत्र यावदागमनं मम ॥ ३४

वैशंपायनः—

तद्वनं नन्दनप्रख्यम् आसाद्य मनुजेश्वरः ।
क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलाम् ॥ ३५
सामात्यो राजलिङ्गानि सोपनीय नराधिपः ।

---

1. क-ख-ग—सम्बाधां स्मृत्वा ; घ—सम्बाधां श्रुत्वा ।
2. क-ख-ग-घ—रम्यतीरया ।

पुरोहितसहायश्च जगामाश्रममण्डलम् ॥ ३६

दिदृक्षुस्तत्र तमृषिं तपोराशिमथाव्ययम् ।
ब्रह्मलोकप्रतीकाशम् आश्रमं सोऽभिवीक्ष्य च ॥ ३७

षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतम् ।
विस्मयोत्फुल्लनयनो राजा प्रीतो बभूव ह ॥ ३८

[1]ऋचो बह्वृचमुख्यैश्च प्रेर्यमाणाः पदक्रमैः ।
[2]शुश्राव मनुजव्याघ्रो वितते ष्विव कर्मसु ॥ ३९

यज्ञविद्याङ्गविद्भिश्च यजुर्विद्भिश्च शोभितम् ।
मधुरैस्सामगीतैश्च शिरोभिर्नियमव्रतैः ॥ ४०

[3]भारुण्डसामगीताभिर् अथर्वशिरसोद्भवैः ।
अमिताभिस्सुनियमैश् शुशुभे स तदाश्रमः ॥ ४१

[4]अथर्वभिः ऋग्यजुस्सामभिश्शोभितैस्तदा ॥ ४१॥
संहितामीरयन्ति स्म पदक्रमयुतां तु ते ॥ ४२

शब्दसंस्कारसंयुक्तं ब्रुवद्भिर्न्यायवित्तमैः ।

---

1. क-ख-ग-घ—न्यायतत्त्वार्थविज्ञानसम्पन्नैर्वेदपारगैः ।
[अधिकः पाठः]

2. क-ख-ग—क्रत्वर्थांश्च प्रकाशद्भिर् यजुर्भिर्निर्मलस्वरैः ।
जटावर्णविभागज्ञैरुच्यमानाननेकशः ॥
[अधिकः पाठः]

3. अ—हारुण्या

4. क-ख-ग—अथर्वर्ग्यजुस्सामभिः पूजितं शोभितं तदा ।

नादितस्स बभौ श्रीमान् ब्रह्मलोक इवा[1]परः ॥ ४३

यज्ञसंस्तरविद्भिश्च क्रमशिक्षाविशारदैः ।
न्यायतत्त्वार्थविज्ञानसंपन्नैर्वेदपारगैः ॥ ४४

[2]नानावाक्यसमाहार तत्त्वज्ञानविशारदैः ।
वैशिष्टिकार्थविद्भिश्च मोक्षधर्मविशारदैः ॥ ४५

स्थापनाक्षेपसिद्धान्तपरमार्थज्ञतां गतैः ।
शब्दच्छन्दोनिरुक्तज्ञैः कालज्ञानविशारदैः ॥ ४६

द्रव्यकर्मगुणज्ञैश्च कार्यकारणवेदिभिः ।
जल्पवादवितण्डज्ञैर् व्यासग्रन्थसमाश्रितैः ॥ ४७
नानाशास्त्रेषु मुख्यैश्च शुश्राव स्वनमीरितम् ॥ ४७॥

लोकायतिकमुख्यैश्च समन्तादभिनादितम् ॥ ४८

तत्र तत्र च विप्रेन्द्रान् नियतान् संशितव्रतान् ।
जपहोमरतान् सिद्धान् ददर्श परवीरहा ॥ ४९

आसनानि विचित्राणि पुष्पवन्ति महीपतिः ।
प्रयत्नोपहितानि स्म दृष्ट्वा विस्मयमागमत् ॥ ५०

देवतायतनानां च प्रेक्ष्य पूजां कृतां द्विजैः ।
ब्रह्मलोक[3]सम राजन् मेने स नृपसत्तमः ॥ ५१

---

1. क-ख-ग-घ—श्रमः 2. अ—कोशे इदमर्धं नास्ति
3. क-ग-घ—स्थमात्मानं

तं काश्यपतपोगुप्तम् आश्रमप्रवरं शुभम् ।
नातृप्यत्प्रेक्षमाणो वै तपोधनगणैर्युतम् ॥ ५२

स काश्यपस्यायतनं महाव्रतैर्
वृतं समन्तादृषिभिस्तपोधनैः ।
विवेश सामात्यपुरोहितोऽरिहा
विविक्तमत्यर्थमनोहरं शिवम् ॥ ५३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
॥ ७ ॥ संभवपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
[अस्मिन्नध्याये ५३ श्लोकाः]

॥ द्व्यशीतितमोऽध्यायः ॥

कण्वाश्रमे दुष्यन्तशकुन्तलासंवादः ॥ १ ॥ शकुन्तलायाः स्वजन्मवृत्तान्तकथनारम्भः ॥ २ ॥

वैशम्पायनः—

ततो गत्वा महाबाहुर् एकोऽमात्यान् विसृज्य सः ।
नापश्यदाश्रमे तस्मिंस् तमृषिं संशितव्रतम् ॥ १

सोऽपश्यमानस्तमृषिं शून्यं दृष्ट्वा तमाश्रमम् ।
उवाच कोऽत्र इत्युच्चैर् वनं सन्नादयन्निव ॥ २

श्रुत्वाऽथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी ।
निश्चक्रामाश्रमात्तस्माद् यथा विद्युत् घनान्तरात् ॥ ३

सा तं दृष्ट्वैव राजानं दुष्यन्तमसिवेक्षणा ।
सुव्रताऽभ्यागतं तं तु पूज्यं प्राप्तमथेश्वरम् ॥ ४

रूपयौवनसंपन्ना शीलाचारवती शुभा ।
सा तमायतपद्माक्षं व्यूढोरस्कं सुसंहतम् ॥ ५

सिंहस्कन्धं दीर्घबाहुं सर्वलक्षणपूजितम् ।
विस्पष्टं [1]मधुरां वाचं साऽब्रवीज्जनमेजय ॥ ६

स्वागतं त इति क्षिप्रम् उवाच प्रतिपूज्य च ।
आसनेनार्चयित्वाऽथ पाद्यार्घ्याचमनैस्तथा ॥ ७

पप्रच्छानामयं राजन् कुशलं च नराधिपम् ॥ ७॥

यथावदर्चयित्वा सा लज्जयावनताननना ।
उवाच स्मयमानेव किं कार्यं क्रियतां मया ॥ ८॥

आश्रमस्याभिगमने किं त्वं कार्यं चिकीर्षसि ॥ ९

कस्त्वमद्येह संप्राप्तो महर्षेराश्रमं शुभम् ॥ ९॥

तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ।
दृष्ट्वा सर्वानवद्याङ्गीं यथावत्प्रतिपूजितः ॥ १०॥

दुष्यन्तः—
राजर्षेरस्मि पुत्रोऽहम् इलिलस्य महात्मनः ।

---

1. क-ख-ञ—मधुरं वाचा; घ—स्पष्टं मधुरया वाचा

दुष्यन्त इति मे नाम सत्यं पुष्करलोचने ॥ ११॥

[1]आगतोऽहं महाभा[2]गम् ऋषिं कण्वमुपासितुम् ।
क्व गतो भगवां भद्रे तन्ममाचक्ष्व शोभने ॥ १२॥

शकुन्तला—

गतः पिता मे भगवान् फलान्याहर्तुमाश्रमात् ।
मुहूर्तं त्वं प्रतीक्षस्व द्रक्ष्यसे तमिहागतम् ॥ १३॥

वैशंपायनः—

अपश्यमानस्तमृषिं तथा चोक्तस्तया नृपः ।
तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीम् ॥ १४॥

विभ्राजमानां वपुषा तपसा च दमेन च ।
रूपयौवनसंपन्नाम् इत्युवाच महीपतिः ॥ १५॥

दुष्यन्तः—

काऽसि कस्यासि सुश्रोणि किमर्थं चागता वनम् ।
एवंरूपगुणोपेता कुतस्त्वमतिशोभने ॥ १६॥

दर्शनादेव हि शुभे त्वया मेऽपहृतं मनः ।
स्थितोऽस्म्यमितसौभाग्ये विवक्षुश्चास्मि किंचन ॥ १७॥

---

1. क-ख ग-घ—शकुन्तला
स्वागतं ते महाराज फलमूलोदकं च नः ।
प्रगृह्योपभुङ्क्ष्व त्वं किं च ते करवाण्यहम् ॥
दुष्यन्तः [अधिक पाठः]

2. क-ख-ग-घ—भागे ऋषिं

शृणु मे नागनासोरु वचनं मत्तकाशिनि ॥ १८

राजर्षेरन्वये जातः पूरोरस्मि विशेषतः ।
वृणे त्वामद्य सुश्रोणि दुष्यन्तो वरवर्णिनि ॥ १९

न मेऽन्यत्र क्षत्रियायां मनो जातु प्रवर्तते ।
ऋषिपुत्रीषु चान्यासु नावर्णासु [1]परासु वा ॥ २०

तस्मात् प्रणिहितात्मानं विद्धि मां कलभाषिणि ।
तस्य मे त्वयि भावोऽस्ति क्षत्रिया ह्यसि का वद ॥ २१

न हि मे भीरु विप्रायां मनः प्रसहते गतिम् ।
भजे त्वामायतापाङ्गे भक्तं भजितुमर्हसि ॥ २२

भुङ्क्ष्व राज्यं विशालाक्षि बुद्धिं मा त्वन्यथा कृथाः । २२॥

वैशम्पायनः—

एवमुक्ता तदा कन्या एकाकी सा तमाश्रमे ।
उवाच हसती वाक्यम् इदं सुमधुराक्षरम् ॥ २३॥

शकुन्तला—

कण्वस्याहं भगवतो दुष्यन्त दुहिता मता ।
तपस्विनो धृतिमतो धर्मज्ञस्य यशस्विनः ॥ २४॥

अस्वतन्त्राऽस्मि राजेन्द्र काश्यपो मे गुरुः पिता ।
तमेव प्रार्थय स्वार्थं नायुक्तं कर्तुमर्हसि ॥ २५॥

---

1. ख—र्णेष्ववरेषु च
घ—र्णास्वपरासु च

दुष्यन्तः—

ऊर्ध्वरेता महाभागो भगवाँल्लोकपूजितः ।
[1]चलेद्धि चित्ताद्धर्मोऽपि न चलेत्संशितव्रतः ॥ २६॥
कथं [2]त्वमस्य दुहिता संभूता वरवर्णिनी ।
संशयो मे महानत्र [3]सत्यं वक्तुमिहार्हसि ॥ २७॥

शकुन्तला—

यथाऽयमागमो मह्यं यथा चेदमभूत् पुरा ॥ २८
अन्यथा सन्तमात्मानम् अन्यथा सत्सु भाषते ।
स पापेनावृतो मूर्खस् तेन आत्मापहारकः ॥ २९
शृणु राजन् यथातत्त्वं यथाऽस्मि दुहिता मुनेः ॥ २९॥
ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् ॥ ३०
ऊर्ध्वरेता यथासि त्वं कुतस्त्येयं शकुन्तला ।
पुत्री त्वत्तः कथं जाता सत्यं मे ब्रूहि काश्यप ॥ ३१
तस्मै प्रोवाच भगवान् यथावच्छृणु पार्थिव ॥ ३१॥

कण्वः—

तप्यमानस्तपो घोरं विश्वामित्रस्सखा मम ।
कम्पयामास देवेन्द्रं पुरा शक्रं महातपाः ॥ ३२॥
[4]तपसा दीप्तवीर्योऽयं स्थानान्मां च्यावयेदिति ।

---

1. घ—चलेत्कदाचिद्धिमवान्
2. घ—त्वं तस्य ३. घ—तन्मे शंसितुमर्हसि
4. क-ख-ग—असावादित्यसङ्काशो विश्वामित्रोऽथ कौशिकः ।
[अधिकः पाठः]

भीतः पुरन्दरस्तस्मान्मेनकामिदमब्रवीत् ॥ ३३॥

इन्द्रः—

"गुणैरप्सरसां दिव्यैर् मेनके त्वं विशिष्यसे ।
श्रेयो मे कुरु कल्याणि यत् त्वां वक्ष्यामि तच्छृणु ॥ ३४॥

असावादित्यसङ्काशो विश्वामित्रोऽथ कौशिकः ।
तप्यमानस्तपो घोरं [1]ब्रह्मचर्यं च संश्रितः ॥ ३५॥

मेनके तव भारोऽयं विश्वामित्रस्सुमध्यमे ।
संशितात्मा सुदुर्धर्षश् चोग्रे तपसि वर्तते ॥ ३६॥

तन्मनश्च्यावयेस्थानात् तं गत्वा विप्रलोभय ।
चर तस्य तपोविघ्नं कुरु मे प्रियमुत्तमम् ॥ ३७॥

रूपयौवनमाधुर्यचेष्टितस्मितभाषितैः ।
लोभयित्वा वरारोहे तपसस्सन्निवर्तय ॥ ३८॥

मेनका—

महातेजास्स भगवान् सदैव च महातपाः ।
कोपनश्च तथा ह्येनं जानाति भगवानपि ॥ ३९॥

तेजसस्तपसश्चैकः कोपस्य च महात्मनः ।
त्वमप्युद्विजसे यस्य नोद्विजेयमहं कथम् ॥ ४०॥

---

1. क-ख-ग-घ—मम कम्पयते मनः ।
तपस्तस्य महाघोरं ब्रह्मचर्यं च संस्थितम् ॥
[अधिकः पाठः]

विमोह्य च वसिष्ठं च तस्य पुत्राञ्छशाप ह ।
क्षत्रे जातश्च यः पूर्वं सोऽभवद्ब्राह्मणो [1]बलात् ॥ ४१॥

शौचार्थं यो नदीं चक्रे दुर्गमां पापकर्मभिः ।
यत्तत्पुण्यतमां लोके कौशिकीति विदुर्जनाः ॥ ४२॥

बभार [2]यज्ञस्य पुरा काले दुर्गे महात्मनः ।
दारान् मतङ्गो धर्मात्मा राजर्षिर्व्याधतां गतः ॥ ४३॥

अतीतकाले दुर्भिक्षे प्रत्येत्य पुनराश्रमम् ।
[3]मुनिवारेति नद्या वै नाम चक्रे तदा प्रभुः ॥ ४४॥

मतङ्गं याजयाञ्चक्रे तत्र प्रीतमनास्स्वयम् ।
स्वं च सोमं भयाद्यस्य गतः पातुं सुरेश्वर ॥ ४५॥

अतिनक्षत्रवंशानि क्रुद्धो नक्षत्रसंपदा ।
प्रतिश्रवणपूर्वाणि नक्षत्राणि ससर्ज यः ॥ ४६॥

गुरुशापहतस्यापि त्रिशङ्कोश्शरणं ददौ ॥ ४७

ब्रह्मर्षिशापं राजर्षिः कथ माक्ष्यति कौशिकः ।
अवमत्य तदा देवैर् यज्ञाङ्गं तद्विनाशितम् ॥ ४८

अन्यानि च महातेजा यज्ञाङ्गान्यसृजत्प्रभुः ।
निनाय च तदा स्वर्गं त्रिशङ्कुं स महातपाः ॥ ४९

1. क-ख-ग-घ—महान् 2. क-ग—यत्रास्य घ—यस्यात्र
3. क-ख-ग—मुनिः पारेति; घ—दुर्गन्वारेति

एतान्यन्यानि कर्माणि भृशं देव बिभेम्यहम् ।
यथा मां न दहेत्क्रुद्धस् तथा पश्य सुरेश्वर ॥ ५०

तेजसा निर्दहेल्लोकांश् चालयेद्धरणीं तथा ।
संक्षिपेच्च महामेरुं महीमावर्तयेत्तथा ॥ ५१

तादृशं तपसा युक्तं प्रदीप्तमिव पावकम् ।
कथमस्मद्विधा बाला जितेन्द्रियमभिस्पृशेत् ॥ ५२

हुताशनमुखं दीप्तं सूर्यचन्द्राक्षितारकम् ।
कालजिह्वं सुरश्रेष्ठ कथमस्मद्विधा स्पृशेत् ॥ ५३

यमश्च सोमश्च महर्षयश्च
विश्वे देवा वालखिल्याश्च सर्वे ।
यस्योद्विजन्ते मुनयस्सदैव
कस्मादिन्द्र मादृशी नोद्विजेत ॥ ५४

त्वयैवमुक्ता तु कथं सुरेश
ऋषेर्न गच्छेयमहं समीपम् ।
रक्षां तु मे चिन्तय देवराज
यथा त्वदर्थे सुखिनी चरेयम् ॥ ५५

भवेच्च मे मन्मथस्तत्र कार्ये
सहायभूतस्तव च प्रसादात् ।

वनं च वायुस्सुरभिः प्रवापयेत्
तस्मिन् काले तमृषिं लोभयन्त्याः ॥ ५६

कामं तु मे मारुतस्तत्र वासः
प्रक्रीडितायां विवृणोतु देव ॥ ५६॥

तथेत्युक्त्वा विहिते चैव तस्मिंस्-
ततो ययौ साऽऽश्रमं कौशिकस्य ॥ ५७

इति श्रीमद्भारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥
॥ ७ ॥ संभवपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
[अस्मिन्नध्याये ५७ श्लोकाः ।]

॥ त्र्यशीतितमोऽध्यायः ॥

विश्वामित्रान्मेनकायां शकुन्तलाया जन्मकथनम् ॥ १ ॥

कण्वः—

एवमुक्तस्तया [1]शक्रः संदिदेश सदागतिम् ।
प्रातिष्ठत ततः काले मेनका वायुना सह ॥ १

तथाऽपश्यद्वरारोहा तपसोग्रेण कर्शितम् ।
विश्वामित्रं तपस्यन्तं दुर्धर्षं संशितव्रतम् ॥ २

1. अ-क—देवः

ततोऽभिवाद्य सा तस्मै प्राक्रीडद्दर्षिसन्निधौ ।
अपोवाह च वासोऽस्या मारुतश्शशिसंनिभम् ॥ ३

साऽगच्छत्त्वरिता भूमिं वासार्थंवाऽवलम्बती ।
कुत्सयन्तीव सव्रीडं मारुतं देववर्णिनी ॥ ४

[1]गृध्नुं वाससि सव्रीडां संभ्रान्तां मेनकामृषिः ।
अनिर्देश्यवयोरूपाम् अपश्यद्विवृतां तदा ॥ ५

तस्या रूपगुणं दृष्ट्वा कामार्तस्समपद्यत ।
चकार भावं संसर्गे तया कामवशं गतः ॥ ६

न्यमन्त्रयत चाप्येनां साप्यैच्छत्तमनिन्दिता ।
तौ तत्र सुचिरं कालं विजह्रते महावने ॥ ७

रममाणौ यथाकामं यथैकदिवसं तथा ।
एवं वर्षसहस्राणाम् अतीतं नाभ्यचिन्तयत् ॥ ८

कामक्रोधावाजितवान् मुनिर्नित्यं क्षमान्वितः ।
चिरार्जितस्य तपसः क्षयं स कृतवानृषिः ॥ ९

तपसस्संक्षयादेव मुनिर्मोहं समाविशत् ।
मोहाभिभूतः क्रोधात्मा [2]ययौ तां कौशिकीं मुनिः ॥ १०

पादैर्जलरवं कृत्वा अन्तर्द्वीपे कुटीं गतः ।

---

1. क-ख-ग—ग्रस्ते घ—गृद्धां
2. क-ख-ग-घ—ग्रसन्मूलफलं मुनिः ।

मेनका गन्तुकामा वै शुश्राव जलनिस्वनम् ॥ ११

तपसा दीप्तवीर्योऽसावाकाशादेति याति च ।
अद्य संज्ञां विजानामि येन केन तपःक्षयम् ॥ १२

गन्तुं न युक्तमित्युक्त्वा ऋतुस्नाता तु मेनका ।
कामरागाभिभूतस्य मुनेः पार्श्वं जगाम सा ॥ १३

जनयामास स मुनिर् मेनकायां शकुन्तलाम् ।
[1]प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥ १४

देवगर्भोपमां बालां सर्वाभरणभूषिताम् ।
शयानां शयने रम्ये मेनका वाक्यमब्रवीत् ॥ १५

मेनका—
महर्षेरुग्रतपसस् तेजस्त्वमसि भामिनि ।
तस्मात्स्वर्गं गमिष्यामि देवकार्यार्थमागता ॥ १६

कण्वः—
जातामुत्सृज्य तां कन्यां मेनका मालिनीं प्रति ।
शक्रसंसदमागच्छत् कृत्वा कार्यं शचीपतेः ॥ १७

तं वने गहने गर्भं सिंहव्याघ्रनिषेविते ।
दृष्ट्वा शयानं शकुनास् समन्तात्पर्यवारयन् ॥ १८

नेमां हिंस्युर्वने बालां क्रव्यादा मांसगर्धिनः ।
इति मत्वा स्म रक्षन्ति शकुन्ता मेनकात्मजाम् ॥ १९

1. अ—कोत्रे श्लोकत्रयं नास्ति

उपस्प्रष्टुं गतश्चाहं तामपश्यमनिन्दिताम् ।
निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ॥ २०

मां दृष्ट्वैवान्वपद्यन्त पादयोः पतिता द्विजाः ।
अब्रुवञ्शकुनास्सर्वे कलं मधुरभाषिणः ॥ २१

द्विजाः—

विश्वामित्रसुतां ब्रह्मन् न्यासभूतां भरस्व वै ।
कामक्रोधावजितवान् सखा ते कौशिकीं गतः ॥ २२

तस्मात्पोषय तत्पुत्रीं दयावानिति तेऽब्रुवन् ॥ २२॥

कण्वः—

सर्वभूतरुतज्ञोऽहं दयावान् सर्वजन्तुषु ॥ २३

निर्जनेऽपि महारण्ये शकुन्तैः परिवारिताम् ।
आनयित्वा ततश्चैनां दुहितृत्वे न्ययोजयम् ॥ २४

शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जते ।
क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्म[1]दर्शने ॥ २५

निर्जने च वने यस्माच् छकुन्तैः परिरक्षिता ।
शकुन्तलेति नामास्याः कृतं चापि ततो मया ॥ २६

एवं दुहितरं विद्धि मम सौम्य शकुन्तलाम् ।
शकुन्तला च पितरं मन्यते मामनिन्दिता ॥ २७

1. अ—साधने घ—रोधने

शकुन्तला—

एतदाचष्ट भगवान् मम जन्म महर्षये ।
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप ॥ २८

कण्वं हि पितरं मन्ये पितरं त्वमजानती ।
इति ते कथितं राजन् यथावृत्तं श्रुतं मया ॥ २९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

॥ ७ ॥ संभवपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥

[अस्मिन्नध्याये २९ श्लोकाः]

॥ चतुरशीतितमोऽध्यायः ॥

समयबन्धपूर्वकं गान्धर्वेण विवाहेन शकुन्तलापाणिग्रहणम् ॥ १ ॥ कण्वस्य स्वाश्रमं प्रति प्रत्यागमनम् ॥ २ ॥ कण्वशकुन्तलासंवादः ॥ ३ ॥ कण्वाच्छकुन्तलाया वरलाभः ॥ ४ ॥

दुष्यन्तः—

सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ।
भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥ १

सुवर्णमालां वासांसि कुण्डले परिपादुके ।
नानापत्तनजैश्शुभ्रैर् मणिरत्नैश्च शोभनैः ॥ २

आहरामि तवाद्याहं निष्कादीन्यमितानि च । २॥

सर्वं राज्यं तवाद्य त्वं भार्या मे भव शोभने ॥ ३

गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि ।
विवाहानां हि रम्भोरु गान्धर्वश्श्रेष्ठ उच्यते ॥ ४

शकुन्तला—

फलाहारो गतो राजन् पिता मम महातपाः ।
[1]मुहूर्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥ ५

पिता हि मे प्रभुर्नित्यं दैवतं परमं मतम् ।
यस्य [2]वा दास्यति पिता स मे भर्ता भविष्यति ॥ ६

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ७

अवमन्यमाना राजेन्द्र पितरं मे तपस्विनम् ।
अधर्मेण हि धर्मिष्ठ कथं वरमुपास्महे ॥ ८

दुष्यन्तः—

मा मैवं वद सुश्रोणि तपोराशिं दयात्मकम् ॥ ८॥

शकुंतला—

मन्युप्रहरणा विप्रा न विप्राश्शस्त्रपाणयः ॥ ९

[3]अग्निर्दहति तेजोभिस् सूर्यो दहति रश्मिभिः ।
राजा दहति दण्डेन ब्राह्मणो मन्युना दहेत् ॥ १०

---

1. क-ख-ग-घ—तं मुहूर्तं प्रती 2. घ- च दास्यति
3. घ--मन्युना घ्नन्ति ते शत्रून् वज्रेणेन्द्र इवासुरान् ।

[अधिक पाठः]

क्रोधितो मन्युना हन्ति वज्रपाणिरिवासुरान् ॥ १०॥

दुष्यन्तः—

जानामि भद्रे महर्षिं तस्य मन्युर्न विद्यते ।
इच्छामि त्वां वरारोहे भज मां त्वमनिन्दिते ॥ ११॥

त्वदर्थं मां स्थितं विद्धि त्वद्गतं हि मनो मम ॥ १२

आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनो मित्रमात्मैव [1]तथात्मा चात्मनः पिता ॥ १३

आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः ॥ १३॥

अष्टावेव समासेन विवाहा धर्मतस्स्मृताः ॥ १४

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः ।
[2]गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमस्स्मृतः ॥ १५

पञ्चानां तु त्रयो धर्म्या द्वावधर्मौ मताविह ।
पैशाच आसुरश्चैव न कर्तव्यौ कथञ्चन ॥ १६

[3]अनेन विधिना कार्यो धर्मश्चैष सनातनः ।
गान्धर्वराक्षसौ क्षत्रे धर्म्यौ तौ मा विशङ्कथाः ॥ १७

---

1. घ—शत्रुरात्मैव चात्मनः ।
2. क-ख-घ—तेषां धर्मं यथापूर्वं मनुस्स्वायंभुवोऽब्रवीत् ॥
प्रशस्तांश्चतुरः पूर्वान् ब्राह्मणस्योपधारय ।
षडानुपूर्व्यात क्षत्रस्य विद्धि धर्मानिनिन्दिते ॥
राज्ञां तु राक्षसो युक्तो विट्च्छूद्रेष्वासुरस्स्मृतः ॥
3. क-ख-ग-घ—अन्येन [अधिकः पाठः]

पृथग्वा यदि वा मिश्रौ कर्तव्यौ नात्र संशयः ॥ १७॥

सा त्वं मम सकामस्य सकामा भव शोभने ।
गान्धर्वेण विवाहेन भार्या मे भव भामिनि ॥ १८॥

शकुन्तला—

यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ।
प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ॥ १९॥

सत्यं मे प्रतिजानीहि [1]यद्वाचा वक्ष्म्यहं रहः ।
ब्राह्मीं मे प्रतिजानीहि प्रतिज्ञां राजसत्तम ॥ २०॥

मम जायते यः पुत्रस् स राजा त्वदनन्तरम् ॥ २१

युवराजश्च कर्तव्यस् सत्यमेतद्ब्रवीहि मे ।
यद्येतदेवं दुष्यन्त अस्तु मे सङ्गमस्त्वया ॥ २२

वैशंपायनः—

तस्यास्तु सर्वं संश्रुत्य यथोक्तं स विशांपतिः ।
दुष्यन्तः पुनरेवाह यद्यदिच्छसि तद्वद ॥ २३

शकुन्तला—

ख्यातो लोकप्रवादोऽयं विवाह इति शाश्वतः ।
वैवाहिकीं क्रियां सन्तः प्रशंसन्ति प्रजाहिताम् ॥ २४

लोकापवादशान्त्यर्थं विवाहं विधिना कुरु ।
सन्त्यत्र यज्ञपात्राणि दर्भास्सुमनसोऽक्षताः ॥ २५

---

1. क-ख-ग—त्वया रंस्याम्यहं रहः । घ—यत्तु याचाम्यहं पुनः ।

यथा युक्तो विवाहस्स्यात् तथा युक्ता प्रजा भवेत् ॥ २५॥

तस्मादाज्यं हविर्लाजास् सिकता ब्राह्मणास्तव ।
वैवाहिकानि चान्यानि सर्वमस्तीह पार्थिव ॥ २६॥

दुरुक्तमपि राजेन्द्र क्षन्तव्यं [1]धर्मकारणात् ॥ २७

वैशंपायनः—

एवमस्त्विति तां राजा प्रत्युवाचाविचारयन् ।
पुरोहितं समाहूय वचनं युक्तमब्रवीत् ॥ २८

दुष्यन्तः—

राजपुत्र्या यदुक्तं वै न वृथा कर्तुमुत्सहे ।
क्रियाहीनो हि न भवेन्मम पुत्रो महाद्युतिः ॥ २९

तथा कुरुष्व शास्त्रोक्तं विवाहं मा चिरं कृथाः ॥ २९॥

वैशंपायनः—

एवमुक्तो नृपतिना द्विजः परमयन्त्रितः ।
शोभनं राजराजेति विधिना कृतवान् द्विजः ॥ ३०॥

शासनाद्विप्रमुख्यस्य कृतमङ्गलकौतुकः ।
जग्राह विधिवत्पाणिम् उवास च तया सह ॥ ३१॥

विश्वास्य चैनां प्रातिष्ठद् अब्रवीच्च पुनः पुनः ॥ ३२

दुष्यन्तः—

प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥ ३२॥

---

1. क-ख-ग—राज्य

[1]त्रयीविवृद्धैस्सहिता नागरा मामकैस्सह ।
शिबिकासहस्रैस्सहिता वनमायान्ति बान्धवाः ॥ ३३॥

मूकाश्चैव किराताश्च कुब्जा वामनकैस्सह ।
सहिताः कञ्चुकिवरैर् वाहिनीसूतमागधैः ॥ ३४॥

शङ्खदुन्दुभिनिर्घोषैर् वनं च समुपैष्यति ॥ ३५

तथा त्वामानयिष्यामि नगरं स्वं शुचिस्मिते ॥ ३५॥

अन्यथा त्वां न नेष्यामि स्वनिवेशमसत्कृताम् ।
सर्वमङ्गलसत्कारैस् सुभ्रु सत्यं करोमि ते ॥ ३६॥

वैशम्पायनः—

एवमुक्त्वा स राजर्षिस् तामनिन्दितगामिनीम् ।
संपरिष्वज्य बाहुभ्यां स्मितपूर्वमुदैक्षत ॥ ३७॥

प्रदक्षिणीकृतां देवीं राजा संपरिषस्वजे ।
शकुन्तला ह्यश्रुमुखी पपात नृपपादयोः ॥ ३८॥

तां देवीं पुनरुत्थाप्य मा शुचेति पुनः पुनः ।
शपेयं सुकृतेनैव प्रापयिष्ये नृपात्मजे ॥ ३९॥

इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय ।
मनसा चिन्तयन् प्रायात् काश्यपं प्रति पार्थिवः ॥ ४०॥

---

1. क-ख-ग— त्रैविद्यवृद्धैस्सहिता नानाराजजनैस्सह ।
घ—त्रैविद्यवृद्धैः

भगवांस्तपसा युक्तश् श्रुत्वा किं नु करिष्यति ।
तं न प्रसाद्यागतोऽहं प्रसीदेति द्विजोत्तमम् ॥ ४१॥

एवं संचिन्तयन्नेव प्रविवेश स्वकं पुरम् ॥ ४२

ततो मुहूर्ते याते तु कण्वोऽप्याश्रममागमत् ।
शकुन्तला च पितरं ह्रिया नोपजगाम तम् ॥ ४३

शङ्कितैव च विप्रर्षिम् उपचक्राम सा शनैः ।
ततोऽस्य राजञ्जग्राह आसनं चाप्यकल्पयत् ॥ ४४

प्राक्षालयच्च सा पादौ काश्यपस्य महात्मनः ।
न चैनं लज्जयाऽशक्नोद् अक्षिभ्यामभिवीक्षितुम् ॥ ४५

शकुन्तला च सव्रीडा तमृषिं नाभ्यभाषत ।
तस्मात् स्वधर्मात् स्खलिता भीता सा भरतर्षभ ॥ ४६

अभवद्दोषदर्शित्वाद् ब्रह्मचारिण्ययन्त्रिता ॥ ४६॥

स तदा व्रीडितां दृष्ट्वा ऋषिस्तां प्रत्यभाषत ॥ ४७

कण्वः—

सव्रीडैव च दीर्घायुः पुरैव भविता न च ।
वृत्तं कथय रम्भोरु मा त्रासं च प्रकल्पय ॥ ४८

वैशंपायनः—

ततः प्रक्षाल्य पादौ सा विश्रान्तं पुनरब्रवीत् ।
निधाय कामं तस्यर्षेः कन्दानि च फलानि च ॥ ४९

ततस्संवाह्य पादौ सा विश्रान्तं वेदिमध्यगा ।
शकुन्तला पौरवाणां दुष्यन्तं जग्मुषी पतिम् ॥ ५०

ततः कृच्छ्रादतिशुभा सव्रीडा श्रीमती तदा ।
सगद्गदमुवाचेदं काश्यपं सा शुचिस्मिता ॥ ५१

शकुन्तला—

राजा ताताजगामेह दुष्यन्त इलिलात्मजः ।
मया पतिर्वृतो योऽसौ दैवयोगादिहागतः ॥ ५२

तस्य तात प्रसीदस्व भर्ता मे सुमहायशाः ।
अतस्सर्वं तु यद्वृत्तं दिव्यज्ञानेन पश्यसि ॥ ५३

अभयं क्षत्रियकुले प्रसादं कर्तुमर्हसि ॥ ५३॥

वैशम्पायनः—

चक्षुषा स तु दिव्येन सर्वं विज्ञाय काश्यपः ।
ततो धार्मिकतां मत्वा धर्मे चास्खलितं मनः ॥ ५४॥

उवाच भगवान् प्रीतस् तद्वृत्तं स महातपाः ॥ ५५

कण्वः—

एवमेतन्मया ज्ञातं दृष्टं दिव्येन चक्षुषा ॥ ५५॥

त्वयाऽद्य राजान्वयया मामनादृत्य यत्कृतम् ।
पुंसा सह समायोगो न स धर्मोपघातकः ॥ ५६॥

न भयं विद्यते भद्रे मा शुचस्सुकृतं कृतम् ॥ ५७

क्षत्रियस्य तु गान्धर्वो विवाहश्रेष्ठ उच्यते ।
सकामायास्सकामेन [1]निमन्त्रश्रेष्ठ उच्यते ॥ ५८

किं पुनर्विधिवत्कृत्वा सुप्रजात्वमवाप्स्यसि ॥ ५८॥

धर्मात्मा च महात्मा च दुष्यन्तः पुरुषोत्तमः ।
अभ्यागच्छत् पतिर्यस्त्वां भजमानां शकुन्तले ॥ ५९॥

महात्मा जनिता लोके पुत्रस्तव महायशाः ।
स च सर्वां समुद्रान्तां [2]सम्यग्रक्ष्यति मेदिनीम् ॥ ६०॥

परं चाभिप्रयातस्य चक्रं तस्य महात्मनः ॥
भविष्यत्यप्रतिहतं विततं चक्रवर्तिनः ॥ ६१॥

प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनि ।
ऋतवो बहवस्ते वै गता व्यर्थाश्शुचिस्मिते ॥ ६२॥

[3]सार्थकं सांप्रतं ह्येतन्न च पापोऽस्ति तेऽनघे ।
गृहाण च वरं मत्तस् त्वत्कृते यदभीप्सितम् ॥ ६३॥

शकुन्तला—

मया पतिर्वृतो योऽसौ दुष्यन्तः पुरुषोत्तमः ।
मम चैव पतिर्दृष्टो देवतानां समक्षतः ॥ ६४॥

तस्मै ससचिवाय त्वं प्रसादं कर्तुमर्हसि ॥ ६५

1. क-ख-ग—निमन्त्रो रहसि स्मृतः । घ—निर्मन्त्रो रहसि स्मृतः
2. क-ख-ग-घ—कृत्स्नां भोक्ष्यति
3. क-ख-ग—सार्थं समावृतं घ—सार्थकः सांप्रतं ह्येष

वैशंपायनः—

इत्येवमुक्त्वा मनसा प्रणिधाय मनस्विनी ।
ततो धर्मिष्ठतां वव्रे राज्ये [1]ऽप्रस्खलितं तथा ॥ ६६

[2]शकुन्तलां पौरवाणां दुष्यन्तहितकाम्यया ।
एवमस्त्विति तां प्राह कण्वो धर्मभृतां वरः ॥ ६७

पस्पर्श चापि पाणिभ्यां सुतां श्रीमिव रूपिणीम् ॥ ६७॥

कण्वः—

अद्यप्रभृति देवी त्वं दुष्यन्तस्य महात्मनः ।
पतिव्रतानां या वृत्तिस् तां वृत्तिमनुपालय ॥ ६८॥

वैशंपायनः—

इत्येवमुक्त्वा धर्मात्मा तां विशुद्धयर्थमस्पृशत् ।
स्पृष्टमात्रे शरीरे तु परं हर्षमवाप सा ॥ ६९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥

॥ ७ ॥ संभवपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥

[अस्मिन्नध्याये ६९॥ श्लोकाः]

---

1. क-ख-ग-घ—चास्खलनं
2. घ—शकुन्तला पौरवस्य दुष्यन्तस्य हितैषिणी ।

॥ पञ्चाशीतितमोऽध्यायः ॥

शकुंतलायाः पुत्रोत्पत्तिः ॥ १ ॥ तस्य सर्वदमनेतिनामप्राप्तिः ॥ २ ॥ शकुंतलायाः दुष्यंतपुरप्रवेशः ॥ ३ ॥

वैशंपायनः —

प्रतिज्ञाय च दुष्यन्ते प्रतियाते शकुन्तलाम् ।
[1]गर्भश्च ववृधे तस्यां राजपुत्र्यां महात्मनः ॥ १

शकुन्तला चिन्तयन्ती राजानं कार्यगौरवात् ।
दिवारात्रमनिद्रैव स्नानभोजनवर्जिता ॥ २

राजप्रेषणिका विप्राश् चतुरङ्गबलैस्सह ।
अद्य श्वो वा परश्वो वा समायान्तीति निश्चिता ॥ ३

[2]दिवसान्पक्षानृतून्मासान् अयनानि च सर्वशः ।
गण्यमानेषु वर्षेषु व्यतीयुस्त्रीणि भारत ॥ ४

त्रिषु वर्षेषु पूर्णेषु ऋषेर्वचनगौरवात् ।
[3]ऋषिपत्न्यस्सुबहवो हेतुमद्वाक्यमब्रुवन् ॥ ५

ऋषिपत्न्यः—

शृणु भद्रे लोकवृत्तं श्रुत्वा यद्वोचते तव ।

---

1. घ—गर्भस्स ववृधे तस्याः राज्ञः पत्न्या महात्मनः ।
2. क-ख-ग—दिनानि पक्षर्तुमासान्
घ—दिनपक्षमासान्सर्तून् स गणयामास चायनैः ।
3. घ—ऋषिः पश्यत्सु बहवो हेतुमद्वाक्यमब्रवीत् ।

तत्कुरुष्व हितं देवि नावमान्यं गुरोर्वचः ॥ ६

देवानां दैवतं विष्णुर् विप्राणामग्निरेव च ।
नारीणां दैवतं भर्ता लोकानां ब्राह्मणो गुरुः ॥ ७

[1]सूतिकालं प्रसूवेति भगवांस्ते पिताऽब्रवीत् ।
करिष्यामीति कर्तव्यं तदा ते सुकृतं भवेत् ॥ ८

वैशंपायनः—

पत्नीनां वचनं श्रुत्वा साधु साध्वित्यचिन्तयत् ॥ ८॥

गर्भं सुषाव वामोरूः कुमारममितौजसम् ॥ ९

त्रिषु वर्षेषु पूर्णेषु प्राजायत शकुन्तला ।
रूपौदार्यगुणोपेतं दौष्यन्ति जनमेजय ॥ १०

[2]तस्मै तदान्तरिक्षात्तु पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर् ननृतुश्चाप्सरोगणाः ॥ ११

गायन्तो मधुरं तत्र देवैश्शक्रोऽभ्युवाच ह ॥ ११॥

शक्रः—

शकुन्तले तव सुतश् चक्रवर्ती भविष्यति ॥ १२

बलं तेजश्च रूपं च न समं भुवि केन चित् ।
आहर्ता वाजिमेधस्य शतसङ्ख्यस्य पौरवः ॥ १३

1. क-ग—काले प्रसूष्वेति ख-घ—कालं प्रसूष्वेति
2. क-ख-ग—जाते तस्मिन्नन्तरिक्षात् । घ—तस्मिंस्तदाऽन्तारिक्षात् ।

अनेकानि सहस्राणि राजसूयादिभिर्मखैः ।
स्वार्थं ब्राह्मणसात्कृत्वा दक्षिणामपितां ददत् ॥ १४

वैशम्पायनः—

देवतानां वचश्श्रुत्वा कण्वाश्रमनिवासिनः ।
सभाजयन्तः कण्वस्य सुतां सर्वे महर्षयः ॥ १५

शकुन्तला च तच्छ्रुत्वा परं हर्षमवाप सा ॥ १५॥

द्विजानाहूय मुनिभिस् सत्कृत्य च महायशाः ॥ १६

जातकर्मादिसंस्कारं कण्वः पुण्यवतां वरः ।
तस्याथ कारयामास वर्धमानस्य चासकृत् ॥ १७

यथाविधि यथान्यायं क्रियास्सर्वास्त्वकारयत् ॥ १७॥

दन्तैश्शुक्लैश्शिखरिभिस् सिंहसंहननोऽभवत् ॥ १८

चक्राङ्कितकरश्श्रीमान् स्वयं विष्णुरिवापरः ।
चतुष्किष्कुर्महातेजा महामूर्धा महाबलः ॥ १९

कुमारो देवगर्भाभस् स तत्राशु व्यवर्धत ।
[1]ऋषेर्भयात्तु दुष्यन्तः स्मरन्नैवाह्वयत्तदा ॥ २०

गते काले तु महति न सस्मार तपोधनाम् ॥ २०॥

षड्वर्षेषु ततो बालः कण्वाश्रमपदं प्रति ॥ २१

व्याघ्रान् सिंहान् वराहांश्च वृकांश्च महिषांस्तथा ।
ऋक्षांश्चाभ्यहनद्बालान् पद्भ्यामाश्रमपीडकान् ॥ २२

1. अ—कोशे इदमर्धं नास्ति

गजान् भुजाभ्यां संगृह्य बलवान् संनियम्य च ।
बद्ध्वा वृक्षेषु दौष्यन्तिर् आश्रमस्य समन्ततः ॥ २३

[1]आरोहद्दमयंश्चैव क्रीडन् स्म परिधावति ।
वनं च लोडयामास सिंहव्याघ्रगणैर्वृतम् ॥ २४

ततश्च राक्षसान् सर्वान् पिशाचांश्च रिपून् रणे ।
मुष्टियुद्धेन ता[2]ञ्जित्वा ऋषीनाराधयत्तदा ॥ २५

काश्यिदितिसुतस्तं तु हन्तुकामो महाबलः ।
वध्यमानांस्तु दैतेयान् अमर्षी तं समभ्ययात् ॥ २६

तमागतं प्रहस्यैव बाहुभ्यां परिगृह्य च ।
दृढं चाबध्य बाहुभ्यां पीडयामास तं तदा ॥ २७

[3]मर्दितो न शशाकास्य मोचितुं बलवत्तया ।
प्राक्रोशद्भैरवं तत्र द्वारेभ्यो निस्सृतं त्वसृक् ॥ २८

तेन शब्देन वित्रस्ता मृगास्सिंहादयो गणाः ।
सुस्रुवुश्च शकृन्मूत्रम् आश्रमस्थाश्च सुस्रुवुः ॥ २९

[4]निरसुं जानुभिः कृत्वा विससर्ज च सोऽपतत् ।
तं दृष्ट्वा विस्मयं चक्रुः कुमारस्य विचेष्टितम् ॥ ३०

---

1. क-ख-ग—आरुराहे द्रुमांश्चैव क्रीडंश्च ।
घ—आरूढं दमयंश्चैव क्रीडंश्च ।
2. क-ख-ग—तान्हत्वा । घ—निर्जित्य मुनीन् । 3. अ—रुषितो
4. घ—निरसुर्जानुना भूमौ पपात भुवि पीडितः ।

नित्यकालं वध्यमाना दैतेया राक्षसैस्सह ।
कुमारस्य भयादेव नैव जग्मुस्तदाश्रमम् ॥ ३१

ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ।
कण्वेन सहितास्सर्वे दृष्ट्वा कर्मातिमानुषम् ॥ ३२

अस्त्वयं सर्वदमनस् सर्वं हि दमयत्यसौ ।
स सर्वदमनो नाम कुमारस्समपद्यत ॥ ३३

विक्रमेणौजसा चैव बलेन च समन्वितः ॥ ३३॥

अप्रेषयति दुष्यन्ते महिष्यास्तनयस्य च ॥ ३४

पाण्डुभावपरीताङ्गीं चिन्तया समभिप्लुताम् ।
लम्बालकां कृशां दीनां तथा मलिनवाससम् ॥ ३५

शकुन्तलां च संप्रेक्ष्य प्रदध्यौ स मुनिस्तदा ॥ ३५॥

शास्त्राणि सर्ववेदाश्च द्वादशाब्दस्य चाभवन् ॥ ३६

तं कुमारमृषिर्दृष्ट्वा कर्म च ह्यतिमानुषम् ।
समयो यौवराज्याय इत्यनुध्याय स द्विजः ॥ ३७

शकुन्तलां समाहूय कण्वो वचनमब्रवीत् ॥ ३७॥

कण्वः—

शृणु भद्रे मम सुते मम वाक्यं शुचिस्मिते ।
पतिव्रतानां नारीणां विशिष्टमिति चोच्यते ॥ ३८॥

पतिशुश्रूषणं पूर्वं मनोवाक्कायचेष्टितैः ।

अनुज्ञाता मया पूर्वं पूजयैतद्व्रतं तव ॥ ३९॥

[1]*एतेनैव च वृत्तेन विशिष्टां लप्स्यसे श्रियम् ॥ ४०

तस्माद्भद्रे प्रयातव्यं समीपं पौरवस्य ह ॥ ४०॥

स्वयं नायाति मत्वा ते गतं कालं शुचिस्मिते ।
गत्वाऽऽराधय राजानं दुष्यन्तं हितकाम्यया ॥ ४१॥

दौष्यन्तिं यौवराज्यस्थं दृष्ट्वा प्रीतिमवाप्स्यसि ॥ ४२

देवतानां गुरूणां च क्षत्रियाणां च भामिनि ।
भर्तृणां च विशेषेण हितं संगमनं सताम् ॥ ४३

तस्मात्पुत्रि कुमारेण गन्तव्यं मत्प्रियेप्सया ।
प्रतिवाक्यं न दद्यास्त्वं शापिता मम पादयोः ॥ ४४

वैशंपायनः—

एवमुक्त्वा सुतां तत्र पौत्रं कण्वोऽभ्यभाषत ॥
परिष्वज्य च बाहुभ्यां मूर्ध्न्युपाघ्राय [2]पौत्रकम् ॥ ४५

कण्वः—

सोमवंशोद्भवो राजा दुष्यन्तो नाम विश्रुतः ।
तस्याग्रमहिषी चैषा तव माता शुचिव्रता ॥ ४६

गन्तुकामा भर्तृवशं त्वया सह सुमध्यमा ।

---

1. क-ख-ग—एतेनैव च वृत्तेन पुण्यांल्लोकानवाप्य च ।
[अधिकः पाठः]

* क-ख-ग-घ—तस्यान्ते मानुषे लोके 2. क-ख-ग-घ—पौरवं

गत्वाऽभिवाद्य राजानं यौवराज्यमवाप्स्यसि ॥ ४७

स पिता तव राजेन्द्रस् तस्य त्वं वशगो भव ।
पितृपैतामहं राज्यम् अनुतिष्ठस्व भावतः ॥ ४८

तस्मिन् काले स्वराज्यस्थो मामनुस्मर [1]पौत्रक ॥ ४८॥

वैशंपायनः—

अभिवाद्य मुनेः पादौ पौरवो वाक्यमब्रवीत् ॥ ४९

सर्वदमनः—

त्वं पिता मम विप्रर्षे त्वं माता त्वं गतिश्च मे ।
न चान्यं पितरं मन्ये त्वामृते तु महातपः ॥ ५०

तव शुश्रूषणं पुण्यम् इह लोके परत्र च ॥ ५०॥

शकुन्तला भर्तृकामा स्वयं यातु यथेष्टतः ।
अहं शुश्रूषणपरः पादमूले वसामि वः ॥ ५१॥

क्रीडां व्यालमृगैस्सार्धं करिष्ये न पुरा यथा ।
त्वच्छासनपरो नित्यं स्वाध्यायं सुकरोम्यहम् ॥ ५२॥

वैशंपायनः—

एवमुक्त्वा तु संश्लिष्य पादौ कण्वस्य [2]तिष्ठति ॥ ५३

तस्य तद्वचनं श्रुत्वा प्ररुरोद शकुन्तला ।

---

1. क-ख-ग-घ—पौरव 2. घ—च स्थितः—

स्नेहात् पितुश्च पुत्रस्य हर्षशोकसमन्विता ॥ ५४

निशाम्य रोदनं मातुर् दौष्यन्तिर्वाक्यमब्रवीत् ॥ ५४॥

सर्वदमनः—

श्रुत्वा भगवतो वाक्यं किं रोदिषि शकुन्तले ।
गन्तव्यं काल्य उत्थाय भर्तृप्रीतिस्तवास्ति चेत् ॥ ५५॥

शकुन्तला—

एकस्तु कुरुते पापं फलं भुङ्क्ते महाजनः ।
भोक्तारस्तत्र मुच्यन्ते कर्ता दोषेण लिप्यते ॥ ५६॥

मया निवारितो नित्यं न करोषि वचो मम ॥ ५७

[1]निस्सृतान्कुञ्जरान्नित्यं बाहुभ्यां संप्रमथ्य वै ।
वनं च लोडयन्नित्यं सिंहव्याघ्रगणैर्वृतम् ॥ ५८

एवंविधानि चान्यानि कृत्वा वै पुरुनन्दन ।
रुषितो भगवांस्तात तस्मादावां विवासितौ ॥ ५९

अहं न गच्छे दुष्यन्तं नास्मि पुत्र हितैषिणी ।
पादमूले वसिष्यामि महर्षेर्भावितात्मनः ॥ ६०

वैशंपायनः—

एवमुक्त्वा तु रुदती पपात मुनिपादयोः ॥ ६०॥

एवं विलपतीं कण्वश् चानुनीय च हेतुभिः ।
पुनः प्रोवाच भगवान् आनृशंस्याद्धितं वचः ॥ ६१॥

1. क-ख-ग-घ—त्रिस्रोतान् ।

कण्वः—

शकुन्तले शृणुष्वेदं हितं पथ्यं च भामिनि ।
पतिव्रताभावगुणान् हित्वा साध्यं न किंचन ॥ ६२॥

पतिव्रतानां देवा वै तुष्टास्सर्ववरप्रदाः ।
प्रसादं च करिष्यन्ति ह्यापदर्थे च भामिनि ॥ ६३॥

पतिप्रसादात्पुण्यगतिं प्राप्नुवन्ति न चाशुभम् ।
तस्माद्गत्वा तु राजानम् आराधय शुचिस्मिते ॥ ६४॥

वैशम्पायनः—

शकुन्तलां तथोक्त्वा वै शाकुन्तलमथाब्रवीत् ॥ ६५

कण्वः—

दौहित्रो मम पौत्रस्त्वम् इलिलस्य महात्मनः ।
शृणुष्व वचनं सत्यं प्रब्रवीमि तवानघ ॥ ६६

मनसा भर्तृकामा वै वाग्भिरुक्त्वा पृथग्विधम् ।
गन्तुं नेच्छति कल्याणी तस्मात्तात वहस्व वै ॥ ६७

शक्तस्त्वं प्रतिगन्तुं च मुनिभिस्सह पौरव ॥ ६७॥

वैशंपायनः—

इत्युक्त्वा सर्वदमनं कण्वश्शिष्यानथाब्रवीत् ॥ ६८

कण्वः—

शकुन्तलामिमां शीघ्रम् इहास्माद्भर्तुरन्तिकम् ।
भर्तुः प्रापयत स्थानं सर्वलक्षणपूजितम् ॥ ६९

नारीणां चिरवासो हि बान्धवेषु न रोचते ।
कीर्तिचारित्रधर्मघ्नस् तस्मान्नयत मा चिरम् ॥ ७०

वैशम्पायनः—

धर्माभिपूजितं पुत्रं काश्यपेन निशाम्य तु ।
काश्यपात् प्राप्य चानुज्ञां मुमुदे च शकुन्तला ॥ ७१

कण्वस्य वचनं श्रुत्वा प्रतिगच्छेति चासकृत् ।
तथेत्युक्त्वा तु कण्वं च मातरं पौरवोऽब्रवीत् ॥ ७२

किं चिरायसि मातस्त्वं गमिष्यामो नृपालयम् ॥ ७२॥

एवमुक्त्वा तु तां देवीं दुष्यन्तस्य महात्मनः ।
अभिवाद्य मुनेः पादौ गन्तुमैच्छत्स पौरवः ॥ ७३॥

शकुन्तला च पितरम् अभिवाद्य कृताञ्जलिः ।
प्रदक्षिणीकृत्य तदा पितरं वाक्यमब्रवीत् ॥ ७४॥

अज्ञानान्मे पिता चेति दुरुक्तं वापि चानृतम् ।
अकार्यं वाप्यनिष्टं वा क्षन्तुमर्हति काश्यप ॥ ७५॥

एवमुक्तो नतशिरा मुनिर्नोवाच किंचन ।
मनुष्यभावात् कण्वोऽपि मुनिरश्रूण्यवर्तयत् ॥ ७६॥

अब्भक्षान् वायुभक्षांश्च शीर्णपर्णाशनान् मुनीन् ।
फलमूलाशिनो दान्तान् कृशान् धमनिसंततान् ॥ ७७॥

व्रतिनो जटिलान् मुण्डान् वल्कलाजिनसंवृतान् ।

समाहूय मुनीन् कण्वः कारुण्यादिदमब्रवीत् ॥ ७८॥

मया तु लालिता नित्यं मम पुत्री यशस्विनी ।
वने जाता विवृद्धा च न च जानाति किंचन ॥ ७९॥

आश्रमेण पथा सर्वैर् नीयतां क्षत्रियालयम् ।
[1]द्वितीययोजने विप्राः प्रतिष्ठानं प्रतिष्ठितम् ॥ ८०॥

प्रतिष्ठाने पुरे राजा शाकुन्तलपितामहः ।
अध्युवास चिरं कालम् उर्वश्या सहितः पुरा ॥ ८१॥

अनूपजाङ्गलयुतं धनधान्यसमाकुलम् ।
[2]प्रतिष्ठितं पुरवरं गङ्गायामुनसङ्गमे ॥ ८२॥

तत्र सङ्गममासाद्य स्नात्वा हुतहुताशनाः ।
शाकमूलफलाहारा निवर्तध्वं महातपाः । ८३॥

अन्यथा तु भवेद्विप्रा अध्वनो गमने श्रमः ॥ ८४

वैशम्पायनः—

तथेत्युक्त्वा च ते शिष्याः [3]प्रातिष्ठन्नमितौजसः ।
शकुन्तलां पुरस्कृत्य दुष्यन्तस्य पुरं प्रति ॥ ८५

गृहीत्वा चामरप्रख्यं पुत्रं कमललोचनम् ।
आजग्मुश्च पुरं शुभ्रं दुष्यन्ताध्युषितं वनात् ॥ ८६

1. अ—ब्यशीति 2. घ—प्रतिष्ठानं पुरं गत्वा
3. क-ख-ग—प्रावर्तन्तामितौजसः

शकुन्तलां समादाय मुनयो धर्मवत्सलाः ।
ते वनानि नदीश्शैलान् गिरिप्रस्रवणानि च ॥ ८७

कन्दराणि नितम्बांश्च राष्ट्राणि नगराणि च ।
आश्रमाणि च पुण्यानि गत्वा चैव गतश्रमाः ॥ ८८

शनैर्मध्याह्नवेलायां प्रतिष्ठानं समाययुः ॥ ८८॥
तां पुरीं पुरुहूतेन ह्यैलस्यार्थे विनिर्मिताम् ॥ ८९

[1]परिघावप्रपुरगैर् उपतल्पशतैरपि ।
शतघ्नी[2]चक्रवज्रैश्च गुप्तामन्यैर्दुरासदाम् ॥ ९०

हर्म्यप्रासादसंबाधां नानापण्यविभूषिताम् ।
मण्टपैस्ससभै रम्यैः प्रपाभिश्च समावृताम् ॥ ९१

राजमार्गेण महता सुविभक्तेन शोभिताम् ।
कैलासशिखराकारैर् गोपुरैस्समलङ्कृताम् ॥ ९२

द्वारतोरणनिर्यूहैर् मङ्गलैरुपशोभिताम् ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥ ९३

सर्वपुष्करिणीभिश्च उद्यानैश्च समावृताम् ॥ ९३॥
वर्णाश्रमैस्स्वधर्मस्थैर् नित्योत्सवसमाहितैः ।
धनधान्यसमृद्धैश्च संतुष्टै रत्नपूजितैः ॥ ९४॥

---

1. क-ख-ग—परिघाट्टालकैर्मुख्यैः । घ—परिघासालकैर्मुख्यैः
2. क-ख-ग—शतयन्त्रैश्च । (घ)—शतयन्त्रस्य चक्रैश्च

क्रतुयुक्तैश्च विद्वद्भिर् अग्निहोत्रपरैस्सदा ।
[1]अकार्यवर्जितैश्चैव दानशीलैर्दयापरैः ॥ ९५॥
अधर्मभीरुभिस्सर्वैस् स्वर्गलोकजिगीषुभिः ॥ ९६
एवंविधजनोपेतम् इन्द्रलोकमिवापरम् ॥ ९६॥
तस्मिन्नगरमध्ये तु राजवेश्म प्रतिष्ठितम् ।
इन्द्रसद्मप्रतीकाशं संपूर्णं वित्तसंचयैः ॥ ९७॥
तस्य मध्ये सभा दिव्या नानारत्नविचित्रिता ॥ ९८
तस्यां सभायां राजर्षिस् सर्वालङ्कारभूषितः ।
ब्राह्मणैः क्षत्रियैश्चैव मन्त्रिभिश्चापि संवृतः ॥ ९९
संस्तूयमानो राजेन्द्रस् सूतमागधवन्दिभिः ॥ ९९॥
[2]सुखासीनोऽभवद्राजा तस्मिन्काले महर्षयः ।
शकुन्तानां स्वनं श्रुत्वा निमित्तज्ञास्त्वलक्षयन्[3] ॥ १००॥

ऋषयः—

शकुन्तले निमित्तानि शोभनानीह वन्दिनः ।
कार्यसिद्धिं वदन्त्येते ध्रुवं राज्ञी भविष्यसि ॥ १०१॥
अस्मिंस्तु दिवसे पुत्रो युवराजो भविष्यति ॥ १०२

---

1. क-ख-ग—वर्जिताकार्यकरणैः ।
2. क-ख-ग-घ—कार्यार्थिभिस्समभ्येत्य कृत्वा कार्यं गतेषु सः । [अधिकः पाठः]
3. घ—शकुन्तलामिदं प्रीता हर्षयन्तोऽब्रवन्वचः । [अधिकः पाठः]

वैशम्पायनः—

वर्धमानपुरद्वारं तूर्यघोषनिनादितम् ।
शकुन्तलां पुरस्कृत्य विविशुस्ते महर्षयः ॥ १०३
प्रविशन्तं नृपसुतं प्रशशंसुश्च प्रेक्षकाः ॥ १०३॥
वर्धमानपुरद्वारं प्रविशन्नेव पौरवः ।
इन्द्रलोकस्थमात्मानं मेने हर्षसमन्वितः ॥ १०४॥
ततो वै नागरास्सर्वे समाहूय परस्परम् ।
द्रष्टुकामा नृपसुतं समपद्यन्त भारत ॥ १०५॥

नागराः—

देवतेव जनस्याग्रे भ्राजते श्रीरिवागता ।
जयन्तेनेव पौलोमी इन्द्रलोकादिहागता ॥ १०६॥

वैशम्पायनः—

इति ब्रुवन्तस्ते सर्वे महर्षीनिदमब्रुवन् ॥ १०७
अभिवादयाम सहिता महर्षीन् देववर्चसः ॥ १०७॥

1 वैशम्पायनः—

इत्युक्त्वा सहिताः केचिद् अन्वगच्छन्त पौरवम् ।
हैमवत्यास्सुतामिव कुमारं पुष्करेक्षणम् ॥ १०८॥
ये केचिदब्रुवन्मूढाः शाकुन्तलदिदृक्षवः ।

---

1. क-ख-ग-घ—अद्य नस्सफलं जन्म कृतार्थाश्च ततो वयम् ।
यत्तु नेत्रैः प्रपश्यामो महर्षीन् सूर्यवर्चसः ॥
[अधिकः पाठः]

कृष्णाजिनेन संछन्नान् द्रष्टुं नेच्छन्ति तापसान् ॥ १०९॥
पिशाचा इव दृश्यन्ते नागराणां विरूपिणः ।
विना सन्ध्यां पिशाचास्ते प्रविशन्ति पुरोत्तमम् ॥ ११०॥
क्षुत्पिपासार्दितान् दीनान् वल्कलाजिनवाससः ।
त्वगस्थिभूतान् निर्मांसान् धमनीसन्ततानपि ॥ १११॥
पिङ्गलाक्षान् पिङ्गजटान् दीर्घदन्तान्निरूदरान् ।
विशीर्षकानूर्ध्वहस्तान् दृष्ट्वा हास्यन्ति नागराः ॥ ११२॥
एवमुक्तवतां तेषां गिरं श्रुत्वा महर्षयः ।
अन्योन्यं ते समाहूय इदं वचनमब्रुवन् ॥ ११३॥
उक्तं भगवता वाक्यं न कृतं सत्यवादिना ।
पुरप्रवेशनं नात्र कर्तव्यमिति शासनम् ॥ ११४॥
किं कारणं प्रवेक्ष्यामो नगरं दुर्जनैर्वृतम् ।
त्यक्तसङ्गस्य च मुनेर् नगरे किं प्रयोजनम् ॥ ११५॥
तस्माद्गमिष्याम वयं गङ्गायामुनसङ्गमम् ।
एवमुक्त्वा मुनिगणाः प्रतिजग्मुर्यथागतम् ॥ ११६॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चाशीतितमोऽध्यायः ॥ ८५॥
॥ ७ ॥ संभवपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
[अस्मिन्नध्याये ११६॥ श्लोकाः]

॥ षडशीतितमोऽध्यायः ॥

सपुत्रायाः शकुन्तलाया दुष्यन्तसमीपगमनं ॥ १ ॥ तयोः संवादश्च ॥ २ ॥

वैशम्पायनः—

गतान् मुनिगणान् दृष्ट्वा पुत्रं संगृह्य पाणिना ।
मातापितृभ्यां विरहाद् यथा शोचन्ति दारकाः ॥ १

तथा शोकपरीताङ्गी धृतिमालम्ब्य दुःखिता ।
[1]पुत्रेणैव सहायेन सा जगाम शनैश्शनैः ॥ २

अदृष्टपूर्वान् पश्यन् वै राजमार्गेण पौरवः ।
हर्म्यप्रासादचैत्यांश्च सभा दिव्या विचित्रिताः॥ ३

कौतूहलसमाविष्टो दृष्ट्वा विस्मयमागतः ॥ ३॥

सर्वे ब्रुवन्ति तां दृष्ट्वा पद्महीनामिव श्रियम् ।
गतेन हंसीसदृशीं कोकिलेन स्वरे समाम् ॥ ४॥

मुखेन चन्द्रसदृशीं श्रिया पद्मालयासमाम् ।
स्मितेन कुन्दसदृशीं पद्मगर्भसमत्वचम् ॥ ५॥

पद्मपत्रविशालाक्षीं तप्तजाम्बूनदप्रभाम् ।
करान्तमितमध्यां तां सुकेशीं संहतस्तनीम् ॥ ६॥

1. क-ख-ग—गतेषु तेषु विप्रेषु राजमार्गेण भामिनी ।
[अधिकः पाठः]

जघनं सुविशालं वै ऊरू करिकरोपमौ ।
रक्ततुङ्ग[1]तलौ पादौ धरण्यां सुप्रतिष्ठितौ ॥ ७॥
एवं रूपसमायुक्ता स्वर्गलोकादिहागता । ८
इति स्म सर्वेऽमन्यन्त दुष्यन्तनगरे जनाः ॥ ८॥
पुनः पुनरवोचंस्ते शाकुन्तलगुणानपि ॥ ९
सिंहेक्षणांसिंहदंष्ट्रस् सिंहस्कन्धो महाभुजः ।
सिंहोरस्कांसिंहबलः सिंहविक्रान्तगाम्ययम् ॥ १०
पृथ्वंसः पृथुवक्षाश्च छत्राकाराशिरा महान् ।
पाणिपादतले रक्तो रक्तास्यो दुन्दुभिस्वनः ॥ ११
राजलक्षणयुक्तश्च राजश्रीश्चास्य लक्ष्यते ॥ ११॥
आकारेण च रूपेण शरीरेणापि तेजसा ।
दुष्यन्तेन समो ह्येष कस्य पुत्रो भविष्यति ॥ १२॥
एवं ब्रुवन्तस्ते सर्वे प्रशशंसुस्सहस्रशः ॥ १३
युक्तिवादानवोचन्त सर्वाः प्राणभृतस्त्रियः ।
बान्धवा इव सस्नेहा अनुजग्मुश्शकुन्तलाम् ॥ १४
पौराणां तद्वचश्श्रुत्वा तूष्णींभूता शकुन्तला ॥ १४॥
वेश्मद्वारं समासाद्य विह्वलन्ती नृपात्मजा ।
चिन्तयामास सहसा कार्यगौरवकारणात् ॥ १५॥

1. क-ख-ग-घ—नखौ

लज्जया च परीताङ्गी राजन् राजसमक्षतः ।
अघृणा किं नु वक्ष्यामि दुष्यन्तं मम कारणात् ॥ १६॥

एवमुक्त्वा तु कृपणा चिन्तयन्ती शकुन्तला ।
अभिसृत्य च राजानं वेदिता सा प्रवेशिता ॥ १७॥

सह तेन कुमारेण तरुणादित्यवर्चसा ॥ १८

सिंहासनस्थं राजानं महेन्द्रसदृशद्युतिम् ।
शकुन्तला नतशिराः परं हर्षमवाप्य च ॥ १९

पूजयित्वा यथान्यायं अब्रवीत्तं शकुन्तला ॥ १९॥

अभिवादय राजानं पितरं ते दृढव्रतम् ।
एवमुक्त्वा तु पुत्रं सा लज्जानतमुखी स्थिता ॥ २०॥

स्तम्भमालिङ्ग्य राजानं प्रसीदस्वेत्युवाच सा ॥ २१

शाकुन्तलोऽपि राजानम् अभिवाद्य कृताञ्जलिः ।
हर्षेणोत्फुल्लनयनो राजानं चान्ववैक्षत ॥ २२

दुष्यन्तो धर्मबुद्ध्या तु चिन्तयन्नेव सोऽब्रवीत् ॥ २२॥

दुष्यन्तः—
किमागमनकार्यं ते ब्रूहि त्वं वरवर्णिनि ।
करिष्यामि न संदेहः सपुत्राया विशेषतः ॥ २३॥

शकुन्तला—
प्रसीदस्व महाराज वक्ष्यामि पुरुषोत्तम ॥ २४

एष पुत्रो हि ते राजन् मय्युत्पन्नः परंतप ।
तस्मात्पुत्रस्त्वया राजन् यौवराज्येऽभिषिच्यताम् ॥ २५
यथोक्तमाश्रमे तस्मिन् वर्तस्व पुरुषोत्तम ।
मया समागमे पूर्वं कृतस्स समयस्त्वया ॥ २६
तं स्मरस्व महाभाग कण्वाश्रमपदं प्रति ॥ २६॥

वैशंपायनः—

तस्योपभोगसक्तस्य स्त्रीषु चान्यासु भारत ।
शकुन्तला सपुत्रा च मनस्यन्तरधीयत ॥ २७॥
[1]सोऽथ श्रुत्वा तु तद्वाक्यं तस्या राजा स्मरन्नपि ।
अब्रवीन्न स्मरामीति त्वया भद्रे समागमम् ॥ २८॥
मैथुनं च वृथा नाहं गच्छेयमिति मे मतिः ।
नाभिजानामि कल्याणि त्वया सह समागमम् ॥ २९॥
धर्मार्थकामसंबन्धं न स्मरामि त्वया सह ।
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ ३०॥
सैवमुक्ता वरारोहा व्रीडितैव मनस्विनी ।
विसंज्ञैव च दुःखेन तस्थौ विगतचेतना ॥ ३१॥
संरम्भामर्षताम्राक्षी स्फुरमाणोष्ठसंपुटा ।

---

1. क-ख-ग—स धारयन्मनस्येनां सपुत्रां सस्मितां तदा ।
तदोपगूह्य मनसा चिरं सुखमवाप सः ॥
[अधिकः पाठः]

निर्दहन्तीव नेत्राभ्यां तिर्यग्राजानमैक्षत ॥ ३२॥

आकारं गूहमाना च मन्युना च समीरितम् ।
तपसा संभृतं तेजो धारयामास वै तदा ॥ ३३॥

सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ।
भर्तारमपि संप्रेक्ष्य यथान्यायं वचोऽब्रवीत् ॥ ३४॥

शकुन्तला—

जानन्नपि महाराज कस्मादेवं प्रभाषसे ।
न जानामीति निश्शङ्कं यथान्यः प्राकृतस्तथा ॥ ३५॥

तस्य ते हृदयं वेद सत्यस्यैवानृतस्य च ।
कल्याणं बत साक्षीणाम् आत्मानमवमन्यसे ॥ ३६॥

योऽन्यथा सन्तमात्मानम् अन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ ३७॥

एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्मणः पापकस्य
तस्यान्तिके त्वं वृजिनं करोषि ॥ ३८॥

धर्म एव हि साधूनां सर्वेषां हितकारणम् ।
नित्यं मिथ्याविहीनानां न च दुःखावहो भवेत् ॥ ३९॥

मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।

देवाश्चैनं विदन्त्येव भूताश्चैव तथापरे ॥ ४०॥

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं [1]यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जनाति नरस्य वृत्तम् ॥ ४१॥

यमो वैवस्वतस्तस्य निर्यातयति दुष्कृतम् ।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥ ४२॥

न तुष्यति च यस्यैष पुरुषस्य दुरात्मनः ।
तं यमः पापकर्माणं [2]निर्भर्त्सयति दुष्कृतम् ॥ ४३॥

योऽवमत्यात्मनात्मानम् अन्यथा प्रतिपद्यते ।
न तस्य देवाश्चेयांसो यस्यात्मापि न कारणम् ॥ ४४॥

स्वयं प्राप्तेति मामेवं मा वमंस्था पतिव्रताम् ।
अर्चार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥ ४५॥

किमर्थं मां प्राकृतवद् उपप्रेक्षसि संसदि ।
सा खल्वहमिदं शून्यं करोमि न शृणोषि मे ॥ ४६॥

यदि मे याचमानाया वचनं न करिष्यसि ।
दुष्यन्त ! शतधा त्वद्य मूर्धा ते विफलिष्यति ॥ ४७॥

1. अ—दिशश्च । घ—मनश्च ।
2. क-ख-ग—तिर्यङ्नयति । घ—निर्यातयति

जायां पतिस्संप्रविश्य यदस्यां जायते पुनः ।
जायाया इति जायात्वं [1]यस्तस्यां जायते ततः ॥ ४८॥

यदागमवतः पुंसो यदपत्यं प्रजायते ।
तत्तारयति संतत्या पूर्वप्रेतान् पितामहान् ॥ ४९॥

पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात्पुत्र इति प्रोक्तः पूर्वमेव स्वयंभुवा ॥ ५०॥

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते ।
अथ पौत्रस्य पुत्रेण मोदन्ते प्रपितामहाः ॥ ५१॥

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या[2]ऽतिथिप्रिया ॥ ५२॥

अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमस्सखा ।
भार्या मूलं त्रिवर्गस्य यस्सभार्यस्स बन्धुमान् ॥ ५३॥

भार्यावन्तः क्रियावन्तस् सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तश्श्रिया वृताः ॥ ५४॥

सहायाः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ ५५॥

कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै ।
यस्सदारस्स विश्वास्यस् तस्माद्दाराः परा गतिः ॥ ५६॥

---

1. घ—यत्तस्यां जायते सुतः । 2. क-ख-ग—पतिव्रता

संसरन्तमभिप्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं वै पतिव्रता ॥ ५७॥

प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वप्रेतं तु भर्तारं पश्चात्साप्यनुगच्छति ॥ ५८॥

एतस्मात्कारणाद्राजन् पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्याम् इह लोके परत्र च ॥ ५९॥

पोषणार्थं शरीरस्य पाथेयं स्वर्गतस्य वै ।
आत्माऽऽत्मनैव जनितः पुत्र इत्युच्यते बुधैः ॥ ६०॥

तस्माद्भार्यां पतिः पश्येन्मातृवत्पुत्रमातरम् ।
अन्तरात्मैव सर्वस्य पुत्रनाम्नोच्यते सदा ॥ ६१॥

गती रूपं च चेष्टा च आवर्ता [1]लक्षणानि च ।
पितॄणां यानि दृश्यन्ते पुत्राणां सन्ति तानिच ॥ ६२॥

तेषां शीलगुणाचारास् तत्संपर्काच्छुभाशुभाः ॥ ६३

भार्यायां जनितं पुत्रम् आदर्शे स्वामिवाननम् ।
जनितं मोदते प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ६४

[2]पतिव्रतारूपधरा परबीजस्य संग्रहात् ।

---

1. क-ख-ग—रोमराजयः
2. घ—पितॄणां यनि दृश्यन्ते पुत्राणां सन्ततानि वै ।
तेषां शीला गुणाचारा परबीजस्य संग्रहात् ॥
[अधिकः पाठः]

[1]कुलं विनाश्य भर्तॄणां नरकं याति दारुणम् ॥ ६५

परेण जनिताः पुत्रास् स्वभार्यायां यथेष्टतः ।
मम पुत्रा इति मतास् ते पुत्रा अपि शत्रवः ॥ ६६

द्विषन्ति प्रतिकुर्वन्ति न ते वचनकारिणः ॥ ६६॥

[2]न द्वेष्टीति पिता पुत्रं तस्मादात्मा सुतो भवेत् ॥ ६७

दह्यमाना मनोदुःखैर् व्याधिभिस्तुमुलैर्जनाः ।
स्वेषु दारेषु तुष्यन्ति घर्मार्तास्सलिलेष्विव ॥ ६८

विप्रवासकृशा दीना नरा मलिनवाससः ।
तेऽपि स्वदारांस्तुष्यन्ति दरिद्रा धनलाभवत् ॥ ६९

[3]अप्रियोक्तोऽपि दाराणां न ब्रूयादप्रियं वचः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य च ॥ ७०

आत्मनोऽर्धमिति श्रौतं सा रक्षति धनं प्रजाः ।
शरीरं लोकयात्रां वै धर्मं स्वर्गमृषीन् पितॄन् ॥ ७१

आत्मनो जन्मनः क्षेत्रं पुण्या रामास्सनातनाः ।
ऋषीणामपि का शक्तिस् स्रष्टुं रामामृते प्रजाः ॥ ७२

---

1. क-ख-ग—कुलानि अस्य दह्यन्ते पुत्राणां सन्ततानि च ।
[अधिकः पाठः]

2. क-ख-ग—न द्वेष्यति पिता पुत्रांस्तस्मादात्मसमो भवेत् ।
घ—न द्वेष्टि पितरं पुत्रस् तस्मादात्मसुतो भवेत् ।

3. क-ख-ग—सुसंक्रुद्धोऽपि

देवानामपि का शक्तिः वेत्तुं संभवमात्मनः ।
पण्डितस्यापि लोकेषु स्त्रीषु सृष्टिः प्रतिष्ठिता ॥ ७३

ऋषिभ्यो ह्यृषयः केचिन् चण्डालीष्वपि जज्ञिरे ॥ ७३॥

परिसृत्य यदा सूनुर् धरणीरेणुकुण्ठितः ।
पितुरालिङ्गतेऽङ्गानि [1]किमिवाभ्यधिकं ततः ॥ ७४॥

स त्वं सूनुमभिप्राप्तं साभिलाषं मनस्विनम् ।
प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ॥ ७५॥

अण्डानि बिभ्रति स्वानि न त्यजन्ति पिपीलिकाः ।
किं पुनस्त्वं न मन्येथास् सर्वथा पुत्रमीदृशम् ॥ ७६॥

न भरेथाः कथं नु त्वम्[2] अज्ञातं स्वं स्वमात्मजम् ।
ममाण्डानीति वर्धन्ते कोकिलानिव वायसाः ॥ ७७॥

किं पुनस्त्वं न मन्येथास् सर्वज्ञः पुत्रमीदृशम् ॥ ७८

मलयाच्चन्दनं जातम् अतिशीतं वदन्ति वै ।
शिशोरालिङ्गमानस्य चन्दनादधिकं भवेत् ॥ ७९

न वाससां न रामाणां नापां स्पर्शं[3] स्तथाविधः ।
शिशुनालिङ्ग्यमानस्य स्पर्शस्सूनोर्यथा सुखः ॥ ८०

---

1. घ—किं ततोऽस्त्यधिकं सुखम् ।
2. क-ख-ग—त्वं मज्ञातं स्वयमात्मजम् ।
घ—त्वमज्ञातं त्वत्समात्मजम्
3. घ—तथासुखम्

पुत्रस्पर्शात्सुखतरस् स्पर्शो लोके न विद्यते ॥ ८०॥
स्पृशतु त्वा समालिङ्ग्य पुत्रोऽयं प्रियदर्शनः ॥ ८१
ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
गुरुर्गरीयसां श्रेष्ठः पुत्रस्स्पर्शवतां वरः ॥ ८२
त्रिषु वर्षेषु पूर्णेषु प्रजातोऽयमरिन्दमः ।
[1]कुमारो राजशार्दूल तव शोकप्रणाशनः ॥ ८३
आहर्ता वाजिमेधस्य शतसङ्ख्यस्य पौरवः ।
राजसूयादिकान्यान् क्रतूनामिततेजसः ॥ ८४
इति गौरन्तरिक्षे मां सूतकेऽभ्यवदत्पुरा ॥ ८४॥
हन्त स्वमङ्कमारोप्य स्नेहाद्रामान्तरं गताः ।
मूर्ध्नि पुत्रानुपाघ्राय प्रतिनन्दन्ति मानवाः ॥ ८५॥
वेदेष्वपि वदन्तीमं मन्त्रवादं द्विजातयः ।
जातकर्मणि पुत्राणां तवापि विदितं ध्रुवम् ॥ ८६॥
अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदश्शतम् ॥ ८७॥
उपजिघ्रन्ति पितरो मन्त्रेणानेन मूर्धनि ॥ ८८
[2]पोषो हि त्वदधीनोऽसौ सन्तानमपि चाक्षयम् ।

---

1. क-ख-ग-घ—अद्यायं मन्नियोगात्तु तवाह्वानं प्रतीक्षते ।
[अधिकः पाठः]
2. क-ख-ग—पोषितं त्वदधीनं मे घ—पोषणं त्वदधीनं मे

तस्मात्त्वं जीव मे पुत्र सुखीव शरदां शतम् ॥ ८९

एको भूत्वा द्विधा भूत इति वादः प्रदृश्यते ।
त्वदङ्गेभ्यः प्रसूतोऽयं पुरुषात्पुरुषोऽपरः ॥ ९०

सरसीवामलेऽऽत्मानं द्वितीयं पश्य ते सुतम् ।
सरसीवामले सोमं प्रेक्षात्मानं त्वमात्मना ॥ ९१

यथावाऽऽहवनीयोऽग्निर् गार्हपत्यात्प्रणीयते ।
एवं त्वत्तः प्रसूतोऽयं त्वमेकस्सन् द्विधाकृतः ॥ ९२

मृगापकृष्टेन हि वै मृगयां परिधावता ।
अहमासादिता राजन् कुमारी पितुराश्रमे ॥ ९३

उर्वशी पूर्वचित्तिश्च सजन्या या च मेनका ।
विश्वाची च घृताची च षडेवाप्सरसां वराः ॥ ९४

तासां वै मेनका नाम ब्रह्मयोनिर्वराप्सराः ।
दिवस्संप्राप्य जगतीं विश्वामित्रादजीजनत् ॥ ९५

श्रीमान्ऋषिर्धर्मपरो वैश्वानर इवापरः ।
ब्रह्मयोनिः कुशो नाम विश्वामित्रपितामहः ॥ ९६

कुशस्य पुत्रो बलवान् कुशनाभश्च धार्मिकः ।
गाधिस्तस्य सुतो राजन् विश्वामित्रस्तु गाधिजः ॥ ९७

एवंविधः पिता राजन् [1]मेनका जननी वरा ।

1. क-ख-ग-घ—माता मे मेनकाप्सराः ।

सा मां हिमवतः पृष्ठे सुषुवे मेनकाऽप्सराः ॥ ९८

[1]परित्यज्य च मां याता परात्मजमिवासती ॥ ९८॥

पक्षिणः पुण्यवन्तस्ते सहिता धर्मतस्तदा ।
पक्षैस्तैरभिगुप्ता च तस्मादस्मि शकुन्तला ॥ ९९॥

ततोऽहमृषिणा दृष्टा काश्यपेन महात्मना ॥ १००

जलार्थमग्निहोत्रस्य गतं दृष्ट्वा तु पक्षिणः ।
न्यासभूतामिव मुनेः प्रददुर्मां दयावतः ॥ १०१

स माऽरणिमिवादाय स्वमाश्रममुपागमत् ॥ १०१॥

सा वै संभाविता राजन् अनुक्रोशान्महर्षिणा ।
तेनैव स्वसुतेवाहं राजन् वै [2]परमर्षिणा ॥ १०२॥

विश्वामित्रसुता चाहं वर्धिता मुनिना नृप ।
यौवने वर्तमानां च दृष्टवानसि मां नृप ॥ १०३॥

आश्रमे पर्णशालायां कुमारीं विजने वने ।
धात्रा प्रचोदितां शून्ये पित्रा विरहितां मिथः ॥ १०४॥

वाग्भिस्त्वं सूनृताभिर्माम् अपत्यार्थमचूचुदः ।
[3]अकार्षीस्त्वाश्रमे वासं धर्मकामार्थनिश्चितम् ॥ १०५॥

---

1. क-ख-ग—अवकीर्यच मां याता जननी वासवं प्रति ।
2. क-ख-ग—वरवर्णिनी ।
3. घ—अवोचस्त्वाश्रमे वाचः धर्मकामार्थमिश्रिताः ।

गान्धर्वेण विवाहेन [1]विधिना पाणिमग्रहीः ॥ १०६

साऽहं कुलं च शीलं च सत्यवादित्वमात्मनः ।
स्वधर्मं च पुरस्कृत्य त्वामद्य शरणं गता ॥ १०७

तस्मान्नार्हसि संश्रुत्य तथेति वितथं वचः ॥ १०७॥

स्वधर्मं पृष्ठतः कृत्वा परित्यक्तुमुपस्थिताम् ।
[2]त्वन्नाथां लोकनाथस्त्वं नार्हसि त्वमनागसम् ॥ १०८॥

किं नु कर्माशुभं पूर्वं कृतवत्यस्मि जातिषु ।
यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति यत्त्वया ॥ १०९॥

कामं त्वया परित्यक्ता गमिष्याम्यहमाश्रमम् ।
इमं बालं तु संत्यक्तुं नार्हस्यात्मानमात्मना ॥ ११०॥

दुष्यन्तः—

न पुत्रमभिजानामि त्वयि जातं शकुन्तले ।
असत्यवचना नार्यः कस्ते श्रद्धास्यते वचः ॥ १११॥

अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे ।
विशेषतो मत्सकाशे दुष्टतापसि ! गम्यताम् ॥ ११२॥

क्व महर्षिस्स चैवोग्रः काप्सरास्सा च मेनका ।
क्व च त्वमेवं कृपणा तापसीवेषधारिणी ॥ ११३॥

---

1. अ—फलवन्त्यो वचोऽब्रवीः ।
2. क-ख-ग—त्वन्नाथो लोकनाथस्त्वं नार्हसे त्वमनापदि ।
घ—मन्नाथां

अतिकायश्च पुत्रस्ते बालोऽतिबलवानयम् ।
कथमल्पेन कालेन सालस्कन्ध इवोद्गतः ॥ ११४॥

सुनिकृष्टा च योनिस्ते पुंश्चली प्रतिभासि मे ।
यदृच्छया कामरागाज् जाता मेनकया ह्यसि ॥ ११५॥

सर्वमेव परोक्षं मे यत्त्वं वदसि तापसि ।
सर्वा वामास्स्त्रियो लोके सर्वाः कामपरायणाः ॥ ११६॥

सर्वास्स्त्रियः परवशास् सर्वाः क्रोधसमाकुलाः ।
असत्योक्तास्स्त्रियस्सर्वा न कण्वं वक्तुमर्हसि ॥ ११७॥

मेनका निरनुक्रोशा वर्धकी जननी तव ।
यया हिमवतः पादे निर्माल्यवदुपेक्षिता ॥ ११८॥

स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव ।
विश्वामित्रो ब्रह्मखेलो लुब्धः कामपरायणः ॥ ११९॥

मेनकाऽप्सरसां श्रेष्ठा महर्षिश्चापि ते पिता ।
तयोरपत्यं कस्मात्त्वं पुंश्चलीवाभिधास्यसि ॥ १२०॥

जातिश्चापि निकृष्टा ते कुलीनेति विकत्थसे ।
जनयित्वा त्वमुत्सृष्टा कोकिलेव परैर्भृता ॥ १२१॥

अरिष्टैरिव दुर्बुद्धिः कण्वो वर्धयिता पिता ।
अश्रद्धेयमिदं वाक्यं यत्त्वं जल्पसि तापसि ॥ १२२॥

ब्रुवन्ती राजसान्निध्ये गम्यतां यत्र वेच्छसि ॥ १२३

सुवर्णमणिमुक्तानि सर्वाण्याभरणानि च ।
यद्यदिच्छसि भोगार्थं तापसि! प्रतिगृह्यताम् ॥ १२४
नाहं त्वां द्रष्टुमिच्छामि यथेष्टं गम्यतामितः ॥ १२४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥
॥ ७ ॥ संभवपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
[अस्मिन्नध्याये १२४॥ श्लोकाः]

॥ सप्ताशीतितमोऽध्यायः ॥

दुष्यन्तशकुन्तलाविवादः ॥ १ ॥

शकुन्तला—

राजन्सर्षपमात्राणि [1]मय्यघानि प्रपश्यसि ।
आत्मनो [2]मेरुमात्राणि पश्यन्नपि न पश्यसि ॥ १
मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम् ।
ममैवोद्रिच्यते जन्म दुष्यन्त तव जन्मतः ॥ २
क्षितौ चरसि राजंस्त्वम् अन्तरिक्षे चराम्यहम् ।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥ ३
महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च ।

1. क-ख-ग-घ—परच्छिद्राणि 2. क-ख-ग-घ—हस्ति

भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥ ४

पुरा नरवरः पुत्र उर्वश्यां जनितस्तदा ।
आयुर्नाम महाराज तव पूर्वपितामहः ॥ ५

महर्षयश्च बहवः क्षत्रियाश्च परन्तप ।
अप्सरस्सु मृगीणां च मातृदोषो न विद्यते ॥ ६

विरूपो यावदादर्शे नात्मनो वीक्षते मुखम् ।
मन्यते तावदात्मानम् अन्येभ्यो रूपवत्तरम् ॥ ७

यदा तु मुखमादर्शे विरूपं सोऽभिवीक्षते ।
तदा ह्रीमांस्तु जानीयाद् आत्मानं नेतरं जनम् ॥ ८

अतीव रूपसंपन्नो न किं चिदवमन्यते ।
अतीव जल्पन् दुर्वाचो भवतीह विभेदकः ॥ ९

[1]सम्यग्वा विप्रवादोऽयं संप्रवक्ष्यामि तेऽनघ ।
निदर्शनार्थं न द्वेषात् तच्छ्रुत्वा क्षन्तुमर्हसि ॥ १०

पांसुपातेन हृष्यन्ति कुञ्जरा मदशालिनः ।
तथा परिवदन्नन्यान् हृष्टो भवति दुर्जनः ॥ ११

सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
नास्तिकोऽप्युद्विजत्येव जनः किं पुनरास्तिकः ॥ १२

---

1. क-ख-ग—सत्यं च
घ—साधु लोकप्रवादोऽयं तव वक्ष्यामि चानघ।

स्वयमुत्पाद्य पुत्रं वै सदृशं योऽवमन्यते ।
तस्य देवाश्रियं घ्नन्ति तत्रैनं कलिराविशेत् ॥ १३
अभव्ये ह्यनृतेऽशुद्धे नास्तिके पापकर्मणि ।
दुराचारे कलिर्ह्याशु न कलिर्धर्मचारिषु ॥ १४
मूर्खोऽपि जल्पतां पुंसां श्रुत्वा तेषां शुभाशुभम् ।
अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥ १५
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचश्शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसि ॥ १६
आत्मनो दुष्टभावत्वं ज्ञानी नीचोऽप्रसन्नधीः ।
परेषामपि जानाति स्व[1]धर्मसदृशं गुणैः ॥ १७
दह्यमानास्तु तीव्रेण नीचाः परयशोऽग्निना ।
अशक्तास्तां गतिं गन्तुम् अतो निन्दां प्रकुर्वते ॥ १८
अन्यान् परिवदन् साधुर् यथा हि परितप्यते ।
तथा परिवदन्नन्यं हृष्टो भवति दुर्जनः ॥ १९
[2]अपास्य दूरतो मूर्खा भवन्ति स्म विशेषतः ।
नापवादरतास्सन्तो भवन्ति स्म विशेषतः ॥ २०
अभिवाद्य च वृद्धान्हि साधुर्गच्छति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ २१

1. क-ख-ग-घ—कर्मसदृशान्गुणान्
2. क-ख-ग—अपवादरता

सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
[1]ये तु वाच्याः परैस्सन्तः परानाहुस्तथाविधान् ॥ २२
अतो हास्यतरं लोके किंचिदन्यन्न विद्यते ॥ २२॥

यत्र दुर्जन इत्याह सज्जनं दुर्जनस्स्वयम् ।
दारुणाल्लोकसंक्लेशाद् दुःखमाप्नोत्यसंशयम् ॥ २३॥

कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन् ।
उत्तमं सर्वधर्माणां [2]मनसः प्रीतिवर्धनम् ॥ २४॥

स्वपत्नीप्रभवांल्लब्ध्वा क्रीतान् [3]सर्वविवर्जितान् ।
कृतान्यैरथोत्पन्नान् पुत्रान् वै मनुरब्रवीत् ॥ २५॥

तत्र षड्बन्धुदायादाः षडदायादबान्धवाः ।
धर्मकृतिवहा नृणां मनसः प्रीतिवर्धनाः ॥ २६॥

त्रायन्ति जनकाज्जाताः पुत्रा धर्मप्लवाः पितॄन् ॥ २७

स त्वं नृपतिशार्दूल न पुत्रं त्यक्तुमर्हसि ।
तस्मात् पुत्रं च सत्यं च पालयस्व महीपते ॥ २८

उभयं पालय ह्येतन्नानृतं वक्तुमर्हसि ।
आत्मानं सत्यधर्मौ च पालयेथा महीपते ॥ २९

---

1. घ—स्वयं
2. क-ख-ग—तस्मात्पुत्रं न तु त्यजेत् । घ--पुत्रं तस्मान्न संत्यजेत्
3. क-ख-ग—समयवर्धितान्

नरेन्द्रसिंह कपटं न हि वोढुं त्वमर्हसि ॥ २९॥

वरं कूपशताद्वापी वरं वापीशतात्क्रतुः ।
वरः क्रतुशतात्पुत्रस् सत्यं पुत्रशताद्वरम् ॥ ३०॥

अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥ ३१॥

सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् ।
[1]सत्यं च वदतो राजन् समं वा स्यान्न वा समम् ॥ ३२॥

नास्ति सत्यात् परो धर्मो न सत्याद्विद्यते परम् ।
न हि तीव्रतरं पापम् अनृतादिह विद्यते ॥ ३३॥

राजन् सत्यं परं ब्रह्म सत्यं च समयः परः ।
मा त्याक्षीस्समयं राजन् सत्यं सङ्गरमस्तु ते ॥ ३४॥

यः पापं न विजानाति कर्म कृत्वा नराधिप ।
न हि तादृक्परं पापम् अनृतादिह विद्यते ॥ ३५॥

यस्य ते हृदयं वेद सत्यस्यैवानृतस्य च ।
कल्याणं साक्षिणं तस्मात् कर्तुमर्हसि धर्मतः ॥ ३६॥

यो न कामान्न च क्रोधान्न द्रोहादभिवर्तते ।
अमित्रं वापि मित्रं वा स वा उत्तमपूरुषः ॥ ३७॥

---

1. क-ख-ग—सत्यस्यैव च राजेन्द्र कलां नार्हति षोडशीम् ।
घ—सत्यं च वदतो राजन् समं वा स्याद्विशिष्यते ।

अनृते चेत् प्रसङ्गस्ते श्रद्दधासि न चेत् स्वयम् ।
[1]आत्मना हतमिच्छामि तादृशे नास्ति सङ्गतं ॥ ३८॥

पुत्रत्वे शङ्कमानस्य बुद्धिर्ज्ञापकदीप्तना ॥ ३९

गतिस्स्वरस्स्मृतिस्सत्वं शीलविज्ञानविक्रमाः ।
धृष्णुःप्रकृतिभावौ च आवर्ता रोमराजयः ॥ ४०

समा यस्य यतस्स्युस्ते तस्य पुत्रो न संशयः ॥ ४०॥

सादृश्येनोद्धृतं बिम्बं तव देहाद्विशांपते ।
तातेति भाषमाणं वै मा स्म राजन् वृथा कृथाः ॥ ४१॥

ऋतेऽपि गर्दभीक्षीरात् पयः पास्यति मे सुतः ॥ ४२

ऋतेऽपि त्वां तु दुष्यन्त ! शैलराजावतंसिकाम् ।
चतुरन्तामिमामुर्वीं पुत्रो मे पालयिष्यति ॥ ४३

शकुन्तले ! तव सुतश् चक्रवर्ती भविष्यति ।
एवमुक्तो महेन्द्रेण भविष्यति न चान्यथा ॥ ४४

साक्षित्वे बहवोऽप्युक्ता देवदूतादयो मताः ।
न ब्रुवन्ति यथा सत्यम् उताहोऽप्यनृतं किल ॥ ४५

[2]असाक्षिणी मन्दभाग्या गमिष्यामि यथागतम् ॥ ४५॥

---

1. क-ख-ग—आश्रमं गन्तुमिच्छामि त्वादृशे
घ—आत्मनो हन्तुमिच्छामि त्वादृशे नास्ति संगमः ।
2. क-ख-ग—असाक्षी मन्दभाग्याहं

वैशंपायनः—

एतावदुक्त्वा वचनं प्रातिष्ठत शकुन्तला ।
तस्याः क्रोधसमुत्थोऽग्निस् सधूमो मूर्ध्न्यदृश्यत ॥ ४६॥

संनियम्यात्मनोऽङ्गेषु ततः क्रोधाग्निमात्मजम् ।
प्रस्थितैवानवद्याङ्गी सह पुत्रेण वै वनम् ॥ ४७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥
॥ ७ ॥ संभवपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[अस्मिन्नध्याये ४७॥ श्लोकाः]

॥ अष्टाशीतितमोऽध्यायः ॥

आकाशवाणीश्रवणानन्तरं सपुत्रायाः शकुन्तलाया राज्ञाऽङ्गीकारः ॥ १ ॥ भरतेतिनामकरणपूर्वकं पुत्रस्य राज्येऽभिषेकः ॥ २ ॥ भरतचरितकथनम् ॥ ३ ॥ तद्वंशकथनं च ॥ ४ ॥

वैशम्पायनः—

अथान्तरिक्षे दुष्यन्तं वागुवाचाशरीरिणी ।
ऋत्विक्पुरोहिताचार्यैर् मन्त्रिभिश्चाभिसंवृतम् ॥ १

माता भस्त्रा पितुः पुत्रो यस्माज्जातस्स एव सः ।
भरस्व पुत्रं दौष्यन्ति सत्यमाह शकुन्तला ॥ २

सर्वेभ्यो ह्यङ्गमङ्गेभ्यस् साक्षादुत्पद्यते सुतः ।
आत्मा वैष सुतो नाम तथैष तव पौरव ॥ ३

आहितं ह्यात्मनाऽऽत्मानं परिरक्ष इमं सुतम् ।
अनन्यां त्वां प्रतीक्षस्व मावमंस्थाश्शकुन्तलाम् ॥ ४

स्त्रियः पवित्रमतुलम् एतद्दुष्यन्त धर्मतः ।
मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ ५

ततस्सर्वाणि भूतानि व्याजहुस्तं समन्ततः ॥ ५॥

देवाः—

आहितस्त्वत्तनोरेष मावमंस्थाश्शकुन्तलाम् ॥ ६

रेतोधाः पुत्र उन्नयति नरदेव यमक्षयम् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ ७

पतिर्जायां प्रविशति स तस्यां जायते [1]पुनः ।
अन्योन्यस्य प्रकृत्यैष मावमंस्थाश्शकुन्तलाम् ॥ ८

जाया जनयते पुत्रम् आत्मनोऽङ्गाद्विधा कृतम् ।
तस्माद्भरस्व दुष्यन्त ! पुत्रं शाकुन्तलं नृप ॥ ९

[2]सुभूतिरेषा न त्याज्या जीवं जीवन्तमात्मजम् ।
शाकुन्तलं महात्मानं दुष्यन्त ! भर पौरवम् ॥ १०

भर्तव्योऽयं त्वया यस्माद् अस्माकं वचनादपि ।
तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः ॥ ११

---

1. अ-घ—सुतः ।
2. अ—आहुतिरेषां सन्त्यज्य

भरताद्भारती कीर्तिर् येनेदं भारतं कुलम् ।
अपरे ये च पूर्वे च भारता इति तेऽभवन् ॥ १२

वैशम्पायनः—

एवमुक्त्वा ततो देवा ऋषयश्च तपोधनाः ।
पतिव्रतेति संहृष्टाः पुष्पवृष्टिं ववर्षिरे ॥ १३

तच्छ्रुत्वा पौरवो वाक्यं व्याहृतं वै दिवौकसाम् ।
सिंहासनात् समुत्थाय प्रणम्य च दिवौकसः ॥ १४

पुरोहितममात्यांश्च [1]प्रष्टव्यानब्रवीदिदम् ॥ १४॥

दुष्यन्तः—

शृण्वन्त्वेतद्भवन्तोऽद्य देवदूतस्य भाषितम् ।
शृण्वन्तु देवतानां च महर्षीणां च भाषितम् ॥ १५॥

अहमप्येवमेवैनं जानामि सुतमात्मजम् ॥ १६

यद्येवं वचना[2]देव गृह्णीयामिममात्मजम् ।
भवेद्धि शङ्का लोकस्य नैवं शुद्धो भवेदयम् ॥ १७

वैशम्पायनः—

तं विशोध्य तदा राजा दैवतैस्समहर्षिभिः ।
हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतम् ॥ १८

मूर्ध्नि चैनं समाघ्राय सस्नेहं परिषस्वजे ॥ १८॥

1. क-ख-ग-घ—संप्रहृष्टो 2. क-ख-ग—दस्याः घ—घस्याः

सभाज्यमानो विप्रैश्च स्तूयमानश्च वन्दिभिः ।
मुदं स परमां लेभे पुत्रस्पर्शनजां नृपः ॥ १९॥

तां चैव भार्यां धर्मज्ञः पूजयामास धर्मतः ।
अब्रवीच्चैव तां राजा सान्त्वपूर्वमिदं वचः ॥ २०॥

दुष्यन्तः—

लोकस्यायं परोक्षस्तु संबन्धो नौ पुराऽभवत् ।
कृतो लोकसमक्षोऽद्य संबन्धो वै पुरा कृतः ॥ २१॥

तस्मादेतन्मया त्वद्य तन्निमित्तं प्रभाषितम् ॥ २२

शङ्केत [1]वा व लोकोऽथ त्वया भावेऽधिसङ्गतम् ।
तस्मादेतन्मया देवि तच्छुद्ध्यर्थं विचारितम् ॥ २३

ब्राह्मणाः क्षत्रिया वैश्याश् शूद्राश्चैव पृथग्विधाः ।
त्वां देवि ! पूजयिष्यन्ति निर्विशङ्कं पतिव्रताम् ॥ २४

पुत्रश्चायं वृतो राज्ये त्वमग्रमहिषी मम ॥ २४॥

यच्च कोपितयाऽत्यर्थं त्वयोक्तोऽस्म्यप्रियं प्रिये ।
प्रणयिन्या विशालाक्षि तत्क्षन्तव्यं मया शुभे ! ॥ २५॥

अनृतं वाप्यनिष्टं वा दुरुक्तं वापि दुष्कृतम् ।
त्वयाप्येवं विशालाक्षि क्षन्तव्यं मम दुर्वचः ॥ २६॥

1. क-ख-ग-घ—वाऽयं लोकोऽथ स्त्रीभावान्मयि सङ्गतम् ।

[1]क्षान्त्या पतिकृते नार्यः पातिव्रत्यं व्रजन्ति ताः ॥ २७

वैशम्पायनः—

तामेवमुक्त्वा राजर्षिस् तामनिन्दितगामिनीम् ।
अन्तःपुरं प्रवेश्यैव दुष्यन्तो महिषीं प्रियाम् ॥ २८

वासोभिरन्नपानैश्च पूजयित्वा तु भारत ।
स मातरमुपस्थाय रथन्तर्यामभाषत ॥ २९

मम पुत्रो वने जातस् तव शोकप्रणाशनः ।
ऋणादद्य विमुक्तोऽहम् अस्मि पौत्रेण ते शुभे ॥ ३०

विश्वामित्रसुता चेयं कण्वेन च विवर्धिता ।
स्नुषा तव महाभागे प्रसीदस्व शकुन्तलाम् ॥ ३१

पुत्रस्य वचनं श्रुत्वा पौत्रं सा परिषस्वजे ॥ ३१॥

पादयोः पतितां तत्र रथन्तर्या शकुन्तलाम् ।
परिष्वज्य च बाहुभ्यां हर्षादश्रूण्यवर्तयत् ॥ ३२॥

उवाच वचनं सत्यं लक्षयंल्लक्षणानि च ॥ ३३

तव पुत्रो विशालाक्षि ! चक्रवर्ती भविष्यति ।
तव भर्ता विशालाक्षि ! त्रैलोक्यविजयी भवेत् ॥ ३४

दिव्यान् भोगाननुप्राप्ता भव त्वं वरवर्णिनि ! ॥ ३४॥

1. क-ख-ग—क्षम्याः पतिकृतं नार्यः घ—गम्याः पतिकृते नार्यः

एवमुक्ता रथन्तर्या परं हर्षमवाप सा ॥ ३५

शकुन्तलां तदा राजा शास्त्रोक्तेनैव कर्मणा ।
ततोऽग्रमहिषीं कृत्वा सर्वाभरणभूषिताम् ॥ ३६

ब्राह्मणेभ्यो धनं दत्त्वा सैनिकानां च भूपतिः ।
दौष्यन्तिं च ततो राजा पुत्रं शाकुन्तलं तदा ॥ ३७

भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ॥ ३७॥

भरते भारमावेश्य कृतकृत्योऽभवन्नृपः ॥ ३८

ततो वर्षशतं पूर्णं राज्यं कृत्वा नराधिपः ।
[1]कृत्वा दानानि दुष्यन्तस् स्वर्गलोकमुपोयिवान् ॥ ३९

वैशंपायनः—

[2]दुष्यन्ते उपरते राज्यं यथान्यायमवाप सः ।
तस्य तत्प्रथितं चक्रं प्रावर्तत महात्मनः ॥ ४०

भास्वरं दिव्यमजितं लोकसंनादनं महत् ॥ ४०॥

स विजित्य महीपालांश् चकार वशवर्तिनः ॥ ४१

स चचार सतां धर्मं प्राप्य चानुत्तमं यशः ।
स राजा चक्रवर्त्यासीत् सार्वभौमः प्रतापवान् ॥ ४२

ईजे च बहुभिर्यज्ञैर् यथा शक्रो मरुत्पतिः ।
याजयामास तं कण्वो दक्षवद्भूरिदक्षिणम् ॥ ४३

---

1. क-ख-ग—गत्वावनानि घ—दत्त्वा धनानि
2. क-ख-ग—दुष्यन्ताद्भरतो घ—दौष्यन्तिः परमो

श्रीमद्गोवितततं नाम वाजिमेधमवाप सः ।
यस्मात् सहस्रं पद्मानां कण्वाय भरतो ददौ ॥ ४४

सोऽश्वमेधशतैरीजे यमुनामनु तीरगः ।
[1]त्रिंशता च सरस्वत्या गङ्गामनु शरच्छतैः ॥ ४५

दौष्यन्तिर्भरतो [2]जज्ञे विद्वाञ्शाकुन्तलो नृपः ।
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ ४६

भरतस्य वरस्त्रीषु पुत्रास्संजज्ञिरे पृथक् ।
नाभ्यनन्दत्तदा राजा नानुरूपा ममेति तान् ॥ ४७

ततो महद्भिः क्रतुभिर् ईजानो भरतस्तदा ।
लेभे पुत्रं भरद्वाजाद् भुमन्युं नाम भारत ॥ ४८

धर्मे प्रणिहितात्मानं मत्वा [3]तं पुरुषोत्तमम् ।
ततः पुत्रिणमात्मानं मत्वा स कुरुपुङ्गव ! ॥ ४९

भुमन्युं भरतः प्रीतो यौवराज्येऽभ्यषेचयत् ॥ ४९॥

ततस्तस्य महीन्द्रस्य वितथं [4]पुत्रतोऽभवत् ।
ततस्स वितथो नाम भुमन्योरभवत्तदा ॥ ५०॥

---

1. क-ख-ग—त्रिंशतैश्च सरस्वत्या गङ्गामनु चतुश्शतैः ।
घ—त्रिंशता च सरस्वत्या गङ्गामनु चतुश्शतैः
2. क-ग—यज्ञैरीजे ॥ ख-घ—यज्ञैर्विद्वान्
3. अ—तुम्बुरुणोत्तमम्
4. क-ख-ग—थः पुत्रको घ—वितथे पुत्रजन्मनि ।

सुहोत्रसुतहोतारौ तथा [1]गर्हतरावुभौ ॥ ५१

पुष्करिण्यामुचक्थ्यं वै भुमन्योरभवन्सुताः ।
चत्वारो भारते वंशे सुहोत्रस्तस्य वंशभाक् ॥ ५२

तेषां ज्येष्ठस्सुहोत्रस्तु राज्यं प्राप्य महीक्षिताम् ।
राजसूयाश्वमेधाद्यैर् ईजे च बहुभिर्मखैः ॥ ५३

सुहोत्रः पृथिवीं चेमां बुभुजे सागराम्बराम् । ५३॥

सुहोत्रे तु महीपाले महीं धर्मेण शासति ।
चैत्ययूपाङ्किता भूमिर् बभूवाथ सहस्रशः ॥ ५४॥

पूर्णा हस्तिगवां चैव बभौ रत्नसमाकुला ॥ ५५

सा ममज्जेव पृथिवी भूरिभारावपीडिता ।
हस्त्यश्वरथसम्पूर्णा मनुष्यकलिला भृशम् ॥ ५६

समृद्धसस्यसम्पन्ना सहदेवा व्यरोचत ॥ ५६॥

ऐक्ष्वाक्यां जनयामास सुहोत्रस्त्रीन् सुतान् नृप ।
अजमीढं सदामीढं पुरुमीढं च भारत ॥ ५७॥

[2]अजमीढो वरस्तेषां तस्मिन् वंशः प्रतिष्ठितः ॥ ५८

---

1. क-ख-ग—गर्गनरावुभौ घ—गर्गतरावुभौ
2. क-ख-ग—अजमीढस्तु राजेन्द्र धर्मनित्यो यशस्सु च ।
[अधिकः पाठः]

[1]षट् पुत्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ॥ ५८॥

ऋक्षं धूमिन्यथो नीली दुष्यन्तपरमेष्ठिनौ ।
केशिन्यजनयज्जह्नुम् उभौ च जनरूषिणौ ॥ ५९॥

विदुस्संवरणं शूरम् ऋक्षाद्राथन्तरीसुतम् ।
तथेमे सर्वपाञ्चाला दुष्यन्तपरमेष्ठिनोः ॥ ६०॥

अन्वयाः [2]कुशिका राजन् जन्होरमिततेजसः ॥ ६१

जनरूषणयोर्ज्येष्ठम् ऋक्षमाहुर्जनाधिपम् ।
ऋक्षात्संवरणो जज्ञे राजन् वंशकरस्तव ॥ ६२

आर्क्षे संवरणे राज्यं प्रशासति महात्मनि ।
संक्षयस्सुमहानासीत् प्रजानामिति शुश्रुमः ॥ ६३

व्यशीर्यत ततो राष्ट्रं दुर्भिक्षैरावृतं तथा ।
क्षुन्मृत्युभ्यामनावृष्ट्या व्याधिभिश्च महाबलैः ॥ ६४

[3]अभ्यापतन् भारताश्चैव सपत्नानां बलानि च ।
चालयन्तो धृतिं भीमां जनयन्तो भृशं भयम् ॥ ६५

---

1. क-ख-ग—ऐक्ष्वाक्यां जनयद्राज्ञ्याम् अजमीढो यशस्विनः ।
[अधिकः पाठः]
2. क-ख-ग-घ—कौशिकास्सर्वे जह्नोरपि महात्मनः ।
3. क-ख-ग—अन्वकीर्यन्त भरतास्सपत्नैश्च महाबलैः ।
[अधिकः पाठः]

अभ्ययुस्तं च पाञ्चाला विवृण्वन्तो बलैर्महीम् ।
अक्षौहिणीभिर्दशभिस् तदा तं तरसाऽजयन् ॥ ६६

ततस्सदारस्सामात्यस् सपुत्रस्ससुहृज्जनः ।
राजा संवरणस्तस्मात् पलायत महाभयात् ॥ ६७

ते प्रतीचीं पराजित्य [1]प्रसन्ना भारता दिशम् ।
सिन्धोर्नदस्य महतो गुहायां [2]न्यवसंस्तदा ॥ ६८

शिवे विषमपर्यन्ते पर्वतस्य समीपतः ।
तत्रावसन् प्रतिच्छन्ना भारताश्च भयाच्चिरम् ॥ ६९

तेषां निवसतां तत्र सहस्रं परिवत्सरान् ।
आगच्छद्भगवांस्तत्र वसिष्ठो भरतान्प्रति ॥ ७०

तमागतं प्रयत्नेन अभ्युत्थायाभिवाद्य च ।
अर्घ्यमस्यानयन् प्रीता अजमीढपुरोगमाः ॥ ७१

निवेद्य सर्वमृषये सत्कृत्यैनमुपासत ॥ ७१॥

ततस्संवरणश्रेष्ठं राजा वव्रे स्वयं तदा ।
पुरोहितो भवान्नोऽस्तु राज्याय प्रयतेमहि ॥ ७२॥

एवमस्त्विति तं विप्रो भारतं प्रत्यभाषत ।
तमभ्यषिञ्चत्साम्राज्ये सर्वक्षत्रस्य पौरवम् ॥ ७३॥

---

1. ग—पलायनपरोऽभवत्
2. क-ख-ग-घ—न्यविशंस्तदा ।

विषाणभूतं सर्वस्यां पृथिव्यामिति नः श्रुतम् ।
[1]स पुरं भारतस्सर्षिर् अध्यतिष्ठत् पुरातनम् ॥ ७४॥
पुनश्चक्रे बली[2]भूतं पृथिव्यां सर्वपार्थिवान् ।
आजमीढो महायज्ञैर् बहुभिर्भूरिदक्षिणैः ॥ ७५॥
भारतः पृथिवीं प्राप्य पुनरीजे महाबलः ॥ ७६
ततस्संवरणात् सौरी तपती सुषुवे कुरुम् ॥ ७६॥
राजत्वे तं प्रजास्सर्वा धर्मज्ञ इति वव्रिरे ।
महिम्ना तस्य कुरवो लेभिरे प्रत्ययं भृशम् ॥ ७७॥
तस्य नाम्ना च विख्यातम् अभूत्तत् कुरुजाङ्गलं ॥ ७८
कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः ॥ ७८॥
अश्ववन्त[3]मभीवन्तं तथा चैत्ररथं मुनिम् ।
जनमेजयं च विख्यातं पुत्रांश्चास्यानुशुश्रुम ॥ ७९॥
पञ्चैतांश्च महीपुत्रान् व्यजायत मनस्विनी ॥ ८०
अविक्षितः परीक्षित्तु शबलाश्वश्च वीर्यवान् ।
अभिराजो विराजश्च बलाशश्च महाबलः ॥ ८१
चित्ररथो धर्मकरो दित्वाष्टिश्चाष्टम स्स्मृतः ॥ ८१॥
[4]न तेषामन्वयः ख्यातस् सर्वेषां नामतो गुणैः ॥ ८२

1. घ—स्वपुरं भारतैर्जुष्टं 2. घ—भृतः
3. क-ख-ग—मनश्वन्तमश्वं चित्र
घ—मभिश्वन्तं दान्तं चित्ररथं मुनिम्
4. क-ख-ग—शबलाश्वादयस्सप्त तथैवान्ये महाबलाः ।[अधिकः पाठः]

जनमेजयादयस्सप्त तथैवान्ये महारथाः ।
परीक्षितोऽभवन्पुत्रास् [1]सप्त धर्मार्थकोविदाः ॥ ८३

[2]कक्षसेनोग्रसेनौ तु चित्रसेनस्तथा [3]शिशुः ।
इन्द्रसेनस्सुषेणश्च भीमसेनश्च नामतः ॥ ८४

जनमेजयस्य तनयास् तथा चाष्टौ महाबलाः ॥ ८४॥

धृतराष्ट्रश्च धर्मात्मा तथोभौ पाण्डुबाह्लिकौ ।
निषधश्च महातेजास् तथा जाम्बूनदो बली ॥ ८५॥

[4]कुण्डोदरः पदातिश्च वसातिश्चाष्टमस्स्मृतः ।
सर्वे धर्मार्थकुशलास् सर्वभूतहिते रताः ॥ ८६॥

धृतराष्ट्रोऽथ राजासीत् तस्य पुत्रोऽथ शुण्डिकः ।
हस्ती विकत्थनः क्रोधः कुण्डलश्चापि पञ्चमः ॥ ८७॥

पर्यश्रवसमिन्द्राभं शराभं वाजिनां युधि ।
अधिराजात्मजानाहुस् तथा शक्रपुरञ्जयौ ॥ ८८॥

ततो धर्मभृतां श्रेष्ठः पर्यश्रवस उच्यते ।
ऋषिं पुण्यकृतां श्रेष्ठं तमेव परमं विदुः ॥ ८९॥

भीमसेनान्महेष्वासः प्रतीपस्समपद्यत ॥ ९०

1. क-ख-ग—सर्वे 2. क-ख-ग-घ—कण्व 3. क-ख-ग—शुचिः
4. क-ख-ग—वनोदकोपदानौ च वसतिश्चा

प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ ॥ ९०॥
देवापिश्शन्तनुश्चैव बाह्लीकश्च महायशाः ॥ ९१
देवापिस्तु प्रवव्राज तेषां धर्महितेप्सया ।
शन्तनुश्च महीं लेभे बाह्लीकश्च महारथः ॥ ९२
भरतस्या[1]न्वये राजन् सत्त्ववन्तो महारथाः ।
बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः ॥ ९३
एवंविधा[2]श्चाप्यपरे देवकल्पा महारथाः ।
अन्ववाये महाराज ऐलवंशविवर्धनाः ॥ ९४
गङ्गातीरं समागम्य दीक्षितो जनमेजय ।
अश्वमेधसहस्राणि वाजपेयशतानि च ॥ ९५
पुनरीजे महायज्ञैस् समाप्तवरदक्षिणैः ।
अग्निष्टोमातिरात्रणाम् उक्थानां सोमवत्पुनः ॥ ९६
वाजपेयैष्टिसत्राणां सहस्रैश्च सुसंभृतैः ।
इष्ट्वा शाकुन्तलो राजा तर्पयित्वा द्विजान् धनैः ॥ ९७
पुनस्सहस्रं पद्मानां कण्वाय भरतो ददौ ॥ ९७॥
जाम्बूनदस्य शुद्धस्य कनकस्य महायशाः ।
यस्य यूपाश्शतव्यामाः परिणाहेऽथ काञ्चनाः ॥ ९८॥
सहस्रव्याममुद्वृद्धास् सेन्द्रैर्देवैस्समुच्छ्रिताः ॥ ९९

1. क-ख-ग—न्वयास्त्वेते देवकल्पा घ—न्वये जाताः सत्त्ववन्तो
2. क-ख-ग—महाभागा देवरूपाः प्रहारिणः ।

स्वलङ्कृता भ्राजमानास् सर्वरत्नैर्मनोरमैः ॥ ९९॥
हिरण्यं द्विरदानश्वान् महिषोष्ट्रगजाविकम् ।
दासीदासं धनं धान्यं [1]सवत्सां गां पयस्विनीम् ॥ १००॥
भूमिं यूपसहस्राङ्कां कण्वाय बहुदक्षिणाम् ।
बहूनां ब्रह्मकल्पानां [2]दक्षिणाममितां ददौ ॥ १०१॥
ग्रामान् गृहाणि [3]क्षेत्राणि कोटिशश्शतशस्तथा ॥ १०२
[4]यस्मात्तु भारती कीर्तिर् येनेदं भारतं कुलम् ।
भरतस्यान्वये जाता देवकल्पा महारथाः ॥ १०३
बहवो ब्रह्मकल्पाश्च बहवो राजसत्तमाः ।
तेषामपरिमेयानि नामधेयानि सर्वशः ॥ १०४
तेषां कुले यथा मुख्यान् कीर्तयिष्यामि भारत ।
महाभागान् देवकल्पान् सत्यार्जवपरायणान् ॥ १०५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टाशीतितमोऽध्यायः ॥ ८८ ॥
॥ ७ ॥ संभवपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ शकुन्तलोपाख्यानं समाप्तम् ॥
[अस्मिन्नध्याये १०५ श्लोकाः ।]

---

1. क-ख-ग—गास्सुशीलास्सवत्सकाः ।
2. क-ख-ग—धनं दत्त्वा क्रतून्बहून् ।
3. क-ख-ग—शुभ्राणि कोटिशोऽददात्तदा ।
4. क-ख-ग-घ—भरताद्

॥ एकोननवतितमोऽध्यायः ॥

महाभिषगुपाख्यानम् ॥ १ ॥ महाभिषग्गङ्गयोः शापः ॥ २ ॥ अष्टवसूनां गङ्गायाश्च संवादः ॥ ३ ॥

वैशंपायनः—

इक्ष्वाकूणामन्यतमो राजाऽऽसीत् पृथिवीपतिः ।
महाभिषगिति ख्यातस् सत्यवाक् सत्यविक्रमः ॥ १

सोऽश्वमेधसहस्रेण शतसङ्ख्येन भारत ।
तोषयामास देवेशं स्वर्गं लेभे च सत्प्रभुः ॥ २

[1]ततः कदाचिद्ब्रह्माणम् उपासांचक्रिरे सुराः ।
तत्र राजर्षयो ह्यासन् स च राजा महाभिषक् ॥ ३

अथ गङ्गा सरिच्छ्रेष्ठा समुपायात् पितामहम् ।
तस्या वाससमुद्धूतं मारुतेन शशिप्रभम् ॥ ४

ततोऽभवन् सुरगणास् सहसाऽवाङ्मुखास्तदा ।
महाभिषक् तु राजर्षिस्[2] तदैको दृष्टवान्नदीम् ॥ ५

सोऽपध्यातो भगवता ब्रह्मणा स महाभिषक् ।
उक्तश्च जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ ६

---

1. क-ख-ग—यौवनं चानुसंप्राप्तं कुमारं वदतां वरम् ।
संस्मरंश्चाक्षयांल्लोकान् विदितांश्च स्वकर्मणा ॥
[अधिकः पाठः]

2. क-ख-ग-घ—रशङ्को

मनुष्येषु चिरं स्थित्वा लोकान् प्राप्स्यसि शोभनान् ॥ ६॥
यया हृतमनाश्चापि गङ्गया त्वं सुदुर्मते ।
सा ते वै मानुषे लोके विप्रियाण्याचरिष्यति ॥ ७॥
यदा ते भविता मन्युस् तदा शापाद्विमोक्ष्यते ॥ ८
स चिन्तयित्वा नृपतिर् नृपान् सर्वांस्तपोधनान् ।
प्रतीपं रोचयामास पितरं भूरिवर्चसम् ॥ ९
सा महाभिषजं दृष्ट्वा नदी धैर्याच्च्युतं नृपम् ।
तमेव मनसा [1]ध्यायन्त्युपावृत्ता सरिद्वरा ॥ १०
सा तु विध्वस्तसङ्काशान् कश्मलाभिहतान् दिवि ।
ददर्श पथि गच्छन्ती वसून् देवान् दिवौकसः ॥ ११
तथारूपांश्च तान् दृष्ट्वा पप्रच्छ सरितां वरा ॥ ११॥

गङ्गा—

किमिदं नष्टरूपास्थ क्वचित् क्षेमं दिवौकसाम् ।
[2]किमर्थं मनुजा भूमौ निपतिष्यन्ति दुःखिताः ॥ १२॥

वैशम्पायनः—

तामूचुर्वसवो दीनाश् शप्ता वै सुमहानदि ।
अस्वयंकृतया बुद्ध्या वसिष्ठेन महात्मना ॥ १३॥

---

1. ख-ग-घ—ध्यात्वा उपा
2. क-ग—मुखानि न प्रसन्नानि विवर्णानि कृतानि किम् ।
[अधिकः पाठः]

वयं हि सहसा सर्वे प्रच्छन्नमृषिसत्तमम् ।
सन्ध्यां वसिष्ठमासीनं तमत्यभिसृताः पुरा ॥ १४॥
तेन कोपाद्वयं शप्ता योनौ संभवतेति ह ॥ १५
न तच्छक्यमकर्तुं च यदुक्तं ब्रह्मवादिना ।
त्वमस्मान् मानुषी भूत्वा सूष्व पुत्रान् वसून् भुवि ॥ १६
न मानुषीणां जठरं प्रविशेम कथञ्चन ।
प्रत्युवाच वसून् गङ्गा तथाऽस्तु समयादिति ॥ १७

गङ्गा—

मर्त्येषु पुरुषश्रेष्ठः को वः कर्ता भविष्यति ॥ १७॥

वसवः—

प्रतीपस्य सुतो विद्वान् शन्तनुर्नाम धार्मिकः ।
त्वत्कृते मानुषे लोके स नः कर्ता भविष्यति ॥ १८॥

गङ्गा—

ममाप्येवं मनो जातं यथा मां वदथानघाः ।
प्रियं तस्य करिष्यामि वचनं च दिवौकसाम् ॥ १९॥

वसवः—

जातान् कुमारान् स्वानप्सु प्रक्षेतुं वै त्वमर्हसि ।
यथा न चिरकालं नो निष्कृतिस्स्यात् त्रिलोकगे २०॥

गङ्गा—

एवमेव करिष्यामि पुत्रस्तस्य विधीयताम् ॥

नास्य मोघं भवेत् कर्म पुत्रहेतोः कृतं मया ॥ २१॥

वसवः—

तुरीयार्धं प्रदास्यामो वीर्यस्यैकैकशो वयम् ।
तेन वीर्येण पुत्रस्ते भविता तस्य चेप्सितः ॥ २२॥

न संपत्स्यति मर्त्येषु पुनस्तस्य च सन्ततिः ।
अपुत्रस्तु नरव्याघ्रो भविष्यति सुतस्तव ॥ २३॥

वैशंपायनः—

एवं च समयं कृत्वा गङ्गया वसवश्च ते ।
जग्मुः प्रहृष्टमनसो यथासंकल्पमञ्जसा ॥ २४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥
॥ ७ ॥ संभवपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
[अस्मिन्नध्याये २४॥ श्लोकाः]

॥ नवतितमोऽध्यायः ॥

प्रतीपेन गङ्गायाः स्नुषात्वेन परिग्रहः ॥ १ ॥ शन्तनूत्पत्तिः ॥ २ ॥
तस्य राज्येऽभिषेकः ॥ ३ ॥ मृगयार्थं गतस्य शन्तनोर्गङ्गया संवादः ॥

वैशंपायनः—

ततः प्रतीपो राजाऽऽसीत् सर्वभूतहिते रतः ।
निषसाद महाबाहुर् गङ्गातीरे जितेन्द्रियः ॥ १

तस्य रूपगुणोपेता लोभनीयतमाकृतिः ।
उत्तीर्य गङ्गा सलिलाद् उद्देशं स्त्री समभ्यगात् ॥ २

अधीयानस्य राजर्षेस् तस्य सा देववर्णिनी ।
दक्षिणं सालसङ्काशम् ऊरुं भेजे शुभानना ॥ ३

प्रतीपस्तु महीपालस् तामुवाच यशस्विनीम् ।
वाक्यं वाक्यविदां श्रेष्ठो धर्मनिश्चयतत्त्ववित् ॥ ४

प्रतीपः—
करवाणि किं ते कल्याणि ! यदर्थं मां त्वमभ्यगाः ॥ ४॥

गङ्गा—
कामये त्वां नरव्याघ्र स कौरव्य भजस्व माम् ।
त्यागः कामयमानानां स्त्रीणां सद्भिर्विगर्हितः ॥ ५॥

प्रतीपः—
नाहं कामात् स्त्रियं भद्रे गच्छेयं वरवर्णिनि ! ।
न चासवर्णां कल्याणि ! धर्म्यमेतद्धि मे व्रतम् ॥ ६॥

गङ्गा—
नाश्रेयस्यस्मि नागम्या नानपत्या कथञ्चन ।
मां वै भजस्व नृपते देहि कामं [1]वरस्त्रियाः ॥ ७॥

प्रतीपः—
समयातीतमेतद्वै यन्मां चोदयसि प्रियम् ।
अन्यथा प्रतिपन्नं मां क्षिणुयाद्धर्मविप्लवः ॥ ८॥

1. घ—वरस्त्रियम् ।

प्राप्य दक्षिणमूरुं मे त्वमाश्लिष्टा वराङ्गने ।
अपत्यानां स्नुषाणां च आसनं विद्धि तच्छुभे ॥ ९॥

सव्योरुः कामिनीभोग्यस् त्वया स च विवर्जितः ।
तस्मादहं नाचरामि त्वयि कामं प्रियंवरम् ॥ १०॥

स्नुषा मे भव कल्याणि ! पुत्रार्थं त्वां वृणोम्यहम् ।
स्नुषापक्षं हि वामोरुं त्वमागम्य समाश्रिता ॥ ११॥

गङ्गा—
एवमप्यस्तु धर्मज्ञ संयोगस्स्यात् सुतेन ते ।
त्वद्भक्त्या तु भजिष्यामि प्रख्यातं भारतं कुलम् ॥ १२॥

पृथिव्यां पार्थिवा ये च तेषां यूयं परायणम् ।
गुणा न हि मया शक्या वक्तुं वर्षशतैरपि ॥ १३॥

कुलस्य [1]यो वः प्रणेता तस्याहं च नरोत्तम ॥ १४

यश्च मेऽभिजनं जातिम् आचारं चापि तद्विभो ।
[2]तत्सर्वमेव पुत्रस्ते न मीमांसेत कर्हिचित् ॥ १५

एवं वसन्ती राजेन्द्र ! वर्धयिष्यामि ते प्रियम् ।
पुत्रैः पुण्यैः परं चापि स्वर्गं प्राप्स्यति ते सुतः ॥ १६

---

1. क-ख-ग—यो वः प्रणेता पतिस्स्यान्मे
घ—यो वः प्रणेता वंशस्य तव पुत्रो नृपोत्तम ।
2. क-ग—न च मीमांस्यते पुत्रः सर्वमेव परंतप ।
ख—न मीमांस्यति ते पुत्रः सर्वमेव परंतप ।
घ—न मीमांस्येत ते पुत्रः सर्वमेव परंतप ।

वैशम्पायनः—

तथेत्युक्त्वा तु सा राजंस् तत्रैवान्तरधीयत ।
अदृश्या राजसिंहस्य पश्यतस्साऽभवत्तदा ॥ १७

पुत्रजन्म प्रतीक्षन् वै स राजा तदधारयत् ॥ १७॥
एतस्मिन्नेव काले तु प्रतीपः क्षत्रियर्षभः।
तपस्तेपे सुतस्यार्थे सभार्यः कुरुनन्दन ॥ १८॥
प्रतीपस्य तु भार्यायां गर्भः श्रीमानवर्धत ।
श्रिया परमया युक्तश् शरच्छुक्ले यथा शशी ॥ १९॥
ततस्तु दशमे मासि प्राजायत रविप्रभम् ।
कुमारं देवगर्भाभं प्रतीपमहिषी तदा ॥ २०॥
तयोस्समभवत् पुत्रो वृद्धयोस्स महाभिषक् ॥ २१
शान्तस्य जज्ञे सन्तानस् तस्मादासीत्स शन्तनुः ॥ २१॥
तस्य जातस्य कृत्यानि प्रतीपोऽकारयत् प्रभुः ।
जातकर्मादि विप्रेण वेदोक्तैः कर्मभिस्तदा ॥ २२॥
नामकर्म च विप्रास्तु चक्रुः परमसत्कृतम् ।
शन्तनोरवनीपाल! वेदोक्तैः कर्मभिस्तदा ॥ २३॥
ततस्संवर्धितो राजा शन्तनुर्लोक[1]पालकः ।
स तु लेभे परां निष्ठां प्राप्य धर्मविदां वरः ॥ २४॥

1. ख-ग-घ—धार्मिकः।

धनुर्वेदे च वेदे च गतिं स परमां गतः ।
यौवनं चापि संप्राप्तः कुमारो वदतां वरः ॥ २५॥

संस्मरंश्चाक्षयांल्लोकान् विजितांस्तान् स्वकर्मणा ।
बभूव धर्मकृद्राजा शन्तनुर्भरतर्षभ ॥ २६॥

प्रतीपश्शन्तनुं पुत्रं यौवनस्थमबोधयत् ॥ २७

पुरा स्त्री मां समभ्यागाच् छन्तनो भूतये तव ।
त्वामाव्रजेद्यदि रहस् सा पुत्र वरवर्णिनी ॥ २८

कामयानाऽभिरूपाह्या दिव्यस्त्री पुत्रकाम्यया ।
[1]सा त्वया नानुयोक्तव्या काऽसि कस्याऽसि चाङ्गने ॥ २९

यच्च कुर्यान्न तत्कर्म प्रतिषेद्धुं त्वयाऽनघ ।
मन्नियोगाद्व्रजन्तीं तां भजेथा इत्युवाच तम् ॥ ३०

एवं संदिश्य तनयं प्रतीपश्शन्तनुं तदा ।
स्वे च राज्येऽभिषिच्यैनं वनं राजा जगाम ह ॥ ३१

स राजा शन्तनुर्धीमान् पार्थिवानां धुरन्धरः ।
बभूव सर्वलोकस्य सत्यवागिति सत्तमः ॥ ३२

पीनस्कन्धो महाबाहुर् मत्तवारणविक्रमः ।
अन्वितः परिपूर्णार्थैस् सर्वैर्नृपतिलक्षणैः ॥ ३३

1. क-ख-ग-घ– न प्रष्टव्या त्वया सा वै कासि कस्य सुता त्विति ।

[1]अमर्त्यसंपदोपेतः क्षत्रधर्मविशेषवित् ।
वशे चक्रे महीमेको विजित्य वसुधाधिपान् ॥ ३४

वेदानागमयत् कृत्स्नान् राजधर्मांश्च सर्वशः ।
ईजे च बहुभिस्सत्रैः क्रतुभिर्भूरिदक्षिणैः ॥ ३५

तर्पयामास विप्रांश्च वेदाध्ययनकोविदान् ।
रत्नैरुच्चावचैर्गोभिर् ग्रामैरश्वैर्धनैरपि ॥ ३६

वयोरूपेण संपन्नः पौरुषेण बलेन च ।
ऐश्वर्येण प्रतापेन विक्रमेण धनेन च ॥ ३७

वर्तमानं च सत्येन सर्वधर्मविशारदम् ।
तं महीपं महीपाला राजराजमकुर्वत ॥ ३८

वीतशोकभयाबाधास् सुखस्वप्नप्रबोधनाः ।
श्रिया भरतशार्दूल समपश्यन्त भूमिपाः ॥ ३९

शन्तनुप्रमुखैर्गुप्तं राष्ट्राधिपतिभिर्जगत् ।
नियमैस्सर्ववर्णानां ब्रह्मोत्तरमवर्तत ॥ ४०

ब्राह्मणाभिमुखं क्षत्रं क्षत्रियाभिमुखा विशः ।
ब्रह्मक्षत्रानुलोमाश्च शूद्राः पर्यचरन् विशः ॥ ४१

एवं पशुवराहाणां तथैव मृगपक्षिणाम् ।
शन्तनावथ राज्यस्थे नावर्तत वृथा वधः ॥ ४२

1. क-ख-ग-घ—अमात्य

असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा सर्वेषां भूतानामभवत् पिता ॥ ४३

स हस्तिनाभ्रि धर्मात्मा विहरन् कुरुनन्दनः ।
तेजसा सूर्यकल्पोऽभूद् वायुना च समो बले ॥ ४४

अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ।
बभूव राजा सुमतिः प्रजानां सत्यविक्रमः ॥ ४५

स वनेषु च रम्येषु शैलप्रस्रवणेषु च ।
चचार मृगयाशीलश् शन्तनुर्वनगोचरः ॥ ४६

स मृगान् महिषांश्चैव विनिघ्नन् राजसत्तमः ।
नदीमन्वचरद्राजा शन्तनुः परया मुदा ॥ ४७

गङ्गां त्रिपथगां पुण्यां सिद्धचारणसेविताम् ।
स कदाचिन्महाराज ददर्श परमां स्त्रियम् ॥ ४८

सा च शन्तनुमभ्यागाद् अलक्ष्मीमपकर्षती ॥ ४८॥

जाज्वल्यमानां वपुषा साक्षा[1]च्छ्रियमिवापराम् ।
सर्वानवद्यां युवतिं दिव्याभरणभूषिताम् ॥ ४९॥

सूक्ष्माम्बरधरां साक्षात् पद्मोदरसमप्रभाम् ।
स्नातमात्रामधौतस्त्रां गङ्गातीररुहे वने ॥ ५०॥

प्रकीर्णकेशीं पाणिभ्यां संस्पृशन्तीं शिरोरुहान् ।

1. क-ख-ग-घ—त्पद्मामिव श्रियम् ।

[1]तां दृष्ट्वा हृष्टरोमाऽभूद् दर्शनादेव शन्तनुः ॥ ५१॥
पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः ॥ ५२

दृष्ट्वैनं सा च राजानं विचरन्तं महाद्युतिम् ।
स्नेहादागतसौहार्दा नातृप्यत विलासिनी ॥ ५३

[2]गङ्गा कटाक्षेण राजानं प्रेक्षमाणा विलासिनी ।
चक्ष्वर्यताग्रतस्तस्य किन्नरीवाप्सरोपमा ॥ ५४

तां दृष्ट्वा हृष्टरूपोऽभूद् दर्शनादेव शन्तनुः ।
विलासचेष्टितैस्तस्या हृतचेताश्च योषितः ॥ ५५
[3]तामुवाच ततो राजा कामिनीं तु मनोरमाम् ॥ ५५॥

शन्तनुः—

पिबन्तीव च नेत्राभ्यां न तृप्तिं दर्शनेन च ॥ ५६

देवता किन्नरी वा त्वं गन्धर्वी वा सुमध्यमे ।
यक्षी वा मानवी वापि जानीयां कां शुचिस्मिते ॥ ५७

---

1. क-ख-ग—रूपेण वयसा कान्त्या शरीरावयवैस्तथा ।
हासभावविलासैश्च लोचनाञ्चलविक्रियैः ॥
श्रोणीभारेण मध्येन स्तनाभ्यामुरसा दृशा ।
कबरीभरेण पादाभ्यामिङ्गितेन स्मितेन च ॥
कोकिलालापसंल्लापैर्धिक्कुर्वन्तीं त्रिलोकगाम् ।
वाणीं च गिरिजां लक्ष्मीं योषितोऽन्यास्सुराङ्गनाः ॥
[अधिकः पाठः]

2. घ—स्नेहात्कटाक्षेण राजानं वीक्षमाणां विलासिनीम् ।

3. ख—रूपेणातीत्य तिष्ठन्तीं सर्वा राजन्ययोषितः ।
[अधिकः पाठः]

याऽसि काऽसि [1]सुमध्ये त्वं महिषी मे भवानघे!।
त्वद्गता हि मम प्राणा वसु यन्मेऽस्ति किंचन ॥ ५८

वैशंपायनः—

श्रुत्वा तु राज्ञस्सा बाला सस्मितं मृदु वल्गु च ।
यशस्विनी च साऽगच्छच् छन्तनोर्भूतये तदा ॥ ५९

सा च दृष्ट्वा नृपश्रेष्ठं चरन्तं तीरमाश्रितम् ।
स्मृत्वा वसूनां समयम् अभ्यगच्छदनिन्दिता ॥ ६०

प्रजार्थिनी राजपुत्रं शन्तनुं पृथिवीपतिम् ।
प्रतीपवचनं चापि संस्मृत्यैव स्वयं नृप ॥ ६१

कालोऽयमिति मत्वा सा वसूनां शापचोदिता ।
प्रत्युवाच महीपालं ह्लादयन्ती मनो गिरा ॥ ६२

गङ्गा—

भविष्यामि महीपाल महिषी ते वशानुगा ।
न तु त्वं वा द्वितीयो वा ज्ञातुमिच्छेत् कथंचन ॥ ६३

यत्तु कुर्यामहं राजन् शुभं वा यदि वाऽशुभम् ।
नाहं वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम् ॥ ६४

एवं वै वर्तमाने तु त्वयि वत्स्यामि पार्थिव ।
वारिता विप्रियं चोक्ता त्यजेयं त्वां नराधिप ॥ ६५

1. क-ख-ग-घ—सुरप्रख्ये

एष मे समयो राजन् भज मां त्वं यथेप्सितम् ।
अनुनीताऽस्मि ते पित्रा भर्ता मे त्वं भव प्रभो ॥ ६६

वैशम्पायनः—

तथेति राज्ञा साधूक्ता तत्रैव वरवर्णिनी ।
प्रहर्षमतुलं लेभे श्रुत्वा वाक्यमनिन्दिता ॥ ६७

प्रतिज्ञाय तु तत्तस्यास् तथेति मनुजाधिपः ।
रथमारोप्य तां देवीं जगाम स तया सह ॥ ६८

सा च शन्तनुमभ्यागात् साक्षाल्लक्ष्मीरिवापरा ।
आसाद्य शन्तनुस्तां च बुभुजे कामवान् सुखी ॥ ६९

न प्रष्टव्येति मन्वानो न स तां किंचिदूचिवान् ॥ ६९॥

स तस्याश्शीलवृत्तेन रूपेण परमेण च ।
सम्यक्चैवोपचारेण सुखमाराधितोऽभवत् ॥ ७०॥

स राजा परमप्रीतः परमस्त्री[1]प्रलोभितः ॥ ७१

दिव्यरूपा हि सा देवी गङ्गा त्रिपथगा नदी ।
मानुषं विग्रहं श्रीमत् कृत्वा वै वरवर्णिनी ॥ ७२

भाग्योपनतकामस्य भार्येवोपस्थिताऽभवत् ।
शन्तनो राजसिंहस्य देवराजसमद्युतेः ॥ ७३

संभोगस्नेहचातुर्यैर् भावलास्यैर्मनोरमैः ।

1. क-ख-ग-घ—प्रलालितः ।

राजानं रमयामास यथा रज्येत स प्रभुः ॥ ७४

स राजा रतिसक्तोऽभूद् उत्तमस्त्रीगणैर्वृतः ॥ ७४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि नवतितमोऽध्यायः ॥ ९० ॥
॥ ७ ॥ संभवपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥
[अस्मिन्नध्याये ७४॥ श्लोकाः ।]

॥ एकनवतितमोऽध्यायः ॥

देवव्रतोत्सर्जनम् ॥ १ ॥

वैशंपायनः—

अहोरात्रानृतून् मासान् न बुबोध गतान् बहून् ।
रममाणः प्रियां लब्ध्वा यथाकामं नरेश्वरः ॥ १

दिविष्ठान् मानुषांश्चैव भोगान् भुङ्क्ते स्म वै नृपः ।
आसाद्य शन्तनुश्श्रीमान् मुमुदे च परन्तपः ॥ २

ऋतुकाले तु सा देवी दिव्यं गर्भमधारयत् ।
अष्टावजनयत्पुत्रांस् तस्य चामरवर्णिनः ॥ ३

जातं जातं च सा पुत्रं [1]ताम्वप्सु क्षिपति स्म ह ।
सूतके कण्ठमाक्रम्य तान्निनाय यमक्षयम् ॥ ४

---

1. क-ख-ग-घ—स्वास्वप्सु

[1]वृणोतु त्वां नदीत्युक्त्वा सर्वान् स्रोतस्यवासृजत् ।
तस्य तत् त्वप्रियं राज्ञश् शन्तनोरभवत्तदा ॥ ५

उवाच किञ्चिन्न तु तां पितुर्वचनयन्त्रितः ॥ ५॥

अमीमांस्या कर्मयोनिर् आगमश्चेति शन्तनुः ।
स्मरन् पितृवचश्चैव नाप्रच्छत् पुत्रकिल्बिषम् ॥ ६॥

जाताञ्जातांश्च वै हन्ति सा स्त्री सप्त वरान् सुतान् ।
शन्तनुर्धर्मभङ्गाच्च नाप्रच्छत्तां कथंचन ॥ ७॥

अष्टमं तु जिघांसन्त्यां चुक्षुभे शन्तनोर्धृतिः ॥ ८

उवाच राजा दुःखार्तः परीप्सन् पुत्रमात्मनः ॥ ८॥

आलभन्तीं तदा दृष्ट्वा तां स कौरवनन्दनः ।
अब्रवीद्भरतश्रेष्ठो वाक्यं परमदुःखितः ॥ ९॥

शन्तनुः—

मा वधीः [2]कस्य काऽसीति किं हिनस्सि सुतानिति ।
पुत्रान्नि सुमहत्पापम् अकार्षीः कर्म निन्दितम् ॥ १०॥

गङ्गा—

पुत्रकाम न ते हन्मि पुत्रं पुत्रवतां वर ।
जीर्णस्तु मम वासोऽयं यथा स समयः कृतः ॥ ११॥

अहं गङ्गा जह्नुसुता महर्षिगणपावनी ।

---

1. क-ख-ग—हनामि त्वां नही; घ—प्रीणामि त्वाहमि
2. क-ख-ग-घ—कासि कस्यासि किञ्च हंसि

देवकार्यार्थसिद्ध्यर्थम् उषिताऽहं त्वया सह ॥ १२॥

इमेऽष्टौ वसवो देवा महाभागा महौजसः ।
[1]आपगस्याभिशापेन मानुषेषूपपादिताः ॥ १३॥

तेषां जनयिता नान्यस् त्वदृते भुवि विद्यते ।
जनित्री मद्विधा धात्री नैवास्ति पुरुषाधिप ॥ १४॥

तस्माद्विजनने युक्ता त्वत्संयोगमरोचयम् ।
जनयित्वा वसूनष्टौ जिता लोकाश्च पुष्कलाः ॥ १५॥

देवानां समयस्त्वेष वसूनां संश्रुतो मया ।
जातं जातं मोक्षयिष्ये नियोगान्मानुषेष्विति ॥ १६॥

शप्ताश्शापाद्विमुक्तास्ते त्व[2]त्कृतोऽयं विमुच्यते ।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम् ॥ १७॥

अयं तव सुतस्तेषां वीर्येण कुलनन्दनः ।
संभूतोऽति जनानन्यान् भविष्यति न संशयः ॥ १८॥

एष पर्यायवासस्थो देवस्त्वत्सदृशोऽष्टमः ।
मत्प्रसादाच्च जानीहि गङ्गादत्तामिमं सुतम् ॥ १९॥

तस्मादेवव्रतश्चैव गङ्गादत्तश्च वीर्यवान् ।

---

1. क-ख-ग-घ—कोशेषु सर्वत्र आपवः इति दृश्यते ।
2. क-ख-ग-घ—कृतेऽयं न मुच्यते ।

द्विनामा शन्तनोः पुत्रश् शन्तनोरधिको गुणैः ॥ २०॥

तेषां लोकानवाप्नोति वसूनां वसुधाधिप ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥

॥ ७ ॥ संभवपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

[अस्मिन्नध्याये २१ श्लोकाः]

॥ द्विनवतितमोऽध्यायः ॥

वसुशापकीर्तनम् ॥ १ ॥

शन्तनुः—

आपगो नाम कोन्वेष किमृषेस्तस्य दूषितम् ।
शशाप यस्मात् कल्याणि ! स वसूंश्चारुदर्शने ॥ १
यस्याभिशापात्ते सर्वे मानुषीं योनिमागताः ॥ १॥

अनेन च विशेषेण गङ्गादत्तेन किं कृतम् ।
कस्य चैष कृतेनैष चिरमेष वसिष्यति ॥ २॥

ईशानास्सर्वलोकानां वसवः केन हेतुना ।
मनुष्येषूदपद्यन्त तत्समाचक्ष्व जाह्नवि ! ॥ ३॥

वैशंपायनः—

एवमुक्ता वरारोहा राजानमिदमब्रवीत् ।

भर्तारं जाह्नवी देवी शन्तनुं पुरुषर्षभ ॥ ४॥

गङ्गा—

लेभे यं यमुना पुत्रं वरुणाद्राजसत्तम ।
वसिष्ठनामा स मुनिः ख्यात आपग इत्युत ॥ ५॥

तस्याश्रमपदं पुण्यं मृगपक्षिगणान्वितम् ।
मेरोः पार्श्वे नगेन्द्रस्य सर्वर्तुकवनावृतम् ॥ ६॥

स वारुणिस्तपस्तेपे तस्मिन् भरतसत्तम ।
वने पुण्यकृतां श्रेष्ठस् स्वादुमूलफलोदके ॥ ७॥

दक्षस्य दुहिता या तु सुरभीत्यभि विश्रुता ।
गां प्रजाता तु सा देवी काश्यपाद्भरतर्षभ ॥ ८॥

अनुग्रहार्थं जगतस् सर्वकामदुहां वराम् ।
लेभे तां गां तु धर्मात्मा होमधेनुं स वारुणिः ॥ ९॥

सा तस्मिंस्तपसाऽरण्ये वसन्ती ऋषिसेविते ।
चचार रम्ये हर्म्ये च गौरपेतभया तदा ॥ १०॥

ततस्तद्वनमाजग्मुः कदाचिद्भरतर्षभ ।
अष्टौ च वसवस्सर्वे देवा देवर्षिसेवितम् ॥ ११॥

सभार्यास्तद्वनं सर्वं विचरन्तस्ततस्ततः ।
रेमिरे रमणीयेषु पर्वतेषु वनेषु च ॥ १२॥

एकस्य भार्या राजेन्द्र ! वसोर्वासवविक्रम ! ।

तां च दोग्ध्रीं वने तस्मिन् गां ददर्श सुदर्शनाम् ॥ १३॥
स्निग्धां वसिष्ठस्य मुनेस् सर्वकामधुगुत्तमाम् ॥ १४
सा विस्मयसमाविष्टा रूपयुक्ता सुनन्दिनी ।
[1]दर्शयामास कल्याणी यातां गां गोवृषविक्रम ॥ १५
सा पीनां च सुदोग्ध्रीं च सुवालधिमुखोदराम् ।
उपपन्नां गुणैस्सर्वैश् शीलेनानुत्तमेन च ॥ १६
एवंगुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास कल्याणी पुरा पौरवनन्दन ॥ १७
द्यौस्तदा तां तु दृष्ट्वैव गां गजे[2]श्वरविक्रम ।
उवाच सा सतां देवि! तस्या रूपगुणान्वयम् ॥ १८

द्यौः—

एषा गौरुत्तमा देवी वारुणेरसितेक्षणा ।
मुनेस्तस्य वरारोहे! यस्येदं वनमुत्तमम् ॥ १९
अस्याः क्षीरं पिबेन्मर्त्यस् स्वादु यो वै सुमध्यमे ।
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ॥ २०

वैशम्पायनः—

एतच्छ्रुत्वा तु सा देवी नृपोत्तम! सुमध्यमा ।
तमुवाचानवद्याङ्गी भर्तारं दीप्ततेजसम् ॥ २१

1. क-ख-ग-घ—स्वपत्युर्दर्शयामास 2. क-ख-ग-घ—न्द्रेन्द्र

गङ्गा—

अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जितवती नाम रूपयौवनशालिनी ॥ २२

उशीनरस्य राजर्षेस् सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसंपदा ॥ २३

तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्व [1]नरश्रेष्ठ त्वरितं पुण्यवर्धनाम् ॥ २४

यावदस्याः पयः पीत्वा सा सखी मम मानदा ।
मानुषेषु भवेच्चैका जरारोगविवर्जिता ॥ २५

एतन्मम महाभाग कर्तुमर्हसि कर्म वै ।
प्रियात् प्रियतरं ह्यस्मान्नास्ति मेऽन्यत् कंथचन ॥ २६

एतच्छ्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
धरादैर्भ्रातृभिस्सार्धं द्यौस्तदा तां जहार गाम् ॥ २७

तया कमलपत्राक्ष्या नियुक्तो द्यौस्तदा नृप ।
ऋषेस्तस्य तपस्तीव्रं न शशाक परीक्षितुम् ॥ २८

हृता गौस्सा तदा तेन प्रयाताऽद्भुतदर्शन ।
तदाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ॥ २९

नापश्यद्गां सवत्सां तां सा हि तस्मिन् वनोत्तमे ।

---

1. क-ख-ग-घ—सुर

स तस्मिन् मृगयामास वने तामृषिसत्तमः ॥ ३०

नाध्यगच्छच्च मृगयन् स्वां गां मुनिरुदारधीः ॥ ३०॥

ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनः ।
स तु कोपवशं प्राप्तश् शशाप च वसूंस्तदा ॥ ३१॥

यस्मान्मे वसवो जह्रुर् गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्वे जनिष्यन्ति वसवो मानुषेष्विति ॥ ३२॥

एवं शशाप भगवान् वसूंस्तान् मुनिसत्तमः ।
वशं क्रोधस्य संप्राप्त आपगो भरतर्षभ ॥ ३३॥

शप्त्वा च तान् महाभागस् तपस्येव मनो दधे ।
एवं स शप्तवान् राजन् वसूनष्टौ तपोधनः ॥ ३४॥

[1]हरप्रभावो ब्रह्मर्षिर् देवान् रोषसमन्वितः ॥ ३५

एवं शप्तास्ततस्तेन मुनिना यामुनेन वै ।
अष्टौ समस्ता वसवो निजदोषेण सत्तम ॥ ३६

अथाश्रमपदं प्राप्य पुनस्तस्य महात्मनः ।
शप्तास्स्म इति जानन्तस् तमृषिं चाभिचक्रमुः ॥ ३७

प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ।
न लेभिरे कृते तस्मात् प्रसादमृषिसत्तमात् ॥ ३८

चकार च न तेषां वै प्रसादं भगवानृषिः ।

---

1. क-ख-ग-घ—महा

आपगः पुरुषव्याघ्र ! सर्वधर्मविशारदः ॥ ३९

उवाच च स धर्मात्मा सप्त राजन् धरादिकाम् ।
अनुसंवत्सराच्छापान्मोक्ष्यध्वमिति भारत ॥ ४०

अयं तु यत्कृते शप्ता मया यूयं स वत्स्यति ।
द्यौस्तु वै मानुषे लोके दीर्घकालं स्वकर्मणा ॥ ४१

नानृतं तच्चिकीर्षामि यस्मिन् क्रुद्धो यदब्रुवम् ॥ ४१॥

प्रजां ह्यनृतवाक्येन हिंस्यामप्यात्मनस्तदा ।
न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥ ४२॥

भविष्यति च धर्मात्मा सर्वशास्त्रार्थविद्वली ।
पितुश्चायं प्रियं कुर्वन् स्त्रीभोगान् वर्जयिष्यति ॥ ४३॥

एवमुक्त्वा वसून् सर्वान् जगाम भगवानृषिः ।
ततो मामुपजग्मुस्ते समस्ता वसवस्तदा ॥ ४४॥

अयाचन्त च मां राजन् वरं तेभ्यो ददाम्यहम् ।
जातं जातं क्षिपेत्यूचुस् स्वयं गङ्गे ! त्वदम्भसि ॥ ४५॥

एवं तेषां वरं सम्यक् शप्तानां राजसत्तम ! ।
मोक्षार्थं मानुषाल्लोकाद् यथावत्कृतवत्यहम् ॥ ४६॥

अयं शापादृषेस्तस्य एक एव नृपोत्तम ! ।
द्यौ राजन् मानुषे लोके चिरं वत्स्यति भारत ! ॥ ४७॥

अयं देवव्रतश्चैव गङ्गादत्तश्च मे सुतः ।
द्विनामा शन्तनोः पुत्रश् शन्तनोरधिको गुणैः ॥ ४८॥

अयं कुमारः पुत्रस्ते विवृद्धः पुनरेष्यति ।
इयं च ते भविष्यामि आह्वानोपगता नृप ! ॥ ४९॥

वैशंपायनः—

एतदाख्याय सा देवी तत्रैवान्तरधीयत ।
आदाय च कुमारं तं जगाम च यथेप्सितम् ॥ ५०॥

तस्माद्देवव्रतश्चैव गङ्गादत्तश्च सोऽभवत् ॥ ५१

शन्तनुश्चापि शोकार्तो जगाम स्वपुरं ततः ॥ ५१॥

तस्य कीर्तिं च वृत्तिं च महतो नृप सद्गुणान् ।
शन्तनोः कीर्तयिष्यामि सर्वानेव यथातथम् ॥ ५२॥

महाभागस्य नृपतेर् भारतस्य यशस्विनः ।
यस्येतिहास आख्यातो महाभारत इत्युत ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥

॥ ७ ॥ संभवपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

[अस्मिन्नध्याये ५३॥ श्लोकाः ।]

॥ त्रिनवतितमोऽध्यायः ॥

देवव्रतयौवराज्याभिषेकः ॥ १ ॥

वैशंपायनः—

एवं स शन्तनुर्धीमान् देवराजर्षिसत्कृतः ।
धर्मात्मा सर्वलोकेषु सत्यवागिति विश्रुतः ॥ १

शन्तनोः कीर्तयिष्यामि सर्वानेव गुणानहम् ॥ १॥

दमो दानं क्षमा बुद्धिर् ह्रीर्धृतिस्तेज उत्तमम् ।
[1]न्यवसंश्च महासत्वे शन्तनौ भरतर्षभ ॥ २॥

अमात्यगुणसम्पन्नः क्षत्रधर्मविशेषवित् ।
आसीद्भरतवंशस्य गोप्ता साधुजनस्य च ॥ ३॥

कम्बुग्रीवः पृथुव्यंसो मत्तवारणविक्रमः ।
धर्म एव परः कामाद् अर्थाच्चेति व्यवस्थितः ॥ ४॥

[2]एवमासीन्महासत्वश् शन्तनुर्भरतर्षभ ।
न चास्य सदृशः कश्चित् क्षत्रियो धर्मतोऽभवत् ॥ ५॥

वर्तमानं च सद्धर्मे शस्त्रशास्त्रविदांवर ।
तं महीपा महेष्वासं राजराजमकुर्वत ॥ ६॥

---

1. क-ख-ग—नित्यान्यस्मिन् घ—नित्यान्यासन्
2. क-ख-ग—अन्वितः परिपूर्णार्थैस्सर्वैर्नृपतिलक्षणैः। [अधिकः पाठः]

तेन कीर्तिमता शिष्टाश् शक्रप्रतिमतेजसा ।
यज्ञदानतपश्शीलास् समपद्यन्त पार्थिवाः ॥ ७॥

शन्तनुप्रमुखैर्गुप्तं राष्ट्राधिपतिभिर्जगत् ।
नियमात् सर्ववर्णानां ब्रह्मोत्तरमवर्तत ॥ ८॥

ब्रह्म पर्यचरत्क्षत्रं विशः क्षत्रमनुव्रताः ।
ब्रह्मक्षत्रानुलोमांश्च शूद्राः पर्यचरन् विशः ॥ ९॥

स हस्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्यन्ताम् अन्वशासद्वसुन्धराम् ॥ १०॥

स देवराजसदृशो धर्मज्ञस् सत्यवागृजुः ।
दानधर्मपरो योगी श्रिया परमया युतः ॥ ११॥

अरागद्वेषसंयुक्तस् सोमवत् प्रियदर्शनः ।
तेजसा सूर्यसङ्काशो वायुवेगसमो बले ॥ १२॥
अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ॥ १३

वधः पशुवराहाणां तथैव मृगपक्षिणाम् ।
शन्तनौ पृथिवीपाले नावर्तत वृथा तदा ॥ १४

सर्वब्रह्मोत्तरे राज्ये शन्तनुर्विनयात्मवान् ।
समं शशास भूतानि कामरागविवर्जितः ॥ १५

चकोरनेत्रस्ताम्रास्यस् सिंहर्षभगतिर्युवा ।
गुणैरनुपमैर्युक्तस् समस्तैराभिगामिकैः ॥ १६

गम्भीरस्सत्वसंपन्नः पूर्णचन्द्रनिभाननः ॥ १६॥

देवर्षिपितृयज्ञार्थं बभूवुः पशवो नृणाम् ।
न ह्यधर्मेण केषां चित् प्राणिनामभवद्वधः ॥ १७॥

असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा भूतानां सर्वेषामभवत् पिता ॥ १८॥

वीतशोकभयाबाधास् सुखस्वप्ननिबोधनाः ।
श्रिता भारतभर्तारं समपद्यन्त भूमिपाः ॥ १९॥

तस्मिन् नरवरश्रेष्ठे राजराजेश्वरे सति ।
नृणां वागभवत्सत्यं दानार्थमभवद्धनम् ॥ २०॥

[1]स समाष्षोडशाष्टौ च चतस्रोऽष्टौ तथाऽपराः ।
रतिमप्राप्तवान् कांचित् बभूव वनगोचरः ॥ २१॥

[2]तथारूपस्तथाचारस् तथावृत्तस्तथाश्रुतः ।
गाङ्गेयस्तस्य पुत्रोऽभूद् आदावेव तथा वसुः ॥ २२॥

सर्वास्त्रेषु च निष्णातः पार्थिवेष्वितरेषु च ।
महाबलो महासत्वो महावीर्यो महायशाः ॥ २३॥

स कदाचिन्मृगान् [3]बद्ध्वा वनादनुससार ह ।

---

1. क-ख-ग-घ—यज्ञार्थं पशवस्सृष्टाः सन्तानार्थं च मैथुनम् । [अधिकः पाठः]
2. घ—तपसा कर्शितोग्रेण जपध्यानपरस्सदा । [अधिकः पाठः]
3. क-ख-ग—विद्ध्वा गङ्गाम; घ—निघ्नन् गङ्गाम

भागीरथीमल्पजलां ददर्श सरितां वराम् ॥ २४॥
तां दृष्ट्वा चिन्तयामास शन्तनुः पुरुषर्षभः ।
स्यन्दते किंन्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा ॥ २५॥
ततो निमित्तमन्विच्छन् ददर्श सुमहामनाः ।
कुमारं रूपसंपन्नं बृहन्तं प्रियदर्शनम् ॥ २६॥
दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम् ।
कृत्स्नां गङ्गां समावृत्य शरैस्तीक्ष्णैरवस्थितम् ॥ २७॥
तां शरैरावृतां दृष्ट्वा नदीं गङ्गां समन्ततः ।
विस्मितः प्रेक्षते स स्म कर्म तस्यातिमानुषम् ॥ २८॥
जातमात्रं पुरा दृष्टं तं पुत्रं शन्तनुस्तदा ।
न ज्ञातवान् महाभागम् अयं पुत्रो ममेति वै ॥ २८॥
स तु तं पितरं दृष्ट्वा मोहयामास मायया ।
प्रमोह्य च ततः क्षिप्रं तत्रैवान्तरधीयत ॥ ३०॥
तदद्भुतं ततो दृष्ट्वा तत्र राजा स शन्तनुः ।
शङ्कमानस्सुतं गङ्गाम् अब्रवीद्दर्शयेति माम् ॥ ३१॥
[1]दर्शयामास तं गङ्गा बिभ्रती रूपमुत्तमम् ।
गृहीत्वा दक्षिणे पाणौ तं कुमारमलङ्कृतम् ॥ ३२॥
अलङ्कृतामाभरणैर् अरजोवस्त्रवासिनीम् ।

1. ग—अवातिष्ठत्तदा प्राप्य गङ्गा वचनमब्रवीत् । [अधिकः पाठः]

[1]दृष्टपूर्वां सतीं गङ्गाम् अभ्यजानात्स शन्तनुः ॥ ३३॥

गङ्गा—

यं पुत्रमष्टमं राजंस् त्वं पुरा मय्यविन्दथाः ।
स तेऽयं पुरुषव्याघ्र वज्रसंहननो युवा ॥ ३४॥
वेदानधिजगे पूर्वं वसिष्ठाच्चरितव्रतः ।
[2]कृतास्त्रः परमेष्वासो देवराजसमो युधि ॥ ३५॥
सुराणां संमतो नित्यम् असुराणां च भारत ।
उशना वेद यच्छास्त्रं तदप्यस्मिन् प्रतिष्ठितम् ॥ ३६॥
[3]महेष्वासमिमं राजन् राजधर्मार्थकोविदम् ।
मया दत्तं निजं पुत्रं वीरं वीर गृहं नय ॥ ३७॥

वैशंपायनः—

इत्युक्त्वा सा महाभागा तत्रैवान्तरधीयत ॥ ३८

---

1. ख-ग—शङ्कमानस्सुतं स्वस्य कर्म तस्यातिमानुषम् ।
[अधिकः पाठः]

2. घ—सकलान्सोपनिषदान् साङ्गोपाङ्गान् यथाविधि ।
[अधिकः पाठः]

3. क-ख-ग-घ—तथैवाङ्गिरसः पुत्रस् सुरासुरनमस्कृतः ।
यद्वेद शास्त्रं तच्चापि कृत्स्नमस्मिन् प्रतिष्ठितम् ॥
तव पुत्रे महाभागे साङ्गोपाङ्गं महात्मनि ।
ऋषिः परैरनाधृष्यो जामदग्न्यः प्रतापवान् ॥
यदस्त्रं वेद रामश्च तदप्यस्मिन् प्रतिष्ठितम् ॥
[अधिकः पाठः]

घ—सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
[अधिकः पाठः]

तयैवं समनुज्ञातः पुत्रमादाय शन्तनुः ।
भ्राजमानं यथाऽदित्यम् आययौ स्वपुरं प्रति ॥ ३९
पौरवेषु ततः पुत्रं यौवराज्येऽभ्यषेचयत् ॥ ३९॥
पौरवस्तु पुरीं गत्वा पुरन्दरपुरोपमाम् ।
सर्वकामसमृद्धार्थं मेने चात्मानमात्मना ॥ ४०॥
पौरवाञ्शन्तनोः पुत्रः पितरं च महायशाः ।
राष्ट्रं च रञ्जयामास वृत्तेन भरतर्षभ ॥ ४१॥
तथावृत्तसमाचारस् तथाधर्मस्तथाश्रुतः ।
पुत्रो देवव्रतो नाम शन्तनोराधिको गुणैः ॥ ४२॥
सर्वास्त्रेष्वभ्यनुज्ञातः पार्थिवेष्वितरेषु च ।
गुणैर्विशिष्टो बहुभिः पुत्रो देवव्रतोऽभवत् ॥ ४३॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥
॥ ७ ॥ संभवपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥
[अस्मिन्नध्याये ४३॥ श्लोकाः]

॥ चतुर्नवतितमोऽध्यायः ॥

भीष्मेण स्वपितुः दाशकन्याविवाहार्थं ब्रह्मचर्यप्रतिज्ञा ॥ १ ॥

वैशम्पायनः—
स तथा सह पुत्रेण रममाणो महीपतिः ।
वर्तयामास वर्षाणि चत्वार्यमितविक्रमः ॥ १

स कदाचिद्वनं यातो यमुनामभितो नदीम् ।
महीपतिरनिर्देश्यम् अजिघ्रद्गन्धमुत्तमम् ॥ २

तस्य प्रभवमन्विच्छन् विचचार वनं नृपः ।
स ददर्श तदा कन्यां दाशानां देववर्णिनीम् ॥ ३

तामपृच्छत्ततो राजा कन्यामसितलोचनाम् ।
कस्य त्वमसि [1]का चासि किं च भीरु चिकीर्षसि ॥ ४

साऽब्रवीद्दाशकन्याऽस्मि धर्मार्थं वाहये तरिम् ।
पितुर्नियोगाद्भद्रं ते दाशराज्ञो महात्मनः ॥ ५

ज्ञात्वा च पितरं तस्या वरयामास तां तदा ।
रूपमाधुर्यगन्धैस्तां संयुक्तां देववर्णिनीम् ॥ ६
समीक्ष्य राजा दाशेयीं कामयामास शन्तनुः ॥ ६॥

पर्यपृच्छत्ततस्तस्या पितरं चात्मकारणात् ।
संभ्रमात्प्रत्युवाचेदं दाशराजो महीपतिम् ॥ ७॥

दाशः—

याचमानाय वै देया वराय वरवर्णिनी ।
हृदि कामस्तु मे कश्चित् तं निबोध जनेश्वर! ॥ ८॥
यदीमां धर्मपत्नीं त्वं मत्तः प्रार्थयसे नृप ।
सत्यवागसि सत्येन समयं प्रतिपद्यसे ॥ ९॥
ततो दास्यामि राजेन्द्र तव कन्यामिमां नृप ।

1. क-ख-ग-घ—वा कासि किं च ते ह चिकीर्षितम् ।

न हि मे त्वत्समः कश्चिद् वरो जातु भविष्यति ॥ १०॥

शन्तनुः—

श्रुत्वा तव वरं दाश व्यवसायो भविष्यति ।
दातव्यं चेत् प्रदास्यामि न त्वदेयं कथंचन ॥ ११॥

दाशः—

योऽस्यां [1]जायेत च पुमान् स राजा पृथिवीपतिः ।
त्वदूर्ध्वमभिषेक्तव्यो नान्यः कश्चन भारत ॥ १२॥

वैशंपायनः—

नाकामयत तं दातुं वरं दाशाय शन्तनुः ।
शरीरजमसह्यं तं दीप्यमानमधारयत् ॥ १३॥

स चिन्तयन्नेव तदा दाशकन्यां महीपतिः ।
प्रत्ययाद्धस्तिनपुरं शोकोपहतचेतनः ॥ १४॥

ततः कदाचिच्छोचन्तं शन्तनुं ध्यानमास्थितम् ।
पुत्रो देवव्रतो ह्येत्य पितरं वाक्यमब्रवीत् ॥ १५॥

देवव्रतः—

सर्वत्र भवतः क्षेमं विधेयास्सर्वशत्रवः ।
अकस्माद्राजशार्दूल शोचंस्तु परिदृश्यसे ॥ १६॥

तत्किमर्थमिहाभीक्ष्णं परिशोचसि दुःखितः ।
कस्मान्न भुङ्क्षे राजंस्त्वं न किञ्चिदपि भाषसे ॥ १७॥

1. घ—जातस्तव सुतस्स राजा त्वदनन्तरम्।

[1]न चाश्वेन च निर्यासि विवर्णो हरिणः कृशः।
व्याधिमिच्छामि ते ज्ञातुं प्रतिकुर्यां हि तत्र वै ॥ १८॥

वैशंपायनः—

स तं काममवाच्यं वै दाशकन्यां प्रतीदृशम्।
विवृतं नाशकत्तस्मै पिता पुत्राय शंसितुम् ॥ १९॥

एवमुक्तस्तु पुत्रेण शन्तनुः प्रत्यभाषत ॥ २०

शन्तनुः—

असंशयं महाप्राज्ञ यथैवात्थ तथैव तत्।
अपत्यं नस्त्वमेवैकः कुले महति भारत ॥ २१

अनित्यता च मर्त्यानाम् अतश्शोचामि पुत्रक।
कथंचित्त्वयि गाङ्गेय! विपन्ने नास्ति नः कुले ॥ २२

असंशयं त्वमेवैकश् शतैरपि वरस्सुतः ॥ २२॥

न चाप्यहं वृथा भूयो दारान् कर्तुमिहोत्सहे।
संतानस्याविनाशं तु कामये भद्रमस्तु ते ॥ २३॥

[2]अपुत्रतैकपुत्रत्वम् इत्याहुर्धर्मवादिनः ॥ २४

चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत।
चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥ २५

---

1. घ—न श्रुतैष कुतो राजंस् त्वं न कश्चित्प्रभाषसे।

[अधिकः पाठः]

2. घ—अपुत्रतैकपुत्रत्वं सममाहुर्मनीषिणः।

अग्निहोत्रं त्रयो वेदा यज्ञाश्च सहदक्षिणाः ।
सर्वाण्येतान्यपत्यस्य कलां नार्हन्ति षोडशीम् ॥ २६

एवमेव मनुष्येषु स्याच्च सर्वं प्रजास्विति ।
यदपत्यं महाप्राज्ञ! तत्र मे नास्ति संशयः ॥ २७

अपत्यादनृणो लोके पितॄणां नास्ति संशयः ।
एषा त्रयी पुराणानाम् उत्तमानां च शाश्वती ॥ २८

अपत्यं कर्म विद्या च त्रीणि ज्योतींषि भारत! ॥ २८॥

यदिदं कारणं तात सर्वमाख्यातमञ्जसा ॥ २९

त्वं च शूरस्सदाऽमर्षी शस्त्रनित्यश्च भारत ।
नान्यत्र शस्त्रात्तस्मात्ते निधनं विद्यतेऽनघ ॥ ३०

सोऽस्मि संशयमापन्नस् त्वयि शान्ते कथं भवेत् ।
एतन्मे कारणं तात दुःखमूलमशेषतः ॥ ३१

वैशंपायनः—

स तस्य पितुराज्ञाय मतं समनुचिन्त्य च ।
देवव्रतो महाबुद्धिः प्रयाणमनुचिन्तयन् ॥ ३२

अपत्यफलसंसक्तम् एतच्छ्रुत्वा पितुर्वचः ।
सूतं भूयोऽपि संतप्त आह्वयामास वै पितुः ॥ ३३

सूतस्तु कुरुमुख्यस्य उपयातस्तदाज्ञया ।
तमुवाच महाप्राज्ञो भीष्मो वै सारथिं पितुः ॥ ३४

भीष्मः—

त्वं सारथे पितुर्मह्यं सखाऽसि [1]रथयुग्यतः ।
अपि जानासि यदि वै कस्यां भावो नृपस्य तु ॥ ३५
[2]यथा वक्ष्यसि मे पृष्टः करिष्ये न तदन्यथा ॥ ३५॥

सूतः—

दाशकन्या नरश्रेष्ठ तत्र भावः पितुर्गतः ।
वृतस्स नरदेवेन तदा वचनमब्रवीत् ॥ ३६॥
योऽस्यां पुमान् भवेद्गर्भस् स राजा त्वदनन्तरम् ॥ ३७
नाकामयत तं दातुं पिता तव वरं तदा ॥ ३७॥
स चापि निश्चयस्तस्य न च दद्यामतोऽन्यथा ॥ ३८
एवं ते कथितं वीर कुरुष्व यदनन्तरम् ॥ ३८॥

वैशंपायनः—

ततस्स पितुराज्ञाय मतं सम्यगवेक्ष्य च ।
ज्ञात्वा विमनसं पुत्रः प्रययौ यमुनां प्रति ॥ ३९॥
क्षत्रियैस्सह धर्मात्मा पुराणैर्धर्मचारिभिः ।
उच्चैश्श्रवसमागम्य कन्यां वव्रे यशस्विनीम् ॥ ४०॥
तं दाशः प्रतिजग्राह विधिवत् प्रतिपूज्य च ।
अब्रवीच्चैनमागम्य राजसंसदि भारत ॥ ४१॥

---

1. क-ख-ग—सरयूर्गतः । घ—रथधूर्गतः ।
2. क-ख-ग-घ—एतदाचक्ष्व

उच्चैःश्रवाः—

राज्यशुल्का प्रदातव्या कन्येयं याचतां वर ।
अपत्यं यद्भवेत्तस्यास् स राज़ा ऽस्तु पितुः परम् ॥ ४२॥

त्वमेवात्र महाबाहो शन्तनोर्वंशवर्धनः ।
पुत्रश्शस्त्रभृतां श्रेष्ठः किं नु वक्ष्यामि ते वचः ॥ ४३॥

कुमारिकाणां शुल्केन किंचिद्वक्ष्यामि भारत ।
को हि संबन्धकं श्लाघ्यम् ईप्सितं यौनमीदृशम् ॥ ४४॥

अतिक्रामन्न तप्येत साक्षादपि शतक्रतुः ॥ ४५

अपत्यं हीदमार्यस्य यो युष्माकं समो गुणैः ।
यस्य सत्यवती शुक्लात् प्रादुर्भूता यशस्विनी ॥ ४६

तपनेन पिता तत्र बहुशः परिकीर्तितः ।
अर्हतीयं सत्यवती पितरं तेऽब्रवीत्तथा ॥ ४७

अर्थितश्चापि राजर्षिः प्रत्याख्यातस्तदा मया ।
स चाप्यासीत् [1]सत्यवत्या भृशमर्थी महायशाः ॥ ४८

कन्यापितृत्वात् किंचित्तु वक्ष्यामि भरतर्षभ ।
बलवत्सपत्नतामत्र दोषं पश्यामि केवलम् ॥ ४९

भूयांसं त्वयि पश्यामि तद्दोषमपराजित ॥ ४९॥

यस्य हि त्वं सपत्नस्या गन्धर्वस्यासुरस्य वा ।

1. घ—सत्यवत्यां

न स जातु सुखं विन्देत् त्वयि क्रुद्धे परन्तप ॥ ५०॥

एतावानत्र दोषोऽस्ति नान्यः कश्चन पार्थिव ।
एतज्जानीहि भद्रं ते दानादाने परन्तप ॥ ५१॥

वैशंपायनः—

तदैवमुक्तो गाङ्गेयस् तद्युक्तं प्रत्यभाषत ।
शृण्वतां भूमिपालानां पितुरर्थाय धर्मवित् ॥ ५२॥

देवव्रतः—

इदं वचनमाधत्स्व नास्ति वक्ताऽस्य मत्समः ।
अन्यो जातो न जनिता न च कश्चन संप्रति ॥ ५३॥

एवमेतत्करिष्यामि यथा त्वमिह भाषसे ।
योऽस्यां जनिष्यते पुत्रस् स नो राजा भविष्यति ॥ ५४॥

वैशंपायनः—

इत्युक्तः पुनरेवाथ तं दाशः प्रत्यभाषत ॥ ५५

दाशः—

चिकीर्षुर्दुष्करं कर्म राज्यार्थे भरतर्षभ ॥ ५५॥

त्वयैवात्र महाबाहो शन्तनुर्नाम नाथवान् ।
ईश्वरः कारणं च त्वं प्रभुर्दानाय चानघ ॥ ५६॥

इदं च वचनं मह्यं कार्यं वै शृणु भारत ।
कुमारिकाणां शुल्केन वक्ष्याम्यहमरिन्दम ॥ ५७॥

यत् त्वया सत्यमर्थं हि सत्यशील महाबल ।

राज्ञां मध्ये प्रतिज्ञातम् अनुरूपं तथैव तत् ॥ ५८॥

अत एव महाबाहो संशयो नात्र विद्यते । ५९

नास्तिकस्यान्यथाभावस् त्वत्तो रिपुनिबर्हण ।
विद्यते पुरुषव्याघ्र त्वयि सत्यं महाव्रत ॥ ६०

अपत्यं यद्भवेत्तुभ्यं तत्र नस्संशयो महान् ॥ ६०॥

वैशम्पायनः—

तस्य तन्मतमाज्ञाय सर्वशस्त्रभृतां वरः ।
प्रतिज्ञां प्रत्यभिजानात् स पितुः प्रियचिकीर्षया ॥ ६१॥

देवव्रतः—

उच्चैश्श्रवस्समाधत्स्व प्रतिज्ञां जनसंसदि ॥ ६२

ऋषयो वाऽथ वा देवा भूतान्यन्तर्हितानि च ।
यानि यानीह शृण्वन्तु नास्ति वक्ता हि मत्समः ॥ ६३

इदं वचनमादत्स्व सत्येन मम जल्पतः ।
शृण्वतां भूमिपालानां यद्ब्रवीमि पितुः कृते ॥ ६४

राज्यं तावत् पूर्वमेव मया त्यक्तं महाबल ।
अपत्यहेतोरपि च करोम्येष विनिश्चयम् ॥ ६५

अद्यप्रभृति मे दाश ब्रह्मचर्यं भविष्यति ।
अपुत्रस्यापि मे लोका भवितारो यथेप्सिताः ॥ ६६

न हि जन्मप्रभृत्युक्तं मम किंचिदिहानृतम् । ६६॥

यावत्प्राणा धियन्ते वै मम देहं समाश्रिताः ।
तावन्न जनयिष्यामि पित्रे कन्यां प्रयच्छ मे ॥ ६७॥

परित्यजाम्यहं राज्यं मैथुनं चापि सर्वशः ।
ऊर्ध्वरेता भविष्यामि दाश सत्यं ब्रवीमि ते ॥ ६८॥

वैशम्पायनः—

तस्य तद्वचनं श्रुत्वा संप्रहृष्टतनूरुहः ।
ददामीत्येव तं दाशः कुमारं प्रत्यभाषत ॥ ६९॥

ततोन्तरिक्षेऽप्सरसो देवास्सर्षिगणास्तदा ।
तद्दृष्ट्वा दुष्करं कर्म प्रशशंसुश्च पार्थिवाः ॥ ७०॥

प्रत्यवर्षन्त कुसुमैर् भीष्मोऽयमिति चाब्रुवन् ॥ ७१

ततोऽस्य पितुरर्थाय तामुवाच यशस्विनीम् ।
अधिरोह रथं मातर् गच्छावस्स्वगृहानिति ॥ ७२

एवमुक्त्वा तु भीष्मस्तां रथमारोप्य भामिनीं ।
आगम्य हस्तिनपुरं शन्तनोस्तन्न्यवेदयत् ॥ ७३

तस्य तद्दुष्करं कर्म प्रशशंसुर्नराधिपाः ।
समेताश्च पृथक्चैनं भीष्मोऽयमिति चाब्रुवन् ॥ ७४

तच्छ्रुत्वा दुष्करं कर्म कृतं भीष्मेण शन्तनुः ।
बभूव दुःखितो राजा चिररात्राय भारत ॥ ७५

स तेन कर्मणा सूनोः प्रीतस्तस्मै वरं ददौ ।

नाकाममरणं तात! भविष्यति तवेति ह ॥ ७६

न ते प्रभविता मृत्युः यावदिच्छसि जीवितुम् ।
स्वेन कामेन मर्त्योऽसि नाकामस्त्वं कथञ्चन ॥ ७७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥
॥ ७ ॥ संभवपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
[अस्मिन्नध्याये ७७ श्लोकाः]

॥ पञ्चनवतितमोऽध्यायः ॥

शन्तनुसत्यवत्योर्विवाहः ॥ १ ॥ चित्राङ्गदविचित्रवीर्ययोः संभवः ॥ २ ॥ विचित्रवीर्यस्य राज्याभिषेकः ॥ ३ ॥

वैशंपायनः—

चेदिराजसुतां ज्ञात्वा दाशराजेन [1]वर्धिताम् ।
विवाहं कारयामास शास्त्रदृष्टेन कर्मणा ॥ १

तदा विवाहे निर्वृत्ते स राजा शन्तनुर्नृपः ।
तां कन्यां रूपसंपन्नां स्वगृहे संन्यवेशयत् ॥ २

ततश्शान्तनवो धीमान् सत्यवत्यामजायत ।
पुत्रश्चित्राङ्गदो नाम बलवीर्यसमन्वितः ॥ ३

1. अ—भाषिताम्

तथाऽपरं महेष्वासं सत्यवत्यां पुनस्सुतम् ।
विचित्रवीर्यं धर्मात्मा जनयामास वीर्यवान् ॥ ४

अप्राप्तवति तस्मिंश्च यौवनं भरतर्षभ ।
स राजा शन्तनुर्वीरः कालधर्ममुपेयिवान् ॥ ५

स्वर्याते शन्तनौ भीष्मश् चित्राङ्गदमरिन्दमम् ।
स्थापयामास वै राज्ये सत्यवत्या मते स्थितः ॥ ६

स तु चित्राङ्गदो धीमान् सर्वांश्चिक्षेप पार्थिवान् ।
मानुषं न हि मेने स कञ्चित् समभिवात्मनः ॥ ७

तं क्षिपन्तं सुरांश्चैव मनुष्यानसुरांस्तथा ।
गन्धर्वराजो बलवांस् तुल्यनामाभ्ययात्तदा ॥ ८

गन्धर्वः—

त्वं वै सदृशनामासि युद्धं देहि नृपात्मज ! ।
नाम चान्यत् प्रगृह्णीष्व यदि युद्धं न दास्यसि ॥ ९

त्वयाऽहं युद्धमिच्छामि त्वत्सकाशात्तु नामतः ।
आगतोऽस्मि वृथा भाव्यो न गच्छेन्नामतो मया ॥ १०

वैशंपायनः—

इत्युक्त्वा गर्जमानौ तौ हिरण्वत्तीरसंगतौ ।
तेनास्य युद्धं सुमहत् कुरुक्षेत्रे बभूव ह ॥ ११

नद्या कूले हिरण्वत्यास् समास्तिस्रोऽभवद्रणम् ॥ ११॥

तयोर्बलवतोस्तत्र गन्धर्वकुरुमुख्ययोः ।
तस्मिन् विमर्दे तुमुले शस्त्रवृष्टिसमाकुले ॥ १२॥

मायाधिकोऽवधीद्वीरं गन्धर्वः कुरुसत्तमम् ।
चित्राङ्गदं कुरुश्रेष्ठं विचित्रशरकार्मुकम् ॥ १३॥

चित्राङ्गदो विनिर्जित्य दिवमाचक्रमे पुनः ॥ १४

तस्मिंस्तु नृपशार्दूले निहते भूरिवर्चसि ।
भीष्मश्शान्तनवो धीमान् प्रेतकार्याण्यकारयत् ॥ १५

विचित्रवीर्यं च तदा बालमप्राप्तयौवनम् ।
कुरुराज्ये महाबाहुर् अभ्यषिञ्चदनन्तरम् ॥ १६

विचित्रवीर्यस्तु तदा भीष्मस्य वचने स्थितः ।
अन्वशासन्महाराज पितृपैतामहं पदम् ॥ १७

स धर्मशास्त्रकुशलो भीष्मं शान्तनवं नृपम् ।
पूजयामास धर्मेण स चैनं प्रत्यपालयत् ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

॥ ७ ॥ संभवपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

[अस्मिन्नध्याये १८ श्लोकाः ।]

॥ षण्णवतितमोऽध्यायः ॥

भीष्मस्य वाराणसीगमनम् ॥ १ ॥ भीष्मेण राज्ञां पराजयः ॥ २ ॥
अम्बाया भीष्मेण निराकरणम् ॥३॥ अम्बायाः कुमारान्मालालाभः॥४॥

वैशम्पायनः—

हते चित्राङ्गदे भीष्मो बाले भ्रातरि चानघे ।
पालयामास तद्राज्यं सत्यवत्या मते स्थितः ॥ १

तथा विचित्रवीर्यं तु वर्तमानं सुखेऽतुले ।
संप्राप्तयौवनं पश्यन् भ्रातरं धीमतां वरम् ॥ २

भीष्मो विचित्रवीर्यस्य विवाहायोपचक्रमे ॥ २॥

ततः काशीपतेर्भीष्मः कन्यास्तिस्रोऽप्सरस्समाः ।
शुश्राव सहिता राजंस् तिष्ठन्तीर्वै स्वयंवरे ॥ ३॥

ततस्स रथिनां श्रेष्ठो रथेनैकेन धर्मतः ।
जगामानुमते मातुः पुरीं वाराणसीं प्रति ॥ ४॥

तत्र राज्ञस्समुदितान् सर्वतस्समुपागतान् ।
ददर्श कन्यास्ताश्चैव भीष्मश्शन्तनुनन्दनः ॥ ५॥

तासां कामेन संमत्तास् सहिताः काशिकोसलाः ।
वङ्गाः पुण्ड्राः कलिङ्गाश्च ते जग्मुस्तां पुरीं प्रति ॥ ६॥

कीर्त्यमानेषु राज्ञां तु नामधेयेषु भारत ।

एकाकिनं तदा भीष्मं वृद्धं शन्तनुनन्दनम् ॥ ७॥

सोद्वेगा इव तं दृष्ट्वा कन्याः परमशोभनाः ।
अपाक्रामन्त तास्सर्वा वृद्ध इत्येव चिन्तया ॥ ८॥

वृद्धः परमधर्मात्मा वलीपलितधारितः ।
किं कारणमिहायातो निर्लज्जो भारतर्षभः ॥ ९॥

मिथ्याप्रतिज्ञो लोकेषु किं वदिष्यति भारतम् ।
ब्रह्मचारीति भीष्मो हि वृथैव प्रथितो भुवि ॥ १०॥

इत्येवं प्रब्रुवन्तस्ते हसन्ति स्म नृपाधमाः ।
क्षत्रियाणां वचश्श्रुत्वा भीष्मश्चुक्रोध भारत ॥ ११॥
भीष्मस्तदा स्वयं राजा वरयामास ताः प्रभुः ॥ १२

उवाच च महीपालान् राजञ्जलदनिस्वनः ।
रथमारोप्य [1]तत्कन्या भीष्मो भीमपराक्रमः ॥ १३

भीष्मः—

आहूय दानं कन्यानां गुणवद्भ्यस्स्मृतं बुधैः ।
अलङ्कृत्य यथाशक्ति प्रदाय च धनान्युत ॥ १४

प्रयच्छन्त्यपरे कन्यां मिथुनेन गवामपि ।
वित्तेन कथितेनान्ये बलादन्येऽ[2]नुमान्य च ॥ १५

प्रमत्तामुपयान्त्यन्ये स्वयं गृह्णन्ति चापरे ।

1. क-ख-ग-घ--ताः कन्याः 2. क-ख-ग--अवमन्य च।

अष्टमं तु मिथोवृत्तं विवाहं कविभिस्स्मृतम् ॥ १६

स्वयंवरं तु राजन्याः प्रशंसन्त्युपयान्ति च ।
संप्रमथ्य हृतामाहुर् ज्यायसीं धर्मचारिणः ॥ १७

ता इमाः पृथिवीपाला जिहीर्षामि प्रसह्य वः ।
ते यतध्वं यथाकामं विजयायेतराय वा ॥ १८

स्थितोऽहं पृथिवीपाला युद्धाय कृतनिश्चयः ॥ १८॥

वैशंपायनः

एवमुक्त्वा नरश्रेष्ठान् काशिराजं च वीर्यवान् ।
सर्वाः कन्यास्स कौरव्यो रथमारोपयत् स्वकम् ॥ १९॥

आमन्त्र्य प्रययौ क्षिप्रं भीष्मो वै जनमेजय ॥ २०

ततस्ते पार्थिवास्सर्वे समुत्पतुरमर्षिताः ।
संस्पृशन्तश्शनैर्बाहून् सन्दश्य दशनच्छदान् ॥ २१

तेषामाभरणान्याशु कवचानि महान्ति च ।
आमुञ्चतां च वर्माणि संभ्रमस्समपद्यत ॥ २२

ताराणामिव संपातो बभूव जनमेजय ।
भूषणानां च हैमानां कवचानां च सर्वशः ॥ २३

वर्माभिर्भूषणैर्मुख्यैः प्रचार्याभिसमन्ततः ।
सक्रोधामर्षजिह्मास्याः कर्षन्तो दशनांस्तदा ॥ २४

सूतोपकृप्तान् सुदृढान् सदश्वैरभिचोदितान् ।

रथानास्थाय ते वीरास् सर्वोपकरणान्विताः ॥ २५

प्रयान्तमेकं कौरव्यम् अनुसस्रुरुदायुधाः ॥ २५॥

ततस्समभवद्युद्धं तेषां तस्य च भारत ।

एकस्य च बहूनां च तुमुलं रोमहर्षणम् ॥ २६॥

ते त्विषून् दशसाहस्रांस् तस्मै युगपदक्षिपन् ॥ २७

अप्राप्तान् सोऽच्छिनत् सर्वांस् तदद्भुतमिवाभवत् ॥ २७॥

ततस्ते पार्थिवास्सर्वे सर्वतः पर्यवारयन् ।

महता शरवर्षेण वर्षेणेवाम्बुदा गिरिम् ॥ २८॥

तत्तु बाणमयं वर्षं स तेषामावृणोच्छरैः ।

तांश्च सर्वान् महीपालान् प्रत्यविध्यत् त्रिभिस्त्रिभिः ॥ २९॥

तस्यातिपरुषं कर्म लाघवं रथचारणम् ।

रक्षणं चात्मनस्संख्ये शत्रवोऽभ्यपूजयन् ॥ ३०॥

अक्षतः क्षपयित्वाऽन्यान् असंख्येयपराक्रमः ।

आनिनाय स काश्यस्य सुतास्सागरगासुतः ॥ ३१॥

तान्निहत्य रणे सर्वान् सर्वशस्त्रविदां वरः ।

कन्याभिस्सहितो यातो भारतो भारतान् प्रति ॥ ३२॥

ततस्तं पृष्ठतो राजा साल्वानामीश्वरः प्रभुः ।

अभ्याहनदमेयात्मा भीष्मं शान्तनवं रणे ॥ ३३॥

कुञ्जरं जघने निघ्नन् दन्ताभ्यामपरो यथा ॥ ३४

वाशिता समये मत्तो यूथपो बलिनां वरः ।
स्त्रीकाम तिष्ठ तिष्ठेति साल्वश्चाह स पार्थिवः ॥ ३५
साल्वेनैव अमहाबाहुर् अमर्षेणाभिचोदितः ॥ ३५॥

ततस्स पुरुषव्याघ्रो भीष्मः परमकोपनः ।
साल्वराजं सुसंक्रुद्धो न्यवर्तत परन्तपः ॥ ३६॥
क्रोधेन चापि ज्वलितो विधूम इव पावकः ।
दहन् यथा कृष्णगतिः कक्षं वातेरितः प्रभुः ॥ ३७॥
क्षत्रधर्मं समास्थाय अभीतो राजसत्तमः ।
निवर्तयामास रथं भीष्मः प्रहरतां वरः ॥ ३८॥

निवृत्तं तेन तं दृष्ट्वा हतशेषा हि पार्थिवाः ।
प्रेक्षकास्समपद्यन्त भीष्मसाल्वसमागमे ॥ ३९॥

[1]तौ गजाविव निष्ठ्रन्तौ बलिनौ वाशितान्तरे ।
अन्योन्यमभ्यवर्तेतां गोष्ठेष्विव महर्षभौ ॥ ४०॥

ततः [2]क्रुद्धं शान्तनवो दृष्ट्वा तं नृपमागतम् ।
[3]साल्वेश्वरं स राजानं हतः क्रुद्धोऽभ्यचोदयत् ॥ ४१॥
संस्पृशंश्च धनुश्श्रेष्ठं सज्यं कृत्वा नरर्षभः ।
समवस्थाय दुर्धर्षस् सशरस्सशरासनः ॥ ४२॥
अभ्यद्रवत् साल्वपतिं युद्धाय कुरुपुङ्गवः ॥ ४३

---

1. क-ख-ग-घ—गोवृषाविव नर्दन्तौ
2. घ—क्रुद्धः 3. घ—साल्वेश्वराय त्वरितो हयान्

कवची बद्धनिस्त्रिंशस् तलबन्धः प्रतापवान् ।
तिष्ठ तिष्ठेति राजानं साल्वं शान्तनवोऽब्रवीत् ॥ ४४
कन्यार्थं वै ततस्साल्वं प्रावर्तत महाबलः ॥ ४४॥

ततस्तु युद्धमभवत् तदा राजन् स्वयंवरे ।
भीष्मस्य चैव राजर्षेस् साल्वस्य च तथैव च ॥ ४५॥

ततो भीष्मं शान्तनवं शरैश्चावारयत् प्रभुः ।
साल्वराजो नरश्रेष्ठ बह्वशोभत भारत ॥ ४६॥

विव्याथ च तथा भीष्मं वामपार्श्वे स्तनान्तरे ।
त्वरमाणस्तदा काले क्षत्रियर्षभसत्तमः ॥ ४७॥

दृष्ट्वा तु भीष्मं व्रणिनं राज्ञा साल्वेन ते नृपाः ।
विस्मितास्समपद्यन्त साधु साध्विति चाब्रुवन् ॥ ४८॥

लाघवं तस्य ते दृष्ट्वा पृथिव्यां सर्वपार्थिवाः ।
साल्वं संपूजयामासुर् वाग्भिर्नृपतिसत्तमाः ॥ ४९॥

क्षत्रियाणां तु ताञ्श्रुत्वा वाचः परपुरञ्जयः ।
क्रुद्धश्शान्तनवस्साल्वं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ५०॥

सारथिं चाब्रवीद्भीष्मो याहि यत्रैष पार्थिवः ।
यावदेनं निहन्म्यद्य भुजङ्गमिव पक्षिराट् ॥ ५१॥

तदश्वं वारुणं सम्यग् योजयामास पार्थिवः ।
तेनाश्वांश्चतुरोऽमृद्नात् साल्वराजस्य पार्थिवः ॥ ५२॥

अस्त्रैरस्त्राणि संवार्य भीष्मस्तस्य परन्तपः ।
ततो नृपतिशार्दूलो न्यहनत्तस्य सारथिम् ॥ ५३॥
अश्वेण चास्य साल्वस्य न्यहनत्तुरगोत्तमान् ॥ ५४
साल्वस्तु विरथो राजन् हताश्वो हतसारथिः ।
निक्षिप्य च धनुश्श्रीमान् भूमौ तिष्ठदवाङ्मुखः ॥ ५५
कन्याहेतोर्नरश्रेष्ठो भीष्मश्शान्तनवस्तदा ।
विसर्जयामास नृपं जीवन्तं तं नराधिपः ॥ ५६
ततो विजित्य ताः कन्यास् तिस्रो रूपगुणान्विताः ।
प्रययौ हस्तिनपुरं भीष्मश्शान्तनवस्तदा ॥ ५७
कुरुक्षेत्रं पुण्यतमं यत्र राजा स कौरवः ॥ ५७॥
साल्वोऽपि राजा स्वं राष्ट्रं संप्राप्तो न चिरादिव ॥ ५८
राजानस्तत्र ये चासन् स्वयंवरदिदृक्षवः ।
तेऽपि स्वान्येव राष्ट्राणि हतशेषाः प्रचक्रमुः ॥ ५९
ते वनानि च रम्याणि शैलांश्च सरितस्तथा ।
अतिक्रम्य च राजानस् [1]स्वं स्वं राज्यं प्रचक्रमुः ॥ ६०
भीष्मस्स्वयंवरे कन्या विजित्य कुरुसत्तमः ।
वनानि सरितश्चापि शैलांश्च विविधद्रुमान् ॥ ६१
अक्षतः [2]क्षपयित्वाऽरीँस् तानसंख्येयविक्रमः ।

1. अ—स्वयं राज्यं
2. क-ख-ग—कम्पयित्वा; घ—क्षतयित्वा

सोऽचिरेणैव कालेन अतिक्रम्य नराधिपः ॥ ६२

आनयामास काश्यस्य सुतास्सागरगासुतः ॥ ६२॥

तास्स्नुषा इव धर्मात्मा भगिनीरनुजा इव ।

यथावद्दुहितॄश्चैव प्रगृह्य प्रययौ कुरून् ॥ ६३॥

स तु धर्मेण धर्मज्ञः कर्म कृत्वाऽतिमानुषम् ।

तास्सर्वा गुणसंपन्ना भ्राता भ्रात्रे यवीयसे ॥ ६४॥

भीष्मो विचित्रवीर्याय विक्रम्य मुदितो ददौ ॥ ६५

स तु धर्मेण धर्मज्ञो विधिदृष्टेन कर्मणा ।

भ्रातुर्विचित्रवीर्यस्य विवाहमुपचक्रमे ॥ ६६

सत्यवत्यास्समीपेऽथ कृत्वा नियममात्मवान् ।

विवाहं कारयिष्यन्तं भीष्मं काशीपतेस्सुता ॥ ६७

ज्येष्ठा तासामिदं वाक्यम् अब्रवीज्जनसंसदि ॥ ६७॥

अंबा—

मया साल्वपतिः पूर्वं मनसा हि वृतः पतिः ॥ ६८

तेन चास्मि वृता राजंस् तथाकामश्च मे पतिः ॥ ६८॥

मया वरयितव्योऽभूत् साल्वस्तस्मिन् स्वयंवरे ॥ ६९

एतद्विज्ञाय धर्मज्ञ धर्मतस्त्वं समाचर ॥ ६९॥

वैशम्पायनः—

एवमुक्तस्ततो भीष्मः कन्यया विप्रसंसदि ।

चिन्तामभ्यगमद्वीरो युक्तां तस्यैव कर्मणः ॥ ७०॥

अन्यसक्ता त्वियं कन्या ज्येष्ठा क्षत्रे मया जिता ॥ ७१

वाचा दत्ता मनोदत्ता कृतमङ्गलवाचना ।
निर्दिष्टा तु परस्यैव सा वर्ज्या परचिन्तनी ॥ ७२

इत्युक्त्वा चानुमान्यैव भ्रातरं स्ववशानुगम् ।
स विनिश्चित्य तैस्सार्धं ब्राह्मणैर्धर्मकोविदैः ॥ ७३

अनुजज्ञे ततो ज्येष्ठाम् अम्बां काशीपतेस्सुताम् ॥ ७३॥

अम्बिकाम्बालिके भार्ये प्रादाद्भ्रात्रे यवीयसे ।
भीष्मो विचित्रवीर्याय विधिदृष्टेन कर्मणा ॥ ७४॥

तयोः पाणी गृहीत्वा स रूपयौवनदर्पितः ।
विचित्रवीर्यो धर्मात्मा नैनामैच्छत् कथञ्चन ॥ ७५॥

अम्बामन्यस्य कीर्त्यन्तीं अब्रवीच्चारुदर्शनाम् ॥ ७६

विचित्रवीर्यः—

[1]प्रत्यक्षफल एवैष कामोऽसाधु निरर्थकः ॥ ७६॥
[2]परतन्त्रोपभोगे माम् आर्य नायोक्तुमर्हसि ॥ ७७

भीष्मः—

प्रतिष्ठितश्शन्तनोर्वै तात ! यस्य त्वमन्वयः ।

---

1. घ—स पापफल एवैष कामस्साधु निरर्थकः ।
2. घ—परतन्त्रोपभोगे मां नार्यो योक्तुमिहार्हसि ।

अकामवृत्तो धर्मात्मा साधु मन्ये मतं तव ॥ ७८

इत्युक्त्वाऽम्बां समालोक्य विधिवद्वाक्यमब्रवीत् ॥ ७८॥

विसृष्टा ह्यसि गच्छ त्वं यथाकाममनिन्दिते ॥ ७९

नानियोज्ये समर्थोऽहं नियोक्तुं भ्रातरं प्रियम् ।
अन्यभावगतां चापि को नारीं वासयेद्गृहे ॥ ८०

अतस्त्वां न नियोक्ष्यामि अन्यकामासि गम्यताम् ॥ ८०॥

अहमप्यूर्ध्वरेता वै निवृत्तो दारकर्मणि ॥ ८१

न संबन्धस्तदावाभ्यां भविता वै कथञ्चन ॥ ८१॥

वैशंपायनः—

इत्युक्ता सा तदा तत्र सखीभिः परिपालिता ।
निर्दिष्टा हि शनै राजन् साल्वराजपुरं प्रति ॥ ८२॥

अथाम्बा साल्वमासाद्य साऽब्रवीन्मनसा वृता ॥ ८३

अम्बा—

पुरा निर्दिष्टभावा त्वाम् आगतास्मि वरानन ।
देवव्रतं समुत्सृज्य सानुजं पुरुषर्षभ ॥ ८४

प्रतिगृह्णीष्व भद्रं ते विधिवन्मां समुद्यताम् ॥ ८४॥

वैशम्पायनः—

एवमुक्तस्तु साल्वोऽपि प्रहसन्निदमब्रवीत् ॥ ८५

साल्वः—

निर्जितासीह भीष्मेण मां विनिर्जित्य राजसु ।

अन्येन निर्जितां भद्रे विसृष्टां तेन चालयात् ॥ ८६

न गृह्णामि वरारोहे तत्र चैव तु गम्यताम् ॥ ८६॥

वैशंपायनः—

इत्युक्ता सा समागम्य भीष्मं पुनरथाब्रवीत् ॥ ८७

अम्बा तत्राब्रवीद्भीष्मं त्वयाऽहं सहसा वृता ॥ ८७॥

क्षत्रधर्ममवेक्षस्व भर्ता त्वं मम धर्मतः ॥ ८८

[1]ऊर्ध्वरेतास्त्वहं भद्रे विवाहविमुखोऽभवम् ।

तत्त्वेन साल्वं गच्छ त्वं यः पुरा मनसा वृतः ॥ ८९

अन्यसक्तां किमर्थं त्वम् आत्मानमवदः पुरा ।

अन्यसक्तां वधूं कन्यां वासयेत् स्वगृहे न हि ॥ ९०

नाहमुद्वाहायष्ये त्वा मम भ्रात्रे यवीयसे ।

विचित्रवीर्याय शुभे यथेष्टं गम्यतामिति ॥ ९१

---

1. क-ख-ग—यां यः स्वयंवरे कन्यां निर्जयेच्छौर्यसम्पदा ।
राज्ञस्सर्वान् विनिर्जित्य स तामुद्वाहयेद्ध्रुवम् ॥
अतस्त्वमेव भर्ता मे त्वयाहं निर्जिता यतः ।
तस्माद्गृहस्व मां भीष्म निर्जितां संसदि त्वया ॥
ऊर्ध्वरेतास्त्वहमिति प्रत्युवाच पुनः पुनः ।
भीष्मं सा चाब्रवीदम्बा यथाऽजैषीस्तथा कुरु ।
एवमन्वगमद्भीष्मं षट् समाः पुष्करेक्षणा ॥
[अधिकः पाठः]

भूयस्साल्वं समभ्येत्य राजन् गृह्णीष्व मामिति ॥ ९१॥

नाहं गृह्णाम्यन्यजिताम् इति साल्वनिराकृताम् ।
ऊर्ध्वरेतास्त्वहमिति प्रत्युवाच पुनः पुनः ॥ ९२॥

पुनस्सा चाब्रवीद्भीष्मं यथाऽजैषीस्तथा कुरु ॥ ९३
अम्बा भीष्मं पुनस्साल्वं भीष्मं साल्वं पुनः पुनः ।

एवमन्वगमद्भीष्मं षट् समाः पुष्करेक्षणा ॥ ९४
अश्रुभिर् भूमिमुक्षन्ती शोचन्ती तं मनस्विनी ॥ ९४॥

[1]ततोऽन्या द्वादश समा बाहुदामभितो नदीम् ।
पार्श्वे हिमवतो रम्ये तपो घोरं समाददे ॥ ९५॥

संक्षिप्तकरणा तत्र तप आस्थाय सुव्रता ।
पादाङ्गुष्ठेन साऽतिष्ठद् अकम्पन्त ततस्सुराः ॥ ९६॥

तस्यास्तीव्रं तपो दृष्ट्वा सुराणां क्षोभकारणम् ।
विस्मितश्चैव हृष्टश्च तस्यानुग्रहबुद्धिना ॥ ९७॥

अनन्तसेनो भगवान् कुमारस्सर्वतः प्रभुः ॥
मानयन् राजपुत्रीं तां ददौ तस्यै शुभां स्रजम् ॥ ९८॥

एषा पुष्करिणी दिव्या यथावत् समुपस्थिता ।

---

1. ख-ग—पीनोन्नतकुचद्वन्द्वा विशालजघनेक्षणा ।
श्रोणीभारालसगमा राकाचन्द्रनिभानना ।
वर्षत्कादम्बिनीमूर्ध्नि स्फुरन्ती चञ्चलेव सा ।
[अधिकः पाठः]

अम्बे त्वच्छोकशमनी माला भुवि भविष्यति ॥ ९९॥

एतां चैव मया दत्तां यो मालां धारयिष्यति ।

सोऽस्य भीष्मस्य निधने कारणं वै भविष्यति ॥ १००॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥

॥ ७ ॥ संभवपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

[अस्मिन्नध्याये १००॥ श्लोकाः]

॥ सप्तनवतितमोऽध्यायः ॥

अम्बायाश्चरित्रकथनम् ॥ १ ॥

अम्बा—

अन्यपूर्वेति मां साल्वो नाभिनन्दति बालिशः ।

साऽहं धर्माच्च कामाच्च विहीना शोकधारिणी ॥ १

अपतिः क्षत्रियान् सर्वान् आक्रन्दामि समन्ततः ॥ १॥

इयं च क्षत्रिया माला या भीष्मं निहनिष्यति ॥ २

अहं च भार्या तस्य स्यां यो वीरं घातयिष्यति ॥ २॥

वैशंपायनः—

तस्यां चङ्क्रम्यमाणायां समाः पञ्च गताः पराः ॥ ३

नाभवच्छरणं कश्चित् क्षत्रियो भीष्मजाङ्घयात् ॥ ३॥

अगच्छत् सोमकं सा तु पाञ्चालेषु यशस्विनम् ।
सत्यसन्धं महेष्वासं सत्यधर्मपरायणम् ॥ ४॥

सा सभाद्वारमागम्य पाञ्चालैरभिरक्षितम् ।
पाञ्चालराजमाक्रन्दत् प्रगृह्य सुभुजा भुजौ ॥ ५॥

अम्बा—

भीष्मेण हन्यमानां मां मज्जतीमिव च ह्रदे ।
यज्ञसेनाभिधावेह पाणिमालम्ब्य चेश्वर ॥ ६॥

तेन मे सर्वधर्माश्च रतिभोगाश्च केवलाः ।
उभौ च लोकौ कीर्तिश्च समूलौ सफलौ हृतौ ॥ ७॥

क्रोशन्त्येवं न विन्दामि राजन्यं शरणं क्वचित् ॥ ८
किं नु निःक्षत्रियो लोको यत्रानाथोऽवसीदति ॥ ८॥

समागम्य तु राजानो मयोक्ता राजसत्तमाः ।
इक्ष्वाकूणां च ये वृद्धाः पाञ्चालानां च ये मुखाः ॥ ९॥

त्वत्प्रसादाद्विवाहेऽस्मिन् मा धर्मो मा पराजयेत् ।
प्रसीद यज्ञसेनेह गतिर्मे भव सोमक ॥ १०॥

यज्ञसेनः—

जानामि त्वा बोधयामि राजपुत्रि ! विशेषतः ।
यथाशक्ति यथाधर्मं बलं सन्धारयाम्यहम् ॥ ११॥

अन्यस्मात् पार्थिवात्ते यद् भयं स्यात् पार्थिवात्मजे ।

तस्यापनयने हेतुं संविधातुमहं प्रभुः ॥ १२॥

न हि शान्तनवस्याहं महास्त्रस्य प्रहारिणः ।
ईश्वरः क्षत्रियाणां हि बलं धर्मोऽनुवर्तते ॥ १३॥

[1]सा साधु व्रज कल्याणि ! न नो वैरं प्रसञ्जय ॥ १४

एवमेव त्वया कार्यम् इति मे प्रतिकाङ्क्षसे ।
न तु तस्यान्यथाभावो दैवमेतन्न मानुषः ॥ १५

अम्बा—

यश्चैनां स्रजमादाय स्वयं[2]कण्ठे प्रमोक्ष्यते ।
स भीष्मं समरे हन्ता मम धर्मप्रणाशनम् ॥ १६

वैशंपायनः—

तां स्रज द्रुपदो राजा कं चित् कालं ररक्ष सः ॥ १६॥

तदा विस्रंभमास्थाय तूष्णीमेतामुपैक्षत ॥ १७

तां शिखण्डी[3]निबध्नात्तु राजा पितुरजानती ॥ १७॥

---

1. क-ख-ग—सा साधु व्रज कल्याणि न मामभिदहेद्बलात् ।
न प्रत्यगृह्णन् ते सर्वे किमित्येव न वेद्म्यहम् ॥
न तु भीष्मादहं धर्मं शक्तो हातुं कथञ्चन ।
इत्युक्ता स्रजमासज्य द्वारि राज्ञो व्यपाद्रवत् ॥
ख्यातां तां सर्वलोकेषु तपसा संशितव्रताम् ।
तामन्वगच्छद्द्रुपदस् सान्त्वञ्जल्पन् पुनः पुनः ॥
स्रजं गृहाण कल्याणि न नो वैरं प्रसञ्जय ।
[अधिकः पाठः]

2. क-ख-ग-घ—वै प्रतिमोक्ष्यते 3. क-ख-ग-घ—ण्डिन्यबध्नात्तु

तां पिता त्वत्यजच्छीघ्रं त्रस्तो भीष्मस्य किल्बिषात् ॥ १८

इषीकं ब्राह्मणं भीता सा ह्यगच्छत्तपस्विनम् ।
गङ्गाद्वारि तपस्यन्तं तुष्टिहेतोस्तपस्विनी ॥ १९

उपचाराभितुष्टस्ताम् अब्रवीदृषिसत्तमः ॥ १९॥

गङ्गाद्वारे विभजनं भविता न चिरादिव ॥ २०

तत्र गन्धर्व[1]राजं तु तं पुरुप्रियदर्शनम् ।
आराधयितुमीहस्व सम्यक् परिचरेर्विभुम् ॥ २१

अहमप्यत्र साचिव्यं कर्तास्मि तव शोभने ॥ २१॥

सा तदाचर भद्रं ते स ते श्रेयो विधास्यति ॥ २२

ततो विभजनं तत्र गन्धर्वाणामपद्यत ।
तत्र द्वाववशिष्येतां गन्धर्वाणां मितौजसौ ॥ २३

तयोरेकस्समीक्ष्यैनां स्त्रीबुभूषुरुवाच ह ॥ २३॥

इदं गृह्णीष्व पुंलिङ्गं वृणे स्त्रीलिङ्गमेव ते ॥ २४

नियमं चक्रतुस्तत्र स्त्री पुमांश्चैव तावुभौ ॥ २४॥

ततः पुमान् समभवच् छिखण्डी परवीरहा ॥ २५

स्त्री तु भूत्वाऽपचक्राम स गन्धर्वो मुदा युतः ।
लब्ध्वा तु महतीं प्रीतिं याज्ञसेनिर्महायशाः ।
ततो बुद्बुदकं हत्वा पुनरस्त्राणि सोऽकरोत् ॥ २६॥

1. क-ख-ग-घ—राजानं तुम्बुरुं प्रियदर्शनम्

तत्र चास्त्राणि दिव्यानि कृत्वा स सुमहामतिः ।
स्वदेशमभिसंपेदे पाञ्चालं कुलनन्दनः ॥ २७॥

सोऽभिवाद्य पितुः पादौ महेष्वासः कृताञ्जलिः ।
उवाच भवता भीष्मान्न भेतव्यं कथञ्चन ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥
॥ ७ ॥ संभवपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ अष्टनवतितमोऽध्यायः ॥

विचित्रवीर्यविवाहः ॥ १ ॥ तन्मरणं ॥ २ ॥ अम्बिकाम्बालिकयोः पुत्रोत्पत्तये भीष्मेण तदनभ्युपगमः ॥ ३ ॥

वैशम्पायनः—

अम्बायां निर्गतायां तु भीष्मश्शान्तनवस्तदा ।
न्यायेन कारयामास राज्ञो वैवाहिकीं क्रियाम् ॥ १

अम्बिकाम्बालिके चैव परिणीयाग्निसंनिधौ ।
तयोः पाणी गृहीत्वा तु कौरव्यो रूपदर्पितः ॥ २

विचित्रवीर्यो धर्मात्मा कामात्मा समपद्यत ॥ २॥

ते चापि वनिते श्लाघ्ये नीलकुञ्चितमूर्धजे ।

रक्ततुङ्गनखे श्यामे पीनश्रोणिपयोधरे ॥ ३॥

आत्मरूपानुरुपो नौ लब्धः पतिरिति स्म ते ।
विचित्रवीर्यं कल्याणं पूजयामासतुस्तु ते ॥ ४॥

अन्योन्यं प्रीतिसक्ते च एकभावाविव स्थिते ॥ ५

स चापि रूपसदृशो देवसत्वपराक्रमः ।
[1]सर्वासामेव नारीणां चित्तप्रमथनोऽभवत् ॥ ६

ताभ्यां सह समासक्तो विहरन्नान्यचेतसा ।
[2]विचित्रवीर्यस्तरुणो यक्ष्माणं समपद्यत ॥ ७

सुहृदां यतमानानाम् आप्तैस्सह चिकित्सकैः ।
जगामास्तमिवादित्यः पौरवो यमसादनम् ॥ ८

तस्य प्रेतस्य कार्याणि सम्यक् सर्वाण्यकारयत् ।
राज्ञो विचित्रवीर्यस्य सत्यवत्या मते स्थितः ॥ ९

ऋत्विग्भिस्सहितो भीष्मस् सर्वैश्च कुरुजाङ्गलैः ॥ ९॥

ततस्सत्यवती दीना कृपणा पुत्रगर्धिनी ॥ १०

कृत्वा प्रेतस्य कृत्यानि स्नुषाभ्यां सहिता तदा ।
माता सत्यवती भीष्मम् उवाच वदतां वरम् ॥ ११

---

1. घ—ते चापि वनिते श्लाघ्ये नीलकुञ्चितमूर्धजे । [अधिकः पाठः]
2. घ—विचित्रवीर्यो धर्मात्मा कामात्मा चैव भारत ।
स्त्रीसक्तस्तरुणो राजा यक्ष्मणा समपद्यत ॥ [अधिकः पाठः]

धर्मं च [1]पितृवंशं च शोभनं परमास्पदम् ।
सत्यवत्यभिसंप्रेक्ष्य भीष्मं वचनमब्रवीत् ॥ १२

दुःखार्दिता तु शोकेन मज्जतीव च सागरे ।
शन्तनोर्धर्मनित्यस्य [2]पौरवस्य यशस्विनी ॥ १३

सत्यवती—

त्वयि कीर्तिश्च पिण्डश्च सन्तानश्च प्रतिष्ठितः ॥ १३॥
भ्राता विचित्रवीर्यस्ते भूतानामन्तमेयिवान् ॥ १४

यथा कर्म शुभं कृत्वा स्वर्गे च गमनं ध्रुवम् ।
यथा चायुर्ध्रुवं सत्ये त्वयि धर्मस्तथा ध्रुवः ॥ १५

वेत्थ धर्मस्य तत्त्वं च सामान्यस्येतरस्य च ।
विविधाश्च श्रुतीर्वेत्थ वेत्थ शास्त्राणि सर्वशः ॥ १६

व्यवसायं च धर्मेषु कुलाचारं च लक्षये ।
प्रतिपत्तिं च कृच्छ्रेषु शुक्राङ्गिरसयोरिव ॥ १७

तस्मात् सुभृशमैश्वर्यं त्वयि धर्मभृतां वर ।
वक्ष्यामि त्वां यथा प्राज्ञ! तच्छ्रुत्वा कर्तुमर्हसि ॥ १८

मम पुत्रस्तव भ्राता यवीयान् कुलवंशभृत् ।
बाल एव गतस्स्वर्गम् अपुत्रः पुरुषर्षभ ॥ १९

---

1. क-ख-ग-घ—मातृवंशंच शोभनम्
2. क-ख-ग—कौरव्यस्य महात्मनः। घ—कौरव्यस्य यशस्विनः

[1]तस्य देव्यौ भगिन्यौ ते अम्बिकाम्बालिके उभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत ॥ २०

धर्ममेतत्परं ज्ञात्वा सन्तानाय कुलस्य च ।
तयोरुत्पादयापत्यं सन्तानकुलवर्धनम् ॥ २१
मन्नियोगान्महाभाग धर्म्यं कर्तुमिहार्हसि ॥ २१॥
राजन् राज्येऽभिषिञ्चस्व भारताननुशाधि च ॥ २२
दारांश्च कुरु [2]कल्याण धर्मस्ते ह पितामहान् ॥ २२॥

वैशम्पायनः—

तथोच्यमानो मात्रा च सुहृद्भिश्च परन्तपः ।
प्रत्युवाच स धर्मात्मा धर्ममेव ततः परम् ॥ २३॥

भीष्मः—

असंशयं परो धर्मस् त्वया मातः प्रकीर्तितः ॥ २४
राज्यार्थे नाभिषिञ्चेयं नोपेयां जातु मैथुनम् ॥ २४॥
भवत्या मतमाज्ञाय कृतमेतद्व्रतं मया ॥ २५
जानीषे यत्तदा वृत्तं शुल्कहेतोस्तदन्तरे ॥ २५॥
स सत्यवति सत्येन पुनरेव ब्रवीमि ते ॥ २६
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ॥ २६॥

1. क-ख-ग-घ—तस्य चेमौ महिष्यौ द्वे काशिराजसुते उभे ।
2. क-ख-ग-घ—कौरव्य मा त्वं हिंसीः पितामहान्

यद्वा ह्याधिकमेताभ्यां न तु सत्यं कथञ्चन ॥ २७

त्यजेच्च पृथिवी गन्धम् आपश्च रसमात्मजम् ।
[1]तेजस्तथा त्यजेद्रूपं वायुस्स्पर्शगुणं त्यजेत् ॥ २८

प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्णताम् ।
त्यजेच्छब्दं तथाऽऽकाशं चन्द्रश्शीतांशुतां त्यजेत् ॥ २९

वृत्रहा विक्रमं जह्याद् गर्भं जह्याच्च धर्मराट् ।
न त्वहं सत्यमुत्स्रष्टुं व्यवस्येयं कथंचन ॥ ३०

तन्नजात्वन्यथा कुर्यां लोकानामपि संक्षये ।
अमरत्वस्य वा हेतोस् त्रैलोक्यसदनस्य वा ॥ ३१

वैशम्पायनः—

तथोच्यमाना पुत्रेण धर्मज्ञेन महात्मना ।
माता सत्यवती भीष्मं पुनरेवाभ्यभाषत ॥ ३२

सत्यवती—

अनुजानामि सर्वं तन्मदर्थं यदभाषथाः ।
[2]आपद्धर्ममवेक्षस्व वह पैतामहीं धुरम् ॥ ३३

यथा तु नः कुलं चैव लोकश्च न पराभवेत् ।

---

1. क-ख-ग-घ—ज्योतिस्तथा
2. क-ख-ग-घ—जानामि त्वयि सर्वज्ञ सत्यं सत्यवतां वर ।
इच्छन् सृजेथास्त्रीन् लोकान् अन्यांश्च स्वेन तेजसा ॥
जानामि चैव सत्यं तन्मदर्थं यदभाषथाः ।
[अधिकः पाठः]

सुहृदश्च सकामास्ते तथा त्वं कर्तुमर्हसि ॥ ३४
आत्मनश्च हितं तात प्रियं च मम भारत ॥ ३४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥
॥ ७ ॥ संभवपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
[अस्मिन्नध्याये ३४॥ श्लोकाः]

॥ एकोनशततमोऽध्यायः ॥

दीर्घतमोनामकमुनेरुपाख्यानम् ॥ १ ॥

वैशम्पायनः—

तां तु लालपतीं दृष्ट्वा कृपणां पुत्रगर्धिनीम् ।
धर्मादपेतं ब्रुवतीं भीष्मो वचनमब्रवीत् ॥ १

भीष्मः—

क्षत्रधर्ममवेक्षस्व मा नस्सर्वान् व्यनीनशः ॥ १॥
धारणेन व्रतस्याहुः क्षत्रियाः परमां धृतिम् ॥ २
शन्तनोरपि सन्तानो यथा स्यात् पुनरेव हि ।
क्षत्रधर्मं प्रवक्ष्यामि क्षत्रियाणां पुरातनम् ॥ ३
श्रुत्वा तं प्रतिपद्येथाः प्राज्ञैस्सह पुरोहितैः ।
आपद्धर्मार्थकुशलैर् लोकधर्ममवेक्ष्य च ॥ ४
जामदग्न्येन रामेण निशाम्य वचनं पितुः ।

पुरा परशुहस्तेन हेहयाधिपतिर्हतः ॥ ५

क्रुद्धेन च महाप्राज्ञे हेहयस्य महात्मनः ।
शतानि दश बाहूनां निकृत्तान्यर्जुनस्य वै ॥ ६

पुनश्च धनुरादाय महास्त्राणि विमुञ्चता ।
निर्दग्धं क्षत्रमेकेन रामेण जयता महीम् ॥ ७

एवमुच्चावचैरस्त्रैर् भार्गवेण महात्मना ।
त्रिस्सप्तकृत्वो रोषेण कृता निःक्षत्रिया मही ॥ ८

ततस्संभूय संभूय क्षत्रियाभिस्समन्ततः ।
उत्पादितान्यपत्यानि ब्राह्मणेभ्य इति श्रुतम् ॥ ९

पाणिग्राहस्य तनय इति वेदेषु निश्चितम् ।
धर्मं मनसि संस्थाप्य ब्राह्मणांस्तास्समभ्ययुः ॥ १०

लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः ॥ १०॥

अथोचथ्य इति ख्यात आसीद्धीमान्महानृषिः ।
भार्या च ममता नाम बभूवास्य महात्मनः ॥ ११॥

उचथ्यस्य यवीयांस्तु पुरोधा यो दिवौकसाम् ।
बृहस्पतिर्बृहत्तेजा ममतां सोऽभ्यमन्यत ॥ १२॥

उवाच ममता तं तु देवरं वदतां वरम् ॥ १३

ममता—

अन्तर्वत्न्यस्मि ते भ्रात्रा ज्येष्ठेनारम्यतामिति ।

अयं च मे महाभाग कुक्षावेव बृहस्पते ॥ १४
औचथ्ये गर्भ आदत्ते षडङ्गं वेदमुत्तमम् ।
अमेयरेतास्त्वं चापि नूनं भवितुमर्हसि ॥ १५
तस्मादेवं गते कार्ये यथा युक्तं तथा कुरु ॥ १५॥

वैशम्पायनः—

एवमुक्तस्तथा सम्यग् बृहत्तेजा बृहस्पतिः ।
कामात्मानं महात्माऽपि नात्मानं सोऽभ्यधारयत् ॥ १६॥
स बभूव ततः कामी तया सार्धमकामया ।
उत्सृजन्तं तु तत्तेजो गर्भस्थो ह्यभ्यभाषत ॥ १७॥
कनीयांस्तात नैवेह संभवो विद्यते त्वया ।
अमोघशुक्रस्त्वं चापि पूर्वं चाहमिहागतः ॥ १८॥
शशाप च ततः क्रुद्ध एवमुक्तो बृहस्पतिः ।
उचथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः ॥ १९॥

बृहस्पतिः—

यस्मात् त्वमीदृशे काले सर्वभूतेप्सिते सति ।
एवमात्थ यदा तस्मात् तमो दीर्घं प्रवेक्ष्यसि ॥ २०॥
ततो दीर्घतमा नाम शापाद्ऋषिरजायत ।
बृहस्पतेर्बृहत्कीर्तेर् बृहस्पतिरिवौजसा ॥ २१॥
जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स्वविद्यया ।
तरुणीं रूपसंपन्नां प्रद्वेषीं नाम ब्राह्मणीम् ॥ २२॥

ऋषेरुचथ्यस्य महान् सन्तानकुलवृद्धये ।
स पुत्राञ्जनयामास गौतमादीन् महायशाः ॥ २३॥
पुत्रलाभाच्च सा पत्नी न तुतोष पतिं तदा ।
प्रद्विषन्तीं पतिर्भार्यां किं मां द्वेष्टीति चाब्रवीत् ॥ २४॥
प्रद्विषन्ती—
पतिर्भार्यानुभरणाद् भर्ता चेति प्रकीर्त्यते ॥ २५
अहं त्वा भरणं कृत्वा जात्यन्धं ससुता सदा ।
नित्यकालं श्रमेणार्ता न भरेयं महातपः ॥ २६
भीष्मः—
तस्यास्तद्वचनं श्रुत्वा ऋषिः कोपसमन्वितः ।
प्रत्युवाच ततः पत्नीं प्रद्वेषीं ससुतां तदा ॥ २७
दीर्घतमाः—
[1]नीयतां क्षत्रियकुले धनार्थी त्वं भविष्यसि ॥ २७॥
पत्नी—
त्वया दत्तं धनं विप्र नेच्छेयं दुःखकारकम् ।
यथेष्टं कुरु विप्रेन्द्र न भरेयं पुरा यथा ॥ २८॥
दीर्घतमाः—
अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता ।
एक एव पतिः पत्न्या यावज्जीवं परायणम् ॥ २९॥
मृते जीवति वा तस्मिन् न परं प्राप्नुयान्नरम् ।

1. अ—नियतां

अभिगम्य परं नारी पतिष्यति न संशयः ॥ ३०॥

अपतीनां तु नारीणाम् अद्यप्रभृति पातकम् ।
यद्यस्ति चेद्धनं सर्वं वृथाभोगा भवन्तु ताः ॥ ३१॥

अकीर्तिः परिवादाश्च नित्यकालं भवन्तु वै ॥ ३२

भीष्मः—

तस्य तद्वचनं श्रुत्वा ब्राह्मणी भृशकोपिता ।
गङ्गायां नीयतामेष पुत्रा इत्येवमब्रवीत् ॥ ३३

लोभमोहाभिभूतास्ते पुत्रास्तं गौतमादयः ।
काष्ठे समृद्धे प्रक्षिप्य गङ्गायां समवासृजन् ॥ ३४

न स्यादन्धश्च वृद्धश्च भर्तव्योऽयमिति स्म वै ॥ ३४॥

कर्मण्यथ ततः क्रूरे तेषां बुद्धिरजायत ॥ ३५

चिन्तयित्वा ततः क्रूराः प्रतिजग्मुर्यथा गृहान् ॥ ३५॥

सोऽनुस्रोतस्तदा राजन् प्लवमानो मुनिस्तदा ।
जगाम सुबहून् देशान् अन्धस्तेनोडुपेन ह ॥ ३६॥

तं तु राजा बली नाम सर्वधर्मविशारदः ।
अपश्यन्मज्जनगतं स्रोतसोऽभ्याशमागतम् ॥ ३७॥

जग्राह चैनं धर्मात्मा बली सत्यपराक्रमः ॥ ३८

ज्ञात्वा चैनं वरं वव्रे पुत्रार्थं मनुजर्षभ ॥ ३८॥

तं पूजयित्वा राजर्षिर् विश्रान्तं मुनिमब्रवीत् ॥ ३९

राजा—

सन्तानार्थं महाभाग भार्यायां मम मानद ।
पुत्रान् धर्मार्थकुशलान् उत्पादयितुमर्हसि ॥ ४०

भीष्मः—

एवमुक्तस्स तेजस्वी तं तथेत्युक्तवानृषिः ॥ ४०॥
तस्मै स राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ॥ ४१
अन्धं वृद्धं तु तं मत्वा न सा देवी जगाम ह ।
स्वां तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ॥ ४२
तस्यां कक्षीवदादीन् स शूद्रयोनावृषिर्वशी ।
जनयामास धर्मात्मा पुत्रानेकादशैव तु ॥ ४३
कक्षीवदादीन् सर्वांस्तान् साङ्गान् वेदानधीयतः ।
[1]उवाच तमृषिं राजा ममैत इति वीर्यवान् ॥ ४४
नेत्युवाच महर्षिस्तं ममैत इति चाब्रवीत् ॥ ४४॥
शूद्रयोनौ मया ह्येते जाताः कक्षीवदादयः ॥ ४५
अन्धं वृद्धं च मां दृष्ट्वा सुदेष्णा महिषी तव ।
[2]अवमत्य ददौ मूढा शूद्रां धात्रेयिकां हि मे ॥ ४६
ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।

---

1. क-ख-ग-घ—मुदा च तान् बली राजा दृष्ट्वा कक्षीवदादिकान् । [अधिकः पाठः]
2. क-ख-ग-घ—प्राहिणोदवमानान्मे शूद्रां धात्रेयिकां नृप ।

बली सुदेष्णां भार्यां च तस्मै तां प्राहिणोत् पुनः ॥ ४७

तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।

दीर्घतमाः—

भविष्यति कुमारस्ते तेजस्वी सत्यवागिति ॥ ४८

तत्राङ्गो नाम राजर्षिस् सुदेष्णायामजायत ॥ ४८॥

एवमन्ये महेष्वासा ब्राह्मणैः क्षत्रिया भुवि ।
जाताः परमधर्मज्ञा वीर्यवन्तो महाबलाः ॥ ४९॥

[1]एतच्छ्रुत्वा त्वमप्यत्र मातः कुरु यथेप्सितम् ॥ ५०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोनशततमोऽध्याय ॥ ९९ ॥

॥ ७ ॥ संभवपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

[अस्मिन्नध्याये ५० श्लोकाः]

---

1. क-ख-ग—तस्माद्भरतवंशस्य पुनस्सन्तानवृद्धये ।
हेतुं वक्ष्याम्यहं सम्यङ् निर्दोषं नात्र संशयः ॥
ब्राह्मणो गुणवान् कश्चिद्धनेनाप्युपमन्त्र्यताम् ।
विचित्रवीर्यभार्यायां योऽस्यामुत्पादयेत्प्रजाः ॥
[अधिकः पाठः]

॥ शततमोऽध्यायः ॥

सत्यवत्याः भीष्मेण सह सन्तानार्थं संवादः ॥ १ ॥

वैशंपायनः—

भीष्मस्य वचनं श्रुत्वा धर्महेत्वर्थसंहितम् ।
माता सत्यवती भीष्मं पुनरेवाभ्यभाषत ॥ १

सत्यवती—

औचथ्यमधिकृत्येदम् अङ्गं च यदुदाहृतम् ।
पौराणश्रुतिरस्त्येषां प्राप्तकालमिदं कुरु ॥ २

त्वं हि [1]पुत्रः कुलस्यास्य ज्येष्ठश्चेष्ठश्च भारत ।
यथा च ते पितुर्वाक्यं मम [2]कुर्यास्तथाऽनघ ॥ ३

मम पुत्रस्तव भ्राता यवीयान् स प्रियश्च ते ।
बाल एव गतस्स्वर्गं भरतो भरतर्षभ ॥ ४

इमे महिष्यौ तस्येह काशिराजसुते [3]उभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत ॥ ५

[4]तमेतं परमं ज्ञात्वा सन्तानाय कुलस्य च ।
आभ्यां मम नियोगात् त्वं धर्मं चरितुमर्हसि ॥ ६

---

1. क-ख-ग-घ—पुत्र
2. क-ख-ग-घ—कार्यं तवानघ
3. घ—शुभे
4. क-ख-ग-घ—धर्ममेतं परं

भीष्मः—

असंशयं परो धर्मस् त्वया मातः प्रकीर्तितः ।
त्वमप्येतां प्रतिज्ञां तु वेत्थ या[1]परमा मयि ॥ ७

जानीषे यत्तदा वृत्तं शुल्कहेतोस्त्वदन्तरे ।
तत् सत्यवति सत्यं वै पुनरेव ब्रवीमि ते ॥ ८

[2]तन्मया नान्यथा कार्यं लोकानामपि संक्षये ॥ ८॥

परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाऽभ्यधिकमेताभ्यां न च सत्यं परित्यजे ॥ ९॥

त्यजेच्च पृथिवी गन्धम् आपश्च रसमुत्तमम् ।
ज्योतिश्च परमं रूपं वायुः स्पर्शगुणं त्यजेत् ॥ १०॥

त्यजेच्च घोषमाकाशं सोमश्शीतत्वमृत्सृजेत् ।
प्रभां समुत्सृजेदर्को धूमकेतुरथोष्णताम् ॥ ११॥

[3]वृत्रहा विक्रमं जह्याद् धर्मं जह्यात्तु धर्मराट् ॥ १२

अमरत्वस्य वा हेतोस् त्रैलोक्यसदनस्य वा ।
उत्सृजेयमहं प्राणान् न तु सत्यं कथञ्चन ॥ १३

सत्यवती—

जानामि [4]त्वयि धर्मज्ञ सत्यं सत्यपराक्रम ।
इच्छेस्त्वमिह लोकांस्त्रीन् सृजेरन्यानरिन्दम ॥ १४

---

1. क-ख-ग—मयि वर्तते 2 क-ख-ग-घ—तन्न जात्वन्यथा कुर्यां
3. अ-क—पु 4 क-ख-ग—तव

यथा तु वः कुलं चैव [1]धर्मं च न पराभवेत् ।
सुहृदश्च [2]प्रभातास्युस् तथा त्वं कर्तुमर्हसि ॥ १५

भीष्मः—

त्वमेव कुलवृद्धाऽसि गौरवं च परं त्वयि ।
सोपायं कुलसन्ताने [3]वक्तुमर्हसि नः परम् ॥ १६
स्त्रियो हि परमं गुह्यं धारयन्ति [4]कुले कुले ॥ १६॥
पुरु[5]षं चापि मायाभिर् बह्वीभिरुपगूहते ॥ १७
सा सत्यवति संपश्य [6]कर्म सत्यपरायणे ।
यथा न जह्यां सत्यं च न सीदेच्च कुलं हि नः ॥ १८

वैशंपायनः—

ततस्सत्यवती भीष्मं वाचा वै सज्जमानया ।
प्रवेपमाना सव्रीलम् इदं वचनमब्रवीत् ॥ १९

सत्यवती—

सत्यमेतन्महाबाहो यदात्थ प्रमदां प्रति ।
[7]विश्वासं ते प्रवक्ष्यामि सन्तानाय कुलस्य ते ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि शततमोऽध्यायः ॥ १०० ॥
॥ ७ ॥ संभवपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
[अस्मिन्नध्याये २० श्लोकाः]

---

1. क-ख-ग—तद्धर्मश्च घ—चैव धर्मश्च
2. क-ख-ग—सुहृष्टास्स्युः 3. घ—वेत्तुं 4. ख-ग—सदा
5. क-ख-ग-घ—षां श्चापि 6. क-ख-ग—धर्मं
7. क-ख-ग—विश्वासात्ते

॥ एकोत्तरशततमोऽध्यायः ॥

भीष्मं प्रति सत्यवत्या कन्यात्वावस्थायां स्वस्मिन् व्यासजन्मकथनम् ॥ १ ॥ तस्याः व्यासेन संवादः ॥ २ ॥ अम्बिकाम्बालिकयोर्व्यासेन पुत्रोत्पादनाङ्गीकारः ॥ ३ ॥

वैशंपायनः—

एवमुक्त्वा तदा भीष्मं तन्माता प्रत्यभाषत ॥

सत्यवती—

रोचते मे वचस्तुभ्यं ममापि वचनं शृणु ।
न च शक्यमनाख्यातुम् आपद्धीयं तथाविधा ॥ १॥

त्वमेव नः कुले धर्मस् त्वं सत्यं त्वं गतिः प्रभो ।
यत् त्वं वक्ष्यसि तत् कार्यम् अस्माभिरिति मे मतिः ॥ २॥

तस्मान्निशम्य वाक्यं मे [1]वद त्वं यदनन्तरम् ॥ ३

शृणु भीष्म वचो मह्यं धर्मार्थसहितं हितम् ।
न च विस्रम्भकथितं भवान् सूचितुमर्हति ॥ ४

यस्तु राजा वसुर्नाम श्रुतस्ते भरतर्षभ ।
तस्य शुक्रादहं मत्स्याद् धृता कुक्षौ पुरा किल ॥ ५

मातरं मे जलाद्धृत्वा दाशः परमधर्मवित् ।
मां तु स्वगृहमानीय दुहितृत्वे ह्यकल्पयत् ॥ ६

1. क-ख-ग-घ—कुरुष्व

धर्मयुक्तस्स धर्मेण पिता चासीत्ततो मम ॥ ६॥
सा कदाचिदहं तत्र गता प्रथमयौवना ॥ ७
अथ धर्मभृतां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं तात तरिष्यन् यमुनां नदीम् ॥ ८
स तार्यमाणो यमुनां मामुपेत्याब्रवी[1]त्तदा ।
सान्त्वपूर्वं [2]महाभागः कामार्तो मधुरं [3]बहु ॥ ९
उक्त्वा जन्म कुले [4]चैव नासि दाशसुता इति ॥ ९॥
[5]तमहं शापभीता च पितुर्भीता च भारत ।
वरैरसुलभैश्चाहं प्रत्यादातुं प्रचक्रमे ॥ १०॥
अभिभूय स मां बालां तेजसा वशमानयत् ॥ ११
[6]तमसा लोकमावृत्य नौगतामेव भारत ।
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः ॥ १२

---

1. क-ख-ग—द्रुचः । घ—न्मुनिः । 2 क-ख-ग-घ—मुनिश्रेष्ठः
3. क-ख-ग-घ—वचः । 4. क-ख-ग—मह्यं । घ—लं मह्यं
5. क-ख-ग-घ—आलोक्य च दिशश्चाहं प्रत्याख्यातुं प्रचक्रमे ।
प्रेक्ष्य तांस्तु महाभागान् परे पारे ऋषीन् स्थितान् ॥
यमुनातीरविन्यस्तान् प्रदीप्तानिव पावकान् ।
पुरस्तादरुणश्चैव तरुणस्संप्रकाशते ॥
येनैषा ताम्रवस्त्रे च द्यौर्भूता प्रविजृम्भिता ।
उक्तमात्रो मया तत्र नीहारमसृजद्विभुः ॥
[अधिकः पाठः]
6. ख-घ—पराशरस्सत्यधृतिर्द्वीपे च यमुनाम्भसि । [अधिकः पाठः]

तमपास्य शुभं गन्धम् इमं प्रादात् स मे मुनिः ॥ १२॥

ततो मामाह स मुनिर् गर्भ उत्सृज्यतामयम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥ १३॥

[1]पाराशर्यो महायोगी स बभूव [2]महामतिः ।
सद्योत्पन्नस्स तु महान् सह पित्रा यतो गतः ॥ १४॥

कन्यापुत्रो मम पुरो द्वैपायन इति स्मृतः ॥ १५

यो व्यस्य वेदांश्चतुरस् तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात्कृष्णत्वमागतः ॥ १६

सत्यवादी शमपरस् तपसा दग्धकिल्बिषः ।
स नियुक्तो मया व्यक्तं त्वया चाप्यमितद्युते ॥ १७

भ्रातुः क्षेत्रे तु कल्याणम् अपत्यं जनयिष्यति ॥ १७॥

स हि मामुक्तवांस्तत्र स्मर कार्येषु मामिति ॥ १८

---

1. क-ख-ग-घ—कन्यात्वं च ददौ प्रीतः पुनर्विद्वांस्तपोधनः ।
ततः पिता वसुश्चैव पितरश्च तपोधनाः ॥
वसिष्ठेन समानीता याज्ञवल्क्यादयो द्विजाः ।
कृत्वा विवाहं मे सर्वे प्रतिजग्मुर्यथागतम् ॥
तस्य वीर्यमहं दृष्ट्वा तथायुक्तं महात्मनः ।
विस्मिता व्यथिता चैव प्रादामात्मानमेव च ॥
ततस्तदा महात्मा स कन्यायां मयि भारत ।
प्रहृष्टोऽजनयत् पुत्रं *द्वीप एव पराशरः ॥
*घ—द्विज [अधिकः पाठः]

2. क-ख-ग-घ—महानृषिः

स्मरिष्यामि महाबाहो यदि भीष्म त्वमिच्छसि ॥ १८॥

तव ह्यनुमते भीष्म नियं[1]तं स महातपाः ।
विचित्रवीर्यक्षेत्रे तु पुत्रानुत्पादयिष्यति ॥ १९॥

वैशंपायनः—

[2]महर्षेः कीर्त[3]नात्तस्य भीष्मः प्राञ्जलिरब्रवीत् ॥ २०

भीष्मः—

देशकालौ च जानासि क्रियता[4]मिह सिद्धये ॥ २०॥
धर्ममर्थं च कामं च त्रीनेतान् योऽनुपश्यति ॥ २१

अर्थमर्थानुबन्धं च धर्मं धर्मानुबन्धनम् ।
कामं कामानुबन्धं च विपरीतान् पृथक् पृथक् ॥ २२

[5]यो विचिन्त्य धिया सम्यग् व्यवस्यति स युक्तिमान् ।
सर्ववित् सर्वकर्ता स यद्येवं तत्करोति च ॥ २३

तदिदं धर्मयुक्तं च हितं चैव कुलस्य नः ।

---

1. क-ख-ग—तः
2. क-ख-ग-घ—इत्युक्तमात्रे भीष्मस्तु मूर्ध्न्यञ्जलिमथो वहन् । [अधिकः पाठः]
3. क-ख-ग—ने तस्य वन्द्य मातुस्तथाब्रवीत् ।
   घ—ने तस्य वन्द्यमानस्तथाब्रवीत् ।
4. क-ख-ग-घ—मर्थं
5. क-ख-ग-घ—शुभं शुभानुबन्धं च तांश्चैव त्रिविधान् पुनः ।
   पुनः पुनर्यो विचिन्त्य धिया सम्यग्व्यवस्यति ॥
   स बुद्धिमान्मनुष्येषु स नरः कृत्स्नकर्मकृत् ।
   [अधिकः पाठः]

उक्तं भवत्या यच्छ्रेयः परमं रोचते मम ॥ २४

वैशंपायनः—

ततस्तास्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन ।
कृष्णद्वैपायनं काली चिन्तयांमास वै मुनिम् ॥ २५

[1]स वेदान् विब्रुवाणोऽयं मातुर्विज्ञाय चिन्तितम् ।
प्रादुर्बभूव विदितः क्षणेन कुरु[2]नन्दन ॥ २६

तस्मै पूजां ततो दत्वा सुताय विधिपूर्वकम् ।
परिष्वज्य च बाहुभ्यां प्रस्रवैरभिषि[3]च्य च ॥ २७

मुमोच बाष्पं दाशेयी पुत्रं दृष्ट्वा चिरस्य तम् ॥ २७॥

तामाद्भिः [4]परिषिच्यार्तां महर्षिरभिसृत्य च ।
मातरं पूर्वजः पुत्रः [5]कृष्णद्वैपायनोऽब्रवीत् ॥ २८॥

भवत्या यदभिप्रेतं तदहं कर्तुमागतः ।
शाधि मां धर्मतत्त्वज्ञे करवाणि प्रियं तव ॥ २९॥

तस्मै पूजां ततोऽकार्षीत् पुरो[6]धाय परन्तपः ॥ ३०

---

1. क-ख-ग-घ—तस्यास्स चिन्तितं ज्ञात्वा सत्यवत्या महातपाः ।
स वेदान् प्रब्रुवन् सर्वान् कृष्णद्वैपायनः प्रभुः ॥
[अधिकः पाठः]

2. क-ख-ग-घ—संसदि 3. क-ख-ग—ञ्चत; घ—ञ्चतम्

4. क-ख-ग—रभिषिञ्चन्तीं महर्षिरभिवाद्य च ।
घ—रभिषिच्यार्तां महर्षिरभिवाद्य च ।

5. क-ख-ग-घ—व्यासो वचनमब्रवीत् ।

6. क-ख-ग-घ—धाः परमर्षये ।

स च तां प्रतिजग्राह विधिवन्मन्त्रपूर्वकम् ॥ ३०॥

[1]पूजितं मन्त्रपूर्वेण विधिना प्रीतमानसम् ।
तमासनगतं माता पृष्ट्वा कुशलमव्ययम् ॥ ३१॥
सत्यवत्यभिवीक्ष्यैनम् उवाचेदमनन्तरम् ॥ ३२

सत्यवती—

माता[2]पित्रोः प्रजायन्ते पुत्रास्साधारणाः कुले ।
तेषां पिता यथा स्वामी तथा माता न संशयः ॥ ३३
विधात्रा विहितस्स त्वं यथा मे प्रथमस्सुतः ।
विचित्रवीर्यो [3]ब्रह्मर्षे तथा मेऽवरजस्सुतः ॥ ३४
य[4]था वै पितृतो भीष्मस् तथा त्वमपि मातृतः ।
भ्राता विचित्रवीर्यस्य यथावा पुत्र मन्यसे ॥ ३५
यवीयसस्तव भ्रातुर् भार्ये सुरसुतोपमे ।
रूपयौवनसंपन्ने पुत्रकामे च धर्मतः ॥ ३६
अयं शान्तनवस्सत्यं पालयन् सत्यविक्रमः ।
बुद्धिं न कुरुतेऽपत्ये तथा राज्यानुशासने ॥ ३७
[5]स त्वं ह्यपेक्षया भ्रातुस् सन्तानाय कुलस्य तु ।
भीष्मस्य चास्य वचनान्नियोगाच्च ममानघ ॥ ३८

---

1. घ—पूजितो मन्त्रपूतेन विधिना प्रीतमानसः ।
क-ख-ग—पूजितो मन्त्रपूर्वं तु विधिवत्प्रीतिमाप सः ॥
2. क-ख-ग-घ—पितृभ्यां 3. घ—राजर्षिः 4. क-ख-ग-घ—थैव
5. क-ख-ग-घ—तस्य चापेक्षया

अनुक्रोशाच्च [1]भ्रातॄणां सर्वेषां रक्षणाय च ।
आनृशंस्येन यद्ब्रूयां तच्छ्रुत्वा कर्तुमर्हसि ॥ ३९

[2]तयो [3]रुत्पादयापत्यं समर्थो ह्यसि पुत्रक ॥ ३९॥

अनु[4]रूपं कुलस्यास्य तेजः [5]प्रशमसंयुतम् ।
वेत्थ धर्मं त्वमेवेह परं चापरमेव च ॥ ४०

व्यासः—

तथा तव महाप्राज्ञे धर्मे प्रणिहिता मतिः ।
नियोगात्तव चैवाहम् एतैरपि च कारणैः ॥ ४१॥

ईप्सितं तत्करिष्यामि दृष्टं ह्येतत् पुरा मया ।
भवत्या यदभिप्रेतं तदहं कर्तुमागतः ॥ ४२॥

भ्रातुः पुत्रान् प्रदास्यामि मित्रावरुणयोस्समान् ॥ ४३

[6]व्रतं चरेतां निर्दिष्टं मया संवत्सरं शुभे ।

---

1. क-ख-ग-घ—भूतानां
2. क-ख-ग-घ—यवीयसस्तव भ्रातु र्भार्ये परमसम्मते ।
रूपयौवनसम्पन्ने पुत्रकामे च धर्मतः ॥
[अधिकः पाठः]
3. क-ख-ग—प्रयच्छ पुत्रांस्त्वं
4. क-ख-ग—कूलान्; घ—रूपान्
5. क-ख-ग-घ—प्रश्रयसंयुतान्;
6. क-ख-ग—व्रतं च चरितव्यं तु निर्दिष्टमिह यन्मया ।
संवत्सरं यथान्यायं ततश्शुद्धे भविष्यतः ॥
न हि मामव्रतोपेता स्पृशते काचिदङ्गना ।
[अधिकः पाठः]

न च मामर्हतः प्राप्तुम् अशुद्धे कोसलात्मजे ॥ ४४
एवं सत्यवती धर्मं परमाज्ञातुमर्हसि ॥ ४४॥

सत्यवती--

[1]तद्यथा प्रतिपद्येतां देव्यौ गर्भं तथा कुरु ॥ ४५
अराजकेषु राज्येषु [2]नास्ति वृष्टिर्न देवता ।
कथं चाराजकं राज्यं शक्यं [3]धारयितुं प्रभो ॥ ४६
तस्माद्गर्भं [4]निषिञ्चस्व भीष्मस्तं वर्धयिष्यति ॥ ४६॥

व्यासः—

यदि पुत्रः प्रदातव्यो मया क्षिप्रमकालिकम् ।
विरूपतां मे सहताम् एतद्धि स्या[5]न्महत्तपः ॥ ४७॥
यदि मे सहते वेषं रूपं गन्धं तथा व[6]पुः ।
अद्यैव गर्भं कौसल्या विशिष्टं प्रतिप[7]त्स्यते ॥ ४८॥
तस्य चापि शतं पुत्रा भवितारो न संशयः ।
गोप्तारः कुरुवंशस्य भवत्याश्शोकनाशनाः ॥ ४९॥
शयने चैव कौसल्या शुचिवस्त्रा स्वलङ्कृता ।

---

1. क-ख-ग-घ—यथा सद्यः प्रपद्येते भार्ये गर्भं तथा कुरु ।
2. क-ख-ग-घ—प्रजाऽनाथा विनश्यति ।
नश्यन्ति च क्रियास्सर्वाः नास्ति वृष्टिर्न देवता ॥ [अधिकः पाठः]
3. क-ख-ग—रञ्जयितुं 4. क-ख-ग-घ—समाधत्स्व
5. क-ख-ग—त्परं व्रतम् 6. ख-ग—यः 7. क-ख-ग-घ—द्य

ममागमनमाकाङ्क्षेद् इत्युक्त्वाऽन्तरधीयत ॥ ५०॥

वैशंपायनः—

[1]अभिगम्य तु सा देवी स्नुषां रहसि संगताम् ।
[2]धर्ममर्थसमायुक्तम् उवाच वचनं [3]मिथः ॥ ५१॥

सत्यवती—

कौसल्ये धर्मतत्त्वं यद् ब्रवीमि त्वां निबोध मे ॥ ५२

भरतानां समुच्छेदो व्यक्तं मद्भाग्यसंक्षयात् ।
व्यथितां मां च संप्रेक्ष्य पितुर्वंशं च पीडितम् ॥ ५३

[4]भीष्मो बुद्धिं ददौ पौत्रीं वंशस्यास्य पुनर्भवे ।
सा च बुद्धिस्त्व[5]य्यधीना पुत्रभावाय नान्यथा ॥ ५४

नष्टं च भारतं वंशं पुनरेव समुद्धर ।
गर्भं धारय कल्याणि ! देवरस्य महात्मनः ॥ ५५

पुत्रं जनय सुश्रोणि देवराजसमप्रभम् ।
स हि राज्यधुरं गुर्वीं [6]धारयिष्यति [7]भारतीम् ॥ ५६

---

1. क-ख-ग—ततोऽभिगम्य सा
2. क-ख-ग-घ—धर्मार्थकामसहितं
3. क-ख-ग-घ—हितम्
4. क-ख-ग-घ—भीष्मो बुद्धिमतां श्रेष्ठः कुरुते बुद्धिमुत्तमाम् ।
5. क-ख-ग-घ—त्वयाकार्या पुत्रं प्राप्तुं मतिं कुरु ॥
6. क-ख-ग-घ—मुद्वहिष्यति 7. ख-घ—धर्मतः

वैशम्पायनः—

सा धर्मतोऽनुनीयैनां कथं चिद्धर्मचारिणीम् ।
भोजयामास विप्रांश्च देवर्षीनतिथींस्तथा ॥ ५७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोत्तरशततमोऽध्यायः ॥ १०१ ॥

॥ ७ ॥ संभवपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

[अस्मिन्नध्याये ५७ श्लोकाः ।]

॥ द्व्यधिकशततमोऽध्यायः ॥

व्यासात् अम्बिकायां धृतराष्ट्रस्य उत्पत्तिः ॥ १ ॥ अम्बालिकायां पाण्डोरुत्पत्तिः ॥ २ ॥ अम्बिकादास्यां विदुरस्य उत्पत्तिः ॥ ३ ॥

वैशम्पायनः—

ततस्सत्यवती [1]हृष्टा स्नुषां स्नातामलङ्कृताम् ।
संवेशयन्ती शयने शनैर्वचनमब्रवीत् ॥ १

कौसल्ये देवरो देवि स चाद्यानुप्रवेक्ष्यति ।
अप्रमत्ताऽ[2]भिवीक्षेथा निशायामागमिष्यति ॥ २

श्वश्वास्तु वचनं श्रुत्वा शयाना शयने शु[3]भा ।

---

1. क-ख-ग—काले वधूं स्नातामृतौ तदा ।
2. क-ख-ग-घ—प्रतीक्ष्यैनं निशीथे समुपेष्यति ।
3. क-ख-ग—भे

[1]जगाम मनसा भीष्मम् अन्यांश्च भरतांस्तथा ॥ ३

ततस्सुप्तजनप्राये [2]व्यासस्स भगवानृषिः ।
[3]दीप्यमानेषु दीपेषु [4]सदनं प्रविवेश तत् ॥ ४

सत्यवत्या नियुक्तस्तु सत्यवागृषिसत्तमः ।
जगाम तस्याश्शयनं विपुले तपसि स्थितः ॥ ५

[5]तं समीक्ष्य तु कौसल्या दुष्प्रेक्षमतथोचिता ।
विरूपमिति वित्रस्ता संकुच्यासीन्नि[6]मीलिता ॥ ६

[7]विरूपो हि जटी चापि दुरङ्गपरुषः कृशः ।

---

1. क-ख-ग—चिन्तयन्ती तदा भीष्ममन्यांश्च कुरुसत्तमान् ।
2. क-ख-ग—रात्रौ च; घ—ऽर्धरात्रे भगवानृषिः ।
3. क-ग—ततोऽम्बिकायां प्रथमं नियुक्तस्सत्यवागृषिः ।
[अधिकः पाठः]
4. क-ग—निशायां प्रविवेश ह ।
5. क-ग—तस्य कृष्णस्य कपिला जटा दीप्ते च लोचने ।
श्मश्रूणि चैव पिङ्गानि दृष्ट्वा देवी न्यमीलयत् ॥
6. ख—ज्वरेश्वर [अधिकः पाठः]
7. क-ग-घ—स बभूव तया रात्रौ मातुः प्रियचिकीर्षया ।
भयात् काशिसुता तं तु नाशक्नोदभिवीक्षितुम् ॥
ततो निष्क्रान्तमासाद्य माता पुत्रमभाषत ।
अप्यस्यां गुणवान् पुत्र राजपुत्रो भविष्यति ॥
निशम्य वचनं मातुर्व्यासः परमधर्मवित् ।
प्रोवाचातीन्द्रियज्ञानो विधिना संप्रचोदितः ॥
नागायुतसमप्राणो विद्वान् राजर्षिसत्तमः ।
महाभागो महावीर्यो महाबुद्धिर्भविष्यति ॥

सुगन्धेतरगन्धश्च सर्वथा दुष्प्रधर्षणः । ७

तस्य कृष्णस्य कपिला जटा दीप्ते च चक्षुषी ।
कद्रूणि चापि श्मश्रूणि दृष्ट्वा सा ऽऽसीन्निर्मीलिता ॥ ८

संबभूव तया रात्रौ मातुः प्रियचिकीर्षया ।
भयात् काशीसुता तं तु नाशक्नोदभिवीक्षितुम् ॥ ९

ततो निष्क्रान्तमासाद्य तन्माता प्रत्यभाषत ।
अप्यत्र गुणवांस्तात राजपुत्रो भविष्यति ॥ १०

इत्युक्तस्सोऽब्रवीन्मातः कुमारो मातृदोषतः ।
अन्धो नागायुतप्राणो भविष्यत्यम्बिकोदरात् ॥ ११

निशम्य वचनं तस्य तन्माता पुनरब्रवीत् ॥ ११॥

सत्यवती—

अलब्धलाभः पुत्रोऽयं यद्यन्धो वै भविष्यति ॥ १२

[1]तस्माद्वंशस्य गोप्तारं सतां शोकविनाशनम् ।
तस्मादवरजं पुत्रं जनया[2]द्य नराधिपम् ॥ १३

भ्रातुर्भार्याऽपरा चेयं रूपयौवनशालिनी ।

पूर्वतोऽनुवृत्तम्—

तस्य चापि शतं पुत्रा भविष्यन्ति महाबलाः ।
किन्तु मातुस्स्य वैगुण्यादन्ध एव भविष्यति ॥
तस्य तद्वचनं श्रुत्वा माता वचनमब्रवीत् ॥

[अधिकः पाठः]

1. क-ख-ग-घ—अस्य वंशस्य 2. क-ख-ग-घ—न्यं

अस्यामुत्पादयापत्यं मन्नियोगाद्गुणाधिकम्[1] ॥ १४

वैशम्पायनः—

[2]अम्बालिकां समाहूय तस्यां सत्यवती सुतम् ।
भूयो नियोजयामास सन्तानाय कुलस्य वै ॥ १५

विषण्णाम्बालिका साध्वी निषण्णा शयनोत्तमे ।
कोऽन्वेष्यतीति ध्यायन्ती नियता संप्रतीक्षति ॥ १६

ततस्तेनैव विधिना महर्षिस्समपद्यत ॥ १६॥

अम्बालिकामथाभ्यागाद् ऋषिं दृष्ट्वा च साऽपि तम् ।
विषण्णा पाण्डुसङ्काशा समपद्यत भारत ॥ १७॥

तां [3]बालां पाण्डुसंकाशां विषण्णां प्रेक्ष्य पार्थिव ।
व्यासस्सत्यवतीपुत्र इदं वचनमब्रवीत् ॥ १८॥

व्यासः—

यस्मात् पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामसि ।
तस्मादेष सुतस्तुभ्यं पाण्डुरेव भविष्यति ॥ १९॥

नाम चास्य तदेवेह भविष्यति शुभानने ॥ २०

---

1. क-ख-ग—द्वितीयं कुरुवंशस्य राजानं दातुमर्हति ।
वैशंपायनः—
स तथेति प्रतिज्ञाय निश्चक्राम महातपाः ॥
2. अ—अथांबिकां समाधाय । [अधिकः पाठः]
3. क-ख-ग-घ—भीता

वैशंपायनः—

इत्युक्त्वा स निराक्रामद् [1]भगवानृषिसत्तमः ॥ २०॥

[2]तमुवाच ततो माता अप्यत्र भविता शुभः ।
कुमारो ब्रूहि मे पुत्र ऋषिस्तां प्रत्युवाच ह ॥ २१॥

भविष्यति [3]सुतो मातः कुमारो दिक्षु विश्रुतः ।
पाण्डुत्वं वर्णतस्तस्य मातृदोषाद्भविष्यति ॥ २२॥

तस्य पुत्रा महेष्वासा जनिष्यन्तीह [4]पाण्डवाः ॥ २३
इत्युक्त्वा मातरं तत्र सोऽभिवाद्य जगाम ह ॥ २३॥

मुनौ यातेऽम्बिका पुत्रं महाभागमसूयत ।
धृतराष्ट्रं महाप्राज्ञं प्रज्ञाचक्षुषमीश्वरम् ॥ २४॥

अनुजाऽम्बालिका तत्र पुत्रं काले व्यजायत ।
पाण्डुं लक्षणसंपन्नं दीप्यमानं श्रिया वृतम् ॥ २५॥

तयोर्जन्मक्रियास्सर्वा यथावदनुपूर्वशः ।
कारयामास वै भीष्मो ब्राह्मणैर्वेदपारगैः ॥ २६॥

अन्धं दृष्ट्वाऽम्बिकापुत्रं जातं सत्यवती सुतम् ।
कौसल्यार्थे समाहूय पुत्रमन्यमयाचत ॥ २७॥

---

1. क-ख-ग-घ—कृष्णद्वैपायनः प्रभुः
2. क-ख-ग-घ—ततो निष्क्रान्तमालोक्य सत्या पुत्रमभाषत ।
शशंस स पुनर्मात्रे तस्य बालस्य पाण्डुताम् ॥
[अधिकः पाठः]
3. क-ख-ग-घ—सुविक्रान्तः 4. क-ख-ग-घ—पञ्च वै

अन्धोऽयमन्यमिच्छामि कौसल्यातनयं शुभम् ॥ २८

एवमुक्तो महर्षिस्तां मातरं प्रत्यभाषत ॥ २८॥

नियता यदि कौसल्या भविष्यति पुनश्शुभा ।
भविष्यति कुमारोऽस्या धर्मशास्त्रार्थतत्त्ववित् ॥ २९॥

तां समाधाय वै भूयस् स्नुषां सत्यवती तदा ।
ऋतुकालं च विज्ञाय देव्या संचोदिताऽम्बिका ॥ ३०॥

सा तु रूपं च गन्धं च महर्षेः प्रतिवीक्ष्य तम् ।
नाकरोद्वचनं देव्या भयात् सुरसुतोपमा ॥ ३१॥

ततस्स्वैर्भूषणैर्दासीं भूषयित्वाऽप्सरोपमाम् ।
प्रेषयामास कृष्णाय ततः काशिपतेस्सुता ॥ ३२॥

दासी ऋषिमनुप्राप्तं प्रत्युत्थायाभिवाद्य च ।
संविवेशाभ्यनुज्ञाता सत्कृत्योपचचार सा[1] ॥ ३३॥

[2]वाससोऽपि प्रदानेन गात्रसंस्पर्शनेन च ।
कामोपभोगसंयुक्तो महर्षिर्विस्मितोऽभवत् ॥ ३४॥

तया सहोषितो रात्रिं महर्षिः प्रीयमाणया ।
उत्तिष्ठन्नब्रवीदेनां त्वं भुजिष्या भविष्यसि ॥ ३५॥

एष ते सुभगे गर्भश् श्रीमानुदरमागतः ।
धर्मात्मा विश्रुतो लोके सर्वधर्मभृतां वरः ॥ ३६॥

1. क-ख-ग-घ—ह । 2. ख-ग—वाग्भावोपप्रदानेन

[1]जज्ञे स विदुरो नाम कृष्णद्वैपायनात्मजः ।
धृतराष्ट्रस्य च भ्राता पाण्डोश्च[2] पृथिवीपतेः ॥ ३७॥

धर्मो विदुररूपेण शापात्तस्य महात्मनः ।
माण्डव्यस्यार्थतत्त्वज्ञः कामक्रोधविवर्जितः ॥ ३८॥

क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनादपि ।
जज्ञिरे देवगर्भाभाः कुरुवंशविवर्धनाः ॥ ३९॥

तेषु त्रिषु कुमारेषु जातेषु कुरुजाङ्गलम् ।
कुरवोऽथ कुरुक्षेत्रं सर्वं त्रयमवर्धत ॥ ४०॥

गन्धवत्यास्तथैवो[3]क्त्वा धर्मरूपं सुतं प्रति ।
नाहमस्मिन् पुनर्योक्तुं शक्यो मातस्सु[4]तान् प्रति ॥ ४१॥

स धर्मस्यानृणो भूत्वा पुनर्मात्रा समेत्य च ।
तस्यां च सर्वमाख्याय तत्रैवान्तरधीयत ॥ ४२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

॥ ७ ॥ संभवपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

[अस्मिन्नध्याये ४२॥ श्लोकाः]

---

1. क-ख-ग-घ—इत्युक्त्वा स निराक्रामत् कृष्णद्वैपायनः प्रभुः । [अधिकः पाठः]
2. क-ख-ग-घ—श्चामितबुद्धिमान् ।
3. क-ख-ग-घ—क्तो
4. क-ख-ग-घ—तं

॥ त्र्यधिकशततमोऽध्यायः ॥

माण्डव्यचरित्रम् ॥ १ माण्डव्येन यमस्य शापः ॥ २ ॥

जनमेजयः—

किं कृतं कर्म धर्मेण येन शापमुपेयिवान् ।
कस्य शापाच्च [1]धर्मज्ञ शूद्रयोनावजायत ॥ १

वैशंपायनः—

बभूव ब्राह्मणः कश्चिन्माण्डव्यो[2] नाम विश्रुतः ।
एकान्तचारी [3]वश्यश्च सत्ये तपसि च ध्रुवः ॥ २

स तीर्थयात्रां विचरन् [4]आजगाम यदृच्छया ॥ २॥

संनिकृष्टानि तीर्थानि ग्रामाणां यानि कानि चित् ।
तत्राश्रमपदं कृत्वा वसति स्म महामुनिः ॥ ३॥

स त्वाश्रमपदद्वारि वृक्षमूले महायशाः ।
ऊर्ध्ववाहुस्थितो योगी मौनी व्रतसमन्वितः ॥ ४॥

केन चित्त्वथ कालेन तथा तपसि तिष्ठतः ॥
त[5]स्याश्रमपदं प्राप्ता दस्यवो लोप्त्रहारिणः ॥ ५॥

---

1. क-ख-ग—ब्रह्मर्षेः 2. क-ख-ग-घ—व्य इति
3. क-ख-ग—वन्यश्च सत्येन तपसि श्रुतः ।
घ—वन्यश्च सत्ये तपसि विश्रुतः
4. क-ख-ग-घ—अगाम च 5. अ-दा

[1] * अनुसाधयमानास्ते रक्षिभिर्भरतर्षभ ।
तामेव वसतिं जग्मुस् तद्रामे लोप्त्रहारिणः । ६॥

तस्मिन्निवसथे लोप्त्रं निदधुर्भयमोहिताः ।
अभितस्तत्र संलीना बलमन्वगमच्च तान् ॥ ७॥

ततश्शीघ्रतरं राजंस् तथा गजबलं महत् ॥ ८

यस्मिन्नावसथे शेते स मुनिस्संश्रितव्रतः ।
तत्राजग्मु[2]स्तपोवृद्धं तं मुनिं रक्षिणस्तु ते ॥ ९

तमपृच्छंस्तदा राजंस् तथायुक्तं तपोधनम् ॥ ९॥

कतरेण पथा याता दस्यवो मुनिसत्तम ।
तेन गच्छाम वै ब्रह्मन् पथा शीघ्रतरं वयम् ॥ १०॥

तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः ।
न किञ्चिद्वचनं राजन् मुनिस्तान् प्रत्यभाषत ॥ ११॥

ततस्ते राजपुरुषा विचिन्वानास्तदाश्रमम् ।
ददृशुस्तत्र वै लीनांश् चोरांस्तद्द्रव्यमेव च । १२॥

ततश्शङ्का समभवद् रक्षिणां तं मुनिं प्रति ।
संयम्यैनं ततो राज्ञे चोरांश्चै[3]वान्ववेदयन् ॥ १३॥

---

1. घ—चोरैरपहृतं द्रव्यं लोप्त्रमित्यभिधीयते । [अधिकः पाठः]
* क-ख-ग-घ—अनुसार्यमाणास्ते चोराः
2. क-ख-ग—स्ततोपृच्छंस्तं
3. क-ख-ग—नं न्य; घ—नं न्यवेदयन्

तं राजा सह चोरैस्तैर् अवद[1]च्छिद्यतामिति ॥ १४

स वध्यघातैराज्ञप्तैश् शूले प्रोतो महातपाः ॥ १४॥

ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा ।
प्रतिजग्मुर्महीपाला धनान्यादाय तान्यथ ॥ १५॥

शूलस्थस्स तु धर्मात्मा कालेन महता [2]अपि ।
निराहार[3]स्तदा राजन् मरणं नाभ्युपागमत् ॥ १६॥

[4]शूलाग्रे तप्यमानेन तदाऽनेन महात्मना ।
सन्तापं परमं जग्मुर् [5]ऋषयो भरतर्षभ ॥ १७॥

[6]ते रात्रौ शकुना भूत्वा तमार्तिं परमां गतम् ।
दर्शयन्तो यथाशक्ति तमापृच्छन् द्विजोत्तमम् ॥ १८॥

ऋषयः—

भगवन् केन दोषेण गन्तासि द्विजसत्तम ।
श्रोतुमिच्छामहे [7]ब्रह्मन् अपापो ह्यसि धर्मतः ॥ १९॥

तत्ते द्विजवरश्रेष्ठ संशयस्तु महान् हि नः ।

---

1. क-ख-ग—ह्यतामिति 2. क-ख-ग-घ—ततः
3. क-ख-ग-घ—रोऽपि विप्रर्षिः
4. क-ख-ग-घ—धारयामास वै प्राणानृषींश्च समुपानयत् ।
[अधिकः पाठः]
5. क-ख-ग-घ—मुनयोऽथ परन्तप ।
6. ख-घ—दुःखिता ऋषयस्तत्र आश्रमस्थाश्च तं तदा। [अधिकः पाठः]
7. क-ख-ग—ब्रह्मंस्त्वमपापोऽसि

ईदृशस्य [1]नरश्रेष्ठ उग्रे तपसि वर्ततः ॥ २०॥

वैशम्पायनः—

[2]तदोवाच महाप्राज्ञस् तानृषीन् संशितव्रतान् ॥ २१

दोषतः कं गमिष्यामि न हि मेऽन्योऽपराध्यति ॥ २१॥

तच्छ्रुत्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि ।
न्यवेदयंस्ततो राज्ञे तथावृत्तं नराधिप ॥ २२॥

राजा च हि तथा श्रुत्वा निश्चित्य सह मन्त्रिभिः ।
प्रसादयामास तदा शूलस्थमृषिसत्तमम् ॥ २३॥

राजा—

यन्मयाऽपकृतं मोहाद् अज्ञानाद्द्विजसत्तम ।
प्रसादये त्वां विप्रेन्द्र न मे त्वं क्रोद्धुमर्हसि ॥ २४॥

वैशंपायनः—

एवमुक्तस्तदा राज्ञा प्रसादमकरो[3]त्तदा ।
कृतप्रसादो राजा तं ततस्समवतारयत् ॥ २५॥

अव[4]तीर्य तु शूलाग्रात् तच्छूलं विनिकृत्य च ।
अशक्नुवन्तो निष्कृष्टुं शूलं मूलेऽथ चिच्छिदुः ॥ २६॥

स तदान्तर्गतेनैव शूलेन व्यचरन्मुनिः ।

---

1. क-ग—द्विज
2. क-ख-ग-घ—ततस्स मुनिशार्दूलस्तानुवाच तपोधनान् ।
3. क-ख-ग-घ—न्मुनिः । 4. क-ख-ग-घ—ता

कण्ठपार्श्वान्तरस्थेन शङ्कुना मुनिराचरन् ॥ २७॥
पुष्पभाजनधारी स्याद् इति चिन्तापरोऽभवत् ॥ २८
स तेन तपसा लोकान् विजिग्ये दुर्लभान् परैः ।
तमाहुराणिमाण्डव्यम् इति धर्मे रतं मुनिम् ॥ २९
गत्वा संयमिनीं विप्रो धर्मस्य परमार्थवित् ।
धर्मं धर्मवतां श्रेष्ठं [1]पर्युपालभतानघ ॥ ३०

आणिमाण्डव्यः—

किं [2]मया तत् कृतं कर्म धर्मपापफलोदयम् ।
येनेदं प्राप्तवानस्मि दुःखमप्रतिमं भुवि ॥ ३१
तन्ममाचक्ष्व तत्त्वेन पश्य मे तपसो बलम् ॥ ३१॥

धर्मराजः—

पतङ्गकानां पुच्छेषु इषीका[3]स्त्वं समादधाः ।
अहिंसकानां धर्मज्ञ तेनैतत् प्राप्तवानसि ॥ ३२॥

आणिमाण्डव्यः—

[4]बालो हि द्वादशाद्वर्षाज् जन्मनो यत्करिष्यति ।

---

1. क-ख-ग—पर्यपृच्छत्तदानघ; घ—परिपालयतानघ
2. घ—यमः
   क-ख-ग—त्वया तत्कृतं कर्म मया कृतमजानता ।
3. क-ख-ग—स्वत्प्रवेशिताः
4. क-ख-ग—कस्मिन्काले मया तत्तु कृतं ब्रूहि यथातथम् ।
   घ—तेनोक्तो धर्मराजोऽथ बालभावे त्वया कृतम् ॥
   [अधिकः पाठः]

न भविष्यत्यधर्मोऽ[1]द्य न प्रज्ञास्यति [2]वै दिशः ॥ ३३॥

अल्पापराधे विपुलो मम दण्डस्त्वया धृतः ।
[3]शूद्रयोनावतो धर्म मानुषस्संभविंष्यसि ॥ ३४॥

मर्यादां स्थापयाम्यद्य लोके धर्मफलोदयाम् ॥ ३५

आ चतुर्दशमाद्वर्षान्न भविष्यति पातकम् ।
परेणकुर्वतामेव दोष एव भविष्यति ॥ ३६

वैशंपायनः—

एतेन त्वपराधेन शापात्तस्य महात्मनः ।
धर्मो विदुररूपेण शूद्रयोनावजायत ॥ ३७

धर्मे चार्थे च कुशलो [4]भयक्रोधविवर्जितः ।
दीर्घदर्शी [5]महाप्राज्ञः कुरूणां च हितेरतः ॥ ३८

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

॥ ७ ॥ संभवपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

[अस्मिन्नध्याये ३८ श्लोकाः]

---

1. क-ख-ग-घ—त्र 2. क-ख-ग—वैशसम्
3. क-ख-ग-घ—गरीयान् ब्राह्मणवधस्सर्वभूतवधादपि।[अधिकःपाठः]
4. क-ख-ग-घ—लोभ
5. क-ख-ग—शमपरः; घ- च परमः

॥ चतुरधिकशततमोऽध्यायः ॥

पाण्डो राज्याभिषेकः ॥ १ ॥ धृतराष्ट्रादिविवाहः ॥ २ ॥

वैशंपायनः—

धृतराष्ट्रे च पाण्डौ च विदुरे च महात्मनि ।
तेषु त्रिषु कुमारेषु जातेषु कुरुजाङ्गलम् ॥ १

कुरवोऽथ कुरुक्षेत्रं त्रयमेतदवर्धत ॥ १॥

यथर्तुवर्षी पर्जन्यो बहुपुष्पफला द्रुमाः ।
वाहनानि प्रहृष्टानि मुदिता मृगपक्षिणः ॥ २॥

ऊर्ध्वसस्याऽभवद्भूमिस् सस्यानि फलवन्ति च ।
गन्धवन्ति च माल्यानि रसवन्ति फलानि च ॥ ३॥

वणिग्भिश्चोपकीर्यन्ते नगराण्यथ शिल्पिभिः ।
शूराश्च कृतविद्याश्च सन्तश्च सुखिनोऽभवन् ॥ ४॥

नाभवत् कृपणः कश्चिन्न काचिद्विधवाऽभवत् ।
नाभवन् दस्यवः केचिन्नाधर्मरुचयो [1]नराः ॥ ५॥

प्रदेशेष्वपि राष्ट्राणां कृतं युगमवर्तत ॥ ६

तन्महोदधिसंकाशं नगरं बहुशोभत ॥ ६॥

1. क-ख-ग—जनाः

द्वारतोरणनिर्यूहैश् छन्नमभ्रं घनैरिव ।
प्रासादशतसंबाधं महेन्द्रपुरसन्निभम् ॥ ७॥

नदीपादपषण्डेषु वापी[1]पल्वलसेतुषु ।
काननेषु च [2]दिव्येषु विहरन्ति स्म कौरवाः ॥ ८॥

उत्तरैः कुरुभिस्सार्धं दक्षिणाः कुरवस्तदा ।
स्पर्धमानाश्च दृश्यन्ते चारणर्षिसमागमे ॥ ९॥

दानधर्मक्रियायुक्ता यज्ञव्रतपरायणाः ।
अन्योन्यप्रीतिसंयुक्ता वर्धन्ते स्म प्रजास्तदा ॥ १०॥

मानक्रोधविहीनाश्च प्रजा लोभविवर्जिताः ।
अन्योन्यमभ्यनन्दंस्ता ब्रह्मोत्तरमवर्धत ॥ ११॥

तस्मिञ्जनपदश्रेष्ठे भीष्मेण विधिना कृताः ।
कूपाराम[3]महावप्रा ब्राह्मणावसथास्तदा ॥ १२॥

स्वाहाकारैस्स्वधाभिश्च [4]संनिवास[5]स्सुरक्षितः ।
बभूव परमोपेतो [6]यूपैश्चैत्यधनुर्भुजैः ॥ १३॥

प्रमृज्य परराष्ट्राणि स्वराष्ट्रं [7]परिरक्षता ॥

---

1. क-ख-ग—कूपादिवल्गुषु 2 क-ख-ग-घ—चित्रेषु
3. क-ख-ग—सभावाप्यो; घ—सभावप्रा
4. क-ख-ग—निवासास्समलङ्कृताः । 5. घ—:कुरूषितः ।
6. क-ख-ग—यूपचैत्यवनध्वजैः; ग. —यूपचैत्यधनुर्ध्वजैः ।
7. क-ख-ग—पर्यरक्षत; ग—परिरक्षितम् ।

भीष्मेण विहितं राष्ट्रे धर्मचक्रमवर्तत ॥ १४॥

क्रियमाणेषु कृत्येषु कुमाराणां यशस्विनाम् ।
पौरजानपदास्सर्वे बभूवुः परमोत्सवाः ॥ १५॥

गृहेषु कुरुमुख्यानां पौराणां च नराधिप ।
दीयता[1]मिज्यतां चेति वाचोऽ श्रूयन्त सर्वशः ॥ १६॥

धृतराष्ट्रश्च पाण्डुश्च विदुरश्च महायशाः ।
जन्मप्रभृति भीष्मेण पुत्रवत् परिपालिताः ॥ १७॥

वैदिकाध्ययने युक्तो नीतिशास्त्रे च पारगः ॥ १८
भीष्मेण राजन् कौरव्यो धृतराष्ट्रोऽभिषेचितः ॥ १८॥

धनुर्वेदेऽश्वपृष्ठे च गदायुद्धेऽसिचर्मणि ।
तथैव गजशिक्षायाम् अस्त्रेषु विविधेषु च ॥ १९॥

अर्थधर्मप्रधानासु विद्यासु विविधासु च ।
गतः पारं यदा पाण्डुस् तदा सेनापतिः कृतः ॥ २०॥

धृतराष्ट्रस्त्वचक्षु[2]ष्मान् राज्यं न प्रतिपद्यत ।
[3]रक्षाकरश्च विदुरः पाण्डुश्चासीन्महीपतिः ॥ २१॥

अमात्यो मनुजेन्द्रस्य बाल एव यशस्विनः ।
प्रणेता सर्वधर्माणां भीष्मेण विदुरः कृतः ॥ २२॥

---

1. क-ख-ग-घ—म्भु 2. घ—ष्ट्वात्
3. क-ख-ग-घ—अवरत्वाच्च

सर्वशास्त्रार्थतत्त्वज्ञो बुद्धिमेधापटुर्युवा ।
भावेनागमयुक्तेन सर्वं वेदयते जगत् ॥ २३॥

प्रनष्टश्शन्तनोर्वंशो भीष्मेण पुनरुद्धृतः ।
ततो निर्वचनं सत्सु तदिदं परिपठ्यते ॥ २४॥

कौसल्या वीरसूस्त्रीणां देशानां कुरुजाङ्गलम् ।
भीष्मो धर्मभृतां श्रेष्ठः पुराणां गजसाह्वयम् ॥ २५॥

ते त्रयः कालयोगेन कुमारा जनमेजय ।
अवर्धन्त महात्मानो नन्दयन्तस्सुहृज्जनान् ॥ २६॥

संस्कारैस्संस्कृतास्ते वै [1]वृत्तैरध्ययनेन च ।
[2]शमव्यायामकुशलास् समपद्यन्त यौवने ॥ २७॥

धनुर्वेदेऽश्वपृष्ठे च [3]तथा युद्धेऽसिचर्मणि ।
तथैव गजशिक्षायां नीतिशास्त्रे च पारगाः ॥ २८॥

इतिहासपुराणेषु नानाशि[4]ल्पासु चान्विताः ।
वेदवेदाङ्ग[5]तत्त्वज्ञास् सर्वत्र कृत[6]विश्रमाः ॥ २९॥

अतीव बलवानासीद् धृतराष्ट्रोऽम्बिकासुतः ।
पाण्डुर्धनुषि विक्रान्तो नरेभ्यो ह्यधिकोऽभवत् ॥ ३०॥

त्रिषु लोकेषु नत्वासीत् प्राणी विदुरसंमितः ।

---

1. घ—व्रतै 2. क-ख-ग-घ—श्रम 3. क-ख-ग-घ—गदा
4. ग—क्षा 5. क-ख-ग-घ—कुशलास् 6. क-ख-ग—निश्चयाः।

धर्मनित्यो हि धर्म[1]ज्ञ बुद्ध्या चैव गतिं गतः ॥ ३१॥

अथ शुश्राव विप्रेभ्यो [2]देवकस्य महीपतेः ।
रूपयौवनसंपन्नां सुतां सागरगासुतः ॥ ३२॥

सुबलस्य च कल्याणीं गान्धाराधिपतेस्सुताम् ।
सुतां च मद्रराजस्य रूपेणाप्रतिमां भुवि ॥ ३३॥

भीष्मः—

गुणैस्समुदितं [3]सर्वम् इदं नः प्रथितं कुलम् ।
अत्यन्यान् पृथिवीपालान् पृथिव्या[4]मपि राजकान् ॥ ३४॥

रक्षितं राजभिः पूर्वैर् [5]धर्मविद्भिर्महात्मभिः ।
[6]नोत्सादमगमच्चेदं कथं चिदिह नः कुलम् ॥ ३५॥

मया च सत्यवत्या च कृष्णेन च महात्मना ।
[7]समवस्थापितं भूयो युष्मासु कुलतन्तुषु ॥ ३६॥

वर्धेत तदिदं पुत्र कुलं सागरवद्यथा ।
तथा मया विधातव्यं त्वया चैव विशेषतः ॥ ३७॥

श्रूयते यादवी कन्या ह्यनुरूपा कुलस्य नः ।
सुबलस्यात्मजा चैव तथा मद्रेश्वरस्य च ॥ ३८॥

कुलीना रूपवत्यश्च नाथवत्यश्च सर्वशः ।

---

1. क-ख-ग—स्य 2. क-ख-ग—यादवस्य
3. क-ख-ग-घ—नित्यम् 4. घ—मधि राजभाक् 5. ख—श्रीमद्भिश्च
6. घ—नोत्साहमगमच्छेदं 7. क-ख—संस्थापितं कुलं

उचिताश्चैव संबन्धे तेऽस्माकं क्षत्रि[1]यर्षभ ॥ ३९॥
मन्ये वरयितव्यास्ता इत्यहं धीमतां वर ।
समानार्थाः[2] कुलस्यास्य यद्वा विदुर मन्यसे ॥ ४०॥

विदुरः—

भवान् पिता भवान् माता भवान् नः परमो गुरुः ।
तस्मात् स्वयं कुलस्यास्य विचार्य कुरु [3]वर्धितम् ॥ ४१॥

वैशंपायनः—

अथ शुश्राव विप्रेभ्यो गान्धारीं सुबलात्मजाम् ॥ ४२
आराध्य वरदं देवं भगनेत्रहरं हरम् ।
गान्धारी [4]लघु पुत्राणां शतं लेभे वरं शुभा ॥ ४३
इति श्रुत्वा च तत्त्वेन भीष्मः कुरुपितामहः ।
ततो गान्धारराजस्य ([5]सुतश्शकुनिराव्रजन् ॥ ४४
स्वसारं परया लक्ष्म्या) प्रेषयामास कौरवः ।
अचक्षुरिति तस्याऽऽसीत् सुबलस्य विचारणा ॥ ४५
कुलख्यातिं च वृद्धिं च बुद्ध्या तु प्रसमीक्ष्य च ।
ददौ तां धृतराष्ट्राय गान्धारीं धर्मचारिणीम् ॥ ४६
गान्धारी त्वथ शुश्राव धृतराष्ट्रं त्वचक्षुषम् ।

---

1. क-ख-ग—योत्तमाः; घ—यर्षभाः 2. क-ख-ग—स्ताः
3. क-ख-ग-घ—यद्धितम् । 4. क-ख-ग-घ—किल
5. (—) इदमन्वितम्- See Sloka 49½.

आत्मानं दिप्सितां त[1]त्र पितुर्मातुश्च कौरव ॥ ४७

ततस्सा पट्टमा[2]नाय्य कृत्वा बहुगुणं शुभा ।
न [3]पश्यतीति भर्ता मे वेष्टयामास चक्षुषी ॥ ४८

नात्यइनीयां पतिमहम् इत्येवं कृतनिश्चया ॥ ४८॥

ततो गान्धारराजस्य सुतश्शकुनिराव्रजत् ।
स्वसारं परया लक्ष्म्या युक्तामादाय कौरव ॥ ४९॥

ततो विवाहं चक्रेऽस्या नक्षत्रे कृत्स्नसंमते ।
सौबलस्स महाराजश् शकुनिः प्रियदर्शनः ॥ ५०॥

दत्वा स्वभगिनीं [4]तत्र यथार्हं च परिच्छदम् ।
पुनरागात् स्वनगरं भीष्मेण परिपूजितः ॥ ५१॥

गान्धार्यपि वरारोहा शीलाचारविचेष्टितैः ।
तुष्टिं कुरूणां सर्वेषां जनयामास भारत ॥ ५२॥

गान्धारी सा पतिं दृष्ट्वा प्रज्ञाचक्षुषमीश्वरम् ।
अतिधाराद्भृशं भीता भर्तुस्सा समचिन्तयत् ॥ ५३॥

सा दृष्टिविनिवृत्ता हि भर्तुस्तु सम[5]तामियात् ।
न हि सूक्ष्मेऽप्यती[6]याते भर्तुस्सा ववृधे तदा ॥ ५४॥

---

1. क-ख-ग-घ—स्य
2. ख-घ—दाय
3. क-ख-ग-घ—पश्यामीति भर्तारं
4. क-ख-ग-घ—वीरो
5. क-ग-घ—तां ययौ
6. क-ग-घ—चारे

वृत्तेनारा[1]धितान् सर्वान् पतिव्रतपरायणा ।
वाचाऽपि परुषानन्यान् [2]सुव्रता नान्वकीर्तयत् ॥ ५५॥

तस्यास्सहोदराः कन्याः पुनरेव ददौ दश ।
गान्धारराजस्सुबलो भीष्मेण परितस्तदा ॥ ५६॥

सत्यव्रतां सत्यसेनां सुषेणां च सुसंहिताम् ।
तेजश्रवां स्वश्रवां च तथोर्वीं निकृतिं तथा ॥ ५७॥

शम्भुवां च दशार्णां च गान्धारीं दश विश्रुताः ॥ ५८

एकाह्वा [3]चोपयेमे ता धृतराष्ट्रो जनेश्वरः ॥ ५८॥

ततश्शान्तनवो भीष्मो धनुःक्रीतास्ततस्ततः ।
आहरद्धृतराष्ट्राय राजपुत्रीः परश्शतम् ॥ ५९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

॥ ७ ॥ संभवपर्वणि एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

[अस्मिन्नध्याये ५९॥ श्लोकाः]

---

1. क-ग-घ—ध्य
2. क-ग—स्वजनान्न व्यकीर्तयत् ।
   घ—स्वजनान्नावकीर्तयत । 3. क-ग-घ—प्रतिजग्राह

॥ पञ्चाधिकशततमोऽध्यायः ॥

पृथाया बाल्यचरित्रकथनम् ॥ १ ॥ तस्या दुर्वाससो मन्त्रप्राप्तिः ॥ २ ॥ मन्त्रप्रभावजिज्ञासया आहूतात्सूर्यात् कुन्त्यां कर्णस्योत्पत्तिः ॥ ३ ॥ लोकभयात्कुन्त्या यमुनायां विसृष्टस्य राधाभर्त्रा स्वीकारो वसुषेणेति नामकरणं च ॥ ४ ॥ सङ्ग्रहेण कर्णचरित्रकथनम् ॥ ५ ॥

वैशम्पायनः—

शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत् ।
तस्य कन्या पृथा नाम रूपेणासदृशी भुवि ॥ १

पैतृष्वसेयाय ततस् सोऽनपत्याय वीर्यवान् ।
उग्रायाग्रे प्रतिज्ञाय स्वस्यापत्यं च वीर्यवान् ॥ २

अग्रजातेति तां कन्याम् उग्रानुग्रहकाङ्क्षया ।
अददात् कुन्तिभोजाय शूरो गोपतये सुताम् ॥ ३

सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिभोजने ।
उग्रं पर्यचरद्घोरं ब्राह्मणं संशितव्रतम् ॥ ४

निगूढं निश्चयं धर्मे दुर्वासा इति यं विदुः ।
[1]तमुग्रं संशितात्मानं सर्वयत्नैरतोषयत् ॥ ५

1. क-ख-ग—तं मुनिं

[1]स तस्यै प्रददौ धर्मम् आपद्धर्मान्ववेक्षया ।
अभिचाराभिसंयुक्तम् अब्रवीच्चैव तां मुनिः ॥ ६

अभिचारयुतं तस्या आचष्ट भगवानृषिः ॥ ६॥

यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
तस्य तस्य प्रसादाद्वै पुत्रस्तव जनिष्यते ॥ ७॥

तथोक्ता सा तु मुनिना तस्य कौतूहलात्तदा ।
कन्या सती देवमर्कम् आजुहाव यशस्विनी ॥ ८॥

ततो घनान्तरं कृत्वा स्वमार्गं तपनस्तदा ।
उपतस्थे स तां कन्यां पृथां पृथुललोचनाम् ॥ ९॥

सा ददर्श तमायान्तं विस्मयाल्लोकभावनम् ।
विस्मिता चानवद्याङ्गी दृष्ट्वा तं महदद्भुतम् ॥ १०॥

साऽब्रवीद्भगवन् कस्त्वं प्रादुर्भूतो ममा[2]न्तिकम् ॥ ११

सूर्यः—

आहूतोपस्थितं भद्रे ऋषिमन्त्रेण चोदितम् ।
विद्धि मां पुत्रलाभाय देवमर्कं शुचिस्मिते ॥ १२

---

1. क-ख-ग—दध्याज्यकादिभि र्नित्यं व्यञ्जनैः प्रत्यहं शुभा ।
सहस्रसङ्ख्यैर्योगीन्द्रं समुपाचरदुत्तमा ।
दुर्वासा वत्सरस्यान्ते ददौ मन्त्रमनुत्तमम् ।
यशस्विन्यै पृथायै स आपद्धर्मान्ववेक्षया ॥
[अधिकः पाठः]

2. क-ख-ग-घ—अतः ।

[1]पुत्रस्ते निर्मितस्सुभ्रु शृणु यादृक्छुभानने ॥ १२॥
आदित्ये कुण्डले बिभ्रत् कवचं चैव मामकम् ।
शस्त्रास्त्राणामभेद्यं च भविष्यति शुचिस्मिते ॥ १३॥
[2]न न किञ्चन देयं तु ब्राह्मणेभ्यो भविष्यति ।
चोद्यमानो मया चापि [3]नाक्षमं चिन्तयिष्यति ॥ १४॥
[4]दास्यत्येव हि विप्रेभ्यो मानी चैव भविष्यति ॥ १५

---

1. ग—अयमस्म्यसितापाङ्गे ब्रूहि किं करवाणि ते ।
कुन्ति—
कश्चिन्मे ब्रह्मवित्प्रादाद्वरविद्यां च शत्रुहन् ॥
तद्विजिज्ञासयाऽऽह्वानं कृतवत्यस्मि ते विभो ।
एतस्मिन्नपराधे त्वां शिरसाऽभिप्रसादये ॥
योषितो हि सदा रक्ष्यास्त्वपराधेऽपि नित्यशः ।
सूर्यः—
वेदाहं सर्वमेवैतद्यद्दुर्वासा वरं ददौ ॥
सन्त्यज्योभे मानभये क्रियतां सङ्गमो मया ।
अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे ॥
वृथाह्वानाद्धि ते भीरु दोषो हि स्यादसंशयम् ।
वैशम्पायनः—
एवमुक्ता बहुविधं सान्त्वपूर्वं विवस्वता ॥
सा तु नैच्छद्वरारोहा कन्याहमिति पार्थिव ।
बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी ॥
तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ।
सूर्यः— [अधिकः पाठः]

2. क-ख-ग-घ—नास्य किञ्चिददेयं च
3. क-ख-ग-घ—न क्षमं 4. अ—दाप्यं न चैव विप्रेभ्यः ।

वैशम्पायनः—

एवमुक्ता ततः कुन्ती गोपतिं प्रत्युवाच ह ।
कन्या पितृवशा चाहं पुरुषार्थो न चैव मे ॥ १६

सूर्यः—

यद्येवं मन्यसे भीरु किमाह्वयसि भास्करम् ।
यदि मामवजानासि ऋषिस्स न भविष्यति ॥ १७

मन्त्रदानेन [1]यस्य त्वम् अवलेपेन दर्पिता ।
कुलं च तेऽद्य धक्ष्यामि क्रोधदीप्तेन चक्षुषा ॥ १८

कुन्ती—

प्रसीद भगवन् [2]देव अवलेपो हि नास्ति मे ।
[3]ममैव परिहार्यं स्यात् कन्याभावस्य दूषणम् ॥ १९

सूर्यः—

व्यपयातु भयं तेऽद्य कुमारं [4]प्राप्स्यसे शुभे ।
मया त्वं चाभ्यनुज्ञाता पुनः कन्या भविष्यसि ॥ २०

वैशंपायनः—

एवमुक्ता ततः कुन्ती संप्रहृष्टतनूरुहा ।
संगता च तदा सुभ्रूर् आदित्येन महात्मना ॥ २१

प्रकाशकर्मा तपनः कन्यागर्भं [5]दधौ ततः ।
अजीजनत्ततो [6]वीरं सर्वशस्त्रभृतां वरम् ॥ २२

---

1. क-ख-ग—यस्मात्त्वं 2. क-ख-ग—मह्यं 3. क-ख-ग—त्वयैव
4. क-ख-ग-घ—प्रसमीक्षसे; घ—प्रसविष्यति
5. ख-ग-घ—ददौ 6. क-ख-ग—देवी

आमुक्तकवचश्श्रीमान् कुण्डलाभ्यां समावृतः ।
सोऽजायत तदा वीरस् सर्वलोकेषु विश्रुतः ॥ २३

मञ्जूषां रत्नसंपूर्णां कर्णना[1]मभिसंज्ञिताम् ।
गूहमाना[2]पचारं तं बन्धुपक्षभयात्तदा ॥ २४

उत्ससर्ज जले कुन्ती तं कुमारं सलक्षणम् ॥ २४॥

प्रादाच्च तस्याः कन्यात्वं पुनस्स परमद्युतिः ।
दत्वा च वरदश्रेष्ठो दिवमाचक्रमे पुनः ॥ २५॥

तमुत्सृष्टं तदा गर्भं राधाभर्ता महायशाः ।
पुत्रत्वे कल्पयामास भार्यायास्सूतनन्दनः ॥ २६॥

नामधेयं च चक्राते तस्य बालस्य तावुभौ ।
समाहृतोऽयं वसुना वसुषेणेति नामतः ॥ २७॥

स वर्धमानो बलवान् सर्वास्त्रेष्वृद्यतोऽभवत् ।
[3]आपृष्टतापाच्चादित्यम् उपतस्थे कृताञ्जलिः ॥ २८॥

यस्मिन् काले [4]तपन्नास्ते स वीरस्सत्यसङ्गरः ।
नादेयं ब्राह्मणायासीत् तस्मिन् काले महात्मनः ॥ २९॥

ततः काले [5]तु कस्मिंश्चित् स्वप्नान्ते कर्णमब्रवीत् ।
आदित्यो ब्राह्मणो भूत्वा शृणु वीर वचो मम ॥ ३०॥

---

1. क-ख-ग—म्ना समाश्रिताम । 2. क-ख-ग—कुमारं तं
3. घ—आपृष्टतापमादित्यं 4 क-ख-ग-घ—ज 5. घ—महः कश्चित्

प्रभातायां रजन्यां त्वाम् आगमिष्यति वासवः ।
न तस्य [1]विप्रदातव्यं विप्ररूपी भविष्यति ॥ ३१॥

निश्चयोऽस्यापहर्तुं ते कवचं कुण्डले तथा ।
अतस्त्वां बोधयाम्येष स्मर्तासि वचनं मम ॥ ३२॥

कर्णः—

शक्रो मां विप्ररूपेण यदि वै याचते द्विज ।
कथं चास्मै न दास्यामि यथा चास्म्यवबोधितः ॥ ३३॥

विप्राः पूज्यास्तु देवानां [2]प्रियं मेऽस्त्विति ब्राह्मणः ।
[3]तदेवमेव जानन् वै न शक्रोऽस्यवमन्त्रणे ॥ ३४॥

सूर्यः—

यद्येवं शृणु मे वीर वरं ते सोऽपि दास्यति ।
शक्तिं त्वमपि याचेथास् सर्वश[4]स्त्र[5]विबाधिनीम् ॥ ३५॥

वैशंपायनः—

एवमुक्त्वा द्विजस्त्वग्रे तत्रैवान्तरधीयत ।
कर्णः प्रबुद्धस्तं स्वप्नं चिन्तयानोऽभवत्तदा ॥ ३६॥

तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थं भूतभावनः ।
कुण्डले प्रार्थयामास कवचं च महाद्युतिः ॥ ३७॥

---

1. क-ख-ग-घ—भिक्षा दात्तया
2. क-ख-ग—स्तत्तं प्रियमिच्छताम् ।
3. क-ख-ग—तं देवदेवं, घ—तमेव देवं
4. ख-ग-घ—त्रु
5. क-ख-ग-घ—विघातिनीम् ।

उत्कृत्याविमनास्त्वाङ्गात् कवचं रुधिरस्रवम् ।
[1]कर्णपाशौ च द्वे छित्त्वा प्रायच्छत्स कृताञ्जलिः ॥३८॥
अहो साहसमित्येवं मनसा वासवो हसन् ।
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ ३९॥
न तं पश्यामि को ह्येतत् कर्म कर्ता भविष्यति ।
प्रीतोऽस्मि कर्मणा तेन वरं वृणु यमिच्छसि ॥ ४०॥

कर्णः—

इच्छामि भगवन्दत्तां शक्तिं शत्रुनिबर्हिणीम् ॥ ४१

वैशंपायनः—

शक्तिं तस्मै ददौ शक्रो विस्मितो वाक्यमब्रवीत् ॥ ४१॥
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
यस्मै क्षेप्स्यसि रुष्टस्सन् सोऽनया न भविष्यति ॥ ४२॥
हत्वैकं समरे शत्रुं ततो मामागमिष्यति ॥ ४३
पुरा नाम तु तस्याऽऽसीद् वसुषेण इति स्मृतम् ।
ततो वै कर्तनःकर्णस् स तस्मात्कारणादि[2]तः ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥
॥ ७ ॥ संभवपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

---

1. क-ख-ग—स्तु कुण्डले छित्वा
2. क-ख-ग-घ—ति

॥ षडधिकशततमोऽध्यायः ॥

कुन्तीविवाहः ॥ १ ॥ माद्रीविवाहः ॥२॥ पाण्डोर्दिग्विजयः ॥ ३ ॥ मृगयार्थमरण्यं गतस्य पाण्डोः किन्दमेन शापः ॥ ४ ॥

वैशंपायनः—

रूपशीलगुणोपेता धर्मकामा नरर्षभ ।
दुहिता कुन्तिभोजस्य कुन्ती राष्ट्रे पतिंवरा ॥ १

सिंहदंष्ट्रं महास्कन्धम् ऋषभाक्षं महास्वनम् ।
पातिं वव्रे महेष्वासं पाण्डुं कुन्ती यशस्विनी ॥ २

भूमिपालसहस्राणाम् अग्रतस्स तया वृतः ।
युयुजे भरतश्रेष्ठः पौलोम्या मघवानिव ॥ ३

यात्वा देवव्रतेनापि मद्राणां पुटभेदनम् ।
विश्रुता त्रिषु लोकेषु माद्री मद्रपतेस्सुता ॥ ४

सर्वराजसु विख्याता रूपेणासदृशी भुवि ।
पाण्डोरर्थे धनुष्क्रीता मद्रराजेश्वरात्मजा ॥ ५

विवाहं कारयामास भीष्मः पाण्डोर्महात्मनः ॥ ५॥

सिंहोरस्कं महेष्वासं वृषभाक्षं महास्वनम् ।
दृष्ट्वा पाण्डुं नरव्याघ्रं व्यस्मयन्त नरा भुवि ॥ ६॥

कृतोद्वाहस्ततः पाण्डुर् बलोत्साहसमन्वितः ।

गोप्ता भरतवंशस्य पाण्डुस्सर्वास्त्रकोविदः ॥ ७॥
[1]जिहीर्षमाणो वसुधां ययौ शत्रूननेकशः ॥ ८
पूर्वमागस्कृतो गत्वा दशार्णास्समरे हताः ।
पाण्डुना नरसिंहेन कौरवाणां यशोभृता ॥ ९
ततस्सेनामुपादाय पाण्डुर्नानाविधध्वजाम् ।
समृद्धहयपादाताम् अप्रमेयहयद्विपाम् ॥ १०
हत्वा काशीषु वङ्गेषु [2]सुह्मेषु च नराधिपान् ।
स्वबाहुबलवीर्येण कुरूणामकरोद्यशः ॥ ११
आगस्कृत् सर्ववीराणां वैरी सर्वकुरुक्षिताम् ।
बहूनामागसां कर्ता वैरी सर्वमहीक्षिताम् ॥ १२
गोप्ता मगधवंशस्य दार्वो राजगृहे हतः ॥ १२॥
ततः कोशं समादाय वाहनानि बलानि च ।
पाण्डुना मिथिलां यात्वा मैथिलास्समरे जिताः ॥ १३॥
तं शरौघं महावेगम् अस्त्रज्वलितपावकम् ।
पाण्डुमासाद्य राजानो न शेकुरतिवर्तितुम् ॥ १४॥
ते ससेनाः स्म यानेन विध्वंसितमहाबलाः ।
पाण्डुना पृथिवीपालाः कुरुकर्मसु योजिताः ॥ १५॥

1. क-ख-ग—जिगीषमाणो
2. क-ख-ग-घ—पौण्ड्रेषु च नराधिपाः।

तेन ते निर्जितास्सर्वे पृथिव्यां सर्वपार्थिवाः ॥ १६

तमेकं मेनिरे शूरं देवेष्विव पुरन्दरम् ।
ते कृताञ्जलयश्शूरम् आसाद्य वसुधाधिपाः ॥ १७

आजह्रुर्धनधान्यानि रत्नानि विविधानि च ।
मणिप्रवालमुक्तानि सुवर्णरजतं तथा ॥ १८

गोरत्नानि च मुख्यानि रथरत्नानि कुञ्जरान् ।
खरोष्ट्रमाहिषान् गाश्च यच्च किञ्चिदजाविकम् ॥ १९

तत्सर्वं प्रतिजग्राह राजा नागपुराधिपः ॥ १९॥
तदादाय ययौ पाण्डुर् भृशं मुदितवाहनः ॥ २०

हर्षयन् सर्वराष्ट्राणि पुरं च गजसाह्वयम् ॥ २०॥

शन्तनो राजसिंहस्य भरतस्य च धीमतः ।
नष्टा कीर्तिस्स्ववंशस्य पाण्डुना पुन[1]राहृता ॥ २१॥

ये पूर्वं परराष्ट्राणि जह्रुः परधनानि च ।
ते नागपुरसिंहेन पाण्डुना वशगाः कृताः॥ २२॥

इत्यभाषन्त राष्ट्राणि भूमिपालाश्च संगताः ।
अभ्यनन्दंश्च वै पाण्डुम् आशीर्वादैः पृथग्विधैः ॥ २३॥

प्रसन्नमनसो भूत्वा बान्धवाः कुरुभिस्सह ।

1. क-ख-ग-घ—रुद्धृता ।

प्रत्युद्ययुस्तं संप्राप्तं सर्वे भीष्मपुरस्सराः ॥ २४॥
ते तु दीर्घमिवायान्तं गत्वा नागपुरालयाः ।
आवृतं ददृशुर्लोकं हृष्टा बहुविधैर्धनैः ॥ २५॥
नानायानसमानीतैः रत्नैरुच्चावचैस्तथा ॥ २६
अजाविकाश्वसङ्घानाम् उष्ट्रगोमहिषस्य च ।
नान्तं ददृशुरासाद्य भीष्मेण सह कौरवाः ॥ २७
सोऽभिवाद्य पितुः पादौ कौसल्यानन्दवर्धनः ।
यथार्हं मानयामास पौरजानपदानपि ॥ २८
प्रमथ्य परराष्ट्राणि कृतार्थं पुनरागतम् ।
पुत्रमासाद्य भीष्मस्तु हर्षादश्रूण्यवर्तयत् ॥ २९
स तूर्यशतसङ्घैश्च भेरीणां च महास्वनैः ।
हर्षयन् सर्वभूतानि विवेश गजसाह्वयम् ॥ ३०
धृतराष्ट्राभ्यनुज्ञातम् स्वबाहुविजितं धनम् ।
भीष्माय सत्यवत्यै च मात्रेवोपजहार तत् ॥ ३१
विदुराय च वै पाण्डुः प्रेषयामास तद्धनम् ।
सुहृदश्चापि धर्मात्मा धनेन समतर्पयत् ॥ ३२
ततस्सत्यवती भीष्मः कौसल्या च यशस्विनी ।
शुभैः पाण्डुजितैः रत्नैर् भृशं तुतुषुराहृतैः ॥ ३३
ननन्द मनसा कौसल्या तमप्रतिमतेजसम् ।

जयन्तमिव पौलोमी परिष्वज्य नरर्षभम् ॥ ३४

तस्य वीरस्य विक्रान्तैस् [1]सहस्रशतदक्षिणैः ।
अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥ ३५

संप्रयुक्तश्च कुन्त्या च माद्र्या च संतत नृपः ।
जितेन्द्रियस्तदा पाण्डुर् बभूव वनगोचरः ॥ ३६

हित्वा प्रासादपङ्क्तीश्च शुभानि शयनानि च ।
चापपाणिर्मृगान्निघ्नन् बभूव मृगयापरः ॥ ३७

स चरन् दक्षिणं पार्श्वं रम्यं हिमवतो गिरेः ।
उवास गिरिशृङ्गेषु महासाल्ववनेषु च ॥ ३८

बभूव कुन्त्या माद्र्या च पाण्डुस्सह वनेचरः ।
द्विपराजः करेणुभ्यां यथा मध्यगतस्तथा ॥ ३९

चरन्तं सह भार्याभ्यां बाणखड्गधनुर्धरम् ।
विचित्रकवचं वीरं परमास्त्रविदं नृपम् ॥ ४०

देवोऽयमित्यमन्यन्त चरन्तो वनवासिनः ॥ ४०॥

तस्य कामांश्च भोगांश्च नरा नित्यमतन्द्रिताः ।
अनुजह्रुर्वनान्तेषु धृतराष्ट्रप्रचोदिताः ॥ ४१॥

तदासाद्य महारण्यं मृगव्यालनिषेवितम् ।

---

1. क-ग—:पाण्डोर्बाहुविनिर्जितैः ।
असंख्येयै र्धनै राजा सहस्रशतदक्षिणैः ॥ [अधिकः पाठः]

तत्र मैथुनकालस्थं ददर्श मृगयूथपम् ॥ ४२॥

स च तं च मृगीं चैव रुक्मपुङ्खैस्सवाजिभिः ।
निर्बिभेद शरैस्तूर्णं पाण्डुः पञ्चभिरायसैः ॥ ४३॥

स च राजन् महातेजा ऋषिपुत्रस्तपोयुतः ।
भार्यया सह तेजस्वी मृगरूपेण संगतः ॥ ४४॥

[1]स संयुक्तस्तथा मृग्या मानुषीं वाचमीरयन् ।
क्षणेन पतितो भूमौ विललापातुरो मृगः ॥ ४५॥

मृगः—

काममन्युवशं प्राप्ता बुद्ध्यान्तरगता अपि ।
वर्जयन्ति नृशंसानि पापेष्वभिरता नराः ॥ ४६॥

न विधिं ग्रसते प्रज्ञा प्रज्ञां तां ग्रसते विधिः ।
विधिपर्यागतानर्थान् प्रज्ञया परिपश्यति ॥ ४७॥

तस्माद्धर्मात्मनो मुख्ये कुले जातस्य भारत ।
कामलोभाभिभूतस्य कस्मात्ते छलिता मतिः ॥ ४८॥

पाण्डुः—

या वै शत्रुवधे वृत्तिस् सा मृगाणां वधे ध्रुवा ।
[2]राज्ञां मृगवनानीह किं त्वं मोहाद्विगर्हसे ॥ ४९॥

---

1. क-ग—मृगो ऋषि मृगी भार्या उभौ तौ तपसाऽन्वितौ ।
रेमाते विपिने भूत्वा निरङ्कुशरतेक्षणौ ॥ [अधिकः पाठः]
2. घ—नरा मृग विजानीहि किं त्वं मोहाद्विकत्थसे ।

अमायया ह्यच्छलेन मृगाणामिषुधारिभिः ।
वध एव भवेद्धर्मस् तद्विद्वान् किं विगर्हसे ॥ ५०॥

अगस्त्यस्सत्रमासीनश् चचार मृगयामृषिः ।
आरण्यान् सर्वदेवत्यान् पशून् प्रेक्ष्य महावने ॥ ५१॥

प्रमाणदृष्टं धर्मस्य शास्त्रं किं त्वं विगर्हसे ।
अगस्त्यस्याभिचारेण युष्माकं हि वपा हृता ॥ ५२॥

मृगानेव समुद्दिश्य विमुञ्चन्ति पुनश्शरान् ।
न रिपूणां समाधानं परीक्षन्ते पुरातनाः ॥ ५३॥

रन्ध्र एषां विशेषेण वधकालः प्रशस्यते ॥ ५४

प्रमत्तमप्रमत्तं वा निकृत्या घ्नन् विषेण च ।
उपायैरिषुभिस्तीक्ष्णैर् मृग कस्माद्विगर्हसे ॥ ५५

मृगः—
नाहं घ्नन्तं मृगान् राजन् विगर्हे त्वामधर्मणा ।
मैथुनं संप्रतीक्ष्यं मे त्वया स्यादानृशंस्यवत् ॥ ५६

सर्वभूत[1]हितः कालस् सर्वभूतहितश्च सः ।
नृशंसं कर्म सुमहत् सर्वलोकविगर्हितम् ॥ ५७
पुरुषार्थफलं कालं यत्त्वया वितथः कृतः ॥ ५७॥

1. घ—हितं काले सर्वभूतेप्सितं तथा ।

[1]नीतिमार्गप्रतिष्ठस्य भरतस्य महात्मनः ।
वंशे जातस्य राजेन्द्र नानुरूपमिदं तव ॥ ५८॥

अस्वर्ग्यमयशस्यं च अधर्मिष्ठं च भारत ।
को हि विद्वान् मृगं हन्याच्चरन्तं मैथुनं वने ॥ ५९॥

स्त्रीभोगानां विशेषज्ञश्शास्त्रधर्मार्थतत्त्ववित् ।
नार्हस्यमरसंकाश कर्तुमाचारमीदृशम् ॥ ६०॥

त्वया नृशंसं कर्तारः पापाचाराश्च ये नराः ।
निग्राह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः ॥ ६१॥

किं कृतं ते नरश्रेष्ठ निघ्नतो मामनागसम् ।
मुनिं मूलफलाहारं मृगवेषधरं नृप ॥ ६२॥

वसमानमरण्येषु नित्यं शमपरायणम् ॥ ६३

त्वयाऽहं निहतो यस्मात् तस्मात्त्वामप्यनागसम् ।
द्वयोर्नृशंसकर्तारम् अवशं काममोहितम् ॥ ६४

जीवितान्तकरो भावो मैथुने समुपेष्यति ॥ ६४॥

अहं हि किन्दमो नाम तपसाऽप्रतिमो मुनिः ॥ ६५

अपत्रपाभिभूतानां नराणां मैथुनं प्रियम् ।
मृगो भूत्वा मृगीष्वेव मैथुने विचराम्यहम् ॥ ६६

1. क-ग—राजर्षीणां पुराणानां तेषामक्लिष्टकर्मणाम् ।
ख—सर्वधर्मार्थतत्त्वज्ञ कुरूणां कीर्तिवर्धन ॥ [अधिकः पाठः]

[1]न हि ते ब्रह्महत्येयं भविष्यति न जानतः ।
मृगरूपधरं हत्वा मामेवं काममोहितम् ॥ ६७

अस्य तु त्वं फलं मूढ प्राप्स्यसीदृशमेव हि ।
प्रियया सह संवासं प्राप्य कामविमोहितः ॥ ६८

त्वमप्यस्यामवस्थायां प्रेतलोकं गमिष्यसि ॥ ६८॥

अन्तकाले च संवासं यया गन्तासि कान्तया ॥ ६९

प्रेतराजवशं प्राप्तं सर्वभूतदुरत्ययम् ।
भक्त्या भक्तिमतां श्रेष्ठा सा वै त्वामनुयास्यति ॥ ७०

वर्तमानस्सुखे दुःखं यथाऽहं प्रापितस्त्वया ।
तथा सुखं त्वं संप्राप्य दुःखमभ्यागमिष्यसि ॥ ७१

एवमुक्त्वा सुदुःखार्तो जीवितात् स व्ययुज्यत ।
मृगः पाण्डुश्च शोकार्तः क्षणेन समपद्यत ॥ ७२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि षडधिकशततमोऽध्यायः ॥ १०६ ॥
॥ ७ ॥ संभवपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
[अस्मिन्नध्याये ७२ श्लोकाः]

---

1. क-ग—गजाश्वमहिषादीनां लज्जा नास्ति चतुष्पदाम् ।
लज्जाशङ्काभीतिहीनं मैथुनं परमं सुखम् ॥
तत्सुखं द्विपदां नास्ति विद्यते यच्चतुष्पदाम् ।
नृपाणां मृगया धर्मस्तत्रापि न वधस्स्मृतः ॥
मैथुनासक्तचित्तस्य मृगद्वन्द्वस्य भूमिप । [अधिकः पाठः]

॥ सप्ताधिकशततमोऽध्यायः ॥

पाण्डोर्वानप्रस्थाश्रमप्रवेशः ॥ १ ॥ पाण्डोस्तपश्चरणम् ॥ २ ॥ विदुरस्य विवाहः ॥ ३ ॥ पुत्रोत्पत्तिश्च ॥ ४ ॥

वैशम्पायनः—

तमतीतमुपक्रम्य राजा स्वमिव बान्धवम् ।
सभार्यश्शोकमोहार्तः पर्यदेवयदातुरः ॥ १

पाण्डुः—

सतामपि कुले जाताः कर्मणा चातिदुर्गतिम् ।
प्राप्नुवन्ति दुरात्मानः कामजालप्रमोहिताः ॥ २

कुले धर्मात्मनां जातः कामात्मा किल भारतः ।
जीवितान्तमनुप्राप्तो बालभावे पिता मम ॥ ३

तस्य कामात्मनः क्षेत्रे राज्ञस्संय[1]मवानृषिः ।
कृष्णद्वैपायनस्साक्षाद् भगवान् मामजीजनत् ॥ ४

तस्य मे व्यसने बुद्धिस् संजातेयमिहाधमा ।
त्यक्तस्य देवैर्विषमान्मृगयायां दुरात्मनः ॥ ५

मोक्ष एव व्यवस्यामि बद्धं हि व्यसनं महत् ।
सद्वृत्तिमनुवर्तिष्ये तामहं पितुरव्ययाम् ॥ ६

1. क-ख-ग-घ—त

अतीव तपसाऽऽत्मानं योजयिष्याम्यसंशयम् ॥ ६॥
तस्मादेकाहमेकाहम् एकैकस्मिन् वनस्पतौ ।
चरन् भिक्षां मुनिर्मुण्डश् चरिष्यामि महीमिमाम् ॥ ७॥
पांसुना च प्रतिच्छन्नश् शून्यागारप्रतिश्रयः ।
वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ॥ ८॥
न शोको न प्रहर्षश्च तुल्यनिन्दात्मसंस्तुतिः ।
निराशीर्निर्नमस्कारो निर्द्वन्द्वो निष्परिग्रहः ॥ ९॥
न जात्वभिहसन् किञ्चिन्नकुर्वन् भ्रुकुटीं क्वचित् ॥ १०
प्रसन्नवदनो नित्यं सर्वप्राणभृतः पुनः ।
जङ्गमाजङ्गमं सर्वं अविहिंसंश्चतुर्विधम् ॥ ११
प्रजावर्गे स्ववर्गस्थस् समस्सर्वप्रजाः प्रति ।
एककालं चरन् भिक्षां कुलानि द्वे च पञ्च च ॥ १२
असंभवे वा भैक्षस्य चरन्ननशनान्यपि ।
अल्पमल्पं यथा भोज्यं पूर्वलाभं च जातु चित् ॥ १३
नित्यं नातिचरन् लाभे अलाभे सप्त पूरयन् ॥ १३॥
वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ।
नाकल्याणं न कल्याणं ध्यायन्नुभययोरपि ॥ १४॥
याःकाश्चिज्जीवता शक्याः [1]त्यक्तं नित्यं क्षमाः क्रियाः ।

1. अ—तित्यक्षताः क्रियाः।

तास्सर्वास्समतिक्रम्य निमेषादिष्ववस्थिताः ॥ १५॥

न जिजीविषुवत् किञ्चिन्न मुमूर्षुवदाचरन् ।
मरणं जीवितं चोभे नाभिनन्दन् न च द्विषन् ॥ १६॥

तासु चाप्यनवस्थासु त्यक्तसर्वक्रियेन्द्रियः ।
संपरित्यक्तसर्वास्थस् सुनिर्निक्तात्मकिल्बिषः ॥ १७॥

विमुक्तस्सर्वपापेभ्यो व्यतीतस्सर्ववागुराः ।
न वशे कस्य चित्तिष्ठन् सधर्मा मातरिश्वनः ॥ १८॥

एतया सततं वृत्त्या चरन्नेकप्रकारया ।
देहं संस्कारयिष्यामि निर्भयं स्थानमाश्रितः ॥ १९॥

नाहं श्वाचरिते मार्गे निर्वीर्यकृपणोचिते ।
स्वधर्मात् सततापेते रमेयं धीरवर्जिते ॥ २०॥

सत्कृतोऽसत्कृतो वापि योऽन्यं कृपणचक्षुषा ।
उपैति वृत्तिकामत्वात् [1]स शुनां वर्तते पथि ॥ २१॥

वैशंपायनः—

एवमुक्त्वा तु दुःखा[2]र्तम् अपश्यद्भरतर्षभः ।
अवेक्षमाणः कुन्तीं च माद्रीं च समभाषत ॥ २२॥

पाण्डुः—

कौसल्या विदुरः क्षत्ता राजा च सह बन्धुभिः ।

---

1. क-ग—सिद्धिमिच्छन्सनातनीम् ।
2. क-ख-ग-घ—र्तो निश्श्वसन् भरतर्षभ ।

आर्या सत्यवती भीष्मस् ते च राजपुरोहिताः ॥ २३॥

ब्राह्मणाश्च महाभागे सोमपास्संशितव्रताः ।
पौरवृद्धाश्च ये तत्र निवसन्त्यस्मदाश्रयाः ॥ २४॥

प्रसाद्य सर्वे वक्तव्याः पाण्डुः प्रव्राजितो वनम् ॥ २५

वैशंपायनः—

श्रुत्वा च वचनं भर्तुस् त्यागधर्मकृतात्मनः ।
तत्समं वचनं कुन्ती माद्री च सम्भाषताम् ॥ २६

कुन्तीमाद्र्यौ—

[1]अन्येऽपि ह्याश्रमास्सन्ति ये शक्या भरतर्षभ ।
आवाभ्यां सह संवस्तुं धर्ममाश्रित्य चिन्तिताः ॥ २७

आवाभ्यां धर्मपत्नीभ्यां सह तप्त्वा महत्तपः ।
[2]वसेह भविता सार्थस् स्वर्गस्यापि न संशयः ॥ २८

प्रणिधायेन्द्रियग्रामं भर्तृलोके नरर्षभ ।
त्यक्तकामसुखे ह्यावां राजंस्तप्स्यावहे तपः ॥ २९

यदि वाऽऽवां महाभाग त्यक्ष्यस्येव विशां पते ।
अद्यैवाऽऽवां प्रहास्यावो जीवितं भरतर्षभ ॥ ३०

पाण्डुः—

यदि व्यवसितं त्वेवं युवाभ्यां धर्ममिश्रितम् ।

---

1. क-ग—अन्यस्तव ह्याश्रमोऽस्ति यश्शक्यो भरतर्षभ ।
2. क-घ—त्वमेव भविता योग्यः

सद्वृत्तिमनुवर्तिष्ये तामहं पितुरव्ययाम् ॥ ३१

त्यक्तग्राम्यसमाचारस् तप्यमानो महत्तपः ।
वल्कली फलमूलाशी चरिष्यामि महावने ॥ ३२

अग्निं जुह्वदुभौ कालावुभौ कालावुपस्पृशन् ।
कृशः परिमिताहारश् चीरधर्मजटाधरः ॥ ३३

शीतवातातपसहः क्षुत्पिपासाश्रमाहितः ।
तपसा विधियुक्तेन शरीरं परिशोषयन् ॥ ३४

एकान्तशीलो विमृशन् पक्वापक्वेन वर्तयन् ।
पितॄन् [1]देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ॥ ३५

वानप्रस्थजनस्यापि दर्शयन् कुलवासिनः ।
नाप्रियाणि चरञ्जातु किं पुनर्ग्रामवासिनः ॥ ३६

एवमारण्यशास्त्राणाम् उक्तमुग्रं तपोविधिम् ।
सेवमानः प्रतीक्षिष्ये देहस्यास्य विमोक्षणम् ॥ ३७

[2]वैशंपायनः—

एवमुक्त्वा स भार्ये ते राजा कौरववंशजः ।

---

1. क-ग—देवानृषीन् पितॄंश्चैव मन्त्रैरद्भिरतर्पयन् ।
2. कुन्ती—
क-ग-घ—आवाभ्यां धर्मपत्नीभ्यां यत्तप्यं तन्महत्तपः ।
त्वमेव भव नस्सार्धं धर्मेण तेन नित्यशः ॥
प्रणिधायेन्द्रियग्रामं भर्तृलोकसुखाय च ।
त्यक्तकामसुखे ह्यावां राजंस्तप्यावहे तपः ॥
[अधिकः पाठः]

ततश्चूडामणिं निष्कान् अङ्गदे कुण्डलानि च ॥ ३८
मकुटं हारसूत्रं च काटिबन्धं तथैव च ।
वासांसि विमलाः खड्गास् स्त्रीणामाभरणानि च ॥ ३९
वाहनानि च मुख्यानि शस्त्राणि विविधानि च ।
हेमभाण्डानि दिव्यानि पर्यङ्कास्तरणानि च ॥ ४०
मणिमुक्ताप्रवालानि वसूनि विविधानि च ।
आसनानि च मुख्यानि बहूनि विविधानि च ॥ ४१
प्रदाय सर्वं विप्रेभ्यः पाण्डुः पुनरभाषत ॥ ४१॥

पाण्डुः—

गत्वा नागपुरं वाच्यं पाण्डुः प्रव्राजितो वने ॥ ४२
अर्थं कार्यं रतिं चैव रत्नानि विविधानि च ।
[1]व्रतस्थस्सर्वमुत्सृज्य सभार्यो [2]भरतर्षभ ॥ ४३

वैशम्पायनः—

ततस्तस्यानुयातारस् सर्वे च परिचारकाः ।
श्रुत्वा भरतसिंहस्य विविधाः करुणा गिरः ॥ ४४
भीममार्तस्वरं कृत्वा हा हेति परिचुक्रुशुः ॥ ४४॥
उष्णमास्रं प्रमुञ्चन्तस् तमालोक्य यशस्विनम् ।
ययुर्नागपुरं तूर्णं सर्वमादाय तद्धनम् ॥ ४५॥

1. क-ग-घ—प्रतस्थे 2. ख-ग-घ—दुःखमोहितः।

ते गत्वा नगरं राज्ञे यथावृत्तं महात्मने ।
कथयाञ्चक्रिरे सर्वं धनं च विविधं ददुः ॥ ४६॥

गृहीत्वा धृतराष्ट्रस्तु धनं भरतसत्तम ।
कृपायुक्तो महाबाहुः पाण्डुमेव स्म शोचति ॥ ४७॥

राजपुत्रस्तु कौरव्यो मुनिर्मूलफलाशनः ।
जगाम सह भार्याभ्याम् आशु नागसहं गिरिम् ॥ ४८॥

स चैत्ररथमासाद्य [1]वारिषेणमवाप्य च ।
[2]वारिषेणमतिक्रम्य गत्वा गन्धरजोवहम् ॥ ४९॥

रक्ष्यमाणो महाभूतैस् सिद्धैश्च परमर्षिभिः ।
उवास सततं राजा समेषु विषमेषु च ॥ ५०॥

इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गे महाप्राज्ञस् तापसस्समपद्यत ॥ ५१॥

तत्रापि तपसि श्रेष्ठे वर्तमानः परन्तपः ।
सिद्धचारणसंघानां बभूव परमप्रियः ॥ ५२॥

शुश्रूषुरनहंवादी संयतात्मा जितेन्द्रियः ।
स्वर्गं गन्तुं पराक्रान्तस् स्वेन वीर्येण भारत ॥ ५३॥

केषांचिदभवद्भ्राता केषांचिदभवत् सखा ।
ऋषिभिस्त्वभवत्कैश्चित् पुत्रवत् परिरक्षितः ॥ ५४॥

1. क-ग-घ—पा 2. क-ग-घ—पा

स तु कालेन महता प्राप्य निष्कल्मषं तपः ।
ब्रह्मर्षिसदृशः पाण्डुर् अभवद्भरतर्षभ ॥ ५५॥

अमावास्यां तु सहिता ऋषयस्संशितव्रताः ।
ब्रह्माणं द्रष्टुकामास्ते संप्रतस्थुर्मनीषिणः ॥ ५६॥

संप्रस्थितानृषीन् दृष्ट्वा पाण्डुर्वचनमब्रवीत् ॥ ५७

पाण्डुः—

भवन्तः क्व गमिष्यन्ति ब्रूत मे वदतां वराः ॥ ५७॥

ऋषयः—

समवायो महानद्य ब्रह्मलोके महात्मनाम् ।
देवानां च ऋषीणां च पितॄणां च महात्मनाम् ॥ ५८॥

वयं तत्र गमिष्यामो द्रष्टुकामास्स्वयम्भुवम् ॥ ५९

वैशम्पायनः—

पाण्डुमुत्थाय सहसा गन्तुकामं मनीषिभिः ।
स्वर्गमार्गं तितीर्षन्तं शतशृङ्गादुदङ्मुखम् ॥ ६०

प्रस्थितं सह भार्याभ्याम् अब्रुवंस्ते तु तापसाः ॥ ६०॥

उपर्युपरि गच्छन्तश् शैलराजमुदङ्मुखाः ।
प्रपश्यामो गिरिं तस्मिन् दुर्गान् देशान् बहून् वयम् ॥ ६१॥

यक्षराक्षसगुह्यानि गन्धर्वचरितानि च ।
आक्रीडितान्यप्सरोभिस् सह देवगणैस्सदा ॥ ६२॥

सदनानि कुबेरस्य हृद्यानि च मृदूनि च ।
तेषां नदं नितम्बांश्च घोरांश्च गिरिगह्वरान् ॥ ६३॥

सन्ति नित्यहिमा देशा निवृत्तमृगपक्षिणः ।
सन्ति कोचित् सदावर्षा घोररूपा दुरासदाः ॥ ६४॥

पक्षिणां न गतिस्तत्र कथमेवापरे मृगाः ।
वायुरेवात्र संयाति सिद्धा यक्षाश्च चारणाः ॥ ६५॥

गच्छन्त्यौ शैलराजेऽस्मिन् राजपुत्र्यौ कथं त्विमे ।
न सीदेतामदुःखार्हे मा गमो भरतर्षभ ॥ ६६॥

पाण्डुः—

अप्रजस्य किल स्वर्गम् अद्वारं संप्रचक्षते ।
स हि सन्तापतप्तोऽहम् अप्रजश्च ब्रवीमि वः ॥ ६७॥

सोऽहमुग्रेण तपसा सभार्यस्त्यक्तजीवितः ।
अनपत्योऽपि विन्देयं स्वर्गमुग्रेण कर्मणा ॥ ६८॥

तापसाः—

अस्ति वै तव धर्मात्मन् विदुर्देवोपमं शुभम् ।
अपत्यमनघं त्विष्टं पश्यामो दिव्यचक्षुषा ॥ ६९॥

दैवादिष्टं मनुष्येन्द्र कारणेनोपपादय ।
अरिष्टं क्षिप्रमव्यग्रो विन्देथाः परमां गतिम् ॥ ७०॥

तस्मादिष्टफले तात कुरु यत्नं यथागमम् ।

अपत्यं गुणसंपन्नं लब्ध्वा प्रीतिमवाप्स्यसि ॥ ७१॥

वैशंपायनः—

तच्छ्रुत्वा तापसवचः कौरव्यस्समचिन्तयन् ।
मृगशापादपहताम् आत्मनो हीन्द्रियक्रियाम् ॥ ७२॥
अथ [1]पारशवीं कन्यां देवकस्य महीपतेः ।
रूपयौवनसंपन्नां स शुश्रावापगासुतः ॥ ७३॥
ततस्तु वरयित्वा ताम् आनाय्य पुरुषर्षभः ।
विवाहं कारयामास विदुरस्य महामतेः ॥ ७४॥
तस्यां चोत्पादयामास विदुरः कुरुनन्दनः ।
पुत्रान् विनयसंपन्नान् आत्मनस्सदृशान् गुणैः ॥ ७५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि सप्ताधिकशततमोऽध्याय. ॥ १०७ ॥
॥ ७ ॥ संभवपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
[अस्मिन्नध्याये ७५॥ श्लोकाः]

॥ अष्टाधिकशततमोऽध्यायः ॥

गान्धार्यां धृतराष्ट्राद्दुर्भोत्पत्तिः ॥ १ ॥ पुत्रजनने पाण्डोश्चिन्ता ॥२॥ व्युषिताश्वोपाख्यानम् ॥ ३ ॥

वैशंपायनः—

ततः पुत्रशतं जज्ञे गान्धार्यां जनमेजय ।
धृतराष्ट्रस्य वेश्यायाम् एकश्चैव शतात् परः ॥ १

1. घ—दाशरवीं

कथञ्चित् सदृशीं भार्यां गान्धारीं धर्मचारिणीम् ।
वर्तमानं प्रियेष्वेव धृतराष्ट्रोऽन्ववर्तत ॥ २

पाण्डोः कुन्त्यां च माद्र्यां च पञ्च पुत्रा महारथाः ।
समपद्यन्त देवेभ्यस् सन्तानाय कुलस्य च ॥ ३

[1]जनमेजयः—

एतत् सर्वं यथावृत्तं विस्तरेण तपोधन ।
कथयस्व न मे तृप्तिः कथ्यमानेषु बन्धुषु ॥ ४

कथं चापि स वैश्यायाम् एकश्चैव शतात् परः ॥ ४॥

कथं च सदृशीं भार्यां गान्धारीं धर्मचारिणीम् ।
वर्तमानां प्रियेष्वेव धृतराष्ट्रोऽन्ववर्तत ॥ ५॥

वैशम्पायनः—

तृषितं बुभुक्षितं शान्तं द्वैपायनमुपस्थितम् ।
तोषयामास गान्धारी स तु तस्यै वरं ददौ ॥ ६॥

सा वव्रे सततं भर्तुः पुत्राणां शतमात्मनः ।
ततः कालेन सा गर्भम् अगृह्णाज् ज्ञानचक्षुषः ॥ ७॥

गान्धार्यामाहिते गर्भे पाण्डुरम्बालिकासुतः ।

---

1. कं-ग-घ—कथं पुत्रशतं जज्ञे गान्धार्यां द्विजसत्तम ।
कियता वापि कालेन तेषामायुश्च किं परम् ॥
कथं च शतस्य ततः पाण्डोस्तेन महात्मना ।
समुत्पन्ना दैवतेभ्यः पञ्च पुत्रा महारथाः ॥
[अधिकः पाठः]

अगच्छत् परमं दुःखम् अपत्यार्थमरिन्दम ॥ ८॥

गर्भिण्यामथ गान्धार्यां पाण्डुः परमदुःखितः ।
मृगाभिशापादात्मानं शोचन्नुपहतक्रियः ॥ ९॥

स गत्वा तपसा सिद्धिं विश्वामित्रो यथा भुवि ।
देहन्यासे कृतमना इदं वचनमब्रवीत् ॥ १०॥

पाण्डुः—

चतुर्भिरृणवानित्थं जायते मनुजो भुवि ।
पितृदेवमनुष्याणाम् ऋषीणामथ भारत ॥ ११॥

एतेभ्यस्तु यथाकालं यो न मुच्येत [1]कालवित् ।
न तस्य लोकास्सन्तीति तथा लोकविदो विदुः ॥ १२॥

यज्ञेन देवान् प्रीणाति स्वाध्यायैस्तपसा ऋषीन् ।
पुत्रैश्श्राद्धैरपि पितॄन् आनृशंस्येन मानवान् ॥ १३॥

ऋषिदेवमनुष्याणाम् अतिमुक्तोऽस्मि सर्वदा ।
पितॄणां तु न मुक्तोऽस्मि तच्च तेभ्यो विशिष्यते ॥ १४॥

देहनाशे ध्रुवो नाशः पितॄणामथ निश्चयः ।
इतरेषां त्रयाणां तु नाशे ह्यात्मा विनश्यति ॥ १५॥

पितॄणामृणनाशाद्धि न प्रजा नाशमृच्छति ।
इह तस्मात् प्रजालाभे प्रयतन्ते द्विजोत्तमाः ॥ १६॥

---

1. क-ख-ग-घ—धर्मवित् ।

यथैवाहं पितुः क्षेत्रे सृष्टस्तेन महात्मना ।
तथैवास्मिन् मम क्षेत्रे कथं सृज्येत वै प्रजाः ॥ १७॥

वैशम्पायनः—

स समानीय कुन्तीं च माद्रीं च भरतर्षभः ।
आचष्ट पुत्रलाभस्य व्युष्टिं सर्वक्रियाधिकाम् ॥ १८॥

उत्तमादवराः पुंसः काङ्क्षन्ते पुत्रमापदि ।
अपत्यं धर्मफलदं श्रेष्ठादिच्छन्ति साधवः ॥ १९॥

अनुनीय तया सम्यङ्महाब्राह्मणसंसदि ।
ब्राह्मणं गुणवन्तं वै चिन्तयामास धर्मवित् ॥ २०॥

सोऽब्रवीद्विजने कुन्तीं धर्मपत्नीं यशस्विनीम् ॥ २१

पाण्डुः—

अपत्यस्य सुखं योगम् आपदि प्रसमर्थये ।
नानपत्यस्य मे लोके प्रतिष्ठा धर्मसंहिता ॥ २२

इति कुन्ति विदुर्धर्मं शाश्वतं धर्मचारिणः ॥ २२॥

इष्टं दत्तं तपस्तप्तं नियमाश्च स्वनुष्ठिताः ।
सर्वमेवानपत्यस्य मोघं भवति निश्चयम् ॥ २३॥

सोऽहमेवं व्यवसितं प्रेक्ष्यात्मानं न संक्षमे ।
अनपत्यो हि मरणं कामये नोत जीवितम् ॥ २४॥

मृगाभिशापाज्जानासि प्रजने मम केवलम् ।

नृशंसं कर्मणा कृत्स्नं यथाह्युपगतं तथा ॥ २५॥

षडेव बन्धुदायादा [1]निर्विष्टास्ताञ्छृणु प्रिये ॥ २६

स्वयं जातः क्षेत्रिकश्च परिक्रीतश्च यस्सुतः ।
पौनर्भवेयः कानीनो जारि[2]ण्याश्चैव जायते ॥ २७

दत्तः क्रीतोपहितकावुपगच्छेत्तथा स्वयम् ।
सहोढो जातरेताश्च भिन्नयोनिधृतश्च यः ॥ २८

पूर्वं पूर्वमसंभावे मत्वा लिप्सेत वै सुतम् ॥ २८॥

उत्तमादवरं जन्म काङ्क्षन्ते धर्मचारिणः ।
फलं महदपत्यस्य तस्य भूतिरनुग्रहः ॥ २९॥

आपद्यपत्यजननं मनुस्स्वायम्भुवोऽब्रवीत् ।
तस्मात् त्वां प्रहिणोम्यद्य पाहि मां प्रजनात्स्वयम् ॥ ३०॥

क्षत्रियाच्छ्रेयसो वापि सूष्वापत्यं यशस्विनि ॥ ३१

या हि ते भगिनी साध्वी श्रुतसेना तपस्विनी ।
[3]उवाह यां तु कैकेयश् शारदण्डायनिर्महान् ॥ ३२

सा वीरपत्नी स्वजनैर् नियुक्ताऽपत्यकर्मणि ।
पुष्पेण प्रयता स्नाता निशि कुन्ति चतुष्पथे ॥ ३३

---

1. क-ग-घ—पुत्रास्सद्धर्मदर्शिनः ।
षडेव बन्धुदायादा निर्दिष्टास्तान्शृणु प्रिये ॥
2. क-ख-ग-घ—ण्यां यश्च [अधिकः पाठः]
3. क-ग-घ—उदावहत्तां

अपत्यार्थे प्रजालाभे अन्वगच्छच्छुभव्रता ।
वरयित्वा द्विजं देवी कृते पुंसवने पुरा ॥ ३४
कर्मण्यवसिते तस्मिन् सा तेनैव सहावसत् ।
सा त्रीन् वीरानजनयद् दुर्जयादीन् महारथान् ॥ ३५
तथा त्वमपि कल्याणि ब्राह्मणं तपसाऽधिकम् ।
मन्नियोगात् कुरु क्षिप्रम् अपत्योत्पादकं महत् ॥ ३६

वैशंपायनः—

एवमुक्ता महाराज कुन्ती तं प्रत्यभाषत ।
कृपणामृषभं वीरं तदा भूमिपतिं पतिम् ॥ ३७

कुन्ती—

न मामर्हसि धर्मज्ञ वक्तुमेवं कथं चन ।
धर्मपत्नीं च पत्नीं च राजन् राजीवलोचन ॥ ३८
त्वमेव हि महाबाहो मय्यपत्यानि भारत ।
तथा वीर्योपपन्नानि संपादयितुमर्हसि ॥ ३९
स्वर्गं मनुजशार्दूल गच्छावो वा तवेप्सितम् ।
अपत्याय च मां गच्छ त्वमेव कुरुपुङ्गव ॥ ४०
नह्यावां मनसाऽप्यन्यं गच्छाव पुरुषर्षभ ।
[1]त्वत्तः प्रतिविशिष्टस्सन् को योऽन्यो भुवि मानवः ॥ ४१

1. क-ग—त्वत्तो यः प्रविशिष्टस्सः कोऽन्योऽस्ति

इमां धर्म्यां धर्म्यकथां [1]मम चैव निबोधय ।
पौराणिकीं विशालाक्ष कीर्तयिष्यामि भारत ॥ ४२

व्युषिताश्व इति ख्यातो बभूव भुवि पार्थिवः ।
पुरा परमधर्मज्ञः पूरोर्वंशविवर्धनः ॥ ४३

तस्मिंश्च यजमाने वै धर्मात्मनि महात्मनि ।
अगच्छंस्त्रिदशास्सर्वे सेन्द्रास्सर्वमहर्षिभिः ॥ ४४

अमाद्यदिन्द्रस्सोमेन तुतुषुर्गुरवो धनैः ।
व्युषिताश्वस्य राजर्षेस् तदा यज्ञे महात्मनः ॥ ४५

व्युषिताश्वो मनुष्येन्द्रश् शुशुभे यज्ञसंपदा ।
सर्वभूतेषु राजेन्द्र शरत्काल इवांशुमान् ॥ ४६

स विजि[2]त्वा गृहीत्वा तु नृपतीन् राजसत्तमः ।
प्राच्यानुदीच्यान् मत्स्यांश्च दक्षिणा अभ्यकल्पयत् ॥ ४७

अश्वमेधशतैरिष्ट्वा व्युषिताश्वः प्रतापवान् ।
बभूव नृपशार्दूलो दशनागबलः किल । ४८

गाथामप्यत्र गायन्ति ये पुराणविदो जनाः ।
अप्रमेयमपर्यन्तं व्युषिताश्वो धनं ददौ ॥ ४९

व्युषिताश्वस्समुद्रान्तां विजित्येमां वसुन्धराम् ।
अपालयत् सर्ववर्णान् पिता पुत्रानिवौरसान् ॥ ५०

1. क-ग—कथयामि निबोध मे । 2. क-ख-घ—त्य

यजमानो महायज्ञैर् ब्राह्मणेभ्यो महद्धनम् ।
अनन्तामखिलां तत्र पृथिवीमददात्ततः ॥ ५१
[1]सुषाव च बहून् सोमान् सोमसंस्थां तथैव च ॥ ५१॥
आसीत् काक्षीवती तस्य भार्या परमसंमता ।
भद्रा नाम मनुष्येन्द्र! रूपेणासदृशी भुवि ॥ ५२॥
कामयामासतुश्चैव परस्परमिति श्रुतम् ॥ ५३
स तस्यां कामसंसक्तो यक्ष्मणा समपद्यत ।
अचिरेणैव कालेन जगामास्तमिवांशुमान् ॥ ५४
तस्मिन् वृत्ते मनुष्येन्द्र भार्या काक्षीवती तदा ।
अपुत्रा पुरुषव्याघ्र विललापेति नश्श्रुतिः ॥ ५५
भद्रा परमदुःखार्ता तन्निबोध नृपोत्तम ॥ ५५॥

भद्रा—

नारी परमधर्मज्ञा सर्वा पुत्रविनाकृता ।
पत्या विना जीवति या न सा जीवत्यसंशयम् ॥ ५६॥
पत्या विना मृतं श्रेयो नार्याः क्षत्रियपुङ्गव ।
तद्गतिं गन्तुमिच्छामि प्रसीदस्व नयस्व माम् ॥ ५७॥
त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे ।
प्रसादं कुरु मे राजन् इतः क्षिप्रं नयस्व माम् ॥ ५८॥

1. क-ग-घ—सुषुवे

पृष्ठतोऽनुगमिष्यामि समेषु विषमेषु च ।
त्वामहं नरशार्दूल गच्छन्तमनिवर्तिनम् ॥ ५९॥
छायेवानुगता राजंस् तवाहं वशवर्तिनी ।
भविष्यामि नरव्याघ्र! नित्यं प्रियहितैषिणी ॥ ६०॥
अद्यप्रभृति मे राजन् कष्टा हृदयशोषणाः ।
आधयो हि भविष्यन्ति त्वदृते पुष्करेक्षण ॥ ६१॥
अभाग्यया मया नूनं विमुक्तास्सहचारिणः ।
संयोगा [1]विप्रयोगाश्च पूर्वदेहे न संशयः ॥ ६२॥
तदिदं कर्मभिः पापैः पूर्वदेहेषु संचितैः ।
दुःखं मामनुसंप्राप्तं राजंस्त्वद्विप्रयोगजम् ॥ ६३॥
एषाहमद्य राजेन्द्र! कुशानास्तीर्य शायिनी ।
दर्शयस्व मनुष्येन्द्र साधु मां पुष्करेक्षण ॥ ६४॥
विक्रोशन्तीं सतीं दुःखाद् देहमास्तां नरेश्वर ॥ ६५

वैशम्पायनः—

एवं बहुविधास्तस्या विलपन्त्याः पुनः पुनः ।
तस्मिन् छवशरीरे वाक् तां किलान्तर्हिताऽब्रवीत् ॥ ६६
उत्तिष्ठ भद्रे गच्छ त्वं ददानि हि वरं तव ।
जनयिष्याम्यपत्यानि त्वय्येवाहं वराङ्गने ॥ ६७
आत्मीये तु वरारोहे शयने [2]मां चतुर्दशीम् ।

1. क-ग-घ—द्विप्रमुक्ताश्च 2. क-ग-घ—त्वं

अष्टमीं वाप्यृतुस्नाता सं[1]भवेथाश्चुचिस्मिते ॥ ६८

कुन्ती—

एवमुक्ताथ सा देवी तच्चकार यशस्विनी ।
तथा कमलपत्राक्षी यथोक्तं पुत्रगर्धिनी ॥ ६९
सा तेन सुषुवे देवी [2]क्रमेण मनुजाधिप ।
त्रीन् साल्वांश्चतुरो मद्रान् पुत्रान् भरतसत्तम ॥ ७०
तथा त्वमपि मय्येव मनसा भरतर्षभ ।
शक्तो जनयितुं राजन् अपत्यं तपसो बलात् ॥ ७१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥
॥ ७ ॥ संभवपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
[अस्मिन्नध्याये ७१ श्लोकाः]

॥ नवाधिकशततमोऽध्यायः ॥

उद्दालककथा ॥ १ ॥ उद्दालकपुत्रेण श्वेतकेतुना कृता स्त्रीपुरुष मर्यादा ॥ २ ॥ गुणाधिकात् द्विजात् पुत्रोत्पादनार्थं पाण्डोराज्ञा ॥ ३ ॥ कुन्त्या स्वस्य दुर्वाससस्सकाशान्मन्त्रप्राप्तिकथनम् ॥ ४ ॥

वैशंपायनः—

एवमुक्तस्तया राजा तां देवीं वाक्यमब्रवीत् ।
धर्मविद्धर्मसंयुक्तम् इदं वचनमुत्तमम् ॥ १

1. क-ख-ग-घ—विशे 2. क-ग—शवेन; घ-शापेन

पाण्डुः—

एवमेव वरारोहे व्युषिताश्वश्चकार ह ।
त्वया यथोक्तं कल्याणि! सह्यासीद्मरोपमः ॥ २

अथ त्विमं प्रवक्ष्यामि धर्मं चैव निबोध मे ।
पुराणमृषिभिर्दृष्टं[1] वत्सधर्मविदां वरैः ॥ ३

अनावृताः किल पुरा स्त्रिय आसन् वराङ्गने ।
कामचारप्रचारिण्यस् स्वतन्त्राश्चारुहासिनि ॥ ४

कामान् व्युच्चरमाणानां कौमारान् सुभगे पतीन् ।
नासीदधर्मस्तु तदा स हि धर्मस्सनातनः ॥ ५

तं चैव धर्मं धर्मज्ञे तिर्यग्योनिगताः प्रजाः ।
पालयन्ति वरारोहे यथावदसितेक्षणे ॥ ६

उत्तरेष्वपि रम्भोरु कुरुष्वद्यापि वर्तते ।
स्त्रीणामनुग्रहो धर्मस् स एव हि सनातनः ॥ ७

नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकस्सर्वभूतानां न पुंसां वामलोचना ॥ ८

एवं तृष्णा तु नारीणां पुरुषात् पुरुषान् प्रति ।
अगम्यागमनं स्त्रीणां नास्ति नित्यं शुचिस्मिते ॥ ९

पुत्रं वा किल पौत्रं वा कासांचिद्भ्रातरं तथा ।

1. घ—सर्वधर्मप्रवर्तिभिः ।

रहसीह नरं दृष्ट्वा योनिरुत्क्लिद्यते स्त्रियाः ॥ १०
एतत् स्वाभाविकं स्त्रीणाम् अनिमित्तं तु तद्भवेत् ।
अस्मिंस्तु न चिराल्लोके मर्यादेयं यशस्विनि ॥ ११
[1]बभूवोद्दालको नाम महर्षिरिति नश्श्रुतम् ।
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः ॥ १२
मर्यादा स्थापिता येन मानुषेषु विशेषतः ।
[2]कोपात् कमलपत्राक्षि यदर्थं तन्निबोध मे ॥ १३
[3]श्वेतकेतुस्तदा देवि तप उग्रं समास्थितः ।
ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वभ्रोदकाशनः ॥ १४
शिशिरे जलमध्यस्थस् सह पत्न्या महातपाः ।
उद्दालकं तपस्यन्तं नियमेन समाहितम् ॥ १५
तस्य पुत्रश्श्वेतकेतुः परिचर्यां चचार ह ।
अभ्यगच्छद्द्विजः कश्चिद् वलीपलितसन्ततः ॥ १६
तं दृष्ट्वैव मुनिः प्रीतः पूजयामास शास्त्रतः ।
स्वागतेन च पाद्येन मृदुवाक्यैश्च भामिनी ॥ १७
शाकमूलफलाद्यैश्च वन्यैरन्यैरपूजयत् ।

---

1. क-ग-घ—स्थापिता येन यस्तां च तत्ते विस्तरतश्शृणु । [अधिकः पाठः]
2. घ—मनुष्यव्यतिरिक्तेषु लोकेष्वद्यापि दृश्यते । [अधिकः पाठः]
3. घ—येनेदं मानुषे लोके गर्हितं ते निबोध मे । [अधिकः पाठः]

क्षुत्पिपासाश्रमैकार्तः पूजितस्तु महर्षिणा ॥ १८

विश्रान्तो मुनिमासाद्य पर्यपृच्छद्द्विजस्तदा ।
उद्दालक महर्षे त्वं सत्यं मे ब्रूहि माऽनृतम् ॥ १९

ऋषिपुत्रः कुमारोऽयं दर्शनीयो विशेषतः ।
तव पुत्रमिमं मन्ये कृतकृत्योऽसि तद्वद ॥ २०

उद्दालकः—

मम पत्नी महाप्राज्ञ! कुशिकस्य सुता मता ।
मामेवानुगता पत्नी मम नित्यमनुव्रता ॥ २१

अरुन्धतीव पत्नीनां तपसा कर्शितस्तनी ।
[1]अस्यां जातः श्वेतकेतुर् मम पुत्रो महातपाः ॥ २२

वेदवेदाङ्गविद्विप्र मच्छासनपरायणः ।
लोकज्ञस्सर्वलोकेषु विश्रुतस्सत्यवाग्घृणी ॥ २३

द्विजः—

अपूर्वी भार्यया[2]चास्मि वृद्धोऽहं मन्दचाक्षुषः ।
पित्र्याद्दणादनिर्मुक्तः पूर्वमेवाकृतास्त्रियः ॥ २४

प्रजारिणी तु पत्नी ते कुलशीलसमाधिनी ।
सदृशी मम गात्रेण वहाम्येनां क्षमस्व वै । २५

---

1. घ—इयं प्रजारिणी मह्यं धर्मस्यैवारणिर्ध्रुवा ।
कालेऽप्यस्मिन् ममैवेयं छायेवानुगता सती ॥
2. क-ख-ग—चार्थी [अधिकः पाठः]

पाण्डुः—

[1]इत्युक्त्वा मृगशावाक्षीं चीरकृष्णाजिनाम्बराम् ।
यष्टयाधारस्खलत्गात्रो मन्दचक्षुरबुद्धिमान् ॥ २६
[2]सव्यापारामक्षमां ताम् अचित्तामात्मनि द्विजः ।
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः ॥ २७
जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ॥ २७॥
ऋषिपुत्रस्ततः कोपं चकारामर्षितस्तदा ॥ २८
स मातरं तथा दृष्ट्वा नीयमानां बलादिव ।
तपसा दीप्तवीर्यो हि श्वेतकेतुर्न चक्षमे ॥ २९
सङ्गृह्य मातरं हस्ते श्वेतकेतुरभाषत ॥ २९॥

श्वेतकेतुः—

दुर्ब्राह्मण विमुञ्च त्वं मातरं मे पतिव्रताम् ।
अयं पिता मे ब्रह्मर्षिः क्षमावान् ब्रह्मवित्तमः ॥ ३०॥
शापानुग्रहयोश्शक्तस् तूष्णींभूतो महाव्रतः ।
तस्य पत्नी दमोपेता मम माता विशेषतः ॥ ३१॥
पतिव्रतां तपोवृद्धां साध्वाचारैरलङ्कृताम् ।
प्राणदानेन ते ब्रह्मन् मातृभूतां विमुञ्च मे ॥ ३२॥

वैशम्पायनः—

एवमुक्त्वा तु याचन्तं विमुञ्चेति मुहुर्मुहुः ।

---

1. घ—पुत्रमेकं समुत्पाद्य पितॄणामृणमोचकम् ।
प्रदास्यामि पुनस्तेऽहं प्रजाराणिमिमां मुने ॥ [अधिकःपाठः]
2. क-ख-ग-घ—स्व

प्रत्यवोचद्द्विजो राजन् अप्रगल्भमिदं वचः ॥ ३३॥

द्विजः—

अपत्यार्थं श्वेतकेतो वृद्धोऽहं मन्दचाक्षुषः ।
पिता ते ऋणनिर्मुक्तस् त्वया पुत्रेण काश्यपः ॥ ३४॥

ऋणादहमनिर्मुक्तो वृद्धोऽहं विगतस्पृहः ।
मम को दास्यति सुतां कन्यां सम्प्राप्तयौवनाम् ॥ ३५॥
प्रजारणीमिमां पत्नीं विमुञ्च त्वं महातपः ।
एकया प्रजया प्रीतो मातरं ते ददाम्यहम् ॥ ३६॥

पाण्डुः—

एवमुक्तश्श्वेतकेतुर् लज्जया क्रोधमोयिवान् ।
तं क्रुद्धं वै पिता ज्ञात्वा श्वेतकेतुमुवाच ह ॥ ३७॥

उद्दालकः—

मा तात कोपं कार्षीस्त्वम् एष धर्मस्सनातनः ।
अनावृता हि वर्णानां सर्वेषामङ्गना भुवि ॥ ३८॥
यथा गावस्स्थितास्तात स्वे स्वे वर्णे तथा प्रजाः ॥ ३९
तथैव वै कुटुम्बेषु न [1]प्रमाद्यन्ति कर्हि चित् ।
ऋतुकाले तु सम्प्राप्ते भर्तारं न जहुस्तदा ॥ ४०

पाण्डुः—

एवमुक्तो महाबाहुश् श्वेतकेतुर्न चक्षमे ॥ ४०॥
चकारैव च मर्यादाम् इमां स्त्रीपुंसयोर्भुवि ॥ ४१

[1]मानुषेष्वसितापाङ्गे न त्वेवान्येषु जन्तुषु ।
तदाप्रभृति मर्यादा स्थापितेयमिति श्रुतिः ॥ ४२

व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् ।
भ्रूणहत्याकृतं पापं भविष्यत्यसुखावहम् ॥ ४३

अद्याप्यनुविधीयन्ते कामद्वेषविवर्जिताः ।
उत्तरेषु महाभागे कुरुष्वेवं यशस्विनि ॥ ४४

पुराणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ॥ ४४॥
भार्यां तथा व्युच्चरतः कौमारीं ब्रह्मचारिणीम् ।

पतिव्रतामेतदेव भविता पातकं भुवि ॥ ४५॥
पत्या नियुक्ता या चैव पत्न्यपत्यार्थमेव च ।

[2]न करिष्यति तस्याश्च भविष्यत्येतदेव हि ॥ ४६॥
इति तेन पुरा भीरु मर्यादा स्थापिताऽबले ।

उद्दालकस्य पुत्रेण धर्मे वै श्वेतकेतुना ॥ ४७॥
तेन भूयस्ततो दृष्टं यस्मिन्नर्थे निबोध तत् ॥ ४८

नियुक्ता पतिना भार्या यद्यपत्यस्य कारणात् ।
न कुर्यात्तत्तथा भीरु सैनस्सुमहदाप्नुयात् ॥ ४९

---

1. घ—मर्यादेयं मनुष्येषु न चान्येषु सुरेषु च ।
2. घ—न भविष्यति तस्याघं भविष्यत्यन्यथैव हि ।
अयं च नियमस्तिष्ये वर्ज्यः प्रोक्तो मनीषिभिः ॥
तिष्ये न वर्तते हीयं मर्यादा पापगौरवात् ॥ [अधिकः पाठः]

सौदासेन च रम्भोरु नियुक्ताऽपत्यकर्मणि ।
मदयन्ती जगामार्षिं वसिष्ठमिति नश्श्रुतम् ॥ ५०
तस्माल्लेभेऽथ सा पुत्रम् अश्मकं नाम भामिनि ॥ ५०॥
भार्या कल्माषपादस्य भर्तुः प्रियचिकीर्षया ॥ ५१
अस्माकमपि वै जन्म विदितं पङ्कजेक्षणे ।
कृष्णद्वैपायनाद् भीरु कुरूणां वंशवृद्धये ॥ ५२
तस्मादेतानि सर्वाणि कारणानि निरीक्ष्य तु ।
सम्प्रधार्य मयोक्तं यत् तत् त्वं वै कर्तुमर्हसि ॥ ५३
ऋतावृतौ राजपुत्रि स्त्रिया भर्ता शुभेक्षणे ।
नातिवर्त्य इति त्वेवं धर्मं धर्मविदो विदुः ॥ ५४
शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलार्हति॥ ५४॥
धर्मं चैव जनास्सन्तः पुराणं परिचक्षते ॥ ५५
भर्ता स्त्रियं राजपुत्रि शुभं वा यदि वाऽशुभम् ।
कार्यं नियुञ्ज्यात् सुश्रोणि ! कर्तव्यं तदकालिकम् ॥ ५६
विशेषतः पुत्रगृध्नुर् हीनः प्रजननात् स्वयम् ।
यथाऽहमनवद्याङ्गि पुत्रदर्शनलालसः ॥ ५७
अयं रक्ताङ्गुलितलः पद्मपत्रनिभश्शुभः ।
प्रसादनार्थं सुश्रोणि ! शिरस्यभ्युद्यतोऽञ्जलिः ॥ ५८
मन्नियोगात् सुकेशान्ते मत्तश्श्रेयस्तरैर्द्विजैः ।

अपत्यानि विशिष्टानि कैश्चिदुत्पादयाबले ॥ ५९
त्वत्कृतेऽहं पृथुश्रोणि गच्छेयं पुत्रिणां गतिम् ॥ ५९॥

वैशंपायनः—

एवमुक्ता ततः कुन्ती पाण्डुं परपुरञ्जयम् ।
प्रत्युवाच वरारोहा भर्तुः प्रियचिकीर्षया ॥ ६०॥

कुन्ती—

अधर्मस्सुमहानेष स्त्रीणां भरतसत्तम ।
[1]यत् प्रसादयते भर्ता प्रसाद्यः क्षत्रियर्षभ ॥ ६१॥
शृणु चेदं महाबाहो मम प्रीतिकरं वचः ॥ ६२
[2]पितृवेश्मन्यहं बाला नियुक्ता तिथिभोजने ।
उग्रं पर्यचरं पूर्वं ब्राह्मणं संशितव्रतम् ॥ ६३
निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ॥ ६३॥
तमुग्रं संशितात्मानं सर्वयत्नैरतोषयम् ॥ ६४
स मे [3]ह्याचारसंयुक्तम् आचष्ट भगवान् मुनिः ।
मन्त्रग्रामं च मे प्रादाद् अब्रवीच्चैव मामिदम् ॥ ६५
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।

---

1. घ—या प्रसादयते भर्त्रा प्रसाद्येन नृपोत्तम ।
2. घ—नावाहयाम्यहं लोके मानुषे कं च मानवम् ।
ब्राह्मणं क्षत्रियं वापि वैश्यं शूद्रमथापि वा ॥ [अधिकः पाठः]
3. क-ख-ग--ऽभिचार

अकामो वा सकामो वा [1]स समेष्यति ते वशम् ॥ ६६

इत्युक्ताऽहं तदा तेन पितृवेश्मनि भारत ।
ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः ॥ ६७

अनुज्ञाता त्वया देवम् आह्वयेयं परन्तप ॥ ६७॥
यां मे विद्यां महाराज अददात् स महायशाः ।

[2]तयाऽऽहूतस्सुरः पुत्रं प्रदास्यति सुरोपमम् ॥ ६८॥
अनपत्यकृतं यस्ते शोकं हि व्यपनेष्यति ॥ ६९

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि नवाधिकशततमोऽध्यायः ॥ १०९ ॥
॥ ७ ॥ संभवपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
[अस्मिन्नध्याये ६९ श्लोकाः]

॥ दशाधिकशततमोऽध्यायः ॥

यमवाय्वोः प्रसादाद् युधिष्ठिरभीमयोरुत्पत्तिः ॥ १ ॥

कुन्ती—

अपत्यकाम एवं स्यान्ममापत्यं भवेदिति ॥ ॥
विप्रं वा गुणसम्पन्नं सर्वभूतहिते रतम् ।

1. घ—वशमेष्यत्यसंशयः ।
2. घ—परावरज्ञो मेधावी कृपया परिपृच्छतः । [अधिकः पाठः]

अनुजानीहि भद्रं ते दैवतं हि पतिस्स्त्रियाः ॥ १॥
यं त्वं वक्ष्यसि धर्मज्ञ देवं ब्राह्मणमेव वा ।
यथोद्दिष्टं त्वया वीर तत्कर्तास्मि महाभुज ॥ २॥
देवात्पुत्रफलं सद्यो विप्रात् कालान्तरे भवेत् ॥ ३
आवाहयामि कं देवं कदा वा भरतर्षभ ।
तत् त्वदाज्ञां प्रतीक्षन्तीं विद्ध्यस्मिन् कर्मणीप्सिते ॥ ४

पाण्डुः—

धन्योऽस्म्यनुगृहितोऽस्मि त्वं नो धात्री कुलस्य हि ।
नमो महर्षये तस्मै येन दत्तो वरस्तव ॥ ५
न चाधर्मेण धर्मज्ञे शक्याः पालयितुं प्रजाः ॥ ५॥
तस्मात् त्वं पुत्रलाभाय सन्तानाय ममैव च ।
प्रवरं सर्वदेवानां धर्ममावाहयाबले ॥ ६॥

वैशंपायनः

पाण्डुना समनुज्ञाता भारतेन यशस्विना ।
मतिं चक्रे महाराज धर्मस्यावाहने तदा ॥ ७॥

पाण्डुः—

अद्यैव त्वं वरारोहे प्रयतस्व यथाविधि ।
धर्ममावाहय शुभे स हि देवेषु मुख्यभाक् ॥ ८॥
अधर्मेण न धर्मो वै संयुज्येत कदा चन ।
लोकश्चापि वरारोहे धर्मोऽयमिति मंस्यते ॥ ९॥

धार्मिकश्च कुरूणां स भविष्यति न संशयः ।
दत्तस्य तस्य धर्मेण नाधर्मे रंस्यते मनः ॥ १०॥

[1]धर्मादिकं हि धर्मज्ञे धर्मान्तं धर्ममध्यमम् ।
प्रशस्तमिष्टं लोकेषु यशःकीर्तिविवर्धनम् ॥ ११॥

ततो धर्मं पुरस्कृत्य नियता त्वं शुचिस्मिते ।
आकाराचारसम्पन्ना भजस्वाराधय स्वयम् ॥ १२॥

वैशम्पायनः—

सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना ।
अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमथाकरोत् ॥ १३॥

संवत्सरोषिते गर्भे गान्धार्यां जनमेजय ।
आजुहाव ततो धर्मं कुन्ती गर्भार्थमच्युतम् ॥ १४॥

सा बलिं त्वरिता देवी धर्मायोपजहार ह ।
जा[2]नन्ती धर्ममग्र्यं वै मन्त्रैर्वशमुपानयत् ॥ १५॥

आहूतो नियमात् कुन्त्या सर्वभूतैर्नमस्कृतः ।
ददृशे भगवान् धर्मस् सन्तानार्थाय पाण्डवे । १६॥

तस्मिन् बहुमृगे रम्ये शतशृङ्गे नगोत्तमे ।
पाण्डोरर्थे महाभाग कुन्ती धर्ममुपागमत् ॥ १७॥

1. घ—धर्मादिं धर्ममध्यं च धर्मान्तं धर्मरूपिणम् ।
2. क-ग—नाति; घ—जानती

ऋतुकाले शुचिस्नाता शुक्लवस्त्रा यशस्विनी ।
शय्यां जगाम सुश्रोणी सह धर्मेण सुव्रता ॥ १८॥

धर्मेण सह सङ्गम्य योगमूर्तिधरेण सा ।
लेभे पुत्रं महाभागं सर्वप्राणभृतां हितम् ॥ १९॥

ऐन्द्रे चन्द्रमसा युक्ते मुहूर्तेऽभिजितेऽष्टमे ।
दिवा मध्यं गते सूर्ये तिथौ पुण्येऽभिपूजिते ॥ २०॥

समृद्धयशसं कुन्ती [1]सुषाव समये सुतम् ॥ २१

जातमात्रे ततस्तस्मिन् वागुवाचाशरीरिणी ।
एष धर्मभृतां श्रेष्ठो भवितेति विनादिनी ॥ २२

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजस्सुतः ।
अभवत् प्रथितो राजंस् त्रिषु लोकेषु वीर्यवान् ॥ २३
यशसा तेजसा चैव वृत्तेन च समन्वितः ॥ २३॥

संवत्सरे द्वितीये तु गान्धार्या उदरं महत् ।
न च प्राजायत तदा ततस्तां दुःखमाविशत् ॥ २४॥

श्रुत्वा कुन्तीसुतं जातं बालार्कसमतेजसम् ।
उदरस्यात्मनस्स्थैर्यम् उपालभ्य च सौबली ॥ २५॥

कौरव्यस्यापरिज्ञातं यत्नेन महता स्वयम् ।
उदरं घातयामास गान्धारी शोकमूर्छिता ॥ २६॥

1. क-ग—सुषुवे

ततो जज्ञे मांसपेशी साष्टीला जनमेजय ।
द्विवर्षसम्भृतां कुक्षौ तामुत्स्रष्टुं प्रचक्रमे ॥ २७॥

ततो द्वैपायनो राजन् आजगाम यदृच्छया ।
तां च मांसमयीं पेशीं ददर्श वदतां वरः ॥ २८॥

ततोऽब्रवीत् सौबलेयीं किमिदं ते चिकीर्षितम् ।
सा चात्मनो मतं सर्वं शशंस परमर्षये ॥ २९॥

ज्येष्ठं कुन्तीसुतं जातं श्रुत्वा रविसमप्रभम् ।
दुःखेन परमेणेदम् उदरं घातितं मया ॥ ३०॥

शतं च किल पुत्राणां दत्तवानसि मे प्रभो ।
इयं मांसमयी पेशी जाता पुत्रशताय मे ॥ ३१॥

व्यासः—

एतावदेतद्गान्धारि नैतज्जात्वन्यथा भवेत् ।
वितथं नोक्तपूर्वं मे स्वैरेष्वपि कदा चन ॥ ३२॥

घृतपूर्णं कुण्डशतं क्षिप्रमानीयतामिति ।
शीताभिरद्भिराष्टीलाम् इमां च परिषिञ्च च ॥ ३३॥

वैशम्पायनः—

संसिच्यमाना साष्टीला [1]ह्यभवच्छतधा तथा ॥ ३४
अङ्गुष्ठपर्वमात्राणां गर्भाणां पुनरेव तु ।

1. घ—बभूव शतधा नृप।

एकाधिकशतं पूर्णं यथायोगं विशाम्पते ॥ ३५

ततः कुण्डशतं तत्र आनाय्य तु महानृषिः ।
मांसपेश्यास्तदा राजन् क्रमशः कालपर्ययात् ॥ ३६

ततस्तांस्तेषु कुण्डेषु गर्भान् सर्वान् समादधात् ॥ ३६॥

स्वनुगुप्तेषु देशेषु [1]रक्षां चैषां व्यधापयत् ॥ ३७

[2]शशास चैव कृष्णो हि गर्भाणां रक्षणं तथा ।
उवाच चैनां भगवान् कालेनैव तथा पुनः ॥ ३८

व्यासः—

घटमानेषु कुण्डेषु जाताञ्ज्ञानीहि शोभने ।
अहोत्तराः कुमारास्ते कुण्डेभ्यस्तु समुत्थिताः ॥ ३९

तेनैवैषां क्रमेणासीज् ज्येष्ठानुज्येष्ठता तदा ।
जन्मतश्च प्रमाणेन जेष्ठः कुन्तीसुतोऽभवत् ॥ ४०

वैशंपायनः—

एवं सन्दिश्य कौरव्यं कृष्णद्वैपायनस्तदा ।
जगाम पर्वतायैव तपसे संशितव्रतः ॥ ४१

धार्मिकं तं सुतं दृष्ट्वा पाण्डुस्तां पुनरब्रवीत् ॥ ४१॥

पाण्डुः—

प्राहुः क्षत्रबलं ज्येष्ठं बलज्येष्ठं सुतं वृणे ॥ ४२

---

1. घ—गर्भांश्चैवाभ्यधारयत् ।
2. घ—व्यासश्शशास गर्भाणां धात्रीस्संरक्षणाय च ।

ततः कुन्तीमभिक्रम्य शशासातीव भारत ॥ ४२॥
वायुमावाहयस्वेति स देवो बलवत्तरः ॥ ४३

अश्वमेधः क्रतुश्रेष्ठो ज्योतिश्श्रेष्ठो दिवाकरः ।
ब्राह्मणो द्विपदां श्रेष्ठो बलश्रेष्ठस्तु मारुतः ॥ ४४

मारुतं मरुतां श्रेष्ठं सर्वप्राणिभिरीडितम् ।
आवाहय त्वं नियमात् पुत्रार्थं वरवर्णिनि ॥ ४५

स नो यं दास्यति सुतं स प्राणबलवान् नृषु ।
भविष्यति वरारोहे बलज्येष्ठा हि भूमिपाः ॥ ४६

वैशम्पायनः—

तथोक्तवति सा काले वायुमेवाजुहाव च ।
द्वितीयेनोपहारेण तेनोक्तविधिना पुनः ॥ ४७

तैरेव नियमैस्स्थित्वा मन्त्रग्राममुदीरयत् ।
आजगाम ततो वायुः किं करोमीति चाब्रवीत् ॥ ४८

लज्जान्विता ततः कुन्ती पुत्रमैच्छन्महाबलम् ।
तथाऽस्त्विति च तां वायुस् समालभ्य दिवं गतः ॥ ४९

तस्माज्जज्ञे महावीर्यो भीमो भीमपराक्रमः ।
तमप्यतिबलं जातं वागुवाचाशरीरिणी ॥ ५०

सर्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत ॥ ५०॥

[1]जातमात्रे कुमारे तु सर्वलोकस्य पार्थिवाः ।
मूत्राम्बु सुस्रुवुस्सर्वे व्यथिताश्च प्रपेदिरे ॥ ५१॥

वाहनानि विशीर्यन्ते विमुञ्चन्त्यश्रुबिन्दवः ॥ ५२

यथाऽनिलस्समुद्धूतस् समर्थः कम्पने भुवः ।
तथा मन्युपरीताङ्गो भीमो भीमपराक्रमः ॥ ५३

इदं चाद्भुतमित्यासीज् जातमात्रे वृकोदरे ।
यदङ्गात् पतितो मातुश् शिलां गात्रैरचूर्णयत् ॥ ५४

कुन्ती तु सह पुत्रेण यात्वा सुरुचिरं सरः ।
स्नात्वा तु सुतमादाय दशमेऽहनि यादवी ॥ ५५

दैवतान्यर्चयिष्यन्ती निर्जगामाश्रमात् पृथा ।
[2]शैलस्यान्तेन गच्छन्त्यास् तदा भारतसत्तम ॥ ५६

[3]निश्चक्राम महान् व्याघ्रो जिघांसन् गिरिगह्वरात् ॥ ५६॥

तमापतन्तं शार्दूलं विकृष्याथ कुरूत्तमः ।
निर्बिभेद शरैः पाण्डुस् त्रिभिस्त्रिदशविक्रमः ॥ ५७॥

---

1. घ—नागायुतबलप्राणस् साहसी रणपण्डितः ।
बह्वाशी वज्रसङ्काशो लोकेऽप्रतिमपौरुषः ॥ [अधिकः पाठः]
2. क-ख-ग-घ—शैलाभ्याशेन; घ—शिलान्तरेण ।
3. घ—अदृष्टवेगस्संरम्भाज् जिघांसुस्त्रासमदूरगाम् ।
निर्जगाम महान् व्याघ्रो विवृतास्योन्नताननः ॥
[अधिकः पाठः]

नादेन महता तां तु पूरयन्तं गिरेर्गुहाम् ।
दृष्ट्वा शैलमुपारोढुम् ऐच्छत् कुन्ती भयात्ततः ॥ ५८॥

त्रासेनास्यास्सुतस्त्वङ्कात् पपात भरतर्षभ ।
[1]पर्वतस्योपरिस्थाया अधस्तादपतच्छिशुः ॥ ५९॥

[2]स शिलाश्चूर्णयामास वज्रवद्वज्रिचोदितम् ॥ ६०

[3]पुत्रस्नेहात्ततः पाण्डुर् अभ्यधावद्गिरेस्तटम् ।
पपात तेन शतधा शिला गात्रैर्विचूर्णिता ॥ ६१

शिलां च चूर्णितां दृष्ट्वा परं विस्मयमागमत् ॥ ६१॥

[4]स तु जन्मनि भीमस्य विनदन्तं विनादितम् ।
ददर्श गिरिशृङ्गस्थं व्याघ्रं व्याघ्रपराक्रमः ॥ ६२॥

दारसंरक्षणार्थाय रक्षमाणस्तथाऽऽत्मजम् ।
सदा बाणधनुष्पाणिर् अभवत् कुरुनन्दनः ॥ ६३॥

मघे चन्द्रमसा युक्ते सिंहे चाभ्युदये गुरौ ।

---

1. घ—अधस्तादपतद्वेगाद्यन्नोत्क्षिप्त इवाचलः ।
2. घ—शिलां संचूर्णयामास वज्रवद्वज्रिचोदितम् ।
3. घ—भग्ना भूमौ शिला चापि क्रोशमात्रमथोऽपि वा ।
[अधिकः पाठः]
4. घ—स्थूलास्तरणशायीव सुखं सुष्वाप सोऽर्भकः ।
वटच्छदानुशायीव युगान्ते प्रलयेऽर्भकः ॥
प्रत्यागत्य पुनः पाण्डुः सुतमादाय विस्मितः ।
दत्त्वा कुन्त्यै शिशुं सुप्तमक्षतं वज्रदेहिनम् ॥ [अधिकः पाठः]

दिवा मध्यगते सूर्ये तिथौ पुण्ये त्रयोदशे ॥ ६४॥
मैत्रे मुहूर्ते सा कुन्ती सुषुवे भीममच्युतम् ॥ ६५
यस्मिन्नहनि भीमस्तु जज्ञे भीमपराक्रमः ।
तामेव रात्रिं पूर्वं तु जज्ञे दुर्योधनो नृपः ॥ ६६
दुर्योधने जातमात्रे दिक्षु सर्वासु भारत ।
क्रव्यादाः प्राणदन् घोराश् शिवाश्चाशिवनिस्वनाः ॥ ६७
ववर्ष रुधिरं देवो भयमावेदयन् महत् ॥ ६७॥
एतस्मिन्नन्तरे राजा धृतराष्ट्रोऽम्बिकासुतः ।
समाहूय बहून् विप्रान् विदुरं चेदमब्रवीत् ॥ ६८॥

धृतराष्ट्रः—

श्रुतं मया यथा जातो ज्येष्ठः पाण्डोस्सुतः किल ।
[1]स तु दुर्योधनाच्छ्रेष्ठस् तस्मिन् राज्यं न संशयः ॥ ६९॥
अयं त्वनन्तरं तस्माद् राजा भवितुमर्हति ।
एतं विब्रूत मे प्रश्नं यद्वाऽस्मिन् दृश्यते फलम् ॥ ७०॥
अस्मिञ्जाते निमित्तानि संशयन्त्यशिवं महत् ।
अतो ब्रवीमि विदुर द्रुतं मां भयमाविशत् ॥ ७१॥

वैशंपायनः—

वाक्यस्यैतस्य निधने दिक्षु सर्वासु भारत ।
क्रव्यादाः प्राणादन् घोराश् शिवाश्चाशिवशंसिनः ॥ ७२॥

1. घ—स च दुर्योधनो ज्येष्ठस् तस्मिन् राज्ये प्रतिष्ठितम्।

लक्षयित्वा निमित्तानि तानि सर्वाणि भारत ।
तेऽब्रुवन् ब्राह्मणा राजन् विदुरश्च महामतिः ॥ ७३॥

विदुरः—

अयं कुलान्तकृज्जातो यस्माच्च कुलपांसनः ।
तस्य त्यागेन शान्तिस्स्यात् पुष्टिस्त्वपनये भवेत् ॥ ७४॥
शतमेकोनमप्यस्तु पुत्राणां ते महीपते ।
एकेन कुरु नः क्षेमं लोकस्य च कुलस्य च ॥ ७५॥
[1]त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ७६॥

[2]वैशंपायनः—

स तथा विदुरेणोक्तस् तैश्च विप्रैर्जनाधिपः ।
[3]न चकार तदा राजा पुत्रस्नेहसमन्वितः ॥ ७७॥
ततः पुत्रशतं सर्वं धृतराष्ट्रस्य भारत ।
अह्नां शतेन संजज्ञे कन्या चैका [4]शतात् परा ॥ ७८॥
गान्धार्यां क्रिश्यमानायां वर्धमाने तथोदये ।
वेश्या सा त्वम्बिकापुत्रं कन्या परिचचार ह ॥ ७९॥
तया समभवद्राजा धृतराष्ट्रो यदृच्छया ।

---

1. क-ख-ग—त्यजेत्कुलार्थे पुरुषं ।
2. घ—त्यागेनास्य कुलस्यैव ग्रामस्य च नृपोत्तम ।
शान्तिर्जनपदस्यास्य कुलवृद्धिर्भवेद्ध्रुवम् ॥ [अधिकः पाठः]
3. घ—नानुमेने सुतं त्यक्तुं पुत्रस्नेहवशं गतः ।
4. क-ख-ग—च दुश्शला; घ—शतात्परम्

तस्यामजनयत् पुत्रं युयुत्सुं नाम भारत ॥ ८०॥

इत्थमेकशतं जज्ञे पुत्राणां भरतर्षभ ।
महारथानां वीराणां कन्या चैकाऽथ दुश्शला ॥ ८१॥

धृतराष्ट्रस्य राजेन्द्र यथा ते कथितं मया ॥ ८२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि दशाधिकशततमोऽध्यायः ॥ ११० ॥

॥ ७ ॥ संभवपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥

[अस्मिन्नध्याये ८२ श्लोकाः ।]

॥ एकादशाधिकशततमोऽध्यायः ॥

गान्धार्यां दुश्शलाया उत्पत्तिः । २ ॥

जनमेजयः—

धृतराष्ट्रस्य पुत्राणाम् आदितः कथितं त्वया ।
ऋषेर्मेतात् पुत्रशतं न तु कन्याऽत्र कीर्तिता ॥ १

वैश्यापुत्रो युयुत्सुश्च एतदेकशतं द्विज ।
जन्मापि धार्तराष्ट्रस्य उक्तमेतन्महर्षिणा ॥ २

कथं हि सम्भवस्तस्माद् दुश्शलाया ब्रवीहि मे ॥ २॥

वैशंपायनः—

साध्वयं प्रश्न उद्दिष्टः पाण्डवेय ब्रवीमि ते ॥ ३

[1]तां मांसपेशीं तु तदा स्वयमेव महामुनिः ।
शीताभिरद्भिस्सिञ्चन् वै भागं भागमधारयत् ॥ ४

यो यथा कल्प्यते भागस् तं तु धान्यस्य वै पृथक् ।
घृतपूर्णेषु कुण्डेषु एकैकं प्राक्षिपत्तदा ॥ ५

एतस्मिन्नन्तरे साध्वी गान्धारी सुमहायशाः ।
नाब्रवीच्च ऋषिं किञ्चिद् गौरवाच्च यशस्विनी ॥ ६

मनसा चिन्तयद्देवी एतत् पुत्रशतं मम ।
भविष्यति न सन्देहो न चर्षिर्भाषतेऽन्यथा ॥ ७

मम वै परमा तुष्टिर् दुहिता मे भवेद्यदि ।
एका शताधिका बाला शतस्यापि कनीयसी ॥ ८

ततो दौहित्रजांल्लोकान् अवाप्नुस्यात् पतिर्मम ।
अहं च कृतकृत्या स्यां दुहित्रा सह सङ्गता ॥ ९

अधिकं किल नारीणां प्रीतिर्जामातृभिर्भवेत् ।
अपत्यं युवतिं चापि दृष्ट्वा प्रीतिमवाप्नुयाम् ॥ १०

यदि सत्यं तपो वा मे गुरवस्तोषिता यदि ।
सुकृतं चेह लोकेऽस्ति तथाऽस्तु दुहिता मम ॥ ११

एतस्मिन्नेव काले तु कृष्णद्वैपायनस्स्वयम् ।
व्यभजत्सहसा विप्रस् तां पेशीं गर्भसम्भवाम् ॥ १२

---

1. घ—स्वयमेव मांसपेशीं तु तदा व्यासो मुनीश्वरः ।

गण्यमानेषु कुण्डेषु शते पूर्णे महात्मना ।
अभवच्चापरं खण्डं वामहस्ते तदा किल ॥ १३

पूर्णं पुत्रशतं ह्येव न मिथ्या वागुदीरिता ।
दैवयोगात्त्वयं भाग एको दृष्टशतात् परः ॥ १४

एषा ते सुभगे कन्या भविष्यति यथेप्सिता ॥ १४॥

[1]ततोऽन्यद्धृतकुण्डं तु आनाय्य सुमहातपाः ।
प्राक्षिपत्तं तदा राजन् कन्याभागं परन्तप ॥ १५॥

सम्भूता चैव कालेन सर्वेषां च यवीयसी ॥ १६

एतत्ते कथितं वीर दुश्शलाजन्म चैव तु ।
ब्रूहि राजेन्द्र किं भूयः कथये पाण्डुनन्दन ॥ १७

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

॥ ७ ॥ संभवपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥

[अस्मिन्नध्याये १७ श्लोकाः]

---

1. घ—गान्धारीमेवमुक्त्वैव धात्रीमेव पुनर्वशी ।
धात्र्यानयापरं कुण्डं घृतपूर्णं मनोहरम् ॥
घृतपूर्णे तया नीते कुम्भे तं भागमाक्षिपत् ।
इयमेका भवेत्पुत्री कन्या पुत्रशतात् परम् ॥
इत्युक्त्वा प्राक्षिपद्भागं कन्यागर्भं परन्तप ।
[अधिकः पाठः]

॥ द्वादशाधिकशततमोऽध्यायः ॥

दुर्योधनादीनां नामधेयकथनम् ॥ १ ॥ दुश्शलापरिणयः ॥ २ ॥

जनमेजयः—

ज्येष्ठानुज्येष्ठतां चैव नामधेयानि चापि भो ।
धृतराष्ट्रस्य पुत्राणाम् आनुपूर्व्येण कीर्तय ॥ १

वैशंपायनः—

[1]दुर्योधनो [2]युयुत्सुश्च राजन् [3]दुश्शासनस्तथा ।
[4]दुर्धर्षो [5]दुर्मुखश्चैव [6]जलसन्धि[7]स्सह[8]स्समः ॥ २
[9]विन्दा[10]नुविन्दौ [11]दुष्षाहस् [12]सुबाहु[13]र्दुष्प्रधर्षणः ।
*[14]दुर्मद[15]श्चित्रयोधी च [16]दुष्कर्णः [17]कर्ण एव च ॥ ३
[18]विविंशति [19]र्विकर्णश्च [20]जलसन्ध[21]स्सुलोचनः ।
†[22]चित्रो [23]विचित्र[24]श्चित्राक्षश् [25]चारुचित्र[26]श्शरासनः ॥ ४
[27]दुर्मर्षणो [28]दुष्प्रधर्षो [29]विविंत्सु[30]र्विकट[31]श्शमः ।
[32]ऊर्णनाभ[33]स्सुनाभश्च तथा [34]नन्दो[35]पनन्दकौ ॥ ५
[36]सेनापति[37]स्सुषेणश्च [38]कुण्डोदर[39]महोदरौ ।
[40]चित्रध्वज[41]श्चित्ररथश् [42]चित्रबाहु[43]रमित्रजित् ॥ ६

* क-ख-ग—दुष्षन्त; घ—दुर्मतिः
† क-ग—चित्रश्च उरुचित्रः; ख—चित्राश्च उरुचित्रः

[44]चित्रबाण[45]श्चित्रवर्मा [46]सुवर्मा [47]दुर्विमोचनः ।
[48]चित्रसेनश्च [49]विक्रान्तस् [50]सुचित्र[51]श्चित्रवर्मवान् ॥ ७
[52]अपराजितः [53]कुण्डितको [54]विशालाक्षो [55]दुरावरः ।
[56]अजितश्च [57]जयन्तश्च [58]जयत्सेनोऽथ [59]दुर्जयः ॥ ८
[60]दृढहस्त[61]स्सुहस्तश्च [62]वातवेग[63]सुवर्चसौ ।
[64]आदित्यकेतु[65]र्बह्वाशी [66]नागदन्तो[67]ग्रशायिनौ ॥ ९
[68]कवची [69]निषङ्गी [70]पाशी च [71]कुण्डधारो [72]धनुर्ग्रहः ।
[73]उग्रो [74]भीमरथो [75]भीमो [76]भीमबाहु[77]रलोलुपः ॥ १०
[78]भीमकर्मा [79]सुबाहुश्च [80]भीमविक्रान्त एव च ।
[81]अभयो [82]रूढकर्मा च तथा [83]दृढरथश्च यः ॥ ११
[84]अनाधृष्यः [85]कुण्डभेदी [86]विरावी [87]दीर्घलोचनः ।
[88]दीर्घध्वजो [89]दीर्घजङ्घ [90]अदीर्घो [91]दीर्घ एव च ॥ १२
[92]दीर्घबाहु[93]र्महाबाहुर् [94]व्यूढोरुः [95]कनकध्वजः ।
[96]महाकुण्डश्च [97]कुण्डश्च [98]कुण्डज[99]श्चित्रजस्तथा ॥ १३
[100]असन[101]श्चित्रकश्चैव [102]दुश्शला चैव भारत ।
एतदेकशतं राजन् कन्या चैका प्रकीर्तिता ॥ १४
नामधेयानुपूर्व्येण विद्धि जन्मक्रमं नृप ॥ १४॥
सर्वेऽप्यतिरथाश्शूरास् सर्वे युद्धविशारदाः ।
सर्वे वेदविनीताश्च नानाशास्त्रेषु चाभवन् ॥ १५॥

सर्वे संसक्तविद्यास्तु मुख्याभिजनशोभिताः ॥ १६
सर्वेषामनुरूपं च कृतदाराः कृतश्रमाः ।
धृतराष्ट्रेण समये समीक्ष्य विधिवत्तदा ॥ १७
दुश्शलां समये राजा सिन्धुराजाय भारत ।
जयद्रथाय प्रददौ सौबलानुमतात्तदा ॥ १८
इति पुत्रशतं राजन् युयुत्सुश्च तथाऽपरः ।
कन्यका दुश्शला चैव यथावत् कीर्तितं मया ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥
॥ ७ ॥ संभवपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
[अस्मिन्नध्याये १९ श्लोकाः]

॥ त्रयोदशाधिकशततमोऽध्यायः ॥

अर्जुनजननम् ॥ १ ॥

वैशम्पायनः—

जाते बलवतां श्रेष्ठे पाण्डुश्चिन्तापरोऽभवत् ।
कथमन्यो मम सुतो लोके श्रेष्ठो भवेदिति ॥ १
दैवं पुरुषकारश्च यत्र लोकः प्रतिष्ठितः ।
ततो देवात्तु तपसा लप्स्ये पुत्रं महाबलम् ॥ २

इन्द्रो हि राजा देवानां प्रधान इति मे श्रुतः ।
अप्रमेयबलोत्साहो वीर्यवानुत्तमद्युतिः ॥ ३

तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम् ।
यं दास्यति स नः पुत्रं स प्रधानो भविष्यति ॥ ४

अमानुषान् मानुषांश्च स सङ्ग्रामे हनिष्यति ।
तपसा कर्मणा चैव तस्मात्तप्स्ये महत्तपः ॥ ५

ततः पाण्डुस्तु राजर्षिः मन्त्रयित्वा महर्षिभिः ।
आदिश्य कुन्त्याः कौरव्य व्रतं सांवत्सरं शुभम् ॥ ६

आत्मनश्च महावीर्यं एकपादस्थितोऽभवत् ॥ ६॥

उग्रं तपस्स आतस्थे परमेण समाधिना ।
आरिराधयिषुश्चैवं त्रिदशानां तमीश्वरम् ॥ ७॥

सूर्येण सह धर्मात्मा पर्यवर्तत भारत ।
तं तु कालेन महता वासवः प्रत्यभाषत ॥ ८॥

इन्द्रः—

पुत्र तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ।
मित्रेभ्यो ब्राह्मणेभ्यश्च सुहृद्भ्यश्चार्थसाधकम् ॥ ९॥

सुतं तेऽद्यं प्रदास्यामि सर्वामित्रविनाशनम् ॥ १०

वैशम्पायनः—

इत्युक्तस्तु महेन्द्रेण कौरवः कुरुवर्धनः ।

कुन्तीं राजसुतां पाण्डुर् अपत्यार्थेऽभ्यचोदयत् ॥ ११
धर्मं बलं च निश्चित्य यथा स्यादिति भारत । ११॥

पाण्डुः—

नीतिमन्तं महात्मानम् आदित्यसमतेजसम् ।
दुराधर्षं रणे शूरं देवराजमिवानघम् ॥ १२॥
पुत्रं जनय सुश्रोणि धाम क्षत्रियतेजसाम् ।
लब्धः प्रसादो देवेन्द्रात् तमाह्वय शुचिस्मिते ॥ १३॥

वैशम्पायनः—

जातेषु धृतराष्ट्रस्य कुमारेषु महात्मसु ।
कुन्ती पुनरपत्याय देवराजमुपाह्वयत् ॥ १४॥
ततः पर्यचरत्तेन बलिना भगवानपि ।
अथाजगाम देवेन्द्रो जनयामास चार्जुनम् ॥ १५॥
उत्तराभ्यां तु पूर्वाभ्यां फल्गुनीभ्यां ततो दिवा ।
जातस्तु फाल्गुने मासि तेनासौ फल्गुनस्स्मृतः ॥ १६॥
जातमात्रे कुमारे तु सर्वभूतप्रहर्षिणी ।
सूतके वर्तमानानां वागुवाचाशरीरिणी ॥ १७॥
मेघगम्भीरनिर्घोषा नभो नादयती तदा ॥ १८
कार्तवीर्यसमः पुत्रो देवतुल्यपराक्रमः ।
एष शक्र इवाजय्यः प्रापयिष्यति ते यशः ॥ १९

अदित्या विष्णुना प्रीतिर् यथा समभिवर्धिता ।
तथा विष्णुसमः प्रीतिं वर्धयिष्यति तेऽर्जुनः ॥ २०

एष मद्रान् वशे कृत्वा कोसलान् सह केकयैः ।
चेदिकाशिकरूशांश्च कुरूणां लक्ष्म धास्यति ॥ २१

एतस्य भुजवीर्येण त्रासितास्सुरशत्रवः ।
निवातकवचा[1]स्संख्ये प्रहास्यन्ते च जीवितम् ॥ २२

हिरण्यपुरमारुह्य निहनिष्यति संयुगे ।
पुलोमजायास्तनयान् कालकेयांश्च सर्वशः ॥ २३

गत्वोत्तरां दिशं वीरो विजित्य युधि पार्थिवान् ।
धनरत्नौघमपरिमितम् आनयिष्यति पाण्डवः ॥ २४

एतस्य भुजवीर्येण खाण्डवे हव्यवाहनः ।
मेदसा सर्वभूतानां तुष्टिं यास्यति वै पराम् ॥ २५

ग्रामणीश्च महीपालान् एष जित्वा महाबलः ।
भ्रातृभिस्सहितो वीरस् त्रीन् मेधानाहरिष्यति ॥ २६

जामदग्न्यसमः कुन्ति शिबेरौशीनरात् परः ।
एवं वीर्यवतां श्रेष्ठो महाभागो भविष्यति ॥ २७

एष चास्त्राणि दिव्यानि निखिलेन हरिष्यति ।
विप्रनष्टां श्रियं चायम् आहर्ता भरतर्षभ ॥ २८

1. क-ख-ग-घ—सर्वे

एतदत्यद्भुतं राजन् कुन्त्याः पार्थस्य सूतके ।
उक्तवान् वायुराकाशे कुन्ती शुश्राव भारत ॥ २९

वाचमुच्चरितामुच्चैस् तां निशम्य यशस्विनीम् ।
[1]बभूव परमो हर्षश् शतशृङ्गनिवासिनाम् ॥ ३०

ततो देवनिकायानां सेन्द्राणां च दिवौकसाम् ।
आकाशे दुन्दुभीनां च बभूवातुलनिस्वनः ॥ ३१

उदतिष्ठन्महामेघाः पुष्पवृष्टिभिरावृताः ।
समवेत्य च देवानां गणः पार्थमपूजयत् ॥ ३२

काद्रवेया वैनतेया गन्धर्वाप्सरसस्तथा ।
प्रजानां पतयस्सर्वे सप्त चैव महर्षयः ॥ ३३

भरद्वाजः काश्यपो गौतमश्च
विश्वामित्रो जमदग्निर्वसिष्ठः ।
यश्चोदितो भास्करोऽभूत् प्रनष्टः
सोऽप्यत्रिरत्र भगवान् संबभूव ॥ ३४

मरीचिराङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः ।
दक्षप्रजापतिश्चैव [2]मरीचिः प्रीतिमाप्तवान् ॥ ३५

गन्धर्वाप्सरसश्चैव किन्नरास्समवादयन् ॥ ३५॥

---

1. अवाप प्रीतिमतुलामानन्दभरिताभवत् । [अधिकः पाठः]
2. अ—गन्धर्वान् समचोदयत् ।

दिव्यमाल्याम्बरधरास् सर्वालङ्कारभूषिताः ।
[1]ते च प्रकाशा मर्त्येषु सर्वोपस्कारसंभृताः ॥ ३६॥
उपगायन्ति बीभत्सुम् उपनृत्यन्ति चैव हि ॥ ३७
ततो गन्धर्वतूर्येषु प्रणदत्सु विहायसि ।
बहुभिस्सह गन्धर्वैर् अगायत च तुम्बुरुः ॥ ३८
भीमसेनोग्रसेनौ च पूर्णायुरनघस्तदा ।
गोमासुर्धृतराष्ट्रश्च सूर्यवर्चास्तथाऽष्टमः ॥ ३९
युगपस्तुर्णपः कार्ष्णी नन्दी चित्ररथस्तथा ।
त्रयोदश[2]स्स्थूलशिराः पर्जन्यश्च चतुर्दशः ॥ ४०
कलिः पञ्चदशश्चात्र किन्तुनारस्तु षोडशः ।
किन्नरा देवगन्धर्वा उपगायन् धनञ्जयम् ॥ ४१
[3]सद्वान्बृहद्वान् बृहकः कराळश्च महायशाः ।
ब्रह्मचारी बहुगुणः सुपर्णश्चेति विश्रुतः ॥ ४२
विश्वावसुर्भुमन्युश्च सुचन्द्रो दशमस्स्मृतः ।
इत्येते देवगन्धर्वा उपगायन् धनञ्जयम् ॥ ४३
हाहा हूहूश्च गन्धर्वौ हंसश्च भरतर्षभ ।
इत्येते देवगन्धर्वा उपगायन् धनञ्जयम् ॥ ४४

---

1. घ—मुक्तामाणिक्यसंपूर्णहेमपात्राग्रपाणयः । [अधिकः पाठः]
2. क-ख-ग—श्शालि
3. क-ख-ग—सुन्वा बृहन्वा

तथैवाप्सरसो हृष्टास् सर्वालङ्कारभूषिताः ।
ननृतुश्च वरारोहा जगुरायतलोचनाः ॥ ४५

अनूचानानवद्याङ्गी क्रियामुख्या गुणावरा ।
[1]अतिकेशा तथा साची दीर्घकेशी त्वलम्बुसा ॥ ४६

मरीचिश्शुशुका चैव विद्युद्वर्णा तिलोत्तमा ।
अद्रिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥ ४७

उर्वशी [2]चैव राजेन्द्र ननृतुर्गीतनिस्वनैः ॥ ४७॥

असिता च सुबाहुश्च सुमनास्सुवपुस्तथा ।
पुण्डरीका सुगन्धा च सुरथा च प्रमाथिनी ॥ ४८॥

काम्या शारद्वती चैव ननृतुस्तत्र सङ्घशः ॥ ४९

मेनका सहजन्या च वर्णिका पुञ्जिकस्थला ।
घृताची चैव विश्वाची पूर्वाचित्तिः क्रतुस्तथा ॥ ५०

[3]प्रम्लोचन्ती च विख्याता अनुम्लोचन्ती च तादृशी ।
उर्वश्येकादशैत्येता जगुरायतलोचनाः ॥ ५१

---

1. घ—अन्तकेशी तथा साची नीला मांसी त्वलम्बुसा ।
2. घ—मेनका विद्युत् सुकेशी केशशालिनी ।
विश्वाची च घृताची च प्रम्लोचन्ती सुराङ्गना ॥
मिश्रकेशी सुकेशी च घृताची पुञ्जिकस्थला ।
दशाश्वमेधिका चूली ननृतुर्गीतनिस्वनैः ॥ [अधिकः पाठः]
3. क-ख-ग—विम्लोचेत्यभिविख्याता प्रम्लोचेति च तादृशी ।

धाताऽर्यमा च मित्रश्च वरुणोऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमस्मृतः ॥ ५२
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या ज्वलन्तस्सूर्यवर्चसः । ५३
महिमानं पाण्डवस्य कुर्वन्तस्तस्थुरम्बरे ॥ ५३॥
मृगव्याधश्च शर्वश्च निर्ऋतिश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः ॥ ५४॥
भवनोऽथेश्वरश्चैव कपाली च विशाम्पते ।
स्थाणुर्भगश्च भगवान् रुद्रास्तत्रावतस्थिरे ॥ ५५॥
धरो ध्रुवश्च सोमश्च आपश्चैवानलोऽनिलः ।
प्रत्यूषश्च प्रभासश्च वसवश्चावतस्थिरे ॥ ५६॥
[1]यथैव वसवस्त्वष्टौ मरुतश्च महाबलाः ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥ ५७॥
तौ चाश्विनौ तथा साध्यास् तस्य जन्मनि संस्थिताः ॥ ५८
ऋतुर्दक्षो वसुस्सत्यः कालः कामो मुनिस्तथा ।
[2]मरुमां ल्ललुमांश्चैव रोचमानस्तु तेजसा ॥ ५९

1. घ—साध्याश्च मरुतश्चैव विश्वे देवा मरुद्गणाः । [अधिकः पाठः]
2. घ—पुरूरवार्द्रवाश्चैव रोचमानाश्च तेजसा ।
विश्वे देवा इति ख्यातास्तस्यासन् जन्मनि स्थिताः ॥
[अधिकः पाठः]

विश्वे देवा इति ख्यातास् तस्यासञ्जन्मनि स्थिताः ॥ ५९॥

कर्णिकारश्च मण्डुश्च वासुकिश्च भुजङ्गमः ।
अब्जपश्चावकुण्डश्च तक्षकश्च महाबलः ॥ ६०॥

अभव्यास्तेजसा दीप्ता उग्रक्रोधा महाबलाः ।
एते महात्मनस्तस्य नागाः प्राञ्जलयस्थिताः ॥ ६१॥

तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्च महायशाः ।
अरुणश्चारुणिश्चैव वैनतेया उपासत ॥ ६२॥

आययुस्तपसा युक्ता महायुक्ता महाबलाः ।
महान् पितामहस्त्वेनम् वरुणेन रजसा तदा ॥ ६३॥

प्रतिजग्राह नप्तारं राजर्षिपरिवारितः ॥ ६४

सगरेणाम्बरीषेण नहुषेण ययातिना ।
धीमता धुन्धुमारेण राज्ञोपरिचरेण ह ॥ ६५

मुचुकुन्देन मान्धात्रा बहुनाऽरिष्टनेमिना ।
भरतेन दिलीपेन सर्वैश्च जनमेजय ॥ ६६

पूरुस्सार्धं नृपतिभिर् जग्राह कुरुपुङ्गवम् ॥ ६६॥

अन्ये च बहवस्तत्र समासन् राजसत्तमाः ॥ ६७

एते चान्ये च बहवो नरलोकाधिपास्तथा ।
देवलोकादिहागम्य प्रैक्षन्त भरतर्षभम् ॥ ६८

विद्योतमानं वपुषा भासयन्तं दिशो दश ॥ ६८॥

लक्षणैर्व्याञ्जतैर्युक्तस् सर्वैर्माहात्म्यसूचकैः ।
एतं दृष्ट्वा महावीर्यं विस्मिता ऋषिसत्तमाः ॥ ६९॥
[1]अधिकां स्म तदा वृत्तिं वर्वन्ते पाण्डवं प्रति ।
पाण्डुः प्रीतेन मनसा नत्वा देवानपूजयत् ॥ ७०॥
पाण्डुना पूजिता देवाः प्रत्यूचुर्नृपसत्तमम् ॥ ७१
देवाः—
प्रादुर्भूतो ह्ययं धर्मो देवतानां प्रसादजः ॥ ७१॥
मातरिश्वा ह्ययं भीमो बलवानरिमर्दनः ।
साक्षादिन्द्रस्त्वयं जातः प्रसादाच्च शतक्रतोः ॥ ७२॥
[2]फल्गुनो जयतां श्रेष्ठः पूरुवंशविवर्धनः ॥ ७३
पितृत्वाद्देवतानां हि नास्ति पुण्यतरस्त्वया ।
धन्यस्त्वमचिरादेव स्वर्गं प्राप्स्यसि पुण्यभाक् ॥ ७४
वैशंपायनः—
इत्युक्त्वा देवतास्सर्वा विप्रजग्मुर्यथागतम् ॥ ७४॥
पाण्डुश्च पुनरेवार्यां पुत्रलोभान्महाबलः ।
प्रादिशद्दर्शनीयार्थी कुन्ती त्वेनमथाब्रवीत् ॥ ७५॥
न वै चतुर्थप्रसवं विदुरापत्सु भारत ।
अतः परमनाचारं पञ्चमे वार्धकी भवेत् ॥ ७६॥

1. अ—अथ तस्य तदावृत्ता वर्तन्ते ते तु पाण्डवम् ।
2. अ-क-ख-ग—कोशेषु इदमर्धं नास्ति ।

स वै विद्वान् धर्ममिमं संचोदयति मां कथम् ।
अपत्यलाभात् त्वं राजन् प्रमत्त इव भाषसे ॥ ७७॥

पाण्डुः—

[1]एवमेतद्धर्मशास्त्रं यथा वदसि तत्तथा ॥ ७८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥
॥ ७ ॥ संभवपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
[अस्मिन्नध्याये ७८ श्लोकाः]

॥ चतुर्दशाधिकशततमोऽध्यायः ॥

नकुलसहदेवजननम् ॥ १ ॥ पाण्डवानां नामकरणम् ॥ २ ॥ तेषा-
मुपनयनादिसंस्कारकरणं काश्यपेन ॥ ३ ॥ शुक्राद्धनुर्वेदशिक्षा ॥ ४ ॥

वैशंपायन—

[2]कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुम् इदं वचनमब्रवीत् ॥ १

माद्री—

[3]न मेऽस्ति त्वयि सन्तानो विगुणोऽपि तथाऽनघ ।

---

1. घ—स पत्नीनामभेदेन कुन्ति वृद्धिर्हि जायते ।
माद्रीमनोरथं कुन्ति सुतदानेन पूरय ॥
बहुपुत्रो गृहस्थो यः स स्वर्गायोपकल्पते ॥ [अधिकः पाठः]
2. घ— कुन्त्या पुत्रेषु जातेषु गान्धार्यां अपि सत्सु च ।
3. घ—त्वत्तो न मेऽस्ति सन्तानो मम शोकविनाशनः ।

मम जातो वनस्थाया ह्यवरत्वात् कथञ्चन ॥ २

गान्धार्याश्चापि पुत्राणां शतं जातं महात्मनाम् ।
तत्रापि नैव बलवद् दुःखं मम विशाम्पते ॥ ३

इदं तु मे महद्दुःखं तुल्यतायामपुत्रता ।
दिष्ट्या त्विदानीं भर्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥ ४

यदि त्वपत्यसन्तानं कुन्ती राजसुता मयि ।
कुर्यादनुग्रहो मे स्यात् तव चैव हितं भवेत् ॥ ५

[1]स्तम्भो हि मे सपत्नीत्वाद् अस्ति कुन्तीसुतान् प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥ ६

पाण्डुः—

ममाप्येष सदा माद्रि हृद्यर्थः परिवर्तते ।
न तु त्वां प्रसहे वक्तुम् इष्टानिष्टविवक्षया ॥ ७

तव त्वनुमतो राज्ञि प्रयतिष्ये यथासुखम् ।
आशंसे न चिरात् कुन्ती वचो मे प्रतिपत्स्यते ॥ ८

वैशम्पायनः—

ततः कुन्तीं पुनः पाण्डुर् एकाग्रामिदमब्रवीत् ॥ ८॥

पाण्डुः—

अनुगृह्णीष्व कल्याणि! मद्रराजसुतामपि ।

---

1. घ—न सहेऽहं सपत्नीत्वात् कुन्तीं वक्तुं सुतान् प्रति।

कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥ ९॥
मम वा पिण्डलाभाय पूर्वेषां च महात्मनाम् ।
मत्प्रियार्थं च कल्याणि! कुरु कल्याणमुत्तमम् ॥ १०॥
कुलस्य पिण्डवृद्धिश्च कुलस्य किल सन्ततिः ।
मम चेष्टस्य निर्वृत्तिस् तव चापि परं यशः ॥ ११॥
यशसोऽर्थाय चैव त्वं कुरु कर्म सुदुष्करम् ॥ १२
प्राप्य देवादपत्यं च यज्ञैरिड्या सहस्रशः ।
तथा मन्त्रविदो विप्रांस् तर्पयित्वा सुदुष्करम् ॥ १३
गुरूनभ्युपगच्छन्ति यशसोऽर्थाय भामिनि ॥ १३॥
तथा ब्रह्मर्षयः पूर्वे ब्राह्मणाश्च तपोधनाः ।
चक्रुरुच्चावचं कर्म यशसोऽर्थाय दुष्करम् ॥ १४॥
तथा राजर्षयो वीरा मनुवैन्यादयः पृथक् ।
यथोक्तं धर्मयुक्तानि चक्रुः कर्माणि शोभने ॥ १५॥
सा त्वमद्य प्रवेनैव तारयैनामनिन्दिते ।
अपत्यसंविभागेन परां कीर्तिमवाप्स्यसि ॥ १६॥
धर्म्यं वै धर्मशास्त्रोक्तं यथा वदसि तत्तथा ।
तस्मादनुग्रहं माद्याः कुरुष्व वरवर्णिनि ॥ १७॥
एवमुक्ताऽब्रवीत् स्नेहात् सकृच्चिन्तय दैवतम् ।
तत्र ते भविताऽपत्यम् अनुरूपमसंशयम् ॥ १८॥

वैशम्पायनः—

कुन्त्या मन्त्रे कृते तस्मिन् विधिदृष्टेन कर्मणा ।
ततो राजसुता स्नाता शयने संविवेश ह ॥ १९॥

ततो माद्री विचार्यैका जगाम मनसाश्विनौ ।
तथा च माद्र्यपत्यार्थे प्रायुङ्क्त बलिमुत्तमम् ॥ २०॥

तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ।
नकुलं सहदेवं च रूपेणाप्रतिमं भुवि ॥ २१॥

तथैव तावपि यमौ वागुवाचाद्भुतोपमौ ॥ २२

कर्मतो भक्तितश्चैव शीलेन विनयैस्तथा ।
रूपसत्त्वगुणश्रेष्ठावेताविति नराधिप ॥ २३

भासतस्तेजसाऽत्यर्थं रूपद्रविणसम्पदा ॥ २३॥

कुन्तीमथ पुनः पाण्डुर् माद्र्यर्थे समचोदयत् ।
तमुवाच पतिं राजन् रहस्युक्ता सती तदा ॥ २४॥

कुन्ती—

युक्ता सकृद्द्वन्द्वमेषा लेभे तेनास्मि वञ्चिता ।
बिभेम्यस्याः परिभवान्नारीणां गतिरीदृशी ॥ २५॥

नाज्ञासिषमहं मूढा द्वन्द्वाह्वाने द्वयं फलम् ।
तस्मान्नाहं नियोक्तव्या त्वयैषोऽस्तु वरो मम ॥ २६॥

वैशंपायनः—

एवं पाण्डुसुताः पञ्च देवदत्ता महाबलाः ।
सम्भूताः कीर्तिमन्तस्ते कुरुवंशविवर्धनाः ॥ २७॥

देवौजसस्सत्त्ववन्तस् सर्वशस्त्रविशारदाः ।
दिव्यसंहननास्सर्वे सर्वे भास्वरमूर्तयः ॥ २८॥

सर्वलक्षणसम्पन्नास् सोमवत् प्रियदर्शनाः ।
सिंहदर्पा महेष्वासास् सिंहविक्रान्तचारिणः ॥ २९॥

सिंहक्षीवा मनुष्येन्द्रा ववृधुर्देवदर्शनाः ॥ ३०

विवर्धमानास्ते तत्र पुण्ये हैमवते गिरौ ।
विस्मयं जनयामासुर् महर्षीणां समेयुषाम् ॥ ३१

नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः ।
ऋषयः कर्मतश्चैव रूपतस्स्नेहतस्तथा ॥ ३२

युधिष्ठिर इति ज्येष्ठं भीम इत्येव मध्यमम् ।
तृतीयमर्जुन इति कुन्तीपुत्रानकल्पयन् ॥ ३३

पूर्वजं नकुलं चेति सहदेवं तथाऽपरम् ।
ऊचुर्माद्रीसुतावेवं महाभागास्तपस्विनः॥ ३४

एकवर्षान्तरास्त्वेते परस्परमरिन्दमाः ।
अन्ववर्तन्त पार्थाश्च यमौ पुत्रौ तथैव च ॥ ३५

ते च पञ्च शतं चैव कुरुवंशविवर्धनाः ।

सर्वे ववृधिरे राजन् कालेनाप्सिव पङ्कजाः ॥ ३६

जातमात्रानुपादाय शतशृङ्गनिवासिनः ।
पाण्डोः पुत्रानमन्यन्त तापसास्त्वानिवात्मजान् ॥ ३७

ततस्तु वृष्णयस्सर्वे वासुदेवपुरोगमाः ।
पाण्डुश्शापभयाद्भीतश् शतशृङ्गमुपेयिवान् ॥ ३८

तत्रैव मुनिभिस्सार्धं तापसोऽभूत्तपश्चरन् ॥ ३८॥

शाकमूलफलाहारस् तपस्वी नियतेन्द्रियः ।
ध्यानयोगपरो राजा बभूवेति च वादकाः ॥ ३९॥

प्रब्रुवन्ति स्म बहवस् तच्छ्रुत्वा शोककर्शिताः ॥ ४०

पाण्डोः प्रीतिसमायुक्ताः कदा श्रोष्याम सत्कथाः ॥ ४०॥

इत्येवं कथयन्तस्ते वृष्णयस्सह बान्धवैः ।
पाण्डोः पुत्रागमं श्रुत्वा सर्वे हर्षसमन्विताः ॥ ४१॥

सभाजयन्तस्तेऽन्योन्यं वसुदेवं वचोऽब्रुवन् ॥ ४२

वृष्णयः—

न भवेरन् क्रियाहीनाः पाण्डोः पुत्रा महायशः ।
पाण्डोः प्रियहितान्वेषी प्रेषय त्वं पुरोहितम् ॥ ४३

वैशम्पायनः—

वसुदेवस्तथेत्युक्त्वा विससर्ज पुरोहितम् ॥ ४३॥

युक्तानि च कुमाराणां पारिबर्हाण्यनेकशः ।

कुन्तीं माद्रीं च सन्दिश्य दासीदासपरिच्छदम् ॥ ४४॥
गावो रौप्यं हिरण्यं च प्रेषयामास भारत ॥ ४५
तानि सर्वाणि संगृह्य प्रययौ स पुरोहितः ॥ ४५॥
तमागतं द्विजश्रेष्ठं काश्यपं वै पुरोहितम् ।
पूजयामास विधिवत् पाण्डुः परपुरञ्जयः ॥ ४६॥
पृथा माद्री च संहृष्टे वसुदेवं प्रशंसताम् ॥ ४७
ततः पाण्डुः क्रियास्सर्वाः पाण्डवान् समकारयत् ॥ ४७॥
गर्भाधानादिकृत्यानि चौलोपनयनानि च ॥ ४८
काश्यपः कृतवान् सर्वम् उपाकर्म च भारत ॥ ४८॥
चौलोपनयनादूर्ध्वम् ऋषभाक्षा यशस्विनः ।
वैदिकाध्ययने सर्वे समपद्यन्त पारगाः ॥ ४९॥
शय्यातेः [1]प्रथमः पुत्रश् शुको नाम परन्तपः ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ ५०॥
अश्वमेधशतैरिष्ट्वा स महात्मा महामखैः ।
आराध्य देवतास्सर्वाः पितॄनपि महामतिः ॥ ५१॥
शतशृङ्गे तपस्तेपे शाकमूलफलाशनः ॥ ५२
तेनोपकरणश्रेष्ठैश् शिक्षया चोपबृंहिताः ।
तत्प्रसादाद्धनुर्वेदे समपद्यन्त पारगाः ॥ ५३

1. घ—पृषतेः

गदायां पारगो भीमस् तोमरेषु युधिष्ठिरः ।
असिचर्मणि निष्णातौ यमौ सत्त्ववतां वरौ ॥ ५४

धनुर्वेदे गतः पारं सव्यसाची परन्तपः ।
शुक्रेन समनुज्ञातो मत्समोऽयमिति प्रभो ॥ ५५

अनुज्ञाय ततो राजा शक्तिं खड्गं तथा शरान् ।
धनुश्च ददतां श्रेष्ठस् तालमात्रं महाप्रभम् ॥ ५६

विपाठक्षुरनाराचान् गृध्रपत्रानलङ्कृतान् ।
ददौ पार्थाय संहृष्टो महोरगसमप्रभान् ॥ ५७

अवाप्य सर्वशस्त्राणि मुदितो वासवात्मजः ।
मेने सर्वान् महीपालान् अपर्याप्तान् स्वतेजसः ॥ ५८

एकवर्षान्तरास्त्वेते परस्परमरिन्दमाः ।
अन्ववर्तन्त पार्थाश्च माद्रीपुत्रौ तथैव च ॥ ५९

ते च पञ्च शतं चैव कुरुवंशविवर्धनाः ।
सर्वे ववृधुरल्पेन कालेनाप्सिव नीरजाः ॥ ६०

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

॥ ७ ॥ संभवपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

[अस्मिन्नध्याये ६० श्लोकाः]

॥ पञ्चदशाधिकशततमोऽध्यायः ॥

युधिष्ठिरादीनामायुर्भावकथनम् ॥ १ ॥ पाण्डुमरणं माद्रीसहगमनं तद्दहनादिसंस्कारश्च ॥ २ ॥

वैशंपायनः—

पाण्डवानां तथाऽऽयुष्यं शृणु कौरवनन्दन ।
जगाम हास्तिनपुरं षोडशाब्दो युधिष्ठिरः ॥ १

[1]पञ्चदशाब्दो भीमस्तु चतुर्दशाब्दो धनञ्जयः ।
त्रयोदशाब्दौ च यमौ जग्मतु र्नागसाह्वयम् ॥ २

तत्र त्रयोदशाब्दानि धार्तराष्ट्रैस्सहोषिताः ।
षट् च मासाञ्ज्तुगृहान्मुक्ता जातो घटोत्कचः ॥ ३

षण्मासानेकचक्रायां वर्षं पाञ्चालके गृहे ।
धार्तराष्ट्रैस्सहोषित्वा पञ्च वर्षाणि भारत ॥ ४

इन्द्रप्रस्थे वसन्तस्ते त्रीणि वर्षाणि विंशतिम् ।
द्वादशाब्दान् यथैकं च बभ्रमुर्द्यूतनिर्जिताः ॥ ५

[2]भुक्त्वा षट्त्रिंशतं राज्यं सागरान्तां वसुन्धराम् ।
मासैष्षड्भिर्महात्मानस् सर्वे कृष्णपरायणाः ॥ ६

1. क-ख-घ—भीमसेनः पञ्चदशे बीभत्सुर्वै चतुर्दशे ।
2. घ—विराटनगरे चैकं हायनं गूढचर्यकम् । [अधिकः पाठः]

राज्ये परीक्षितं स्थाप्य इष्टां गतिमवाप्नुवन् ॥ ६॥

एवं युधिष्ठिरस्यापि आयुरष्टोत्तरं शतम् ॥ ७

अर्जुनात् केशवो ज्येष्ठस् त्रिभिर्मासैर्महाभुजः ।

कृष्णात् सङ्कर्षणो ज्येष्ठस् त्रिभिर्मासैर्महाबलः ॥[1] ८

[2]दर्शनीयांस्ततः पुत्रान् पाण्डुः पञ्च महावने ।

तान् पश्यन् पर्वते रम्ये स्वबाहुबलपालितान् ॥ ९

[3]सुपुष्पितवने काले प्रवृत्ते मधुमाधवे ।

पूर्णे चतुर्दशे वर्षे फल्गुनस्य च धीमतः ॥ १०

तदा उत्तरफल्गुन्यां प्रवृत्ते स्वस्तिवाचने ।

[4]रक्षणे विस्मृता कुन्ती व्यग्रा ब्राह्मणभोजने ॥ ११

पुरोहितेन सहिता ब्राह्मणान् पर्यवेषयत् ॥ ११॥

तस्मिन् काले समाहूय माद्रीं मदनमोहितः ।

[5]भूतसंमोहने काले सभार्यो व्यचरद्वने ॥ १२॥

---

1. क—रामो वृकोदराज्ज्येष्ठस्त्रिभिर्मासै र्महाबलः । [अधिकः पाठः]
2. घ—प्राकृतं शृणु राजेन्द्र पाण्डवानां यशस्विनाम् ।
पाण्डोः स्वर्गगतिं चैव माद्र्या सह सुशीलया ॥ [अधिकः पाठः]
3. घ—ऋणत्रयाद्विप्रमुक्तं मेने चात्मानमात्मना ।
अवाप पुत्रिणां प्रीतिं यज्ञकोटिसुदुर्लभाम् ॥ [अधिकः पाठः]
4. घ—माद्री सङ्क्रमनात्पाण्डुं दिवारात्रमतन्द्रिता ।
रक्षन्ती सा पतिं कुन्ती विस्मृता कालपर्ययात् ।
अथ संवत्सरे जिष्णोर्व्यापृता शुभकर्मणि ॥ [अधिकः पाठः]
5. घ—अज्ञातं पृथया भूपः कालपाशप्रपाशितः ॥ [अधिकः पाठः]

[1]पलाशैस्तिलकैश्चूतैश् चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च मल्लिकैरतिमुक्तकैः ॥ १३॥

वकुलैस्तिलकैस्सालैः पनसैर्वनकिंशुकैः ।
अन्यैश्च बहुभिर्वृक्षैर् लतापुष्पफलैर्वृतम् ॥ १४॥

जलस्थानैश्च बहुभिः पद्मिनीभिश्च शोभितम् ।
पाण्डोर्वनं तु संप्रेक्ष्य प्रजज्ञे हृदि मन्मथः ॥ १५॥

मत्तभ्रमरसङ्गीतं कोकिलस्वनमिश्रितम् ॥ १६

गायमानैस्तु गन्धर्वैः पुरा नागपुरे यथा ।
प्रहृष्टमनसं तत्र विहरन्तं यथाऽमरम् ॥ १७

तं माद्र्यनुजगामैका वसने बिभ्रती शुभे ॥ १७॥

[2]समीक्षमाणस्य तु तां वयस्थां तनुवाससम् ।
तस्य कामः प्रववृधे गहनेऽग्निरिवोत्थितः ॥ १८॥

रहस्यात्मसमां दृष्ट्वा राजा राजीवलोचनाम् ।
न शशाक नियन्तुं तं कामं कामबलात्कृतः ॥ १९॥

अथ सोऽष्टादशे वर्षे ऋतौ माद्रीमलङ्कृताम् ।
आजुहाव ततः पाण्डुः परीतात्मा यशस्विनीम् ॥ २०॥

---

1. घ—प्रियायै दर्शयन् पश्यन् स्वयं च मधुसंपदम् । [अधिकः पाठः]
2. घ—तां माद्रीं पश्यतः पाण्डोः श्यामामरुणवाससम् ।

तत एनां बलाद्राजा जग्राह च रहोगतः ।
वार्यमाणस्तया देव्या विस्फुरन्त्या यथाबलम् ॥ २१॥

[1]स तु कामपरीतात्मा तं शापं नान्वबुध्यत ।
माद्रीं मैथुनधर्मेण गच्छमानो बलादिव ॥ २२॥

जीवितान्ताय कौरव्यो मन्मथस्य वशं गतः ।
शापजं भयमुत्सृज्य जगामैव बलात् प्रियाम् ॥ २३॥

[2]तस्य कामात्मनो बुद्धिस् साक्षात् कालेन मोहिता ।
सम्प्रमथ्येन्द्रियग्रामं प्रनष्टा सहचेतना ॥ २४॥

स तया सह सङ्गम्य भार्यया कुरुसत्तमः ।
पाण्डुः परमधर्मात्मा युयुजे कालधर्मणा ॥ २५॥

क्षणेनाभ्यपतद्राजा राजधानीं यमस्य वै ॥ २६

ततो माद्री समालिङ्ग्य राजानं गतचेतसम् ।
आक्रोशपरमायत्ता चक्रवाकी यथा पतिम् ॥ २७

तं श्रुत्वा करुणं शब्दं सहसोत्पतितं तदा ।
सहपुत्रा ततः कुन्ती माद्रीपुत्रौ च पाण्डवौ ॥ २८

आजग्मुस् सहितास्तत्र यत्र राजा तथा गतः ॥ २८॥

---

1. घ-गृहीताऽऽच्छिद्य करया धावन्त्या सर्वतो वनम् । [अधिकः पाठः]
2. घ—क्रोशन्तीं वारयन्तीं च बलात्केशग्रहात् प्रियाम् ।
पातयित्वा जगामाशु कुक्कुटन्यायमास्थितः ॥ [अधिकः पाठः]

ततो माद्र्यब्रवीद्राजन् आर्ता कुन्तीमिदं तदा.।
एकैव त्वमिहागच्छ तिष्ठन्तां तत्र दारकाः ॥ २९॥

एतच्छ्रुत्वा वचस्तस्यास् तत्रैवावार्य दारकान् ।
हताऽहमिति विक्रुश्य सहसोपजगाम ताम् ॥ ३०॥

दृष्ट्वा माद्रीं च पाण्डुं च शयानौ धरणीतले ।
कुन्ती शोकपरीताङ्गी विललाप सुदुःखिता ॥ ३१॥

कुन्ती—

रक्ष्यमाणो मया नित्यं धीरस्सततमात्मवान् ।
कथं त्वामत्यतिक्रान्तश् शापं जानन् वनौकसः ॥ ३२॥

ननु नाम त्वया माद्रि रक्षितव्यो नराधिपः ।
सा कथं लोभितवती विजने त्वं नराधिपम् ॥ ३३॥

माद्री—

विधिना चोदितस्यास्य मां दृष्ट्वा विजने वने ।
अचिन्तयित्वा तच्छापं प्रहर्षस्समजायत ॥ ३४॥

कुन्ती—

कथं दिने वसन्ते त्वाम् आसाद्य च रहोगताम् ।
तं विचिन्तयतश्शापं प्रहर्षस्समजायत ॥ ३५॥

धन्या त्वमसि बाह्लीके मत्सौभाग्यतरा भुवि ।
दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः ॥ ३६॥

माद्री—

अलोभ्यमानेन मया वार्यमाणेन चासकृत् ।
आत्मा न धारितस्तेन सत्यं दिष्टं चिकीर्षुणा ॥ ३७॥

वैशम्पायनः—

तस्यास्तद्वचनं श्रुत्वा कुन्ती शोकाग्नितापिता ।
पपात सहसा भूमौ छिन्नमूल इव द्रुमः ॥ ३८॥

निश्चेष्टा पतिता भूमौ मोहेन तु चचाल सा ॥ ३९

तस्मिन्क्षणे कृतस्नानम् अमलाम्बरसंवृतम् ।
[1]अलङ्कारकृतं पाण्डुं शयानं शयने शुभे ॥ ४०

कुन्तीमुत्थाप्य माद्री च मोहेनाविष्टचेतनाम् ।
एह्येहीति तां कुन्तीं दर्शयामास कौरवम् ॥ ४१

पादयोः पतिता कुन्ती पुनरुत्थाय भूमिपम् ।
रक्तचन्दनदिग्धाङ्गं महारजनवाससम् ॥ ४२

सस्मितेन तु वक्त्रेण गदन्तमिव भारत ।
[2]परिरभ्य तदा मोहाद् विललापाकुलेन्द्रिया ॥ ४३

माद्री चापि समालिङ्ग्य राजानं विललाप सा ॥ ४३॥

---

1. घ—अहताम्बरसंवीतं रक्तगन्धानुलेपनम् ।
रक्तमाल्याम्बरधरं सर्वाभरणभूषितम् ॥
अलङ्कृत्य च तं पाण्डुं शाययित्वाऽसितेक्षणा ।
क्षौमास्तरणसंवीते शयने त्यक्तरोदना ॥ [अधिकः पाठः]

2. घ—तद्वक्त्रे वक्त्रमाधाय दशन्तमिव भारत । [अधिकः पाठः]

तं तथाऽधिगतं पाण्डुम् ऋषयस्सह चारणैः ।
अभ्येत्य सहितास्सर्वे शोकाश्रूणि प्रवर्तयन् ॥ ४४॥

अस्तं गतमिवादित्यं सुशुष्कमिव सागरम् ।
दृष्ट्वा पाण्डुं नरव्याघ्रं शोचन्ति स्म महर्षयः ॥ ४५॥

समानशोका ऋषयः पाण्डवाश्च बभूविरे ।
ते समाश्वासिते विप्रैर् विलेपतुरनिन्दिते ॥ ४६॥

कुन्ती—

हा राजन् कस्य नो हित्वा गच्छसि त्रिदशालयम् ॥ ४७

हा राजन् मम मन्दायाः कथं माद्रीं समेत्य वै ।
निधनं प्राप्तवान् राजन् मद्भाग्यपरिसंक्षयात् ॥ ४८

युधिष्ठिरं भीमसेनम् अर्जुनं च यमावुभौ ।
कस्य हित्वा प्रियान् पुत्रान् प्रयातोऽसि विशाम्पते ॥ ४९

नूनं त्वां त्रिदशा देवाः प्रतिनन्दन्ति भारत ।
यथा हि तप उग्रं ते चरितं विप्रसंसदि ॥ ५०

आवाभ्यां सहितो राजन् गमिष्यसि दिवं शुभाम् ।
आजमीढाजमीढानां कर्मणा चरितां गतिम् ॥ ५१

ननु नाम सहावाभ्यां गमिष्यामीति नस्त्वया ।
प्रतिज्ञातं कुरुश्रेष्ठ यदाऽस्मि वनमागता ॥ ५२

आवाभ्यां त्वेव सहितो गमिष्यसि विशां पते ।

मुहूर्तं क्षम्यतां राजन् आरोक्ष्यावश्चितां तव ॥ ५३

वैशंपायनः—

विलपित्वा भृशं त्वेवं निस्संज्ञे पतिते भुवि ।
यथा मृगे हते मृग्यौ लुब्धैर्वनगतैस्तदा ॥ ५४

युधिष्ठिरमुखास्सर्वे पाण्डवा वेदपारगाः ।
तेऽप्यागत्य पितुर्मूले निस्संज्ञाः पतिता भुवि ॥ ५५

पाण्डोः पादौ परिष्वज्य विलपन्ति स्म पाण्डवाः ॥ ५५॥

युधिष्ठिरः—

हा विनष्टास्स्म तातेति हा अनाथा भवामहे ।
[1]क्षणेनैव महाराज अहो लोकस्य चित्रता ॥ ५६॥

नास्मद्विधा राजपुत्रा अधन्यास्सन्ति भारत ।
त्वद्विनाशाच्च राजेन्द्र राज्यप्रस्खलनात्तथा ॥ ५७॥

बान्धवानामथाज्ञानात् प्राप्तास्स्म व्यसनं महत् ।
किं करिष्यामहे राजन् कर्तव्यं नः प्रसीदताम् ॥ ५८॥

---

1. क-ख-ग—त्वद्विहीना महाप्राज्ञ कथं वर्तामं बालकाः ।
लोकनाथस्य पुत्रास्स्मो न सनाथा भवामहे ॥
[अधिकः पाठः]
घ—हा मग्नाः शोकदुःखाब्धौ शून्याः पश्यामहे दिशः ।
त्वद्विहीना महाप्राज्ञ कथं जीवामहेऽबलाः ॥
लोकनाथस्य पुत्रास्स्मो न सनाथा भवामहे ।
क्षणेनैव महाराज पतिता दुःखसागरे ॥ [अधिकः पाठः]

भीमसेनः—

हित्वा राज्यं च भोगांश्च शतशृङ्गे निवासिना ।
त्वया लब्धास्म राजेन्द्र महता तपसा वयम् ॥ ५९॥

हित्वा मानं वनं गत्वा स्वयमाहृत्य भक्षणम् ।
शाकमूलफलैर्वन्यैर् भरणं वै त्वया कृतम् ॥ ६०॥

पुत्रानुत्पाद्य पितरो यमिच्छन्ति महात्मनः ।
त्रिवर्गफलमिच्छन्तस् तस्य कालोऽयमागतः ॥ ६१॥

अभुक्त्वैव फलं राजन् गन्तुं नार्हसि भारत ॥ ६२

वैशम्पायनः—

इत्येवमुक्त्वा पितरं भीमोऽपि विललाप ह ॥ ६२॥

अर्जुनः—

प्रनष्टं भारतं वंशं पाण्डुना पुनरुद्धृतम् ॥ ६३

तस्मिंस्तपोवनगते नष्टं राज्यं सराष्ट्रकम् ।
पुनर्निस्तारितं क्षत्रं पाण्डुपुत्रैश्च पञ्चभिः ॥ ६४
एतच्छ्रुत्वाऽनुमोदित्वा गन्तुमर्हसि कौरव ॥ ६४॥

वैशम्पायनः—

इत्येवमुक्त्वा पितरं विललाप धनञ्जयः ॥ ६५

यमौ—

दुस्सञ्चयं तपः कृत्वा लब्ध्वा नो भरतर्षभ ।
पुत्रलाभस्य महतश् शुश्रूषादिफलं त्वया ॥ ६६
न चावाप्तं त्वया तात त्वत्पित्रा तु यथा पुरा ॥ ६६॥

वैशम्पायनः—

एवमुक्त्वा यमौ चापि विलेपतुरथातुरौ ॥ ६७

कुन्ती—

अहं ज्येष्ठा धर्मपत्नी ज्येष्ठं धर्मफलं मम ।
अवश्यंभाविनो भावान् मा मा माद्रि निवर्तय ॥ ६८
अन्वेष्यामीह भर्तारम् अहं प्रेतवशं गतम् ।
[1]उत्तिष्ठैनं विसृज्य त्वम् इमान् रक्षस्व दारकान् ॥ ६९
अवाप्य पुत्राँल्लब्धात्मा वीरपत्नीत्वमर्थये ॥ ६९॥

वैशम्पायनः—

मद्रराजसुता कुन्तीम् इदं वचनमब्रवीत् ॥ ७०

माद्री—

अहमेवानुयास्यामि भर्तारमपलायिनम् ।
न हि तृप्ताऽस्मि कामानां त्वं ज्येष्ठा ह्यनुमन्यताम् ॥ ७१
मां चाभिगम्य क्षीणोऽयं कामाद्भरतसत्तमः ।
समुच्छिन्द्यामस्य कामं कथं नु यमसादने ॥ ७२
मम हेतोर्गतो राजा दिवं राजर्षिसत्तमः ।
न चैव तादृशी बुद्धिर् बान्धवाश्च न तादृशाः ॥ ७३

---

1. घ—उत्तिष्ठ त्वं विसृज्याहं मा मोक्ष्यामि चितामिमाम् ॥
महाराजेन पतिना भोक्ष्ये स्वर्गफलं महत् ।
दारकांस्त्वमिमान् रक्ष पुत्रप्रीतिमवाप्नुहि ॥
साम्राज्यपदसंप्राप्तान् पश्यन्ती प्रीतिमाप्नुहि ।
उत्तारमनुयामीह वीरपत्नि समृद्धये ॥ [अधिकः पाठः]

न चोत्सहे धारयितुं प्राणान् भर्त्रा विनाकृता ।
[1]तस्मात्तमनुयास्यामि यान्तं वैवस्वतक्षयम् ॥ ७४
वर्तेयं न समां वृत्तिं जात्वहं च सुतेषु ते ।
[2]तथा हि वर्तमानां माम् अधर्मस्संपृशेन्महान् ७५
तस्मान्मे सुतयोर्देवि वर्तितव्यं स्वपुत्रवत् ।
[3]अन्वेष्यामि च भर्तारं व्रजन्तं यमसादनम् ॥ ७६
मां हि कामयमानोऽयं राजा प्रेतवशं गतः ॥ ७६॥
[4]राज्ञश्शरीरेण सह ममापीदं कलेबरम् ।
दग्धव्यं सुप्रतिच्छन्नम् एतदार्ये प्रियं कुरु ॥ ७७॥
दारकेष्वप्रमत्ता त्वं भवेश्चाभिहिता मम ।
अतोऽन्यन्न प्रपश्यामि सन्देष्टव्यं हि किञ्चन ॥ ७८॥

वैशंपायनः—

ऋषयस्तान् समाश्वास्य पाण्डवान् सत्यविक्रमान् ।
ऊचुः कुन्तीं च माद्रीं च समाश्वास्य तपस्विनः ॥ ७९॥
सुभगे बालपुत्रे तु न मर्तव्यं कथञ्चन ।
पाण्डवांश्चापि नेष्यामः कुरुराष्ट्रं परन्तपान् ॥ ८०॥

---

1. घ—या कामात् भवता गच्छेत् सा त्वया सह यास्यति ।
इति विप्रोऽशपत्पूर्वं तस्माद्यास्याम्यहं पतिम् ॥ [अधिकः पाठः]
2. घ—नाहं शक्ता समं ज्येष्ठे वर्तितुं बालिशा ह्यहम् । [अधिकः पाठः]
3. घ—नूनं तव सुतावेतौ त्वन्मन्त्रमहिमोद्भवौ । [अधिकः पाठः]
4. घ—प्रारब्धसुखलाभार्थं मदागमनमात्मवान् ।
पश्यन्नास्ते पुरो गत्वा मध्येमार्गं नृपोत्तमः ॥ [अधिकः पाठः]

अधर्मेष्वर्थजातेषु धृतराष्ट्रश्च लोभवान् ।
स कदाचिन्न वर्तेत पाण्डवेषु यथाविधि ॥ ८१॥

कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
माद्र्याश्च बलिनां श्रेष्ठश्शल्यो भ्राता महारथः ॥ ८२॥

भर्त्रानुमरणं सार्थं फलवन्नात्र संशयः ।
[1]युवाभ्यां दुष्करं चैतद् वदन्ति द्विजपुङ्गवाः ॥ ८३॥

मृते भर्तरि या साध्वी ब्रह्मचर्यव्रते स्थिता ।
यमैश्च नियमैश्शान्ता मनोवाक्कायजैश्शुभैः ॥ ८४॥

[2]भर्तारं चिन्तयन्ती सा भर्तारं निस्तरेच्छुभा ।
तारितश्चापि भर्ता स्याद् आत्मा पुत्रस्तथैव च ॥ ८५॥

[3]तस्माज्जीवितमेवैतद् युवयोर्विद्म शोभनम् ॥ ८६

---

1. घ—असाध्यो धर्मसूक्ष्मत्वाद् दुष्करं प्रतिभाति नः ।
भर्त्रानुगमनं स्त्रीणां सुकरं जीवितं भवेत् ॥
क्लेशोऽधितरणं स्त्रीणां पाण्डुर्देहेन मारणम् ।
मारणं जीवितं श्रेयो भर्त्रा सायुज्यदं शुभम् ॥ [अधिकः पाठः]

2. घ—व्रतोपवासनियमैः कृच्छ्रैश्चान्द्रायणादिभिः ।
भूशय्यां क्षारलवणं वर्जनं चैकभोजनम् ॥
येन केनापि विधिना देहशोषणतत्परा ।
देहपोषणसंयुक्ता विषयै र्हृतचेतना ॥
देहव्ययेन नरकं महदाप्नोत्यसंशयः ।
तस्मात्सं शोषयेद्देहं विषया नाशमाप्नुयुः ॥ [अधिकःपाठः]

3. घ—अपुत्रिणां मृतानां स्त्री पुत्रिणां लोकदा भवेत् ।
विधवाचारसंयुक्ता सा सुपुत्रासमा स्मृतिः ॥ [अधिकः पाठः]

कुन्ती—

यथा पाण्डोश्च निर्देशस् तथा विप्रगणस्य च ।
आज्ञा शिरसि निक्षिप्ता करिष्यामि च तत्तथा ॥ ८७

यथाऽऽहुर्भगवन्तो हि तन्मन्ये शोभनं परम् ।
भर्तुश्च मम पुत्राणां मम चैव न संशयः ॥ ८८

माद्री—

कुन्ती समर्था पुत्राणां योगक्षेमस्य धारणे ।
अस्या हि न समा बुद्ध्या यद्यपि स्यादरुन्धती ॥ ८९

कुन्त्याश्च वृष्णयो नाथाः कुन्तीभोजस्तथैव च ।
नाहं त्वमिव पुत्राणां समर्था धारणे तथा ॥ ९०

साऽहं भर्तारमन्वेष्ये अतृप्ता नन्वहं तथा ।
भर्तृलोकस्य तु ज्येष्ठा देवी मामनुमन्यताम् ॥ ९१

धर्मज्ञस्य कृतज्ञस्य सत्यधर्मस्य धीमतः ।
पादौ परिचरिष्यामि तदार्ये ह्यनुमन्यताम् ॥ ९२

वैशंपायनः—

एवमुक्त्वा महाराज मद्रराजसुता शुभा ।
ददौ कुन्त्यै यमौ माद्री शिरसाऽभिप्रणम्य च ॥ ९३

अभिवाद्य ऋषीन् सर्वान् परिष्वज्य च पाण्डवान् ।
मूर्ध्न्युपाघ्राय बहुशः पार्थानात्मसुतौ तथा ॥ ९४

हस्ते युधिष्ठिरं गृह्य माद्री वाक्यमभाषत ॥ ९४॥

माद्री—

कुन्ती माता अहं धात्री युष्माकं तु पिता मृतः ।
युधिष्ठिरः पिता ज्येष्ठश् चतुर्णां धर्मतस्सदा ॥ ९५॥

वृद्धानुशासने सक्तास् सत्यधर्मपरायणाः ।
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ॥ ९६॥

तस्मात् सर्वे कुरुध्वं वै गुरुवृत्तिमतन्द्रिताः ॥ ९७

वैशंपायनः—

ऋषीणां च पृथायाश्च नमस्कृत्य पुनः पुनः ।
आयासकृपणा माद्री प्रत्युवाच पृथां तथा ॥ ९८

धन्या त्वमसि वार्ष्णेयि नास्ति स्त्री सदृशी त्वया ।
वीर्यं तेजश्च योगं च माहात्म्यं च यशस्विनाम् ॥ ९९

कुन्ति द्रक्ष्यसि पुत्राणां पञ्चानाममितौजसाम् ।
ऋषीणां सन्निधावेषां मया वाग्भ्युदीरिता ॥ १००

दिदृक्षमाणायास्स्वर्गं ममैषा न वृथा भवेत् ।
आर्या चाप्यभिवाद्या च मम पूज्या च सर्वतः ॥ १०१

ज्येष्ठा वरिष्ठा त्वं देवि भूषिता स्वगुणैश्शुभैः ।
अभ्यनुज्ञातुमिच्छामि त्वया [1]यादवनन्दिनि ॥ १०२

1. अ—यावदनिन्दिते।

धर्मं स्वर्गं च कीर्तिं च त्वत्कृतेऽहमवाप्नुयाम् ।
यथा तथा विधत्स्वेह मा च कार्षीर्विचारणाम् ॥ १०३

वैशंपायनः—

बाष्पसन्दिग्धया वाचा कुन्त्युवाच यशस्विनी ॥ १०३॥

कुन्ती—

अनुज्ञातासि कल्याणि त्रिदिवे सङ्गमोऽस्तु ते ।
भर्त्रा सह विशालाक्षि क्षिप्रमद्यैव भामिनि ॥ १०४॥

सङ्गता स्वर्गलोके त्वं रमेथाश्शाश्वतीस्समाः ॥ १०५

वैशंपायनः—

ततः पुरोहितस्स्नात्वा प्रेतकर्मणि पारगः ।
हिरण्यशकलान्याज्यं तिलान् दधि च तण्डुलान् ॥ १०६

उदकुम्भं सपरशुं समानीय तपस्विभिः ।
अग्निमेधाग्निमाहृत्य यथान्यायं समन्ततः ॥ १०७

काश्यपः कारयामास पाण्डोः प्रेतस्य तां क्रियाम् ॥ १०७॥

पुरोहितोक्तविधिना पाण्डोः पुत्रो युधिष्ठिरः ।
चित्याग्निनाऽदहत् पाण्डुं कृत्वा चापि क्रियां तदा ॥ १०८॥

रुदन्छोकाभिसंतप्तः पपात भुवि पाण्डवः ॥ १०९

ऋषीन् पुत्रान् पृथां चैव विसृज्य च नृपात्मजान् ।

[1]नमस्कृत्य चिताग्निस्थं धर्मपत्नी नराधिपम् ॥ ११०

मद्रराजात्मजा तूर्णम् अन्वारोहद्यशस्विनी ॥ ११०॥

अहताम्बरसंवीतो भ्रातृभिस्सहितोऽनघः ।

उदकं कृतवांस्तत्र पुरोहितमते स्थितः ॥ १११॥

[2]अर्हतस्तस्य कृत्यानि शतशृङ्गनिवासिनः ।

तापसा विधिवच्चक्रुश् चारणा ऋषिभिस्सह ॥ २१२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

॥ ७ ॥ संभवपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥

[अस्मिन्नध्याये ११२॥ श्लोकाः]

॥ षोडशाधिकशततमोऽध्यायः ॥

हास्तिनपुरं प्राप्य पाण्डुचरितमुक्त्वा युधिष्ठिरादीन् भीष्माय समर्प्य च ऋषीणां प्रतिनिवर्तनम् ॥ १ ॥

वैशंपायनः—

पाण्डोरवभृथं कृत्वा देवकल्पा महर्षयः ।

ततो मन्त्रमकुर्वन्त ते समेत्य तपस्विनः ॥ १

---

1. घ—नमस्कृत्य ऋषीन् सर्वाननुज्ञाता मुनीश्वरैः ।
आशीर्भिर्वर्धयित्वा च पाण्डवान् धर्मशीलिनः॥[अधिकः पाठः]

2. घ—एककुण्डेऽददात्पित्रो र्निवापं विधिचोदनात् ।
एकपाके पृथक् श्राद्धं वृषोत्सर्जनपूर्वकम् ॥ [अधिकः पाठः]

हित्वा राज्यं च राष्ट्रं च स महात्मा महातपाः ।
अस्मिन् स्थाने तपस्तप्तुं तापसान् शरणं गतः ॥ २

सञ्जातमात्रान् पुत्रांश्च दारांश्च भवतामिह ।
प्रदायोपनिधिं राजा पाण्डुस्स्वर्गमितो गतः ॥ ३

तस्मात् कृत्यं परीक्षध्वम् इति होवाच धर्मवित् ।
शुक्रः परमकल्याणो गिरा समभिभाषत ॥ ४

ते परस्परमामन्त्र्य सर्वभूतहिते रताः ।
धर्मं चैव पुरस्कृत्य श्रेष्ठां मतिमकुर्वत ॥ ५

कुरुक्षेत्रमितः कुन्तीं तां सपुत्रां नयामहे ।
इत्युक्त्वा ते महात्मानो गमने चक्रिरे मनः ॥ ६

तस्मिन्नेव क्षणे सर्वे परिवार्य प्रतस्थिरे ।
पाण्डोः पुत्रान् पुरस्कृत्य नगरं नागसाह्वयम् ॥ ७

भीष्माय पाण्डवान् दातुं धृतराष्ट्राय चैव हि ।
तस्मिन्नेव क्षणे सर्वे तानादाय प्रतस्थिरे ॥ ८

पाण्डोर्दारांश्च पुत्रांश्च शरीरे चैव तापसाः ॥ ८॥

सुखिनी सा पुरा भूत्वा सततं पुत्रवत्सला ।
प्रपन्ना दीर्घमध्वानम् संक्षिप्तं तममन्यत ॥ ९॥

सा न दीर्घेण कालेन सम्प्राप्ता कुरुजाङ्गलम् ।
वर्धमानपुरद्वारम् आससाद यशस्विनी ॥ १०॥

तच्चारणसहस्रं वै मुनीनां चागतं तदा ।
श्रुत्वा नागपुरेन्द्राणां विस्मयस्समजायत ॥ ११॥

मुहूर्तोदित आदित्ये सर्वे भीष्मपुरोगमाः ।
सदारास्तापसान् द्रष्टुं निर्ययुः पुरवासिनः ॥ १२॥

स्त्रीसङ्घाः क्षत्रसङ्घाश्च यानसङ्घान् समास्थिताः ।
ब्राह्मणैस्सह निर्जग्मुर् ब्राह्मणाश्च सयोषितः ॥ १३॥

तथा विट्च्छूद्रसङ्घानां महान् व्यतिकरोऽभवत् ॥ १४
न कश्चिदकरोदीर्ष्याम् अभवन् धर्मबुद्धयः ॥ १४॥

तथा भीष्मश्शान्तनवस् सोमदत्तोऽथ बाह्लिकः ।
प्रज्ञाचक्षुश्च राजर्षिः क्षत्ता च विदुरस्स्वयम् ॥ १५॥

सा च सत्यवती देवी देवी चाम्बालिकाऽपि च ।
राजदारैः परिवृता गान्धारी चापि निर्ययौ ॥ १६॥

धृतराष्ट्रस्य दायादा दुर्योधनपुरस्सराः ।
भूषिता भूषणैश्चित्रैश् शतसङ्ख्या विनिर्ययुः ॥ १७॥

तान् महर्षिगणान् सर्वान् शिरोभिरभिवाद्य च ।
स्वागतं वचनं चोक्त्वा पाण्डोर्भवनमाविशन् ॥ १८॥

उपोपविविशुस्सर्वे कौरवस्य पुरोहिताः ॥ १९
तथैव शिरसा भूमावभिवाद्य प्रसाद्य च ।
उपोपविविशुस्सर्वे पौरजानपदा अपि ॥ २०
[1]तमद्भुतमिवाज्ञाय जनौघं सर्वशस्तदा ।
भीष्मो राज्यं च राष्ट्रं च महर्षिभ्यो न्यवेदयत् ॥ २१
तेषां वृद्धतमः कश्चित् प्रत्युत्थाय जटाजिनी ।
महर्षिमतमास्थाय महर्षिरिदमब्रवीत् ॥ २२

महर्षिः—

यस्स कौरव्यदायादः पाण्डुर्नाम नराधिपः ।
हित्वा राष्ट्राणि राज्यं च शतशृङ्गमितो गतः ॥ २३
कामभोगान् परित्यज्य तपस्वी ह बभूव ह ।
स यथोक्तं तपस्तेपे तत्र मूलफलाशनः ॥ २४
पत्नीभ्यां सह धर्मात्मा कञ्चित् कालमतन्द्रितः ॥ २४॥
तेन वृत्तसमाचारैस् तपसा च तपस्विनः ।
तोषितास्तापसास्तत्र शतशृङ्गनिवासिनः ॥ २५॥
स्वर्गलोकं गन्तुकामं तपसा विनिवार्य तम् ।
उद्यन्तं सह पत्नीभ्यां विप्रा वचनमब्रुवन् ॥ २६॥
अनपत्यस्य राजेन्द्र पुण्यलोका न सन्ति ते ॥ २७
तस्माद्धर्मं च वायुं च महेन्द्रं च तथाऽश्विनौ ।

1. क-ग--अक्रूरमिव चाज्ञाय; ख—तमग्रजमिवाज्ञाय

आराधयस्व राजेन्द्र पत्नीभ्यां सह देवताः ॥ २८
तृप्ताः पुत्रान् प्रयच्छन्ति ऋणमुक्तो भविष्यसि ॥ २८॥
तपसा दिव्यचक्षुष्त्वात् पश्यामस्ते तथा सुतान् ॥ २९
अस्माकं वचनं श्रुत्वा देवानाराधयत्तदा ॥ २९॥
[1]ब्रह्मचर्यव्रतस्थस्य तस्य दिव्येन हेतुना ।
तस्माद्धर्मादयं पुत्रः कुन्त्यां जातो युधिष्ठिरः ॥ ३०॥
तथेमं बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः ।
मातरिश्वा ददौ पुत्रं भीमं बलवतां वरम् ॥ ३१॥
पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जयः ॥ ३२
अस्मिञ्जाते महेष्वासे देवैरिन्द्रस्तथाऽब्रवीत् ॥ ३२॥
मत्प्रसादादयं जातः कुन्ति सत्यपराक्रमः ।
[2]अजेयो युधि जेताऽरीन् देवतादीन् न संशयः ॥ ३३॥
यस्य कीर्तिर्महेष्वासान् सर्वान्नोऽभिभविष्यति ।
युधिष्ठिरो राजसूयं भ्रातृवीर्यादवाप्स्यति ॥ ३४॥

---

1. घ—कुन्तीं स प्रेरयामास देवरन्यायधर्मतः ।
सा नामन्यत तं न्यायं पुण्यैराख्यानकैरपि ।
मुनेर्मन्त्रप्रभावेन शक्रांशं त्रियोनिनः ॥
आहूय धर्मं वायुं च महेन्द्रं च तथाऽश्विनौ ।
असूत पुत्रान्कुन्ती यांस्त्रीन् माद्री द्वौ सुतावपि ।[अधिकः पाठः]
2. घ—लघयिष्यति हरिणा भुवो भारं नियोजितः ।
नरो मामाविशत्कुन्ति विष्णोरर्धं नरं विदुः ।
सोऽहं त्वामाविशं भद्रे जातोऽयं फल्गुनाह्वयः ।
तस्मादजेयो भुवनैश्चतुर्दशभिरप्यसौ ॥ [अधिकः पाठः]

एष जेता मनुष्यांश्च सर्वान् गन्धर्वराक्षसान् ।
[1]एष दुर्योधनं कीर्त्या भारतांश्च विजेष्यति ॥ ३५॥
वीरस्यैतस्य विक्रान्तैर् धर्मपुत्रो युधिष्ठिरः ।
[2]यक्ष्यते राजसूयाद्यैर् धर्म एव परस्सदा ॥ ३६॥
इन्द्रस्य वचनं श्रुत्वा पाण्डुः प्रीतिमवाप सः ॥ ३७
यौ तु माद्री महेष्वासावसूत कुरुसत्तमौ ।
अश्विभ्यां मनुजव्याघ्राविमौ तावपि तिष्ठतः ॥ ३८
नकुलस्सहदेवश्च तावप्यमिततेजसौ ।
पाण्डवौ नरशार्दूलाविमावप्यपराजितौ ॥ ३९
चरता धर्मनित्येन वनवासं यशस्विना ।
एष पैतामहो वंशः पाण्डुना पुनरुद्धृतः ॥ ४०
पुत्राणां जन्म वृत्तं च वैदिकाध्ययनानि च ।
पश्यतस्सततं पाण्डोश् शश्वत् प्रीतिरवर्धत ॥ ४१
वर्तमानस्सतां मार्गे पुत्रलाभमवाप्य च ।
पितृलोकं गतः पाण्डुर् इतस्सप्तदशेऽहनि ॥ ४२
तं चितागतमासाद्य वैश्वानरमुखे हुतम् ।
प्रविष्टा पावकं माद्री हित्वा जीवितमात्मनः ॥ ४३
सङ्गता सह तेनैव पतिलोकमनुव्रता ।

1. घ—सुरासुरोरगादींश्च वीर्यादेकरथो जयेत् । [अधिकः पाठः]
2. घ—अजातशत्रुर्धर्मात्मा पृथ्वैश्वर्य स्सुपूजितः । [अधिकः पाठः]

तस्यास्तस्य च यत् कार्यं क्रियतां तदनन्तरम् ॥ ४४
[1]पृथां च शरणं प्राप्तां पाण्डवांश्च यशस्विनः ।
यथावदनुगृह्णन्तां धर्मो ह्येष सनातनः ॥ ४५
इमे तयोश्शरीरे द्वे सुताश्चेमे तयोर्वराः ।
क्रियाभिरनुगृह्णन्तां सह मात्रा परन्तपाः ॥ ४६
प्रेतकार्ये च निर्वृत्ते पितृमेधे च पाण्डवाः ।
लभन्तां सर्वदायाद्यं पाण्डोः कुरुकुलोद्वहाः ॥ ४७

वैशंपायनः—

एवमुक्त्वा कुरून् सर्वान् कौरवाणां च पश्यताम् ।
क्षणेनान्तर्हितास्सर्वे चारणा गुह्यकैस्सह ॥ ४८
ऋषिसिद्धगणान् दृष्ट्वा विस्मयं ते परं ययुः ।
गन्धर्वनगराकारांस् तत्रैवान्तर्हितांस्तदा ॥ ४९
कौरवास्सहसोत्पत्य साधु साध्विति विस्मिताः ॥ ४९।

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥
॥ ७ ॥ संभवपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥
[अस्मिन्नध्याये ४९॥ श्लोका.]

---

1 घ—भीष्मं च धृतराष्ट्रं च विदुरं च महामतिम् ।
गान्धारीं शरणं प्राप्तान् अन्यांश्च कुरुपुङ्गवान् ॥
पाण्डवान् परिगृह्णीध्वं धर्मनित्यान्यशस्विनः ।
एतेषां भरणं भीष्म महान्धर्मस्त्वयाभि भो ।
क्षत्तुश्च धृतराष्ट्रस्य गान्धार्याश्च विशेषतः ॥ [अधिकः पाठः]

॥ सप्तदशाधिकशततमोऽध्यायः ॥

पाण्डोरस्थिसञ्चयनादिविधिः ॥ १ ॥

धृतराष्ट्रः—

पाण्डोर्विदुर! सर्वाणि प्रेतकार्याणि कारय ।
राजवद्राजसिंहस्य माद्र्याश्चैव विशेषतः ॥ १

पशून् वासांसि रत्नानि धनानि विविधानि च ।
पाण्डोः प्रयच्छ माद्र्याश्च येभ्यो यावच्च वाञ्छितम् ॥ २

यथा च कुन्ती सत्कारं कुर्यान्माद्र्यास्तथा कुरु ।
यथा न वायुर्नादित्यः पश्येतां तां सुसंवृताम् ॥ ३

न शोच्यः पाण्डुरनघः प्रशस्यस्स नराधिपः ।
[1]यस्य पञ्च सुता वीरा जातास्सुरसुतोपमाः ॥ ४

वैशंपायनः—

विदुरस्स तथेत्युक्त्वा भीष्मेण सह भारत ।
पाण्डुं संस्कारयामास देशे परमसम्मते ॥ ५

ततस्तु नगरात्तूर्णम् आज्यहोमपुरस्कृताः ।
निर्हृताः पावका दीप्ताः पाण्डो राजन् पुरोहितैः ॥ ६

1. घ—स पाण्डुश्च न शोच्यस्स्यात् प्रवरः पुण्यकर्मणाम् ।
[अधिकः पाठः]

[1]अथैतमार्तवैर्गन्धैर् माल्यैश्च विविधैरपि ।
शिबिकास्थमलञ्चक्रुर् वस्त्रैराच्छाद्य सर्वशः ॥ ७

[2]तं तथा शोभितं माल्यैर् विविधैश्च महाधनैः ।
[3]अमात्या ज्ञातयश्चैव सुहृदश्चोपतस्थिरे । ८

नृसिंहं नरयुक्तेन परमालङ्कृतेन तम् ।
अवहन् यानमुख्येन सह माद्र्या सुसम्भृतम् ॥ ९

पाण्डरेणातपत्रेण चामरव्यजनेन च ।
सर्ववादित्रनादैश्च समलञ्चक्रिरे ततः ॥ १०

ततस्सर्वाणि रत्नानि बहूनि शतशो नराः ।
प्रददुः काङ्क्षमाणेभ्यः पाण्डोस्तत्रौर्ध्वदैहिके ॥ ११

अच्छिद्राणि च शुभ्राणि पाण्डराणि बहूनि च ।
आजह्रुः कौरवस्यार्थे वासांसि रुचिराणि च ॥ १२

याजकैश्शुक्लवासोभिर् हूयमाना हुताशनाः ।
अगच्छन्नग्रतस्तस्य दीप्यमानास्स्वलङ्कृताः ॥ १३

---

1. घ—पालाशवृन्तकाष्ठैश्च कुशमुञ्जालकबल्बजैः ।
सूत्रोक्तेन विधानेन शरीरं चक्रुरञ्जसा ।
अस्थिगर्भे तयो र्भूप कृत्वा प्रतिकृती तयोः ।
शिबिकायां समारोप्य शोभितायामलङ्कृतैः ॥ [अधिकः पाठः]
2. घ—मुक्ताप्रवालमाणिक्य हेमस्रग्भिरलङ्कृतम् । [अधिकः पाठः]
3. घ—दर्पणाशोकपुन्नागमल्लिकाजातिचम्पकैः ।
नालिकेरफलैः पुष्पैः पूगीफलसुगुच्छकैः ।
तां तथा शोभितां माल्यैर्विविधैश्च महाधनैः । [अधिकः पाठः]

ब्राह्मणाः क्षत्रिया वैश्याश् शूद्राश्चैव सहस्रशः ।
रुदन्तश्शोकसन्तप्ता अनुजग्मुर्नराधिपम् ॥ १४

[1]अयमस्मानपाहाय दुःखं चाधाय शाश्वतम् ।
कृत्वाऽनाथान् परो नाथः क यास्यति नराधिपः ॥ १५

[2]क्रोशंतः पाण्डवास्सर्वे भीष्मो विदुर एव च ।
बाह्लीकस्सोमदत्तश्च तथा भूरिश्रवा नृपः॥ १६

अन्योन्यं वै समाश्लिष्य अनुजग्मुस्सहस्रशः ॥ १६॥

रमणीये वनोद्देशे गङ्गातीरे समे शुभे ।
न्यासयामासुरथ तां शिबिकां सत्यवादिनः ॥ १७॥

सभार्यस्य नृसिंहस्य पाण्डोरक्लिष्टकर्मणः ॥ १८

[3]ततस्तस्य शरीरं तत् सर्वगन्धनिषेवितम् ।
शुचिकालेयकादिग्धं मुख्यस्नानाधिवासितम् ॥ १९

पर्यषिञ्चञ्जलेनाशु शातकुम्भमयैर्घटैः।

---

1. घ—विकीर्णमू र्जास्सर्वे मूर्ध्नि विन्यस्तपाणयः ।
उरस्ताडं रुदन्तश्च स्त्रियस्सर्वा अनावृताः ।
एकवस्त्रधरास्सर्वे निराभरणभूषणाः ।
नोष्णीषिणो महाराज निरानन्दा भृशातुराः ।
पुरुषाश्च स्त्रियस्सर्वा अनुजग्मुर्नराधिपम् । [अधिकः पाठः ।]
2. घ—अनिधाय सुतान् राज्ये वने जातान् यशस्विनः ।
अदृष्ट्वा पुत्रसम्पत्तिं क यास्यसि महीपते । [अधिकः पाठः]
3. घ—आच्छिद्य वाससस्संवीतं देशशुद्धिं वितेनिरे ॥ [अधिकः पाठः]

चन्दनेनापि मुख्येन शुक्लेन समलेपयन् ॥ २०

कालागरुविमिश्रेण तथा धातुरसेन च ।
अथैनं देशजैश्शुक्लैर् वासोभिस्समयोजयन् ॥ २१

[1]आच्छन्नस्सह वासोभिर् जीवन्निव नरर्षभः ।
[2]शुशुभे पुरुषव्याघ्रो महार्हशयनोचितः ॥ २२

हयमेधाग्निना सर्वे याजकास्सपुरोहिताः ।
[3]वेदोक्तेन विधानेन क्रियां चक्रुस्समन्त्रकम् ॥ २३

याजकैरभ्यनुज्ञाताः प्रेतकर्मणि निष्ठितैः ॥ २३॥

घृतावसिक्तं राजानं सह माद्र्या स्वलङ्कृतम् ।
तुङ्गपद्मकमिश्रेण चन्दनेन सुगन्धिना ॥ २४॥

सरलं देवदारुं च गुग्गुलुं लाक्षया सह ।
रक्तचन्दनकाष्ठैश्च हरिबेरैरुशीरजैः ॥ २५॥

अन्यैश्च विविधैर्गन्धै राजानं समदाहयन् ॥ २६

घृताप्लुतैर्महावस्त्रैः प्रावारैश्च महाधनैः ।
घृतपूर्णैस्तथा कुम्भै राजानं समदाहयन् ॥ २७

ततस्तयोश्शरीरे ते दृष्ट्वा मोहवशं गताः ।
हा हा पुत्रेति कौसल्या पपात सहसा भुवि ॥ २८

---

1. घ—आच्छन्नौ तु सुवासोभिस्सर्वालङ्कारशोभिनौ ।
2. घ--स जीवाविव राजेन्द्र शुशुभाते तु पश्यताम् ।
3. अ—कोशे अयं श्लोको न दृश्यते ।

तां प्रेक्ष्य पतितामार्तां पौरजानपदा जनाः ।
रुरुदुस्सस्वरं सर्वे राजभक्त्या कृपान्विताः ॥ २९
[1]क्रान्तानीवार्तनादेन सर्वाणि च विचुक्रुशुः ।
मानुषैस्सह भूतानि तिर्यग्योनिगतान्यपि ॥ ३०
[2]तथा भीष्मश्शान्तनवो विदुरश्च महामतिः ।
ज्ञातयः कौरवाश्चैव प्राणदन् भृशदुःखिताः ॥ ३१
चुक्रुशुः पाण्डवास्सर्वे धृतराष्ट्रश्च भारत ।
तथा भीष्मोऽथ विदुरो राजा च सह बान्धवैः ॥ ३२
[3]कृतोदकांस्तानादाय पाण्डवाञ्छोककर्शितान् ।
सर्वाः प्रकृतयो राजञ् छोचन्त्यः पर्यवारयन् ॥ ३३
यथा च पाण्डवा भूमौ शेरते सह बान्धवाः ।
तथैव नागरा राजञ् छिश्यिरे ब्राह्मणादयः ॥ ३४
तदनानन्दमस्वस्थम् आकुमारमहृष्टवत् ।
बभूव पाण्डवैस्सार्धं नगरं द्वादश क्षपाः ॥ ३५

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥
॥ ७ ॥ संभवपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
[अस्मिन्नध्याये ३५ श्लोकाः]

---

1. घ—क्रान्ता इवार्तनादेन सर्वास्ताश्चुक्रुशुः स्त्रियः ।
2. घ—सर्वाणि समदुःखानि रुरुदुस्सह तैर्जनैः ।
3. घ—एककुण्डे पृथक् चैव पिण्डांश्चैव पृथक्पृथक् ।
ददुर्धर्मोदकं सर्वे सर्वाश्च कुरुयोषितः । [अधिकः पाठः]

॥ अष्टादशाधिकशततमोऽध्यायः ॥

पाण्डोःश्राद्धदानम् ॥ १ ॥ सत्यवत्यास्स्नुषाभ्यां सह तपोवनगमनम् ॥ २ ॥

वैशम्पायनः—

ततः क्षत्ता च भीष्मश्च व्यासो राजा च बन्धुभिः ।
ददुःश्राद्धं तथा पाण्डोस्स्वधामृतसमं तदा ॥ १

पुरोहितसहायास्ते यथान्यायमकुर्वत ॥ १॥

[1]कुरूंश्च विप्रमुख्यांश्च भोजयित्वा सहस्रशः ।
रत्नौघान् विप्रमुख्येभ्यो दत्त्वा ग्रामवरानपि ॥ २॥

कृतशौचांस्ततस्तांस्तु पाण्डवान् भरतर्षभ ।
आदाय विविशुः पौराः पुरं वारणसाह्वयम् ॥ ३॥

सततं स्मान्वतप्यन्त तमेव भरतर्षभम् ।
पौरजानपदास्सर्वे मृतं स्वमिव बान्धवम् ॥ ४॥

श्राद्धावसानेषु तदा दृष्ट्वा तं दुःखितं जनम् ।
सम्मूढां दुःखशोकार्तां व्यासो मातरमब्रवीत् ॥ ५॥

व्यासः—

अतिक्रान्तसुखाः कालाः प्रत्युपस्थितदारुणाः ।
शश्वत् पापीयदिवसाः पृथिवी गतयौवना ॥ ६॥

1. घ—एकपाके पृथक्चैव स्वशाखोक्तविधानतः । [अर्धिक पाठः]

बहुमायासमाकीर्णा नानादेशास्समाकुलाः ।
लुप्तधर्मक्रियाचारो घोरः कालो भविष्यति ॥ ७॥

[1]गच्छ त्वं त्यागमास्थाय युक्ता वस तपोवने ।
मा द्रक्ष्यसि कुलस्यास्य घोरं संक्षयमात्मनः ॥ ८॥

तथेति संमनुज्ञाय सा प्रविश्याब्रवीत् स्नुषाम् ॥ ९

अम्बिके तव पुत्रस्य दुर्नयात् किल भारताः ।
सानुबन्धा विनङ्क्ष्यन्ति पौत्राश्चैवेति नश्श्रुतम् ॥ १०

तत् कौसल्यामिमामार्तां पुत्रशोकाभिपीडिताम् ।
वनमादाय गच्छामो भद्रं ते यदि मन्यसे ॥ ११

वैशम्पायनः—

तथेत्युक्ता त्वम्बिकया भीष्ममामन्त्र्य सुव्रता ।
वनं ययौ सत्यवती स्नुषाभ्यां सह भारत ॥ १२

---

1. घ—पुत्राश्च बहुपौत्र्यश्च राजानस्सर्वएव हि ।
पाण्डवाः कौरवाश्चैव राज्यैश्वर्यमदान्विताः ।
पृथ्वीनिमित्तमन्योन्यं घातयिष्यन्ति निर्घृणाः ।
कुरुपाण्डवयोरर्थे पृथ्व्याश्च क्षयकारणम् ।
अन्योन्यं वैरमासाद्य करिष्यन्ति महीभिमाम् ।
रुधिरौघनिमग्नैश्च बालवृद्धावशेषिताम् ।
घोरमेनमदृष्ट्वैव कालं सर्वक्षयावहम् ।
दृष्ट्वाऽऽनन्दसुखं प्रीत्या दिष्ट्या मातश्श्रुणुष्व ह ॥

तास्सुघोरं तपः कृत्वा दैवाद्भरतसत्तम ।
देहं त्यक्त्वा महाराज गतिमिष्टां ययुस्तदा ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥
॥ ७ ॥ संभवपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
[अस्मिन्नध्याये १३ श्लोकाः]

॥ एकोनविंशत्यधिकशततमोऽध्यायः ॥

कुमाराणां विहारवर्णनम् ॥ १ ॥ वृकोदरेण धार्तराष्ट्राणां क्रीडनसमये परिभवनम् ॥ २ ॥ धार्तराष्ट्रादिभिर्भीमस्य गङ्गापातनं सर्पदंशप्रापणं गरलसंमिश्रभोज्यदानं च ॥ ३ ॥

वैशम्पायनः—

अवाप्नुवन्तो वेदोक्तान् संस्कारान् पाण्डवास्तदा ।
अवर्धन्त महाभोगान् भुञ्जानाः पितृवेश्मनि ॥ १

ते धार्तराष्ट्रैस्सहिताः क्रीडन्तः पितृवेश्मनि ।
बालक्रीडासु सर्वासु विशिष्टाः पाण्डवा भवन् ॥ २

जवे लक्ष्याभिहरणे भेद्ये पांसुविकर्षणे ।
धार्तराष्ट्रान् भीमसेनस् सर्वांस्तु परिमर्दति ॥ ३

हर्षाद्ध्येतान् क्रीडमानान् गृह्णैकाकी निलीयते ।

[1]शिरस्सु च निगृह्यैनान् योधयामास पाण्डवः ॥ ४

शतमेकोत्तरं तेषां कुमाराणां महौजसाम् ।
एक एव विमृद्नाति नातिकृच्छ्राद्वृकोदरः ॥ ५

गलेषु च निगृह्यैनान् विनिहत्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ घृष्टजानुशिरोक्षिकान् ॥ ६

दश बालाञ्जले क्रीडन् भुजाभ्यां परिगृह्य सः ।
आस्ते स्म सलिले मग्नः प्रमृद्नंश्च विमुञ्चति ॥ ७

फलानि वृक्षमारुह्य प्रचिन्वन्ति च ते यदा ।
तदा पादप्रहारेण भीमः कम्पयते द्रुमम् ॥ ८

[2]प्रहाराभिहताच्चापि द्रुमाद् व्याघूर्णितात् ततः ।
सफलाः प्रपतन्ति स्म द्रुमात् स्रस्ताः कुमारकाः ॥ ९

न ते नियुद्धे न जवे योग्या ह्याशु कदा चन ।
कुमारा उत्तरं चक्रुस् स्पर्धमाना वृकोदरम् ॥ १०

एवं स धार्तराष्ट्राणां स्पर्धमानो वृकोदरः ।
अप्रियेऽतिष्ठदत्यर्थं बाल्यान्न द्रोहचेतसा ॥ ११

ततो बलमभिख्यातं धार्तराष्ट्रः प्रतापवान् ।

---

1. परस्परं क्रीडमानान् काकपक्षधरान्नृप । [अधिकः पाठः]
2. घ—प्रगृह्य वृक्षमूलं च पाणिभ्यां कम्पयद्द्रुमम् ।
अग्रशाखाग्रसंलीनान् पातयामास भूतले ॥
भग्नपादोरुपृष्ठाश्च भिन्नमस्तकपार्श्वकाः ॥

भीमसेनस्य तज्ज्ञात्वा दुष्टभावमदर्शयत् ॥ १२

तस्य धर्मादपेतस्य पापानि परिपश्यतः ।
मोहादैश्वर्यभावाच्च पापा मतिरजायत ॥ १३

अयं बलवतां श्रेष्ठः कुन्तीपुत्रो वृकोदरः ।
मध्यमं पाण्डुपुत्राणां निकृत्या विनिहन्यताम् ॥ १४

अथ तस्मादवरजं ज्येष्ठं चैव युधिष्ठिरम् ।
प्रसह्य बन्धने बद्ध्वा प्रशासिष्ये वसुन्धराम् ॥ १५

एवं स निश्चयं पापं कृत्वा दुर्योधनस्तदा ।
नित्यमेवान्तरं प्रेक्षन् भीमस्यासीन्महात्मनः ॥ १६

ततो जलविहारार्थं कारयामास भारत ।
चेलकम्बलवेश्मानि विचित्राणि महान्ति च ॥ १७

प्रमाणकोट्यां तद्देशं स्थलं किञ्चिदुपेत्य च ।
क्रीडावसाने सर्वे च शुचिवस्त्रास्त्वलङ्कृताः ॥ १८
सर्वकामसमृद्धं तद् अन्नं बुभुजिरे शनैः ॥ १८॥

दिवसान्ते परिश्रान्ता विहृत्य च कुरूद्वहाः ।
विहारावसथेष्वेव वीरा वासमरोचयन् ॥ १९॥

खिन्नस्तु बलवान् भीमो व्यायामाभ्यधिकस्तदा ।
वाहयित्वा कुमारांस्तान् जलक्रीडागतान् विभुः ॥ २०॥
प्रमाणकोट्यां वासार्थं सुष्वापारुह्य तत्स्थलम् ॥ २१

शीतं वासं समासाद्य श्रान्तो मदविमोहितः ।
निश्चेष्टः पाण्डवो राजन् सुष्वाप मृतकल्पवत् ॥ २२

ततो बद्ध्वा लतापाशैर् भीमं दुर्योधनश्शनैः ।
प्रमाणकोट्यां तं सुप्तं गङ्गायां बलिनां वरम् ॥ २३
भीमसेनं तदा राजन् बद्धं प्राक्षेपयज्जले ॥ २३॥

ततः प्रबुद्धः कौन्तेयस् सर्वान् संछिद्य बन्धनान् ।
उदतिष्ठज्जलाद्भीमो भूयः प्रहरतां वरः ॥ २४॥

स विमुक्तो महाराज नाज्ञासीत्तेन तत्कृतम् ।
पुनर्निद्रावशं प्राप्य तत्रैव प्रास्वपद्बली ॥ २५॥

अथ रात्र्यां व्यतीतायाम् उत्तस्थुः कुरुपाण्डवाः ।
दुर्योधनस्तु कौन्तेयं दृष्ट्वा निर्वेदमभ्यगात् ॥ २६॥

[1]सुप्तं चापि पुनस्सर्पैस् तीक्ष्णदंष्ट्रैर्महाविषैः ।
कुपितैर्दंशयामास सर्वेष्वेवाङ्गसन्धिषु ॥ २७॥

दंष्ट्राश्च दंष्ट्रिणां तेषां मर्मस्वपि निपातिताः ।

---

1. घ—समासाद्य ततः कांश्चिद्भर्मादि शिरसा शिरः ।
शिरोभिश्शिरसा वीरः कृतवान्युद्धमद्भुतम् ॥
तथान्यदिवसे सुप्तं···सर्पैर्घोराननैः ।
कुपितैश्च महाकायैस् तीक्ष्णदंष्ट्रैर्महाविषैः ॥
स तेन दंशयामास सर्वेष्वेवाङ्गसन्धिषु ।
तेषां सुतीक्ष्णदंष्ट्राश्च निमग्नास्तत्र मर्मसु ॥
त्वचं च नाल्पिकां भेत्तुं शक्नुवन् पृथुतेजसः ॥ [अधिकः पाठः]

त्वचं न चास्य बिभिदुस् सारत्वात् पृथुवक्षसः ॥ २८॥

प्रबुद्धो भीमसेनस्तान् सर्वान् सर्पानपोथयत् ।
सारथिं चास्य दयितं वामहस्तेन जघ्निवान् ॥ २९॥

[1]तथाऽन्यदिवसे राजन् हन्तुकामोऽत्यमर्षणः ।
बललेन सहामन्त्र्य सौबलस्य मते स्थितः ॥ ३०॥

भोजने भीमसेनस्य पुनः प्राक्षेपयद्विषम् ॥ ३१

कालकूटं विषं तीक्ष्णं सम्भृतं रोमहर्षणम् ।
तत्रापि भुक्त्वाऽजरयद् अविकारो वृकोदरः ॥ ३२

विकारं नाभ्यजनयत् सुतीक्ष्णमपि तद्विषम् ॥ ३२॥

[2]ततोऽन्यदिवसे राजन् हन्तुकामो वृकोदरम् ।
सौबलेन सहायेन धार्तराष्ट्रोऽभ्यचिन्तयत् ॥ ३३॥

चिन्तयन्नालभन्निद्रां दिवारात्रमतन्द्रितः ॥ ३४

एवं दुर्योधनः कर्णश् शकुनिश्चापि सौबलः ।
अनेकैरप्युपायैस्तान् जिघांसन्ति स्म पाण्डवान् ॥ ३५

न जज्ञिरे तु तद्वृत्तं पाण्डवा मन्दचेतसः ।
वेश्यापुत्रस्तदाचष्ट पार्थानां हितकाम्यया ॥ ३६

1. घ—ताडितस्तेन सूतोऽपि ययौ स यमसादनम् [अधिकः पाठः]
2. घ—भीमसंहननं कर्तुं भीममाहारयत्ततः । [अधिकः पाठः]

पाण्डवा ह्यपि तत्सर्वं प्रत्यजानन्नरिन्दमाः ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
॥ ७ ॥ संभवपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
[अस्मिन्नध्याये ३७ श्लोकाः]

॥ विंशत्यधिकशततमोऽध्यायः ॥

पुनरपि वृकोदराय विषभोज्यदानं जलपातनं च ॥ १ ॥ भीमस्य नागलोकप्राप्तिः ॥ २ ॥ तत्र तस्य वासुकिदत्तरसपानम् ॥ ३ ॥

वैशम्पायनः—

ततस्ते मन्त्रयामासुर् दुर्योधनपुरोगमाः ।
प्राणवान् विक्रमी चापि शौर्ये महति च स्थितः ॥ १
स्पर्धते चापि सततम् अस्मानेको वृकोदरः ॥ १॥
तं तु सुप्तं पुरोद्याने जले शूले क्षिपामहे ॥ २
ततो जलविहारार्थं कारयामास भारत ।
चेलकम्बलवेश्मानि चित्राणि च शुभानि च ॥ ३
तत्र संस्कारयामासुर् नानागाराण्यनेकशः ।
उदकक्रीडनार्थानि कारयामास भारत ॥ ४
प्रमाणकोट्यामुद्देशे स्थले कृत्वा परिच्छदम् ।

भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यं तथाऽपि च ॥ ५

उपार्जितं नरैस्तत्र तदा सूदकृतं च तत् ।
न्यवेदयन्त पुरुषा धार्तराष्ट्रस्य तत्तदा ॥ ६

ततो दुर्योधनस्त्वाह पाण्डवान् स्म सुदुर्मतिः ॥ ६॥

दुर्योधनः—

गङ्गां वै मानयामोऽद्य उद्यानवनशोभिताम् ।
सहिता भ्रातरस्सर्वे जलक्रीडामवाप्नुमः ॥ ७॥

वैशम्पायनः—

एवमस्त्विति तं चापि प्रत्युवाच युधिष्ठिरः ॥ ८

[1]ते रथैर्नगराकारैर् देशजैश्च हयोत्तमैः ।
निर्ययुर्नगराद्वीराः कुरवः पाण्डवैस्सह ॥ ९

उद्यानवनमासाद्य सम्प्रसृज्य च वाहनम् ।
प्राविशंस्तु महावीर्यास् सिंहा इव गिरेर्गुहाः ॥ १०

उद्यानं स्माथ पश्यन्ति भ्रातरस्सर्व एव ते ।
उपस्थानगृहैश्शुभ्रैर् वलभीभिश्च शोभितम् ॥ ११

गवाक्षकैस्तथा जालैर् जलसंसारकैस्तथा ।
सूपस्थितं सुधाकारैश् शिल्पकारैश्च शिल्पिभिः ॥ १२

दीर्घिकाभिश्च पुण्याभिस् तथा कारण्डकैरपि ।

1. घ—जानन्नप्यनुमेने तद् भेदबुद्धिभिया तदा । [अधिकः पाठः]

जलं तु शुशुभे छन्नं पुष्पैर्जलरुहैस्तथा ॥ १३

उपकीर्णा वसुमती तथा पुष्पैर्यथर्तुकैः ।
उपविष्टास्तथा सर्वे पाण्डवाः कुरवस्तथा ॥ १४

उपपन्नान् बहून् कामांस् तथा भुक्त्वा तथा तथा ।
अथोद्यानवने तस्मिंस् तथा क्रीडागताश्च ते ॥ १५
परस्परस्य वक्त्रेषु ददुर्भक्ष्यांस्ततस्ततः । १५॥

[1]ततो दुर्योधनः पापस् तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया ॥ १६॥
स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः ॥ १७

[2]सत्कृत्य भ्रातृवत्तत्र वाचा चामृतकल्पया ।
प्राक्षिपद्वै स्वयं भक्ष्यं वक्त्रे भीमस्य पापकृत् ॥ १८
प्रभक्षितं च भीमेन ह्यस्य दोषमजानता ॥ १८॥

ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमिवात्मानं मेने स पुरुषाधमः ॥ १९॥
ततस्ते सहितास्सर्वे जलक्रीडामकुर्वत ॥ २०

दिवसान्ते परिश्रान्ता विहृत्य कुरुनन्दनाः ।
विहारायतनेष्वेव वीरा वासमरोचयन् ॥ २१

---

1. घ—नानाविधानि भक्ष्याणि भोज्यापूपाणि मोदकान् ।
क्ष्वेलन्तः प्रहसन्तश्च विवृतेषु कुमारकाः ॥ [अधिकःपाठः]
2. घ—बहिर्मधुरया वाचा हृदयेन क्षुरोपमः ॥ [अधिकः पाठः]

भीमस्तु बलवान् भुक्त्वा व्यायामाभ्यधिकं जले ।
वाहयित्वा कुमारांस्तान् जलक्रीडां महाबलः ॥ २२
प्रमाणकोट्यां वासार्थी पुनश्चारुह्य तत्स्थलम् ॥ २२॥
स हि तत्स्थलमासाद्य श्रान्तश्चाप्सु विशेषतः ।
श्रमेण च परीतात्मा सुष्वाप मृतकल्पवत् ॥ २३॥
ततो बद्ध्वा दृढं पाशैर् भीमं दुर्योधनस्स्वयम् ।
[1]शूलान्यप्सु निखायाशु स्थलाज्जलमपातयत् ॥ २४॥
सशेषत्वान्न संप्राप्तो जले शूलानि पाण्डवः ।
पपात यत्र तत्रास्य शूलं नासीद्यदृच्छया ॥ २५॥
स निस्संज्ञो जलस्यान्तरवाग्वै पाण्डवोऽविशत् ॥ २६
आक्रम्य नागभवने तथा नागकुमारकान् ।
ततस्समेत्य बहुभिस् तथा नागैर्महाविषैः ॥ २७
दश्यते पाण्डवस्तत्र विषदग्धो महाविषैः ॥ २७॥
ततोऽस्य दश्यमानस्य तद्विषं कालकूटकम् ।
हतं सर्पविषेणाशु स्थावरं जङ्गमेन तु ॥ २८॥
ततः प्रबुद्धः कौन्तेयस् स संछिद्य च बन्धनम् ।
पोथयामास तान् सर्पान् कांश्चित् प्राणैर्व्ययोजयत् ॥ २९॥

1. घ—खातयित्वाप्सु शूलानि प्रदेशाभ्यन्तराणि च ।
लतापाशै र्दृढं बद्धः स्थलाज्जलमपातयत् ॥

ते हन्यमानाः पार्थेन सर्पा वासुकिमभ्ययुः ।
ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ॥ ३०॥

सर्पाः—

अयं नरो वै नागेन्द्र ह्यप्सु बद्ध्वा प्रवेशितः ।
तथा चारातिभिर्वीर विषपीतो भविष्यति ॥ ३१॥

विनिविष्टोऽन्तरप्राप्तस् स च दष्टो ह्यनकेशः ।
ससंज्ञश्च स संवृत्तः छित्त्वा बन्धनमाशु सः ॥ ३२॥

पोथयन्नो महाबाहुस् तं वै त्वं ज्ञातुमर्हसि ॥ ३३

वैशंपायनः—

ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ।
पश्यति स्म महानागो भीमं भीमपराक्रमम् ॥ ३४

[1]आर्यकेण तु दष्टस्स पृथायास्त्वार्यकेण तु ।
ततो दृष्ट्वश्च तेनापि परिष्वक्तश्च पाण्डवः ॥ ३५

सुप्रीतश्चाभवत्तस्य वासुकिस्सुमहायशाः ।
अब्रवीत्तं च नागेन्द्रः किमस्य क्रियतामिति ॥ ३६

प्रियं धनौघं रत्नानि यावदस्य प्रदीयताम् ॥ ३६॥

---

1 घ—अथ वासुकिना भीमो दृष्टः पृष्टस्सुहृत्तमः ।
परिष्वक्तश्च सस्नेहं भीमःप्रीतोऽभवत्तदा ॥
वासुकिश्चापि सुप्रीतो भीममाहामृतं वचः ।
आर्य कं नाम नागेन्द्रं किमस्य क्रियतामिति ॥ [पाठान्तरम्]

एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत ॥ ३७

नागः—

यदि नागेन्द्र प्रीतोऽसि किमस्य धनसञ्चयैः ।
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबलः ॥ ३८

बलं नागसहस्रस्य कुण्डे चास्मिन् प्रतिष्ठितम् ।
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम् ॥ ३९

वैशम्पायनः—

एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत ॥ ३९॥

ततो भीमस्तदा नागैः कृतस्वस्त्ययनश्शुचिः ।
प्राङ्मुखश्चोपविष्टश्च रसं पिबति पाण्डवः ॥ ४०॥

एकोच्छ्वासात्तदा कुण्डं पिबति स्म महाबलः ।
एवमष्टौ तु कुण्डानि सोऽपिबत् पाण्डुनन्दनः ॥ ४१॥

दिव्ये ततस्तु शयने नागदत्ते महाभुजः ।
शेते स्म च तदा भीमो दिवसान्यष्ट चैव तु ॥ ४२॥

दुर्योधनोऽपि पापात्मा भीममाशीविषह्रदे ।
प्रक्षिप्य कृतकृत्यं स्वम् आत्मानं मन्यते तदा ॥ ४३॥

प्रभातायां रजन्यां च प्रविवेश पुरं ततः ।
[1]ब्रुवाणो भीमसेनस्तु यातो ह्यग्रत एव नः ॥ ४४॥

1. घ—वदन्तो भीमसेनोऽपि पूर्वमेव गृहागतः ।
इति स्म पृच्छतां नृणां कुन्त्याश्च विदुरस्य तु ॥ [अधिकः पाठः]

युधिष्ठिरस्तु धर्मात्मा चिन्तयन् पापमात्मनि ।
[1]स्वतोऽनुमानेन परं तदान्तं स्मानुपश्यति ॥ ४५॥

उपगम्य ततः पार्था मातरं मातृवत्सलाः ।
अभिवाद्याब्रुवंस्ते वै अम्ब भीम इहागतः ॥ ४६॥

नेति स्माह तदा कुन्ती ततस्ते व्यथिता भवन् ॥ ४७

द्रुतं गत्वा पुरोद्यानं विचिन्वन्ति स्म पाण्डवाः ।
भीम भीमेति ते वाचं नित्यमुच्चैरुदीरयन् ॥ ४८

विचिन्वन्तोऽथ ते सर्वे न स्म पश्यन्ति भ्रातरम् ॥ ४८॥

आगतास्स्वगृहं भूय इदमूचुः पृथां तदा ॥ ४९

न दृश्यते महाबाहुर् अम्ब भीमो वरोचितः ।
विचितानि च सर्वाणि उद्यानानि नदीस्तथा ॥ ५०

ततो विदुरमानाय्य कुन्ती सा खं निवेशनम् ।
उवाच क्षत्तो बलवान् भीमसेनो न दृश्यते ॥ ५१

उद्यानान्निर्गतास्सर्वे भ्रातरो भ्रातृभिस्सह ।
तत्र ह्येको महाबाहुर् भीमो नाभ्येति मामिह ॥ ५२

न च प्रणयते चक्षुस् साधु दुर्योधनस्य ह ।
ततः प्रसुप्तं मन्येऽहं पापेन निहतं सुतम् ॥ ५३

---

1. क-ख-ग—स्वेनानुमानेन परं नायान्तं स्म स पश्यति ।
घ—स्वेनानुमानेन परं तेषामेवासमञ्जसम् ।

विदुरः—

मा मैवं वद कल्याणि शेषसंरक्षणं कुरु ।
प्रत्यादिष्टो हि पापात्मा शेषेषु प्रहरेत ह ॥ ५४

दीर्घायुषस्तु ते पुत्रा तथाह्यृषिरभाषत ।
आगमिष्यति ते पुत्रः प्रीतिं ते वर्धयिष्यति ॥ ५५

वैशंपायनः—

एवमुक्ता तदा कुन्ती निश्श्वसन्ती मुहुर्मुहुः ।
शय्यापरा महाभागा पुत्रैः परिवृता तदा ॥ ५६

[1]ततोऽष्टमेऽथ दिवसे प्रत्यबुध्यत पाण्डवः ।
भीमस्तदा रसे जीर्णे ह्यप्रमेयबलो बली ॥ ५७

ओषधीभिर्विषघ्नीभिस् सुरभीभिर्विभूषितः ।
भुक्त्वा तु परमान्नं च नागैर्दत्तं महाभुजः ॥ ५८

उत्क्षिप्य च तदा नागैर् जलाज्जलरुहेक्षणः ।
तस्मिन्नेव वनोद्देशे स्थापितः पाण्डुनन्दनः ॥ ५९

अन्तर्दधुश्च ते नागाः पाण्डवस्यैव पश्यतः ॥ ५९॥

तत उत्थाय भीमस्तु आजगाम स्वयं गृहे ॥ ६०

अभिवाद्य परिष्वक्तस् समाघ्रातश्च मूर्धनि ।
प्रणम्य धर्मपुत्राय सस्वजे फल्गुनं तदा ॥ ६१

---

1. विचिन्वते वने भीमं पाण्डवाः प्रत्यहं दिवा ।
दुःखाकरं कोपयन्तः शेरते दुःखिता निशि ॥ [अधिकः पाठः]

अभिवादितश्च तैर्वीरैस् सस्वजे च यमावपि ।
तच्च सर्वं यथावृत्तम् आख्याति स्म वृकोदरः ॥ ६२

यदा त्ववगमंस्ते वै पाण्डवास्तस्य कर्म तत् ।
न त्वेव बहुलं चक्रुः प्रायतन्तास्य रक्षणे ॥ ६३

धर्मात्मा विदुरस्तेषां प्रददौ मतिमान् मतिम् ॥ ६३॥

दुर्योधनोऽपि तं दृष्ट्वा पाण्डवं पुनरागतम् ।
निश्वसंश्चिन्तयंश्चैवम् अहन्यहनि तप्यते ॥ ६४॥

[1]एवं दुर्योधनः पापश् शकुनिश्चापि सौबलः ।
अनेकैरप्युपायैस्तान् जिघांसन्ति स्म पाण्डवान् ॥ ६५॥

पाण्डवाश्चापि तत्सर्वं प्रत्यजानन्नरिन्दम ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ॥ ६६॥

अधिजग्मुश्च कुरवो धनुर्वेदं कृपात्तु ते ॥ ६७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

॥ ७ ॥ संभवपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

[अस्मिन्नध्याये ६७ श्लोकाः ।]

---

1. ख—सौबलेन सहायेन धार्तराष्ट्रोऽभ्यचिन्तयत् ।
चिन्तयन्नालभच्चिद्रां दिवारात्रमतन्द्रितः ॥ [अधिकः पाठः]

॥ एकविंशत्यधिकशततमोऽध्यायः ॥

कृपाचार्योत्पत्तिः ॥ १ ॥

जनमेजयः—

कृपस्यापि मम ब्रह्मन् सम्भवं वक्तुमर्हसि ।
शरस्तम्बात् कथं जातः कथं चास्त्राण्यवाप्तवान् ॥ १

वैशंपायनः—

महर्षेर्गौतमस्यासीच् छरद्वान्नाम गौतमः ।
पुत्रः किल महाराज जातस्सह शरैर्विभो ॥ २

न तस्य वेदाध्ययने तथा बुद्धिरजायत ।
यथाऽस्य बुद्धिरभवद् धनुर्वेदे परन्तप ॥ ३

अधिजग्मुर्यथा वेदांस् तपसा ब्रह्मवादिनः ।
तथा स तपसोपेतस् सर्वाण्यस्त्राण्यवाप ह ॥ ४

धनुर्वेदं पठित्वा च तपसा विपुलेन च ।
भृशं सन्तापयामास देवराजं स गौतमः ॥ ५

ततो जालवतीं नाम देवकन्यां सुरेश्वरः ।
प्राहिणोत्तपसो विघ्नं कुरु तस्येति कौरव ॥ ६

साऽभिगम्याऽऽश्रमं तस्य रमणीयं शरद्वतः ।
धनुर्बाणधरं दृष्ट्वा लोभयामास गौतमम् ॥ ७

तामेकवसनां दृष्ट्वा गौतमो ऽप्सरसं वने ।
लोकेऽप्रतिमसंस्थानाम् उत्फुल्लनयनोऽभवत् ॥ ८
धनुश्च हि शरास्तस्य कराभ्यां प्रापतन् भुवि ।
वेपथुश्चास्य सहसा शरीरे समजायत ॥ ९
स तु ज्ञानगरीयस्त्वात् तपसश्च समन्वयात् ।
अवतस्थे महाप्रज्ञो धैर्येण परमेण ह ॥ १०
यस्तस्य सहसा राजन् विकारस्समजायत ।
तेन सुस्राव रेतोऽस्य स च तन्नाववुध्यत ॥ ११
तं विहायाश्रमं चापि तां चैवाप्सरसं मुनिः ।
जगाम रेतस्तत्तस्य शरस्तम्बे पपात ह ॥ १२
शरस्तम्बे च पतितं द्विधा तदभवन्नृप ॥ १२॥
तस्याथ मिथुनं जज्ञे गौतमस्य शरद्वतः ।
महर्षेर्गौतमस्यास्य आश्रमस्य समीपतः ॥ १३॥
मृगयां चरतो राज्ञश् शन्तनोस्तु यदृच्छया ।
कश्चित्सेनाचरोऽरण्ये मिथुनं तदपश्यत ॥ १४॥
धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च ।
व्यवस्य ब्राह्मणापत्यं धनुर्वेदान्तगस्य च ॥ १५॥
स राज्ञो दर्शयामास मिथुनं सशरं तदा ॥ १६
स तदादाय मिथुनं राजा च कृपयाऽन्वितः ।
आजगाम गृहानेव मम पुत्राविति ब्रुवन् ॥ १७

ततस्संवर्धयामास संस्कारैश्चाप्ययोजयत् ।
कृपया परया बालाविमौ संवर्धिताविति ॥ १८
तस्मात्तयोर्नाम चक्रे तदेव स महीपतिः ।
तस्मात् कृप इति ख्यातः कृपी कन्या च साऽभवत् ॥ १९
पिताऽपि गौतमस्तत्र तपसा [1]समविन्दत ।
आगम्य चासौ गोत्रादि सर्वमाख्यातवांस्तदा ॥ २०
कृपोऽपि च तदा राजन् धनुर्वेदपरोऽभवत् ।
चतुर्विधं धनुर्वेदम् अस्त्राणि विविधानि च ॥ २१
निखिलेनास्य तत्सर्वं गुह्यमाख्यातवांस्तदा ॥ २१॥
सोऽचिरेणैव कालेन परमाचार्यतां गतः ॥ २२
कृपमाहूय गाङ्गेयस् तव शिष्या इति ब्रुवन् ।
पौत्रान् परिसमादाय कृपमाराधयत्तदा ॥ २३
ततोऽधिजग्मुस्सर्वे ते धनुर्वेदं महारथाः ।
धृतराष्ट्रात्मजाश्चैव पाण्डवाश्च महाबलाः ॥ २४
वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः ।
कृपमाचार्यमासाद्य परमास्त्रज्ञतां गताः ॥ २५

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥
॥ ७ ॥ संभवपर्वणि षट्षष्टितमोऽध्यायः[2] ॥ ६६ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

1. क-ख-ग—तावविन्दत । 2. घ—कोशे नाध्यायपरिसमाप्तिरिह।

॥ द्वाविंशत्यधिकशततमोऽध्यायः ॥

द्रोणस्योत्पत्तिः ॥ १ ॥ द्रोणाचार्यस्य परशुरामादस्त्रप्राप्तिः ॥ २ ॥

वैशंपायनः —

विशेषार्थी ततो भीष्मः पौत्राणां हितकाम्यया ।
इष्वस्त्रज्ञान् पर्यपृच्छद् आचार्यान् वीर्यसंमतान् ॥ १

[1]नानृषिर्नामहाभागस् तथा नावेदपारगः ।
नावेदसत्वो विनयेत् कुरूनस्त्रे महाबलान् ॥ २

[2]इति सञ्चिन्त्य गाङ्गेयस् सदा भरतसत्तमः ॥ २॥

---

1. अ-कोशे । घ-कोशे च-नाल्पधीर्नामहाभागस्तथा नाशास्त्रकोविदः । [अधिकः पाठः]

2. अ-क-ख-ग-घ—कोशेषु इतआरभ्य श्लोकचतुष्टयं नास्ति—तस्स्थाने अधस्तनश्लोकाः दृश्यन्ते ।

महर्षिस्तु भरद्वाजो हविर्धाने चरन् पुरा ।
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ॥
तस्या वायुस्समुद्धूतो वसनं व्यपकर्षत ।
रागाद्रेतः प्रचस्कन्द तदृषिर्द्रोण आदधे ॥
तस्मिन् समभवद्द्रोणः कलशे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥
अग्निवेश्ये महाभागो भारद्वाजः प्रतापवान् ।
प्रत्यवेदयदाग्नेयं अस्त्रं धर्मभृतां वरः ॥
अग्निष्वजातस्स मुनिर् भ्राता भ्रातरमन्तिके ।
भारद्वाजे स चाग्नेयं महास्त्रं प्रत्यपादयत् ॥
स वै युक्तो गुरुरिह यदीच्छेत्कृपणस्सुखम् ।
भीष्मोऽप्यलपदेवं स भरद्वाजपरीप्सया ॥

द्रोणाय वेदविदुषे भारद्वाजाय धीमते ।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान् नरर्षभ ॥ ३॥

शास्त्रतः पूजितश्चैव सम्यक् तेन महात्मना ।
स भीष्मेण महाभागस् तुष्टोऽस्त्रविदुषां वरः ॥ ४॥

प्रतिजग्राह तान् सर्वान् शिष्यत्वेन महायशाः ।
शिक्षयामास च द्रोणो धनुर्वेदमशेषतः ॥ ५॥

तेऽचिरेणैव कालेन सर्वशस्त्रविशारदाः ।
बभूवुः कौरवा राजन् ! पाण्डवाश्चामितौजसः ॥ ६॥

जनमेजयः—

[1]कथं समभवद्द्रोणः कथं चास्त्राण्यवाप्तवान् ।
कथं चागात् कुरून् ब्रह्मन् ! कस्य पुत्रस्स वीर्यवान् ॥ ७॥

कथं चास्य सुतो जातस् सोऽश्वत्थामाऽस्त्रवित्तमः ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण प्रकीर्तय ॥ ८॥

वैशम्पायनः—

गङ्गाद्वारं प्रति महान् बभूवर्षिर्महातपाः ।
भरद्वाजो महाप्राज्ञस् सततं संशितव्रतः ॥ ९॥

सोऽभिषेक्तुं ततो गङ्गां पूर्वमेवागमन्नदीम् ॥ १०

1. अ-क-ख-ग-घ—कोशेषु इत आरभ्य श्लोकद्वयस्थाने एतदुपलभ्यते॥
कथं द्रोणस्समुद्भूतः कथमस्त्राण्यवाप्तवान् ।
एतदिच्छाम्यहं ब्रह्मन् ! निखिलेनानुवर्णितुम् ॥

महर्षिस्तु भरद्वाजो हविर्धाने चरन् पुरा ।
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ॥ ११
रूपयौवनसंपन्नां मददृप्तां मदालसाम् ॥ ११॥
तस्या वायुस्समुद्धूतो वसनं व्यपकर्षत ।
अपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा ॥ १२॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
हृष्टस्य रेतः प्रस्कन्द तदृषिर्द्रोण आदधे ॥ १३॥
ततस्समभवद्द्रोणः कुमारस्तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥ १४॥
भारद्वाजसखा चासीत् पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः ॥ १५॥
स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः ।
चिक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः ॥ १६॥
ततो [1]व्यतीते पृषते स राजा द्रुपदोऽभवत् ।
पाञ्चालेषु महाबाहुर् उत्तरेषु नरेश्वरः ॥ १७॥
भरद्वाजोऽपि भगवान् आरुरोह दिवं तदा ॥ १८
ततः पितृनियुक्तात्मा पुत्रलोभाद्यशस्विनीम् ।
शारद्वतीं तदा द्रोणः कृपीं भार्यामविन्दत ॥ १९

1. क-ख-ग—प्यतीते काले च ।

अग्निहोत्रे च धर्मे च दमे च सततं रताम् ॥ १९॥
अलभद् गौतमी पुत्रम् अश्वत्थामानमच्युतम् ॥ २०
स जातमात्रो व्यनदद् यथैवोच्चैःश्रवा हयः ।
तच्छ्रुत्वाऽन्तर्हितं भूतम् अन्तरिक्षस्थमब्रवीत् ॥ २१
[1]अश्वस्येवास्य यद् ध्मानं नदतः प्रदिशो गतम् ।
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति ॥ २२
सुतेन तेन सुप्रीतो भारद्वाजस्ततोऽभवत् ।
तत्रैव च वसन् धीमान् धनुर्वेदपरोऽभवत् ॥ २३
स शुश्राव महात्मानं जामदग्न्यं परन्तपम् ।
ब्राह्मणेभ्यस्तदा राजन् दित्सन्तं वसु सर्वशः ॥ २४
स रामस्य धनुर्वेदे दिव्येषु विविधेषु च ।
[2]दिव्यास्त्रेषु मतिं चक्रे नीतिशास्त्रेषु कौशलम् ॥ २५
ततस्समानैर्व्रतिभिस् तपोयुक्तैर्महातपाः ।
ततः प्रायान्महाबाहुर् महेन्द्रं वसुधाधरम् ॥ २६
ततो महेन्द्रमासाद्य भारद्वाजो महातपाः ।
शत्रघ्नं तममित्रघ्नम् अपश्यद्भृगुनन्दनम् ॥ २७
स रामायात्मनो नाम जन्म चाङ्गिरसे कुले ।

---

1 क-ख-ग—अश्वत्थामेति नाम्ना वै प्रख्यातोऽस्य भविष्यति ।
2. घ—शस्त्रास्त्रेषु च निष्णातं श्रुत्वा तत्र समागतः ॥ [अधिकः पाठः]

निवेद्याङ्गिरसो भूमौ पादावस्याभ्यवादयत् ॥ २८

तमब्रवीन्महातेजा क्षत्रहा विप्रसत्तमः ॥ २८॥

स्वागतं कुशलं तेऽस्तु किमिच्छसि महाद्युते ॥ २९

वैशंपायनः—

एवमुक्तस्तु रामेण भारद्वाजोऽब्रवीद्द्विजः ।
[1]आगतं वित्तकामं मां विद्धि द्रोणं द्विजर्षभ ॥ ३०

रामः—

हिरण्यं पशवो रौप्यं यद्वाऽन्यद्वसु किञ्चन ।
ब्राह्मणेभ्यो मया दत्तं सर्वमेव तपोधन ॥ ३१

तथैवेयं धरा देवी सागरान्ता सपर्वता ।
काश्यपाय मया दत्ता कृत्स्ना नगरमालिनी ॥ ३२

शरीरमात्रमेवाद्य ममेदमवशेषितम् ।
अस्त्राणि च महार्हाणि शस्त्राणि विविधानि च ॥ ३३

अस्त्राणि वा शरीरं वा ब्रह्मञ्छस्त्राणि वा पुनः ।
वृणीष्व किं प्रयच्छामि तुभ्यं द्रोण वदस्व माम् ॥ ३४

द्रोणः—

अस्त्राणि मे समन्त्राणि ससंहाराणि भार्गव ।
सप्रयोगरहस्यानि दातुमर्हस्यशेषतः ॥ ३५

1. क-ख-ग—सम्प्राप्तं वसुकामं मां वेत्तुमर्हसि सुव्रत।

एतद्वसु वसूनां हि सर्वेषां विप्रसत्तम ॥ ३५॥

वैशम्पायनः—

तथेत्युक्त्वा ततस्तस्मै प्रादादस्त्राणि भार्गवः ।
सरहस्यव्रतं चैव धनुर्वेदमशेषतः ॥ ३६॥

प्रतिगृह्य तु तत्सर्वं कृतार्थो द्विजसत्तमः ।
प्रियं सखायं सुप्रीतो जगाम द्रुपदं प्रति ॥ ३७॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

॥ ७ ॥ संभवपर्वणि [1]सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

[अस्मिन्नध्याये ३७॥ श्लोकाः]

॥ त्रयोविंशत्यधिकशततमोऽध्यायः ॥

द्रुपदनिकटं प्राप्य स्वसखित्वं वदतो द्रोणस्य द्रुपदकृतं भर्त्सनम् ॥ १ ॥ ततो द्रोणस्य हास्तिनपुरप्रवेशनम् ॥ २ ॥

वैशम्पायनः—

ततो द्रुपदमागम्य भरद्वाजः प्रतापवान् ।
अब्रवीत् [2]पुरुषव्याघ्रं सखायं विद्धि मामिति ॥ १

इत्येवमुक्तस्सख्या स प्रीतिपूर्वं जनेश्वरः ।

---

1. घ—कोशे—षट्षष्टितमोऽध्यायः । 2. क-ख-ग—पार्षतं राजन्

भारद्वाजेन पाञ्चालो रोषात् संरक्तलोचनः ॥ २

नामृष्यत वचस्सख्युः प्रीतिपूर्वमुदाहृतम् ॥ २॥

[1]स चैश्वर्यमदोन्मत्त इदं राजा वचोऽब्रवीत् ॥ ३

द्रुपदः--

अकृतेयं तव प्रज्ञा ब्रह्मन् नातिसमञ्जसी ।

यन्मां ब्रवीषि प्रसभं सखा तेऽहमिति द्विज ॥ ४

न हि राज्ञामुदीर्णानाम् एवंभूतैर्नरैः क्वचित् ।

सख्यं भवति मन्दात्मन् श्रिया हीनैर्धनच्युतैः ॥ ५

सौहृदान्यपि जीर्यन्ते कालेन परिजीर्यता ॥ ५॥

सौहृदं मे त्वया ह्यासीत् पूर्वं सामर्थ्यवर्धनम् ॥ ६

न सख्यमजरं लोके दृश्यते जातु कर्हि चित् ॥ ६॥

कामश्चैनं नाशयति क्रोधश्चैनम् प्रमर्दति ॥ ७

न वै जीर्णमुपातिष्ठ सख्यं नवमुपाकुरु ॥ ७॥

आदत्स्वैनं द्विजश्रेष्ठ सौहृदं ह्यर्थबन्धनम् ॥ ८

न दरिद्रो वसुमतो नाविद्वान् विदुषस्सखा ।

[2]न शूरस्य सखा क्लीबस् सखा पूर्वः किमिष्यते ॥ ९

ययोरेव समं वित्तं ययोः प्रज्ञा ययोश्श्रुतम ।

---

1. क-ख-ग—स ह्येवमैश्वर्यमदादिदं वचनमब्रवीत् ।

2. ख—नाराजा पार्थिवस्यापि सख्यं पूर्वं किमिष्यते ॥ [अधिकः पाठः]

तयोस्सम्बन्धकं तुल्यं न तु पुष्टविपुष्टयोः ॥ १०

नाश्रोत्रियश्श्रोत्रियस्य नारथी रथिनस्सखा ।
नाराज्ञ[1]स्सङ्गतं राज्ञस् सखिपूर्वं किमिष्यते ॥ ११

[2]त्वद्विधैर्मद्विधानां हि प्रहीणार्थैर्न जातु चित् ।
सख्यं भवति मन्दात्मन् सखिपूर्वं किमिष्यते ॥ १२

[3]वैशम्पायनः—

द्रुपदेनैवमुक्तस्तु भारद्वाजः प्रतापवान् ।
मुहूर्तं चिन्तयामास मन्युनाऽभिपरिप्लुतः ॥ १३

स विनिश्चित्य मनसा पाञ्चालं प्रति बुद्धिमान् ।
शिष्यैः परिवृतश्श्रीमान् पुत्रेणानुगतस्तदा ॥ १४

जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ १४॥

[4]श्यालस्यैव गृहं द्रोणस् सदारः पर्युपस्थितः ॥ १५

---

1. घ—सङ्गमो राज्ञा नन्वपूर्वं करिष्यते ।
2. क-ख-ग—ध्रुवमेव कृतप्रज्ञ न राज्ञा विद्यते क्वचित् ।
नैव तीर्णमुपातिष्ठ सख्यं नवमुपाकृधि ॥
सखा राज्ञः कृतं विप्र त्वाद्विधश्च भविष्यति ॥
[अधिकः पाठः]
3. घ—जगाम कुरुमुख्यानां सखा पूर्वं किमिष्यते । [अधिकः पाठः]
4. घ-कोशे—प्रीतिकारं करोम्यस्य द्रुपदस्य निराकृतेः ।
ऐश्वर्यमदमत्तस्य नृपं कंचिदुपेत्य च ॥
पौर्वकं सौहृदं त्यक्त्वा राज्यैश्वर्यविमोहितः ।
अपहस्तेन मां मत्तः द्रावयामास सोऽन्तिकात् ॥

अश्वत्थाम्ना च पुत्रेण महाबलवता सह ।
अवसत्तत्र राजेन्द्र गौतमस्य निवेशने ॥ १६
स कृपस्यान्तरे पार्थान् भारद्वाजः प्रतापवान् ।
अस्त्राणि शिक्षयामास बुबोध च स तं कृपः ॥ १७
आवासे तत्र [1]मूढात्मा कञ्चित्कालमुवास ह ॥ १७।।

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥
॥ ७ ॥ संभवपर्वणि अष्टषष्टितमोऽध्यायः2 ॥ ६८ ॥

[अस्मिन्नध्याये १७॥ श्लोका.]

॥ चतुर्विंशत्यधिकशततमोऽध्यायः ॥

द्रोणेन भीष्मादिभ्यः स्वपूर्ववृत्तान्तकथनम् ॥ १ ॥

वैशंपायनः—
द्रोणस्समुदितान् दृष्ट्वा कुरून् वृत्तिपरीप्सया ।
आजगाम महातेजा विप्रो नागपुरं प्रति ॥ १

पूर्वतोऽनुवृत्तम्—
मनसा प्रपतन्नेव यज्ञसेनावमानितः ॥
क-ख-ग—कोशेषु-द्रोणस्समुदितान् दृष्ट्वा पुरून्वृत्तिपरीप्सया ।
आजगाम महातेजा विप्रो नागपुरं प्रति ॥
स तथोक्तस्तथा तेन सदारः प्राद्रवत्कुरून् ।
तां प्रतिज्ञां प्रतिज्ञाय यां कर्ता न चिरादिव ॥

1. क-ग—गू [अधिकः पाठः]
2. घ-कोशे नात्राध्यायसमाप्तिः ; अन्त्यश्लोकत्रयमपि न दृश्यते ।

स तथोक्तस्तथा तेन सदारः प्राद्रवत् कुरून् ।
तां प्रतिज्ञां प्रतिज्ञाय यां कर्ता न चिरादिव ॥ २

[1]ततः कुमारा निष्क्रम्य सहिता नागसाह्वयात् ।
क्रीडया विनयाद्वीरास् तत्र पर्यचरन्मुदा ॥ ३

तेषां सङ्क्रीडमानानाम् उदपानेऽङ्गुलीयकम् ।
[2]पपात धर्मराजस्य वीटा तत्रैव चापतत् ॥ ४

तत्त्वम्बुना प्रतिच्छन्नं तारारूपमिवाम्बरे ।
[3]दृष्ट्वा ते वै कुमाराश्च तं यत्नात्पर्यवारयन् ॥ ५

ते परस्परमैक्षन्त कुमारास्सहितास्तदा ॥ ५॥

तस्य योगमविन्दन्तो भृशमुत्कण्ठिता भवन् ॥ ६

न किञ्चित्प्रत्यपद्यन्त कर्म वीटोपलब्धये ॥ ६॥

[4]तेऽपश्यन् ब्राह्मणं श्यामम् आसन्नपलितं कृशम् ।
कृत्यवन्तस्समीपस्थम् अग्निहोत्रपुरस्कृतम् ॥ ७॥

---

1. क-ग—कुमारास्त्वथ निष्क्रम्येति श्लोकमारभ्याध्यायारम्भो दृश्यते ।
घ—अथैकदा कुमारास्ते पुरान्निर्गम्य कौरवाः ।
विनोदक्रीडया वीरास्तत्र पर्यचरन्मुदा ॥ [पाठान्तरम्]
2. घ—अगाधे निर्मले कूपे पतितं न्वङ्गुलीयकम् । [अधिकः पाठः]
3. घ—विराजमानं दृष्ट्वैव चूडारत्नमनुत्तमम् ।
अङ्गुलीयं च सर्वेपि विस्मिताः पर्यवारयन् ॥ [अधिकः पाठः]
4. घ—परस्परं कुमारास्ते परितः पर्यवर्तयन् । [अधिकः पाठः]

[1]स तान् कृत्यवतो दृष्ट्वा कुमारांस्तु विचेतसः ।
[2]ब्राह्मणः प्रहसन् मन्दं कौशलेनाभ्यभाषत ॥ ८॥

अब्रवीद्धिग्बलं क्षात्रं धिक्चैषां वः कृतास्त्रताम् ।
भरतस्यान्वये जाता ये वीटां नाधिगच्छत ॥ ९॥

वीटां च मुद्रिकां चैव अहमेतदपि द्वयम् ।
उद्धरिष्ये त्विषीकाभिर् भोजनं मे प्रदीयताम् ॥ १०॥

[3]ततोऽब्रवीद्भरद्वाजं कुन्तीपुत्रो युधिष्ठिरः ।
गौतमीं च महाभागां भिक्षामश्नीत शाश्वतीम् ॥ ११॥

ततोऽब्रवीद्भरद्वाजः प्रहस्य भरतानिदम् ॥ १२

---

1. घ—पुत्रेण भार्यया साकं ब्रह्मतेजोनिधिः परम् । [अधिकः पाठः]
2. घ—आत्मानमङ्गुलीयं च चूडारत्नं जलाशये ।
पश्यतः परितः कूपं ब्राह्मणः प्रहसन्मृदु ॥
स तानुपेत्य कूपेऽस्मिन् पतितं किं नु पश्यथ ।
दृष्ट्वेति तान् स्वयं वीक्ष्य कूपान्तः पतितं च तत् ॥
कुमारांश्च समुद्वीक्ष्य कौशलेनाभ्यभाषत ॥ [अधिकः पाठः]
3. घ—श्रुत्वैतस्य वचो भूप धृतराष्ट्रसुता नृप ।
तूष्णीमासन् धर्मसूनुरुवाच प्राक्कृताञ्जलिः ॥
अहं दास्यामि वोऽभीष्टं भवन्तो मे वदन्तु किम् ।
उद्धरैतत्प्रियं रत्नं चूडामुद्रिकमेव च ॥
इत्युक्तो धर्मपुत्रेण भारद्वाजोऽब्रवीत्पुनः ।
अद्य भोजनमस्माकं क्षयाणां कुन्तिसंभव ॥
दिवारात्रं सृष्टमन्नम् इत्युक्तं पुनरब्रवीत् ॥

द्रोणः—

एषा मुष्टिरिषीकाणां मयाऽस्त्रेणाभिमन्त्रिता ॥ १२॥
अस्या वीर्यं समीक्षध्वं यदन्येषु न विद्यते ॥ १३
वेत्स्यामीषिकया वीटां तामिषीकामिषीकया ॥ १३॥
तामपीषीकया चैव अन्यामप्यनया पुनः ।
तथाऽन्योन्यसमायोगः वीटाया ग्रहणे मतः ॥ १४॥

वैशम्पायनः—

ततो यथोक्तं तत्सर्वं कृतवांस्तत्र ब्राह्मणः ॥ १५
तदपश्यन् कुमारास्ते विस्मयोत्फुल्ललोचनाः ॥ १५॥
अवाप्य चोद्धृतां वीटां वीटावेधिनमब्रुवन् ॥ १६
मुद्रिकामपि विप्रेन्द्र क्षिप्रमेतां समुद्धर ॥ १६॥
ततस्सशरमादाय धनुश्चापि महाबलः ।
शरेण बध्वा मुद्रां ताम् ऊर्ध्वमावाहयच्छरैः ॥ १७॥
सशरस्तदुपादाय कूपादङ्गुलिवेष्टकम् ।
प्रददौ तं कुमाराणां विस्मितानामविस्मितः ॥ १८॥
मुद्रिकां तूद्धृतां दृष्ट्वा प्राब्रुवंस्ते कुमारकाः ॥ १९

कुमारकाः—

अभिवादयामहे ब्रह्मन् नैतदन्येषु विद्यते ॥ १९॥
कोऽसि कं त्वां विजानीमो ब्रूहि किं करवाम ते ॥ २०

वैशम्पायनः—

एवमुक्तस्तथा विप्रः प्रत्युवाच कुमारकान् ।
आख्यापयध्वं भीष्माय रूपेण च गुणैरपि ॥ २१

स मा बुद्धिमतां श्रेष्ठश् श्रुत्वा ज्ञास्यति कौरवः ॥ २१॥

तथेत्युक्त्वा तु ते गत्वा भीष्ममूचुः पितामहम् ।
ब्राह्मणस्य वचस्सर्वं तच्च कर्म विशेषतः ॥ २२॥

श्रुत्वा भीष्मः कुमाराणां द्रोण इत्येव जज्ञिवान् ॥ २३

युक्तरूपस्स हि गुरुर् इत्येवमनुचिन्त्य च ।
तत आनाय्य द्रोणं तु भीष्मश्शान्तनवस्तदा ॥ २४

अर्हणीयेन कामैश्च यथान्यायमपूजयत् ॥ २४॥

ततस्तं परिपप्रच्छ भीष्मश्शस्त्रभृतां वरः ।
हेतुमागमने सर्वं तं द्रोणः प्रत्यभाषत ॥ २५॥

द्रोणः—

महर्षेरग्निवेश्यस्य सकाशमहमच्युत ।
अस्त्रार्थमगमं पूर्वं धनुर्वेदजिघृक्षया ॥ २६॥

ब्रह्मचारी विनीतात्मा जटिलो बहुलास्समाः ।
अवसं तत्र सुचिरम् अग्निवेश्यस्य सन्निधौ ॥ २७॥

पाञ्चालराजपुत्रश्च यज्ञसेनो महाबलः ।
मया सहाकरोद्विद्यां गुरौ तस्मिन् समाहितः ॥ २८॥

स मे तत्र सखा चासीत् प्रियवागुपकारकः ।
मया स्म रमते नित्यं सङ्गम्य समये तदा ॥ २९॥

[1]स मां संप्रस्थितः पूर्वं प्रियकारी प्रियंवदः ।
अब्रवीदिति मां भीष्म वचनं प्रीतिवर्धनम् ॥ ३०॥

अहं प्रियतमः पुत्रः पितुरेको महात्मनः ।
अभिषेक्ष्यति मां राज्ये स पाञ्चालो यदा तदा ॥ ३१॥

भविष्यति च ते भोज्यं सख्युस्सखिधनं यथा ॥ ३२
तद्भोज्यं भवता राज्यं सखे सत्येन ते शपे ॥ ३२॥
मम भोगाश्च वित्तं च त्वदधीनास्सुखानि च ॥ ३३
मम राज्यं महाभाग त्वया भोक्तव्यमिच्छता ॥ ३३॥
एवमुक्त्वा प्रचक्राम कृतास्त्रः पूजितो मया ॥ ३४

[2]उक्तवाक्यमहं ज्ञात्वा प्रहृष्टेनान्तरात्मना ।
सोऽहं पितृनियुक्तत्वात् पुत्रलोभाद्यशस्विनीम् ॥ ३५
शारद्वतीं महाप्राज्ञ उपयेमे समाहितः॥ ३५॥

अग्निहोत्रे च धर्मे च दमे च सततं रताम् ॥ ३६
लेभे च गौतमी पुत्रम् अश्वत्थामानमात्मजम् ॥ ३६॥

---

1. क-ख-ग—बाल्यात्प्रभृति कौरव्य सहाध्ययनमेव च ।
मया सहाकरोद्विद्वान् गुरौ तस्मिन् समाहितः ।
[अधिकः पाठः]

2. क-ख-ग—तत्तु वाक्यमहं हित्वा स्वकर्मोपाचरं तदा ।

भीष्म विक्रमकर्माणम् आदित्यमिव तेजसा ।
आत्मजेनाभवं प्रीतो भरद्वाजो यथा मया ॥ ३७॥

गोक्षीरं पिबतो दृष्ट्वा धनिनां स्म कुमारकान् ।
अश्वत्थामाऽरुदत्तात दिशो मे दश मोहयन् ॥ ३८॥

[1]न साधकोऽवसीदेत वर्तमानस्स्वकर्मणि ॥ ३९
अगच्छमभिजानंस्तान् अहं देशान् बहूनपि ॥ ३९॥

अविलोपेन धर्मस्य सततं धर्मसंस्थितम् ।
अयाचित्वा परिक्रामन् नाध्यगच्छं धनं क्वचित् ॥ ४०॥

अथ पिष्टोदकेनैव लोभयं वै कुमारकम् ॥ ४१
[2]पीत्वा पिष्टोदकं तच्च मातृदत्तं प्रियेण च ।

---

1. घ—दृष्ट्वा तदाऽहं कौरव्य व्यथितोऽभवमच्युत ।
याचयित्वा धनं देशे दातृभ्यः पुत्रकारणात् ॥
आगच्छामि भृशं दुःखी निर्गतोऽहं गृहात्ततः ।
ज्ञानवानपि यो लोके वेदशास्त्रार्थतत्त्ववित् ॥
को नावसीदेत् पुरुषो वर्तमानस्स्वकर्मणि ।
सीदमानकुटुम्बस्सन् दृष्ट्वा दारिद्र्यमात्मनः॥
आदाय गां धनं चापि याचित्वा दातृहस्ततः ।
गतिं गत्वा बहून् देशान् पर्यटन् धनकाङ्क्षया ॥ [अधिकः पाठः]

2. अ-कोशे—अस्य सार्धश्लोकस्य स्थाने इदमर्धं दृश्यते—
नृत्यति प्रहसन् स्म स्म पीतक्षीरोऽहमित्यपि ।

अनभिज्ञक्षीररसो नृत्यति प्रहसन् मुहुः ॥ ४२
सवयोभिः कुमारैश्च पीतक्षीरोऽहमित्यसौ ॥ ४२॥
तं दृष्ट्वा कश्मलं घोरं तत्र मामन्वपद्यत ॥ ४३
[1]द्रोणं धिगस्त्वधनिनं यो धनं नाधिगच्छति ॥ ४३॥
क्षीरारसज्ञः क्षीरमिति पीत्वा पिष्टं प्रनृत्यति ॥ ४४
अश्वत्थामापि धिङ्मातुर् यत्पयो नाधिगच्छति ॥ ४४॥
[2]इति संभाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत् ।
आत्मानं चात्मना गर्हन् मनसेदं व्यचिन्तयम् ॥ ४५॥
अपि नाहं पुरा विप्रैर् वर्जितां गर्हितां भृशम् ।
परोपसेवां पापिष्ठाम् आचरेयं धनाशया ॥ ४६॥
इति मत्वा प्रियं पूर्वं वक्तारं सूनृतां गिरम् ।
पूर्वं सङ्गतसंसिद्धं सदारस्सोमकं गतः ॥ ४७॥
अभिषिक्तं च श्रुत्वैनं कृतार्थोऽस्मीति चिन्तयन् ।
प्रियं सखायं सुप्रीतो राज्यस्थं समुपागमम् ॥ ४८॥

---

1. घ—कृपी चापि महत्क्लेशं पुत्रं दृष्ट्वा ममाविशत् ।
एकदा भवने स्नेहात् सख्युर्मध्ये ममात्मजः ॥
भुक्त्वा यथेष्टं क्षीरान्नं ज्ञातक्षीररसस्ततः ॥
अब्रवीन्मातरं दुःखी किं क्षीरं दत्तवत्यसि ।
त्वद्दत्तं मम यत्क्षीरं मातस्तेन समं न हि ॥
यद्भुक्तं भवने सख्यु र्देहि मे मधुरं पयः ॥
रुदन्तमेवमित्युक्ता दृष्ट्वा माता भृशातुरा ।
महद्दुःखं तयो र्दृष्ट्वा दुःखितोऽहं पितामह ॥ [अधिकः पाठः]

2. अ-क-ख-ग-घ—कोशेषु अयं श्लोको न दृश्यते ।

संस्मरन् सङ्गतं चैव वचनं चैव तस्य तत्।
ततो द्रुपदमागम्य सखिपूर्वमहं प्रभो ॥ ४९॥

अब्रुवं पुरुषव्याघ्र सखायं विद्धि मामिति ॥ ५०
उपस्थितं तु द्रुपदस् सखिवद्याभिसङ्गतम्।
स मां निराकारमिव प्रहसन्निदमब्रवीत् ॥ ५१

अकृतेयं तव प्रज्ञा ब्रह्मन् नातिसमञ्जसी।
यदात्थ मां त्वं प्रहसन् सखा तेऽहमिति द्विज ॥ ५२

न हि राज्ञामुदीर्णानाम् एवंभूतैर्नरैः क्वचित्।
सख्यं भवति मन्दात्मन् श्रिया हीनैर्धनच्युतैः ॥ ५३

[1]नाश्रोत्रियश्रोत्रियस्य [2]नारथी रथिनस्सखा।

---

1. क-ख-ग—सङ्गतानीह जीर्यन्ति कालेन परिजीर्यता।
आसीत्ते सङ्गतं पूर्वं न तु सामर्थ्यवर्धनम् ॥
[अधिकः पाठः]

2. क-ख-ग—नाविद्वान्विदुषस्सखा।
साम्ये सख्यं भवति वै वैषम्ये नोपगम्यते ॥
न सख्यमजरं लोके विद्यते जातु कर्हिचित्।
कामाद्धि रज्यते चान्यः क्रोधेनापि च रज्यते ॥
मा वै जीर्णमुपातिष्ठास्सख्यं नीचमुपादधाः।
आगतश्चेदनाहूतो दहेत् स्वार्थनिबन्धनम् ॥
नाकिञ्चनस्सखाऽऽढ्यस्य नारथी रथिनस्सखा।
नाशूरस्य सखा शूरस्सख्यं पूर्वं किमिष्यते ॥
न हि राज्ञामुदीर्णनामेवंभूतैर्नरैः क्वचित्।
सख्यं भवति मन्दात्मन् श्रिया हीनैर्धनच्युतैः ॥

सङ्गमं नाभिजानामि त्वयाऽद्य समये कृतम् ।
एकरात्रं तु ते ब्रह्मन् कामं दास्यामि भोजनम् ॥
आदत्स्वैनं द्विजश्रेष्ठ सौहार्दं ह्यर्थबन्धनम् ॥
एवमुक्तस्त्वहं तेन सदारः प्रस्थितस्तदा ।
तां प्रतिज्ञां प्रतिज्ञाय यां कर्ता न चिरादिव ॥
ततश्च भवतः कामं संवर्धयितुमागतः ।
इदं नागपुरं राज्यं ब्रूहि किं करवाणि ते ।

॥ इति संभवपर्वणि षट्सप्ततितमोऽध्यायः ॥

॥ अथ सप्तसप्ततितमोऽध्यायः ॥

वैशम्पायनः —

एवमुक्तस्तदा भीष्मो भरद्वाजमभाषत ।
अधिज्यं कुरुवीराणां साध्वस्त्रं प्रतिपादय ॥
भुङ्क्ष्व भोगान् भृशं प्रीतः पूज्यमानः कुरुक्षये ॥
कुरूणामस्ति यद्वित्तम् इदं राज्यं च कृत्स्नशः ।
त्वमेव परमो राजा सर्वे वाक्यकरास्तव ॥
यच्च ते प्रार्थितं ब्रह्मन् कृतमित्यवधार्यताम् ॥
दिष्ट्या प्राप्तोऽसि ब्रह्मर्षे महान् मेऽनुग्रहः कृतः ॥
द्रोणस्तथोक्तो भीष्मेण पूजितो वसतिं वसन् ।
कुरूणां सफलं कर्म द्रोणप्राप्तौ तदाऽभवत् ॥
अस्त्रं चतुर्विधं कृत्स्नं कुमारान् प्रत्यपादयत् ॥
तस्य क्षत्तस्य लोकेऽस्मिन् राजपुत्रा महाबलाः ॥
अभिजग्मुस्तदा द्रोणं धनुर्वेदचिकीर्षया ॥
बुद्ध्या भुजबलोद्योगे तेषु सर्वेषु पाण्डवः ।
अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः ॥
कृत्येष्वस्त्रप्रयोगेषु लाघवात् सौष्ठवेन च ।
समेतानां तु सर्वेषां बभूवाभ्यधिकोऽर्जुनः ॥
ऐन्द्रि त्वविषमं द्रोण उपदेशेऽभ्यभाषत ॥
एकस्सर्वकुमाराणां विव्याध शरमुत्तमम् ।

नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ ५४
द्रुपदेनैवमुक्तोऽहं मन्युनाऽभिपरिप्लुतः ।
अभ्यागच्छं कुरून् भीष्म शिष्यैरर्थिगुणान्वितैः ॥ ५५

वैशम्पायनः—

प्रतिजग्राह तं भीष्मो गुरुं पाण्डुसुतैस्सह ।
पौत्रानादाय तान् सर्वान् वसूनि विविधानि च ॥ ५६
शिष्या इति ददौ राजन् द्रोणाय विधिपूर्वकम् ॥ ५६॥

पूर्वतोऽनुवृत्तम्—

कमण्डलुं च सर्वेषां प्रायच्छदुदकानये ॥
पुत्राय तु ददौ कुम्भमविलम्बनकारणात् ।
यावत्ते नाभिगच्छन्ति तावदस्य परा गतिः ॥
द्रोण आचष्ट पुत्राय तज्ज्ञात्वे शङ्कयाऽन्वितम् ।
पार्जन्येनैव सोऽस्तेन पूरयित्वा कमण्डलुम् ॥
सममाचार्यपुत्रेण गुरुमायात् स फल्गुनः ॥
आचार्यपुत्रात्तस्माद्विशेषेऽपि धिया गुणैः ।
न चाहीयत मेधावी पार्थश्शस्त्रभृतां वरः ॥
द्रुपदेनैवमुक्तोऽहं मन्युनाऽभिपरिप्लुतः ।
अभ्यागच्छम् कुरून् भीष्म शिष्यैरर्थगुणान्वितैः ॥
घ—इत्थं निराकृतस्तेन देशाद् देशं परिभ्रमन् ।
त्वत्संभवामहं कीर्तिं श्रुत्वा त्वां समुपागतः ॥

वैशम्पायनः—

इत्युक्तवन्तं तं द्रोणं मा भैरिति समाश्वसत् ।
पूजयित्वा बहुविधैर्धनैर् गुरुपरीप्सया ।
पौत्राणां सुमतिं दृष्ट्वा सर्वशास्त्रार्थगाहिनीम् ॥

[अधिकः पाठः]

स च शिष्यान् महेष्वासः प्रतिजग्राह कौरवान् ॥ ५७

प्रतिगृह्य च तान् सर्वान् द्रोणो वचनमब्रवीत् ।
रहस्येतान् प्रतीतात्मा कृतोपसदनांस्तथा ॥ ५८

द्रोणः—

कार्यं मे काङ्क्षितं किञ्चिद्धृदि संपरिवर्तते ।
कृताकृतं तत्प्रदेयं मे तद्भवद्भिर्वदतानघाः ॥ ५९

वैशम्पायनः—

तच्छ्रुत्वा कौरवेयास्ते तूष्णीमासन् विशाम्पते ॥ ५९॥
अर्जुनस्तु ततस्सर्वं प्रतिजज्ञे परन्तप ॥ ६०

ततोऽर्जुनं मूर्ध्नि तदा समाघ्राय पुनः पुनः ।
प्रीतिपूर्वं परिष्वज्य प्ररुरोद मुदा तदा ॥ ६१

अश्वत्थामानमाहूय द्रोणो वचनमब्रवीत् ।
सखायं विद्धि ते पार्थं मया दत्तं प्रगृह्यताम् ॥ ६२
साधु साध्विति तं प्राज्ञः परिष्वज्येदमब्रवीत् ॥ ६२॥

अद्यप्रभृति विप्रेन्द्र परवानस्मि धर्मतः ।
शिष्योऽहं त्वत्प्रसादेन जीवामि द्विजसत्तम ॥ ६३॥

इत्युक्त्वा तु तदा पार्थः पादौ जग्राह पाण्डवः ॥ ६४

ततो द्रोणः पाण्डुपुत्रान् अस्त्राणि विविधानि च ।
ग्राहयामास दिव्यानि मानुषाणि च वीर्यवान् ॥ ६५

[1]राजपुत्रास्तथैवान्ये समेत्य भरतर्षभाः ।
अभिजग्मुस्ततो द्रोणम् अस्त्रार्थं द्विजसत्तमम् ॥ ६६

वृष्णयश्चान्धकाश्चैव नानादेश्याश्च पार्थिवाः ।
सूतपुत्रश्च राधेयो गुरुं द्रोणमियात्तदा ॥ ६७

स्पर्धमानस्तु पार्थेन सूतपुत्रोऽत्यमर्षणः ।
दुर्योधनमुपाश्रित्य पाण्डवानत्यमन्यत ॥ ६८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥
॥ ७ ॥ संभवपर्वणि [2]ख-कोनसप्ततितमोऽध्यायः ॥ ६९ ॥
[अस्मिन्नध्याये ६८ श्लोकाः]

॥ पञ्चविंशत्यधिकशततमोऽध्यायः ॥

ख-कलव्यवृत्तान्तकथनम् ॥ १ ॥

वैशंपायनः—

[3]अर्जुनस्तु परं यत्नम् आतस्थे गुरुपूजने ।

---

1. ख—अस्त्रं चतुर्विधं कृत्स्नं कुमारान् प्रत्यपादयत् ।
ततः क्षत्रस्य लोकेऽस्मिन् राजपुत्रा महाबलाः ॥[अधिकः पाठः]
2. ख-ग—कोशयो रध्यायसमाप्तिर्नोपलभ्यते ।
घ—कोशे सप्तषष्टितमोऽध्यायः ॥
3. ख—बुद्ध्या भुजबलोद्योगे तेषु सर्वेषु पाण्डवः ।
अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः ॥

अस्त्रे च परमे योगे प्रियो द्रोणस्य चाभवत् ॥ १

[1]द्रोणेन च तदाहूय रहस्युक्तोऽन्नसाधकः ।
अन्धकारेऽर्जुनायान्नं न देयं ते कदा चन ॥ २

ततः कदाचिद्भुञ्जाने प्रववौ वायुरर्जुने ।
[2]तेन दीपस्तु सहसा निर्वापित इति श्रुतिः ॥ ३

भुक्त्वा[3]नेव कौन्तेयो नाभ्यासात्स न्यवर्तत ।

पूर्वतोऽनुवृत्तम्—

तुल्येष्वस्त्रप्रयोगेषु लाघवात् सौष्ठवेन च ।
समेतानां तु शिष्याणां बभूवाभ्यधिकोऽर्जुनः ॥
ऐन्द्रिमभ्यधिकं द्रोण उपदेशेऽभ्यभाषत ।
एकस्सर्वकुमाराणां विव्याध शरमुत्तमम् ॥
कमण्डलुं च सर्वेषां प्रायच्छदुदकानये ।
पुत्राय तदहौ कुम्भं अविलम्बनकारणात् ॥
यावन्नाभ्यधिगच्छन्ति तावदस्य परा गतिः ।
द्रोण आचष्ट पुत्राय तज्ज्ञे शङ्कयाऽन्वितः ॥
पार्जन्येनैव सोऽस्त्रेण पूरयित्वा कमण्डलुम् ।
सममाचार्यपुत्रेण गुरुमायात् स फल्गुनः ॥
आचार्यपुत्रात्तस्मात्तु विशेषेऽपि धियो गुणैः ।
न चाहीयत मेधावी पार्थश्शस्त्रभृतां वरः ॥ [अधिकः पाठः]

1. क-ख-ग—ततो द्रोणोऽब्रवीदेनं राज्ञ एव निवेशने । [अधिकः पाठः]
2. घ—निर्वापितः प्रदीपोऽयं नापश्यस्त्वाश्रृणोत्तदा ।
शिक्षाभ्याससमाकृष्टः शिक्षासक्तमनास्तदा ॥ [अधिकः पाठः]
3. क-ख-ग—नेव कौन्तेयो नाभ्यासाच्च न्यवर्तत ।
घ—नेव कौन्तेयो न भुक्तेस्स न्यवर्तत ॥

[1]हस्तस्तेजस्विनो नित्यम् अभ्यासकृतकारणात् ॥ ४
तदभ्यासकृतं मत्वा रात्रावपि स पाण्डवः ।
तस्य ज्यातलनिर्घोषं द्रोणश् शुश्राव तन्निशि ॥ ५
उपेत्यार्जुनमुत्थाप्य परिष्वज्येदमब्रवीत् ॥ ५॥

द्रोणः—

[2]प्रयतिष्ये तथा कर्तुं यथा नान्यो धनुर्धरः ।
त्वत्समो भविता लोके सत्यमेतद्ब्रवीमि ते ॥ ६॥

[3]वैशंपायनः—

ततो द्रोणोऽर्जुनं भूयो हयेषु च गजेषु च ।

---

1. घ—शिक्षासक्तमनोबुद्धेश् चक्षुषो न च दृश्यते ।
निर्वापितः प्रदीपो वा नेति वा नृपसत्तम ॥
इन्द्रियाणां नयत्वाच्च मनसो वस्तुदर्शने ।
अभ्यासस्य प्रधानत्वात् सर्वविद्यासु फल्गुनः ॥ [अधिकः पाठः]
2. ख—अस्त्रवान्वान्वियेषे स्त्री यथावां नाद्य कश्चन । [अधिकः पाठः]
3. क-ख-ग—धनुर्ग्रहेपि मे शिष्यो भविष्यसि विशेषवान् ।
इतब्रूदि तदा जिष्णोर् ववृधे द्रोणशासनम् ॥
परमं चाकरोद्यत्नं धनुर्वेदे परन्तपः ।
अर्जुनो नरशार्दूलस्सर्वशस्त्रभृतां वरः ॥
सर्वक्रियाभ्यनुज्ञानात्तथा शिष्यान्समानयत् ।
दुर्योधनं चित्रसेनं दुश्शासनविविंशती ।
अर्जुनं च समानीय अश्वत्थामानमेव च ॥
शिशुकं मृण्मयं कृत्वा द्रोणो गङ्गाजले ततः ।
शिष्याणां पश्यतां चैव क्षिपति स्म महाभुज ॥
चक्षुषी वाससा चैव बद्ध्वा प्रादाच्छरासनम् ॥

रथेषु भूमावपि च रणशिक्षामशिक्षयत् ॥ ७॥

गदायुद्धेऽसिचर्यायां तोमरप्रासशक्तिषु ।
द्रोणस्संकीर्णयुद्धेषु शिक्षयामास कौरवम् ॥ ८॥

पूर्वतोऽनुवृत्तम्—

शिशुकं विद्यतेमं वै जलस्थं बद्धचक्षुषः ।
एतत्क्षणेन बीभत्सु रावापैर्दशभिर्वशी ॥
पञ्चकैरनुविध्याथ मग्नं शिशुकमम्भसि ।
तस्य दृष्ट्वा क्रियास्सर्वा द्रोणोऽमन्यत पाण्डवम् ॥
विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ।
अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ॥
अस्त्रं विशिष्टमन्येषु यच्च विद्येत पाण्डव ।
ससंहारप्रयोगं च त्वमधीष्व व्रतं चर ॥
अस्त्रं ब्रह्मशिरो नाम दहेद्यत्पृथिवीमपि ।
यावान्मन्त्रप्रयोगोऽपि विनियोगे भविष्यति ॥
तावानेव तु संहारे कर्तव्य इति चान्ततः ।
*न मानुषे प्रयोक्तव्यं ब्रह्मणोऽस्त्रं कथञ्चन ।
बाधते मानुषाञ्शत्रून् यदा वा मानुषः क्वचित् ॥
तस्मादेतत्प्रयोक्तव्यं ब्राह्ममस्त्रं सनातनम् ।
तथेत्येव च बीभत्सुर् उवाचाथ कृताञ्जलिः ॥

चकार च तथा सर्वं यथोक्तं मनुजर्षभः ।
अवाप्तास्त्रं तु बीभत्सुमनुज्ञाय महामतिः ॥
उवाच परमप्रीतो सत्समोऽसीति पाण्डवम् ॥
ततश्चित्रान् धनुर्मार्गान् गजेषु च रथेषु च ।
अस्त्रेषु सम्यक्चारेषु द्रोणश्शिष्यान् व्यचारयत् ॥

[अधिकः पाठः]

* ख—असामान्यमिदं तात लोकेष्वस्त्रं निगद्यते ।
तद्धारयेथाः प्रयतः शृणु चेदं वचो मम ॥ [अधिकः पाठः]

तस्य तत्कौशलं दृष्ट्वा धनुर्वेदजिघृक्षवः ।
राजानो राजपुत्राश्च समाजग्मुस्सहस्रशः ॥ ९॥

तान् सर्वाञ्शिक्षयामास द्रोणश्शस्त्रभृतां वरः ॥ १०

ततो निषादराजस्य हिरण्यधनुषस्सुतः ।
एकलव्यो महावीर्यो द्रोणमभ्याजगाम ह ॥ ११

न स तं प्रतिजग्राह नैषादिरिति चिन्तयन् ।
शिष्यं धनुषि धर्मज्ञस् तेषामेवान्ववेक्षया ॥ १२

द्रोणः—

शिष्योऽसि मम नैषादे ! प्रयोगे बलत्तरः ।
निवर्तस्व गृहानेव अनुज्ञातोऽसि नित्यशः ॥ १३

वैशंपायनः—

स तु द्रोणस्य शिरसा पादौ गृह्य परन्तपः ।
अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम् ॥ १४

तस्मिन्नाचार्यवृत्तिं च परमामास्थितस्तदा ।
इष्वस्त्रे योगमातस्थे परं नियममास्थितः ॥ १५

स तेन तपसा युक्तो योगेन परमेण च ।
विमोक्षादानसन्धाने लघुत्वं परमाप सः ॥ १६

लाघवं चास्त्रयोगं च नचिरात् प्रत्यपद्यत ॥ १६॥

अथ द्रोणाभ्यनुज्ञाताः कदाचित् कुरुपाण्डवाः ।

रथैर्विनिर्ययुस्सर्वे मृगयामरिमर्दनाः ॥ १७॥
तत्रोपकरणं गृह्य नरः कश्चिद्यदृच्छया ।
राजन्ननुजगामैकः श्वानमादाय पाण्डवान् ॥ १८॥
तेषां विचरतां तत्र तत्तत्कर्म चिकीर्षताम् ।
श्वा चरन् स पथा मूढो नैषादिं प्रति जग्मिवान् ॥ १९॥
[1]स कृष्णं मलदिग्धाङ्गं कृष्णाजिनधरं वने ।
नैषादिं श्वा समुद्वीक्ष्य भषंस्तस्थौ तदन्तिके ॥ २०॥
तस्यैकलव्यो भषतः शुनस्सप्त शरान् मुखे ।
लाघवं दर्शयन्नस्त्रैर् मुमोच युगपद्यथा ॥ २१॥
[2]स तु श्वा शरपूर्णास्यः पाण्डवानाजगाम ह ।
तं दृष्ट्वा कौरवा राजन् विस्मयं परमं गताः ॥ २२॥
लाघवं शब्दवेधित्वं दृष्ट्वा तत् परमं तदा ।
[3]प्रेक्ष्य तं व्रीडिताश्चासन् प्रशशंसुश्च सर्वशः ॥ २३॥

1. क-ख-ग—तस्य रोरूयमाणस्य नष्टस्य विजने वने ।
शब्दं शुश्राव नैषादिश् शुनस्तस्य तु मारिष ॥
[अधिकः पाठः]

2. घ—वेगमर्जनविस्तारि परिणाहविळम्बनैः ।
आयामपरिमाणाभ्यां बहुशस्ते शराङ्कुराः ॥
समप्रमाणिभिर्जिह्मास्सक्षिप्तैर्व्याभाषितश्शरैः ।
तथा शैलबिलोत्थाभिः ससार्चीर्भिररिन्दमैः ॥ [अधिकः पाठः]

3. क-ख-ग—आत्मन्यकार्षुर्व्रीळां च ततस्ते पाण्डुनन्दनाः ।
श्वानं तु पाण्डवा दृष्ट्वा विस्मयोत्फुल्ललोचनाः ॥
[अधिकः पाठः]

तं ततोऽन्वेषमाणास्ते वने वनचरेश्वरम् ।
ददृशुः पाण्डवा राजन् अस्यन्तमनिशं शरान् ॥ २४॥

न चैनमभ्यजानंस्ते तदा विकृतदर्शनम् ।
अथैनं परिपप्रच्छुः को भवान् कस्य चेति ह ॥ २५॥

एकलव्यः—

निषादाधिपतेर्वीरा हिरण्यधनुषस्सुतम् ।
द्रोणशिष्यं च मां वित्त धनुर्वेदकृतश्रमम् ॥ २६॥

वैशम्पायनः—

[1]ते तमाज्ञाय तत्त्वेन पुनरागम्य पाण्डवाः ।
यथावृत्तं वने राजन् द्रोणायाचख्युरद्भुतम् ॥ २७॥

कौन्तेयस्त्वर्जुनो राजन् एकलव्यमनुस्मरन् ।
रहो द्रोणं समागम्य प्रणयादिदमब्रवीत् ॥ २८॥

नन्वहं परिरभ्यैकः प्रीतिपूर्वमिदं वचः ।
भवतोक्तो न मे शिष्यस् त्वद्विशिष्टो भविष्यति ॥ २९॥

अथ कस्मान्मद्विशिष्टो लोकादपि च वीर्यवान् ।
अस्त्यन्यो भवतश्शिष्यो निषादाधिपतेस्सुतः ॥ ३०॥

वैशंपायनः—

मुहूर्तमिव तं द्रोणश् चिन्तयित्वा विनिश्चयम् ।

1. क-ख-ग—एकलव्यं स आत्मानमाचचक्षेऽथ पाण्डवाः ।

सव्यसाचिनमादाय नैषादिं प्रति जग्मिवान् ॥ ३१॥

ददर्श मलदिग्धाङ्गं जटिलं चीरवाससम् ।
एकलव्यं धनुष्पाणिम् अस्यन्तमनिशं शरान् ॥ ३२॥

एकलव्यस्तु तं दृष्ट्वा द्रोणमायान्तमन्तिकात् ।
[1]अभिगम्योपसंगृह्य जगाम शिरसा महीम् ॥ ३३॥

पूजयित्वा ततो द्रोणं विधिवत् स निषादजः ।
निवेद्य शिष्यमात्मानं [2]तस्थौ प्राञ्जलिरग्रतः ॥ ३४॥

ततो द्रोणोऽब्रवीद्राजन् एकलव्यमिदं वचः ॥ ३५

द्रोणः—

यदि शिष्योऽसि मे तात वेतनं दीयतामिति ॥ ३५॥

वैशंपायनः—

एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोऽब्रवीदिदम् ॥ ३६

एकलव्यः—

किं प्रयच्छामि भगवन् आज्ञापयतु मां गुरुः ।
न हि किंचिददेयं मे गुरवे ब्रह्मवित्तम ॥ ३७

वैशंपायनः—

तमब्रवीत् त्वयाऽङ्गुष्ठो दक्षिणो दीयतामिति ॥ ३७॥

---

1. क-ख-ग—अभिगम्य ततः पादौ जग्राह शिरसा तदा ।
2. क-ख-ग-घ—द्रोणाय स निषादजः ।

एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम् ।
प्रतिज्ञामात्मनो रक्षन् सत्ये च निरतस्सदा ॥ ३८॥

तथैव हृष्टवदनस् तथैवादीनमानसः ॥ ३९

सत्यसन्धं च नैषादिं दृष्ट्वा प्रीतोऽब्रवीदिदम् ।
[1]एवं कर्तव्यमिति वै एकलव्यमभाषत ॥ ४०

[2]छित्त्वाऽविचार्य तं प्रादाद् द्रोणायाङ्गुष्ठमात्मनः ॥ ४०॥

अतः परं तु नैषादिरङ्गुलीभिर्व्यकर्षत ।
न तथा स तु शीघ्रोऽभूद् यथा पूर्वं नराधिप ॥ ४१॥

ततोऽर्जुनः प्रीतमना बभूव विगतज्वरः ।
द्रोणश्च सत्यवागासीन्नाधिकोऽन्योऽर्जुनादभूत् ॥ ४२॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

॥ ७ ॥ संभवपर्वणि सप्ततितमोऽध्यायः [3] ॥ ७० ॥

[अस्मिन्नध्याये ४२॥ श्लोकाः]

---

1. ख—शिष्योऽसि मम नैषादे प्रयोगो बलवत्तरः । [अधिकः पाठः]
2. क-ग-घ—बाढमित्येव नैषादिश्छित्त्वाङ्गुष्ठौ ददौ ततः ।
अविषण्णस्तु तौ प्रादाच्छित्त्वा द्रोणस्य वेतनम् ॥
[अधिकः पाठः]
3. ख-कोशे—एकोनसप्ततितमोऽध्यायः ।
घ-कोशे—अष्टषष्टितमोऽध्यायः ।

॥ षड्त्रिंशत्यधिकशततमोऽध्यायः ॥

अर्जुनेन द्रोणस्य ग्राहान्मोक्षणम् ॥ १ ॥

वैशम्पायनः—

[1]द्रोणस्य तु तदा शिष्यौ गदायोग्यौ विशेषतः ।
दुर्योधनश्च भीमश्च कुरूणामभ्यगच्छताम् ॥ १

अश्वत्थामा महास्त्रेषु सर्वेष्वभ्यधिकोऽभवत् ।
[2]युधिष्ठिरो रथश्रेष्ठस् सर्वत्र तु धनञ्जयः ॥ २

[3]प्रथितस्सागरान्तायां रथयूथपयूथपः ।
[4]बुद्धियोगबलोत्साहैस् सर्वास्त्रेषु तथाऽर्जुनः ॥ ३

अस्त्रे गुर्वनुरागे च विशिष्टोऽभवदर्जुनः ॥ ३॥
तुल्येष्वस्त्रोपदेशेषु सौष्ठवेन च वीर्यवान् ।
एकस्सर्वकुमाराणां स बभूवार्जुनोऽधिकः ॥ ४॥

---

1. क-ख—द्रोणस्ततः परां पूजां कुरुषु प्राप्नुवद्धनम् ।
चतुष्पादं कृत्स्नमस्त्रं कुमारान् प्रत्यवेदयत् ॥
पार्थिवस्य तु क्षत्तस्य राजपुत्रा महाबलाः ।
अनुजग्मुस्ततो द्रोणं कुरुष्वस्त्रचिकीर्षया ॥ [अधिकः पाठः]

2. क-ख-ग-घ—तथाऽतिपुरुषानन्यान् स राधेयो महाबलः ।
तथाऽतिपुरुषानन्यान् यमजावसिचर्मणि ॥
[अधिकः पाठः]

3. क-ख-ग—अर्जुनो जयतां श्रेष्ठस् सर्वत्र तु धनंजयः । [अधिकः पाठः]

4. क-ग—बुद्ध्या भुजबलोद्योगैस्तेषु सर्वेषु पाण्डवः ॥

प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ।
धार्तराष्ट्रा दुरात्मानो नामृष्यन्त परंतप ॥ ५॥
तांस्तु सर्वान् समानीय सर्वविद्यासु निष्ठितान् ।
द्रोणः प्रहरणज्ञाने जिज्ञासुः पुरुषर्षभान् ॥ ६॥
कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम् ।
अविज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत् ॥ ७॥

[1]द्रोणः —

शीघ्रं भवन्तस्सर्वे वै धनूंष्यादाय सत्वराः ।
भासमेतं समुद्दिश्य तिष्ठन्तु संहितेषवः ॥ ८॥
मद्वाक्यसमकालं च शिरोऽस्य विनिकृत्यताम् ।
एकैकशो नियोक्ष्यामि तथा कुरुत पुत्रकाः ॥ ९॥

वैशम्पायनः—

ततो युधिष्ठिरं पूर्वम् उवाचाङ्गिरसां वरः ।
संधत्स्व बाणं दुर्धर्ष मद्वाक्यान्ते विमुञ्च तम् ॥ १०॥
[2]ततो युधिष्ठिरः पूर्वं धनुर्गृह्य महारवम् ।
तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः ॥ ११॥
ततो विततधन्वानं द्रोणस्तं कुरुनन्दनम् ।

---

1. घ—भीष्मं विदुरमानाय्य बाह्लीकादीन् गुरूनपि । [अधिकः पाठः]
2. क-ख-ग-घ—ततः कुन्तीसुतो राजन् गृहीत्वा धनुरुत्तमम् ।

स मुहूर्तादुवाचेदं वचनं भरतर्षभ ॥ १२॥
पश्यस्येनं द्रुमाग्रस्थं भासं नरवरात्मज ! ।
पश्यामीत्येवमाचार्यं प्रत्युवाच युधिष्ठिरः ॥ १३॥
स मुहूर्तादिव पुनर् द्रोणस्तं प्रत्यभाषत ।
पार्थ वृक्षमिमं मां च भ्रातॄन् वाऽपि प्रपश्यसि ॥ १४॥
तमुवाच स कौन्तेयः पश्याम्येनं वनस्पतिम् ।
भवन्तं च तथा भ्रातॄन् [1]भासं चेति पुनः पुनः ॥ १५॥
तमुवाचापसर्पेति द्रोणोऽप्रीतमना इव ।
नैतच्छक्यं त्वया वेद्धुं लक्ष्यमित्येव कुत्सयन् ॥ १६॥
ततो दुर्योधनादींस्तान् [2]धार्तराष्ट्रान् महाबलान् ।
तेनैव क्रमयोगेन जिज्ञासुः पर्यपृच्छत ॥ १७॥
अन्यांश्च शिष्यान् भीमादीन् राज्ञश्चैवा[3]न्यदेशजान् ।
तथा च सर्वे सर्वं तत् पश्याम इति कुत्सिताः ॥ १८॥
ततो धनञ्जयं द्रोणः स्मयमानोऽभ्यभाषत ॥ १९
त्वयेदानीं प्रहर्तव्यम् एतल्लक्ष्यं निपात्यताम् ।
मद्वाक्यसमकालं ते मोक्तव्यश्च भवेच्छरः ॥ २०
विकृष्य कार्मुकं पुत्र तिष्ठ तावन्मुहूर्तकम् ॥ २०॥

1. क-ख-ग-घ—लक्ष्यं चैव हि विप्रो ।
2. क-ख-ग-घ—कुत्सयित्वा महारथान् ।
3. क-ख-ग-घ—विदेशकान् ।

एवमुक्तस्सव्यसाची मण्डलीकृतकार्मुकः ।
तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः ॥ २१॥

मुहूर्तादिव तं द्रोणस् तथैव समभाषत ।
पश्यस्येनं स्थितं भासं द्रुमं मामपि चार्जुन ॥ २२॥

पश्यामि भासमेवाहं इति तं प्रत्यभाषत ।
न तु वृक्षं भवन्तं वा पश्यामीति च भारत ॥ २३॥

ततः प्रीतमना द्रोणो मुहूर्तादिव तं पुनः ।
प्रत्यभाषत दुर्धर्षं पाण्डवानां रथर्षभम् ॥ २४॥

भासं पश्यसि यद्येनं तथा ब्रूहि पुनर्वचः ।
शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत् ॥ २५॥

अर्जुनेनैवमुक्तस्तु द्रोणो हृष्टतनूरुहः ।
मुञ्चस्वेत्यब्रवीत् पार्थं स मुमोचाविचारयन् ॥ २६॥

ततस्तस्य नगस्थस्य क्षुरेण निशितेन सः ।
शिर उत्कृत्य तरसा पातयामास पाण्डवः ॥ २७॥

तस्मिन् कर्मणि संसिद्धे परिष्वज्य च पाण्डवम् ।
मेने च द्रुपदं सङ्ख्ये सानुबन्धं पराजितम् ॥ २८॥

[1]कस्य चित्त्वथ कालस्य सशिष्योऽङ्गिरसां वरः ।

---

1. ध—सामर्थ्यं फल्गुनस्यापि कौरवाणां तथेतरत् ।
दर्शयामास भीष्माय विदुराय महात्मने ॥ [अधिकः पाठः]

जगाम गङ्गामभितो मज्जितुं भरतर्षभ ॥ २९॥

[1]अवगाढमथो द्रोणं सलिले सलिलेचरः ।
ग्राहो जग्राह बलवान् जङ्घान्ते कालचोदितः ॥ ३०॥

स समर्थोऽपि मोक्षाय शिष्यान् सर्वानचोदयत् ।
ग्राहं हत्वा मोक्षयध्वं मामिति त्वरयन्निव ॥ ३१॥

[2]तद्वाक्यसमकालं तु बीभत्सुर्निशितैश्शरैः ।
अवार्यैर्निशितैश्चैनं मग्नमम्भस्यताडयत् ॥ ३२॥

इतरे तु विसंमूढास् तत्र तत्र प्रपेदिरे ॥ ३३
तं च दृष्ट्वा क्रियोपेतं द्रोणोऽमन्यत पाण्डवम् ।

विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ॥ ३४
स पार्थबाणैर्बहुधा खण्डशः परिकल्पितः ।

[3]ग्राहः पञ्चत्वमापेदे जङ्घां त्यक्त्वा महात्मनः ॥ ३५
अथाब्रवीन्महात्मानं भारद्वाजो महारथम् ॥ ३५॥

गृहाणेदं महाबाहो विशिष्टमतिदुर्धरम् ।

---

1. घ—पुनर्भीष्मादिभिस्साकं दर्शयन् शिष्यलाघवम् ॥ [अधिकः पाठः]
2. क-ख-ग—वचनादेव बीभत्सुरवार्यैर्दशभिः शरैः ।
शिरश्चिच्छेद दशधा मग्नं ग्राहमथाम्भसि ॥
3. क-ग—ग्राहःपञ्चत्वमापेदे इति श्लोकानन्तरं
सप्तविंशत्यधिकशततमेऽध्याये प्रारम्भे—
कृताञ्जान्धार्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत ।
इति श्लोकक्रमो वर्तते ॥

अस्त्रं ब्रह्मशिरो वीर सप्रयोगनिवर्तनम् ॥ ३६॥

न च ते मानुषेष्वेतत् प्रयोक्तव्यं कथंचन ।
जगद्धि निर्दहेदेतद् अल्पतेजसि पातितम् ॥ ३७॥

असामान्यमिदं तात लोकेष्वस्त्रं निगद्यते ।
तद्धारयेथाः प्रयतः शृणु चेदं वचो मम ॥ ६८॥

बाधतेऽमानुषः कश्चिद् देवो वापीह कश्चन ।
तद्वधाय प्रयुञ्जीथास् तदस्त्रमिदमाहवे ॥ ३९॥

तत्तथेति प्रतिश्रुत्य बीभत्सुः प्रकृताञ्जलिः ।

जग्राह परमास्त्रं तद् आह चैनं पुनर्गुरुः ॥ ४०॥
भविता त्वत्समो नान्यः पुमांल्लोके धनुर्धरः ॥ ४१

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां-
आदिपर्वणि षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

॥ ७ ॥ संभवपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥

[अस्मिन्नध्याये ४१ श्लोकाः]

॥ सप्तविंशत्यधिकशततमोऽध्यायः ॥

कुमाराणां अस्त्रशिक्षापरीक्षार्थं रङ्गनिर्माणम् ॥ १ ॥ शिक्षादर्शनार्थं भीष्मादीनां प्रेक्षागारप्रवेशः ॥ २ ॥ युधिष्ठिरादीनां परीक्षा ॥ ३ ॥ भीम दुर्योधनयोः गदायुद्धपरीक्षा ॥ ४ ॥

वैशम्पायनः—

[1]कृतास्त्रान् धार्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत ।
दृष्ट्वा द्रोणोऽब्रवीद्वाक्यं धृतराष्ट्रं जनेश्वरम् ॥ १

कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
गाङ्गेयस्य च सान्निध्ये व्यासस्य विदुरस्य च ॥ २

[2]राजन् संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम ।
[3]ते दर्शयेयुस्त्वां शिक्षां राजन्ननुमते तव ॥ ३

ततोऽब्रवीन्महाराजः प्रहृष्टेनान्तरात्मना ॥ ३॥

धृतराष्ट्रः—

भारद्वाज महत्कर्म कृतं द्विजवर त्वया ॥ ४

यदाऽनुमन्यसे कालं यस्मिन् देशे यथा यथा ।
तथा[4]तथा विधानाय स्वयमाज्ञापयस्व माम् ॥ ५

---

1. क-ख-ग—तांस्तु सर्वास्त्रकुशलान् सर्वशस्त्रविशारदान् ।
2. क-ख-ग—त्रयाणामपि लोकानां प्रजापतिमिव स्थितम् ।
[अधिकः पाठः]
3. क-ख-ग—दर्शयिष्यन्ति शस्त्राणि तद्विद्वाननुमन्यताम् ।
4. क-ख-ग—त्वयि तथा यत्त्वं समाज्ञापय चैव माम् ।

स्पृहयाम्यद्य निर्वेदात् पुरुषाणां सचक्षुषाम् ।
अस्महेतोस्समायुक्तान् ये मे द्रक्ष्यन्ति पुत्रकान् ॥ ६

सत्कार्यः क्षत्त आचार्यो ब्रवीति क्रुरु तत्तथा ।
न हीदृशं प्रियं मेऽद्य भविता धर्मवत्सल ॥ ७

वैशम्पायनः—

ततो राजानमामन्त्र्य विदुरानुगतो बहिः ।
भारद्वाजो महाप्राज्ञो ज्ञापयामास मेदिनीम् ॥ ८

समामवृक्षां निर्गुल्माम् उदक्प्रवणसंस्थिताम् ॥ ८॥
तस्यां भूमौ बलिं चक्रे तिथिनक्षत्रपूजिते ॥ ९

अवघुष्टं पुरे चापि तदर्थं भरतर्षभ ।
रङ्गभूमिं [1]सुविहितां शास्त्रदृष्टामकारयत् ॥ १०

प्रेक्षागारं सुविहितं चक्रुस्तत्र च शिल्पिनः ।
राज्ञां सर्वायुधोपेतं स्त्रीणां चैव नरर्षभ ॥ ११

मञ्चान् स्म कारयामासुर् यत्र जानपदा जनाः ।
सचिवाश्च पुनर्मञ्चान् कारयामासुरुच्छ्रितान् ॥ १२

तस्मिंस्ततोऽहनि प्राप्ते राजा ससचिवस्तदा ।
सान्तःपुरस्सहामात्यो व्यासस्यानुमते तदा ॥ १३

भीष्मं प्रमुखतः कृत्वा कृपं चाचार्यसत्तमम् ।

1. क-ख-ग—सुविपुलामकरोद्दर्शनेप्सया ।

बाह्लीकं सोमदत्तं च भूरिश्रवसमेव च ॥ १४

कुरूनन्यांश्च सचिवान् आदाय नगराद्बहिः ।
रङ्गभूमिं समासाद्य ब्राह्मणैस्सहितो नृपः ॥ १५

मुक्ताजालपरिक्षिप्तं वैदूर्यमणिभूषितम् ।
शातकुम्भमयं दिव्यं प्रेक्षागारमुपारुहत् ॥ १६

गान्धारी च महाभागा कुन्ती च जयतां वर ।
स्त्रियश्च सर्वा या [1]राज्ञस् तासां च परिचारकाः ॥ १७

हर्षादारुरुहुः कान्तं मेरुं देवस्त्रियो यथा ।
ब्राह्मणक्षत्रविट्च्छूद्रं सर्वं तत्र समागतम् ॥ १८

[2]दर्शनेप्सुः समभ्यागात् कुमाराणां कृतास्त्रताम् ॥ १८॥

प्रवादितैश्च वादित्रैर् युतः कोलाहलेन च ।
महार्णव इव क्षुब्धः समाजस्सोऽभवत्तदा ॥ १९॥

ततश्शुक्लाम्बरधरश् शुक्लयज्ञोपवीतवान् ।
शुक्लकेशस्सितश्मश्रुश् शुक्लमाल्यानुलेपनः ॥ २०॥

रङ्गमध्यं तदाचार्यः सपुत्रस्स विवेश ह ॥ २१

नभो जलधरै[3]र्वीतं साङ्गारक इवांशुमान् ।
[4]व्यासस्यानुमते चक्रे बलिं बलवतां वरः ॥ २२

---

1. क-ख-ग—राज्ञां तेषामन्तःपुराणि च ।
2. क-ख-ग—क्षणेनैव तथा तत्र दर्शनेप्सुर्जगाम ह ।
3. क-ख-ग—हीनं 4. क-घ-ग—स तथा समये चक्रे बलं

ब्राह्मणांश्चापि शास्त्रज्ञान् वाचयामास मङ्गलैः ॥ २२॥

सुवर्णमणिरत्नानि वस्त्राणि विविधानि च ।
प्रददौ दक्षिणां राजा द्रोणस्य च कृपस्य च ॥ २३॥

अथ पुण्याहघोषस्य महतस्समनन्तरम् ।
[1]विविशुर्विविधं गृह्य शस्त्रोपकरणं नृपाः ॥ २४॥

ततो बद्धतनुत्राणा बद्धकक्ष्या महाबलाः ।
बद्धतूणास्सधनुषो विविशुर्भरतर्षभाः ॥ २५॥

[2]अनुज्येष्ठं च ते तत्र युधिष्ठिरपुरोगमाः ।
रङ्गमध्ये स्थितं द्रोणम् अभिवाद्य नरर्षभाः ॥ २६॥

पूजां चक्रुर्यथान्यायं द्रोणस्य च कृपस्य च ॥ २७

आशीर्भिश्च प्रयुक्ताभिस् सर्वे संहृष्टमानसाः ।
अभिवाद्य पुनश्शस्त्रान् बलिपुष्पैस्समन्वितान् ॥ २८

रक्तचन्दनसंमिश्रैस् स्वयमर्चन्त कौरवाः ॥ २८॥

रक्तचन्दनदिग्धाश्च रक्तमाल्यानुधारिणः ।
सर्वे रक्तपताकाश्च सर्वे रक्तान्तलोचनाः ॥ २९॥

द्रोणेन समनुज्ञाता गृह्य शस्त्रं परन्तपाः ।
धनूंषि पूर्वं संगृह्य तत्पताकाश्चनभूषिताः ॥ ३०॥

1. क-ख-ग—गृहीत्वोपाविशन् सर्वे रणोपकरणं नराः ।
2. क-ख-ग—यथा ज्येष्ठक्रमं तत्र

सज्यानि विविधाकारैश् शरैस्सन्धाय कौरवाः ।
ज्याघोषं तलघोषं च कृत्वा भूतान्यपूजयन् ॥ ३१॥
चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतम् ॥ ३२
केषांचित्तरुमूलेषु शरा निपतिता नृप ।
केषांचित् पुष्पमुकुटे निपतन्ति स्म सायकाः ॥ ३३
केचिल्लक्ष्याणि विविधैर् बाणैराहितलक्षणैः ।
[1]बिभिदुर्लाघवोत्सृष्टैर् गुरूणि च लघूनि च ॥ ३४
केचिच्छराक्षेपभयाच् छिरांस्यवननामिरे ।
मनुजा धृष्टमपरे वीक्षाञ्चक्रुस्सविस्मयाः ॥ ३५
ते स्म लक्ष्याणि बिभिदुर् बाणैर्नामाङ्कशोभितैः ।
विविधैर्लाघवोत्सृष्टैर् उह्यन्तो वाजिभिर्द्रुतम् ॥ ३६
तत्कुमारबलं तत्र गृहीतशरकार्मुकम् ।
गन्धर्वनगराकारं प्रेक्षका विस्मिता भवन् ॥ ३७
सहसा चुक्रुशुस्तत्र शतशोऽथ सहस्रशः ।
विस्मयोत्फुल्लनयनाः प्रेक्षकास्साधु साध्विति ॥ ३८
कृत्वा धनुषि ते मार्गान् रथचर्यासु चासकृत् ।
गजपृष्ठेऽश्वपृष्ठे च नियुद्धे च महाबलाः ॥ ३९
गृहीतखड्गचर्माणस् ततो भूयः प्रहारिणः ।

1. क-ख-ग—विव्यधुः

शस्त्रमार्गान् यथोद्दिष्टांश् चेरुस्सर्वासु भूमिषु ॥ ४०

लाघवं सौष्ठवं शोभां स्थिरत्वं दृढमुष्टिताम् ।
ददृशुस्तत्र सर्वेषां प्रयोगं खड्गचर्मणाम् ॥ ४१

अथ तौ नित्यसंक्रुद्धौ सुयोधनवृकोदरौ ।
अवतीर्णौ गदाहस्तौ सद्विशृङ्गाविवाचलौ ॥ ४२

[1]क्रूरप्रेक्षौ महाबाहू पौरुषे पर्यवस्थितौ ।
बृंहन्तौ वाशिताहेतोः समदाविव कुञ्जरौ ॥ ४३

तौ प्रदक्षिणसव्यानि मण्डलानि महाबलौ ।
चेरतु[2]श्चञ्चलगतौ समदाविव कुञ्जरौ ॥ ४४

धृतराष्ट्राय विदुरो गान्धार्यै च महामतिः ।
न्यवेदयत तत्सर्वं कुमाराणां च चेष्टितम् ॥ ४५

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

॥ ७ ॥ संभवपर्वणि द्विसप्ततितमोऽध्यायः3 ॥ ७२ ॥

[अस्मिन्नध्याये ४५ श्लोकाः]

---

1. क-ख-ग-घ—बद्धकक्ष्यौ
2. क-ख-ग—निर्मलगदौ सदर्पाविव गोवृषौ ।
3. क-कोशे-ग—कोशे च एकसप्ततितमोऽध्यायः ।
   ख-कोशे-घ—कोशेच सप्ततितमोऽध्यायः ।

॥ अष्टाविंशत्यधिकशततमोऽध्यायः ॥

अर्जुनस्य परीक्षा ॥ १ ॥ कर्णस्य रङ्गप्रवेशः ॥ २ ॥

वैशम्पायनः—

[1]कुरुराजे तु रङ्गस्थे भीमे च बलिनां वरे ।
पक्षपातकृतस्नेहस् स द्विधेवाभवज्जनः ॥ १

जय हे कुरुराजेति जय हे भीम इत्युत ।
पुरुषाणां सुविपुलाः प्रणादास्सहसोत्थिताः ॥ २

ततः क्षुब्धार्णवसमं रङ्गमालोक्य बुद्धिमान् ।
भारद्वाजः प्रियं पुत्रम् अश्वत्थामानमब्रवीत् ॥ ३

द्रोणः—

वारयैतौ महावीर्यौ कृतयोग्यावुभावपि ।
मा भूद्रङ्गप्रकोपोऽयं भीमदुर्योधनोद्भवः ॥ ४

वैशम्पायनः—

तत उत्थाय वेगेन अश्वत्थामा न्यवारयत् ।
गुरोराज्ञा भीम इति गान्धारे गुरुशासनम् ॥ ५

अलं योग्यकृतं वेगम् अलं साहसमित्युत ॥ ५॥

ततस्तावुद्यतगदौ गुरुपुत्रेण वारितौ ।

1. क-ख-ग—दुर्योधने चरत्येवं

युगान्तानिलसंक्षुब्धौ महावेगाविवार्णवौ ॥ ६॥

ततो रङ्गाङ्गणगतो द्रोणो वचनमब्रवीत् ।
निवार्य वादित्रगणं महामेघनिभस्वनम् ॥ ७॥

यो मे पुत्रात् प्रियतरस् सर्वास्त्रविदुषां वरः ।
ऐन्द्रिरिन्द्रानुजसमस् स पार्थो दृश्यतामिति ॥ ८॥

आचार्यवचनात् सोऽथ कृतस्वस्त्ययनो युवा ।
बद्धगोधाङ्गुलित्राणः पूर्णतूणस्सकार्मुकः ॥ ९॥

काञ्चनं कवचं बिभ्रत् प्रत्यदृश्यत फल्गुनः ।
एकस्सेन्द्रायुधतडित् ससन्ध्य इव तोयदः ॥ १०॥

ततस्सर्वस्य रङ्गस्य समुत्पिञ्जलकोऽभवत् ।
वादित्राण्यप्यवाद्यन्त सशङ्खानि समन्ततः ॥ ११॥

प्रेक्षकाः—

एष कुन्तीसुतश्श्रीमान् एष पाण्डवमध्यमः ।
एष पुत्रो महेन्द्रस्य कुरूणामेष रक्षिता ॥ १२॥

एषोऽस्त्रविदुषां श्रेष्ठ एष धर्मभृतां वरः ।
एष शील[1]वतां चापि शीलरत्नाकरोऽर्जुनः ॥ १३॥

---

1. क-ख-ग—वतामग्र्य एष ज्ञानवतां वरः ।
घ—वतां शील गुणरत्नाकरोऽर्जुनः ।

1वैशम्पायनः—

इत्येवमतुला वाचश् शृण्वन्त्याः प्रेक्षकेरिताः ।
कुन्त्याः प्रस्रवसंमिश्रैर् अस्रैः क्लिन्नमुरोऽभवत् ॥ १४॥

तेन शब्देन महता पूर्णश्रुतिरथाब्रवीत् ।
धृतराष्ट्रो नरश्रेष्ठो विदुरं हृष्टमानसः ॥ १५॥

धृतराष्ट्रः—

क्षत्तः क्षुब्धार्णवसमः किमेष सुमहास्वनः ।
सहसैवोत्थितो रङ्गे भिन्दन्निव नभस्तलम् ॥ १६॥

विदुरः—

एष पार्थो महाबाहुः कौन्तेयः पाण्डुनन्दनः ।
2अवतीर्णस्सकवचस् तत्रैष जननिस्वनः ॥ १७॥

धृतराष्ट्रः—

धन्योऽस्म्यनुगृहीतोऽस्मि रक्षितोऽस्मि महामते ।
पृथारणिंसमुद्भूतैस् त्रिभिः पाण्डववह्निभिः ॥ १८॥

3वैशंपायनः—

तस्मिन् प्रमुदिते रङ्गे कथंचित्पर्यवस्थिते ।

---

1. क-ख-ग—एष कंसविमर्दस्य साक्षात्प्राणसमस्सखा ।
एष यत्प्रतिजानाति तस्य पारं गमिष्यति ॥ [अधिकः पाठः]
2. घ—विद्याबलं दर्शयिष्यन्नवतीर्णः कलानिधिः । [अधिकः पाठः]
3. घ—इत्थमन्तस्तपन् राजन् हृदि मात्सर्यवह्निना ।
बहिर्मधुरया वाचा पृथापुत्रानतोषयत् ॥ [अधिकः पाठः]

दर्शयामास बीभत्सुर् आचार्यादस्त्रलाघवम् ॥ १९॥

आग्नेयेनासृजद्वह्निं वारुणेनासृजत् पयः ।
वायव्यादसृजद्वायुं पर्जन्यादसृजद्घनान् ॥ २०॥

भौमेन प्रासृजद्भूमिं पार्वतेनासृजद्गिरिम् ।
अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥ २१॥

क्षणात् प्रांशुः क्षणाद्भ्रस्वः क्षणाच्च रथधूर्गतः ।
क्षणेन रथमध्यस्थः क्षणेनावतरन्महीम् ॥ २२॥

सुकुमारश्च शूरश्च गुरुश्चापि गुरुप्रियः ।
सौष्ठवेन हि संयुक्तः सोऽविध्यद्विविधैश्शरैः ॥ २३॥

भ्रमतश्च वराहस्य वाहस्य प्रमुखे स्थितः ।
[1]पञ्च बाणान् नसंयुक्तान् स मुमोचैकबान्धवान् ॥ २४॥

गव्ये विषाणकोशे च [2]वालरज्ज्वावलम्बिते ।
निचखान महावीरस् सायकानेकविंशतिम् ॥ २५॥

इत्येवमादि सुमहत् खड्गे धनुषि चाभवत् ॥ २६

गदायां चास्त्रकुशलो दर्शकानां प्रदर्शयन् ।
चक्रे तोमरपाशानां भिण्डिपालपरश्वधान् ॥ २७

अन्येषां चापि शिक्षाणां दर्शयामास लाघवम् ॥ २७॥

---

1. घ—भूताश्चे भूवराहाणां सिह्यर्क्षकपिसंमुखान् । [अधिकः पाठः]
2. क-ग—काकस्य च मुखे समम् । ख—सिंहस्य च मुखे समम् ।

ततस्समाप्तभूयिष्ठे तस्मिन् कर्मणि भारत ।
महाभूते समाजे च वादित्रस्य च निस्वने ॥ २८॥

द्वारदेशात् समुद्भूतो माहात्म्यबलसूचकः ।
वज्रनिष्पेषसदृशश् शुश्रुवे भूरिनिस्वनः ॥ २९॥

शीर्यन्ते किं नु गिरयः किंस्विद्भूमिर्विदीर्यते ।
किंस्विदापूर्यते व्योम जलभारस्वनैर्घनैः ॥ ३०॥

रङ्गस्यैवं मतिरभूत् क्षणेन वसुधाधिप ।
द्वारं चाभिमुखास्सर्वे बभूवुः प्रेक्षकास्तदा ॥ ३१॥

पञ्चभिर्भ्रातृभिः पार्थैर् द्रोणः परिवृतो बभौ ।
पञ्चतारेण संयुक्तस् सावित्रेणेव चन्द्रमाः ॥ ३२॥

अश्वत्थाम्ना च सहितं भ्रातॄणां शतमूर्जितम् ।
दुर्योधनममित्रघ्नम् उत्थितं पर्यवारयत् ॥ ३३॥

स तैस्तदा भ्रातृभिरुद्यतायुधैर्
वृतो गदापाणिरवस्थितो बभौ ।
स्थितस्तदा दानवसंक्षये पुरा
पुरन्दरो देवगणैरिवावृतः ॥ ३४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥
॥ ७ ॥ संभवपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
[अस्मिन्नध्याये ३४॥ श्लोकाः]

॥ एकोनत्रिंशदधिकशततमोऽध्यायः ॥

कर्णस्य परीक्षा ॥ १ ॥ कर्णार्जुनयोर्युद्धप्रसङ्गः ॥ २ ॥ कृपेण कर्णस्याधिक्षेपः, कर्णस्य दुर्योधनेन राज्याभिषेचनं च ॥ ३ ॥

वैशम्पायनः—

एतस्मिन्नेव काले तु तस्मिञ्जनसमागमे ।
दत्तावकाशः पुरुषैर् विस्मयोत्फुल्ललोचनैः ॥ १

[1]सिंहर्षभगजेन्द्राणां तुल्यवीर्यपराक्रमः ।
दीप्तिकान्तिद्युतिगुणैस् सूर्येन्दुज्वलनोपमः ॥ २

प्रांशुः कनकतालाभः सिंहसंहननो युवा ।
असङ्ख्येयगुणश्रीमान् भास्करस्यात्मसंभवः ॥ ३

संनिरीक्ष्य महाबाहुस् सर्वतो रङ्गमण्डपम् ।
प्रणामं द्रोणकृपयोर् नामपूर्वमथाकरोत् ॥ ४

स समाजे जनस्सर्वो निश्चलस्थिरलोचनः ।
कोऽयमित्यागतक्षोभः कौतूहलपरोऽभवत् ॥ ५

विवेश रङ्गं विस्तीर्णं कर्णः परपुरञ्जयः ॥ ५॥

1. क-ख-ग-घ—विवेश रङ्गं विस्तीर्णं कर्णः परपुरञ्जयः ।
सहजं कवचं बिभ्रत कुण्डलोद्योतिताननः ॥
सधनुर्बद्धनिस्त्रिंशः साक्षादिव दिवाकरः ।
कन्यागर्भः पृथुयशाः पृथायाः पृथुलोचन ॥
तीक्ष्णांशोर्भास्करस्यांशः कर्णोऽरिगणनाशनः ॥

वैशंपायनः—

ततो द्रोणाभ्यनुज्ञातः पार्थः परपुरञ्जयः ।
भ्रातृभिस्त्वरया श्लिष्टो रणायोपजगाम तम् ॥ २०

ततो दुर्योधनेनापि सभ्रात्रा समरोद्यतः ।
परिष्वक्तस्थितः कर्णः प्रगृह्य सशरं धनुः ॥ २१

[1]ततस्सविद्युत्स्तनितैः सेन्द्रायुधपुरोजलैः ।
आवृतं गगनं मेघैर् बलाकापङ्क्तिभासिभिः ॥ २२

ततस्स्नेहाद्धरिहयं दृष्ट्वा रङ्गावलोकनम् ।
भास्करोऽप्यनयन्नाशं समीपोपगतान् घनान् ॥ २३

मेघच्छायोपगूढश्च ततोऽदृश्यत पाण्डवः ।
सूर्यातपपरिष्वक्तः कर्णोऽपि समदृश्यत ॥ २४

धार्तराष्ट्रा यतः कर्णस् तस्मिन् देशे व्यवस्थिताः ।
भारद्वाजः कृपो भीष्मो यतः पार्थस्ततोऽभवन् ॥ २५

द्विधा रङ्गस्समभवत् स्त्रीणां द्वैधमजायत ।

पूर्वतोऽनुवृत्तम्—

ब्राह्मणा बहुशो वैश्या जात्याचारसुनिर्मलाः ।
आहूता एव गच्छन्ति कस्त्वं तेषु कुतो भवान् ॥

वैशम्पायनः—

किरीटिनैवमुक्तस्स कर्णो रोषपरिप्लुतः ।
जातिसंकीर्तनाद् भङ्गात् क्षुब्धार्णव इवावदत् ॥

कर्णः—

1. घ—कर्णोऽप्यभ्युद्ययात् पार्थम् अर्को मेरुरिवापरः । [अधिकः पाठः]

कुन्तिभोजसुता मोहं विज्ञातार्था जगाम ह ॥ २६
तां तथा मोहमापन्नां विदुरस्सर्वधर्मवित् ।
[1]कुन्तीमाश्वासयामास प्रोक्ष्य चन्दनवारिभिः ॥ २७
ततः प्रत्यागतप्राणा तावुभावपि दंशितौ ।
[2]पुत्रौ दृष्ट्वा सुसंतप्ता नान्वपद्यत किंचन ॥ २८
तावुद्यतमहाचापौ कृपश्शारद्वतोऽब्रवीत् ॥ २८॥

कृपः—

द्वन्द्वयुद्धसमाचारे कुशलस्सर्वधर्मवित् ।
अयं पृथायास्तनयः कनीयान् पाण्डुनन्दनः ॥ २९॥
कौरवो भवता सार्धं द्वन्द्वयुद्धं करिष्यति ॥ ३०
त्वमप्येवं महाबाहो मातरं पितरं कुलम् ।
कथयस्व नरेन्द्राणां किं च त्वं भूषयेः कुलम् ॥ ३१
ततो विदित्वा पार्थश्च प्रतियोत्स्यति वा न वा ।
[3]वृथाकुलसमाचारैर् न युध्यन्ते नृपात्मजाः ॥ ३२

वैशम्पायनः—

एवमुक्तस्य कर्णस्य व्रीडावनतमाननम्।

---

1. घ—सर्वज्ञो विदुरस्तत्र शनैरेत्य पृथां शुभाम् ।
अज्ञातं जनसङ्घैस्तां समाश्वासयदच्युतः ॥
नेत्रभ्रूसंज्ञया चैव व्यङ्ग्योक्तिवचनैरपि ।
आश्वासयामास शनै श्चन्दनोदकसेचनैः ॥ [अधिकः पाठः]

2. क-ख-ग—पुत्रावज्ञाततत्त्वार्थौ व्रीलिता सा त्ववैक्षत ।
[अधिकः पाठः]

3. घ—आत्मतुल्यमतुल्यं वा प्रतियोत्स्यति वा न वा । [अधिकः पाठः]

बभौ वर्षाम्बुदच्छिन्नं पद्ममागलितं यथा ॥ ३३

दुर्योधनः—

आचार्य त्रिविधा योनी राज्ञां धर्मविनिश्चये ।
सत्कुलीनश्च शूरश्च यश्च सेनां विकर्षति ॥ ३४

अद्भ्योऽग्निर्ब्रह्मणः क्षत्रम् अश्मनो लोहमुत्थितम् ।
तेषां सर्वगतं तेजः स्वासु योनिषु शाम्यति ॥ ३५

अयं हि फल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति ।
तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ ३६

वैशंपायनः—

ततो राजानमामन्त्र्य गाङ्गेयं च पितामहम् ।
अभिषेकस्य संभारान् समानीय द्विजातिभिः ॥ ३७

गोसहस्रायुतं दत्त्वा युक्तानां पुण्यकर्मणाम् ।
अर्होऽयमङ्गराज्यस्य इति वाच्य द्विजातिभिः ॥ ३८

ततस्तस्मिन् क्षणे कर्णस् सलाजकुसुमैर्घटैः ।
काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्द्विजातिभिः ॥ ३९

अभिषिक्तोऽङ्गराज्ये स्म श्रिया युक्तो महाबलः । ३९॥
स मौलिहारकेयूरैस् सहस्राभरणाङ्गदैः ।
राजलिङ्गैस्तथाऽन्यैश्च भूषितो भूषणैश्शुभैः ॥ ४०॥
सच्छत्रवालव्यजनो जयशब्दोत्तरेण च ।

सभाज्यमानो विप्रैश्च प्रदत्त्वा ह्यमितं वसु ॥ ४१॥
उवाच कौरवं राजा राज्ञां मध्ये वृषस्तदा ॥ ४२

कर्णः—

अस्य राज्यप्रदानस्य सदृशं किं ददामि ते ।
तद् ब्रूहि राजशार्दूल कर्तव्यं हि तवानघ ॥ ४३

दुर्योधनः—

अत्यन्तं सख्यमिच्छामि त्वया सह महाबल ॥ ४३॥

वैशम्पायनः—

एवमुक्तस्ततः कर्णस् तथेति प्रत्यभाषत ।
[1]हर्षाच्चोभौ परिष्वज्य परां मुदमवापतुः ॥ ४४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि एकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥
॥ ७ ॥ संभवपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
[अस्मिन्नध्याये ४४॥ श्लोकाः]

॥ त्रिंशदधिकशततमोऽध्यायः ॥

कर्णपितुरधिरथस्य रङ्गप्रवेशः ॥ १ ॥ भीमेन कर्णस्याधिक्षेपः ॥ २ ॥ सर्वेषां रङ्गान्निष्क्रमणम् ॥ ३ ॥

वैशंपायनः—

ततस्स्रस्तोत्तरपटस् सप्रस्वेदस्सवेपथुः ।
विवेशाधिरथो [2]राजन् यष्टिप्राणस्खलन्निव ॥ १

1. क-ख-ग-घ—अङ्गराज्यस्य युक्तांश्च दत्त्वा राज्यपरिच्छदान् ।
2. क-ख-ग-घ—रङ्गं [अधिकः पाठः]

तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।
कर्णोऽभिषेकार्द्रशिराश् शिरसा तमवन्दत ॥ २

ततः पादाववच्छाद्य पटान्तेन ससंभ्रमम् ।
पुत्रेति परिपूर्णार्थम् अब्रवीद्रथसारथिम् ॥ ३

परिष्वज्य च तस्याङ्गं मूर्धानममरद्युतेः ।
अङ्गराज्याभिषेकार्द्रम् अश्रुभिः पर्यषिञ्चत ॥ ४

तं दृष्ट्वा सूतपुत्रोऽयम् इति निश्चित्य पाण्डवः ।
भीमसेनस्तदा वाक्यं प्रहसन्निदमब्रवीत् ॥ ५

भीमः—

न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम् ।
कुलस्य सदृशः कर्ण प्रतोदोऽयं प्रगृह्यताम् ॥ ६

अङ्गराज्यं च नार्हस्त्वम् उपभोक्तुं नराधम ।
[1]श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ॥ ७

वैशम्पायनः—

एवमुक्तस्ततः कर्णः किंचित् प्रस्फुरिताधरः ।
गगनस्थं विनिश्वस्य दिवाकरमुदैक्षत ॥ ८

---

1. घ—खल्विदानीं मया ज्ञातः सूतोदरसमुद्भवः ।
अङ्गराज्यं न पर्याप्तं भवतः कर्ण केवलम् ॥
त्रैलोक्यस्य भवान् प्राप्तः त्वत्समो नास्ति भूमिपः ।
गच्छ पार्थं न योद्धव्यं शुना सह कदा चन ॥
साकं शुना विवदतो ध्रुवं भवति लाघवम् ॥ [अधिकः पाठः]

ततो दुर्योधनः कोपात् उत्पपात महाबलः ।
भ्रातृपक्षवनात् तस्मान्मदोत्कट इव द्विपः ॥ ९
सोऽब्रवीद्भीमकर्माणं भीमसेन[1]मिदं वचः ॥ ९॥

दुर्योधनः—

वृकोदर न युक्तं ते वचनं वक्तुमीदृशम् ।
क्षत्रियाणां बलं ज्येष्ठं योद्धव्यं क्षत्रबन्धुना ॥ १०॥
[2]शूराणां च नदीनां च प्रभवो दुर्विभावनः ।
सलिलादुत्थितो वह्निर् येन दग्धं चराचरम् ॥ ११॥
दधीचस्यास्थिभिर्वज्रं कृतं दानवसूदनम् ॥ १२
आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि ।
[3]श्रूयते भगवान् देवः सर्वगुह्यमयो गुहः ॥ १३

---

1. क-ख-ग—मवस्थितम् ।
2. घ—क्षतत्राणात् क्षत्रियस्य क्षत्रत्वं परिकीर्तितम् ॥
भीमः—
कोन्वयं क्षत्रियः कर्णः सूतजः क्षत्रियो नु किम् ।
ब्राह्मण्यां क्षत्रियाज्जातो रथकार इति स्मृतः ॥
नावा नदीसन्तरणं रथकारस्यमेव च ।
निकृष्टजाते स्सूतस्य अभिषेकः कथं भवेत् ॥
आदिप्रभृति यत्क्षत्रं तद्रामेण विनाशितम् ।
क्षत्रियाया द्विजश्रेष्ठैः क्षत्रमुत्पादितं पुनः ॥
कृतस्य सूतजातेस्तु कथं क्षत्रत्वमुद्भवौ ।
शुनः पुच्छो यदा यूपस् तदाऽसौ राजतामियात् ॥
दुर्योधनः—
[अधिकः पाठः]
3. घ—शरकाननसम्भूतः किं नासौ पूजितोऽभवत् । [अधिकः पाठः]

[1]क्षत्रियासु च ये जाता ब्राह्मणास्तव विश्रुताः ।
[2]आचार्यः कलशाज्जातो शरस्तम्बाद् गुरुः कृपः ॥ १४
भवतां च यथा जन्म तदप्यागमितं नरैः ॥ १४॥
सकुण्डलं सकवचं दिव्यलक्षणलक्षितम् ।
कथमादित्यसङ्काशं सूतोऽमुं जनयिष्यति ॥ १५॥
एवं क्षत्रगुणैर्युक्तं शूरं समितिशोभनम् ।
कथमादित्यसङ्काशं मृगी व्याघ्रं प्रसूयते ॥ १६॥
पृथिवीराज्यमर्होऽयं नाङ्गराज्यं नरेश्वरः ।
स्वबाहुबलवीर्येण मया चाज्ञानुवर्तिना ॥ १७॥
यस्य वा मनुजस्येदं न क्षान्तं मद्विचेष्टितम् ।
रथमारुह्य पद्भ्यां वा विनामयतु कार्मुकम् ॥ १८॥

वैशम्पायनः—

[3]ततस्सर्वस्य रङ्गस्य हाहाकारो महानभूत् ।
साधुवादानुसंबद्धस् सूर्यश्चास्तमुपागमत् ॥ १९॥
ततो दुर्योधनः कर्णम् आलम्ब्याग्रकरे नृपः ।

---

1. क-ख-ग—क्षत्रिया ब्राह्मणेभ्यश्च भाविता इति विश्रुताः ।
2. क-ख-ग—जातानाहुः क्षत्रियासु ब्राह्मणैः क्षत्रसंक्षये ।
3. घ—श्रुत्वैतद्भीमसेनस्य पार्थस्य च महात्मनः । [अधिकः पाठः]
हृदि कोपस्समजनि धर्मराजोऽब्रवीदिदम् ॥
धर्मराजः—
राज्यस्य कर्ता गाङ्गेयो धृतराष्ट्रः प्रतापवान् ।
तस्मिंस्तस्मिन् स्थिते चैव दत्तं राज्यमनर्हते ॥
राजा भवेत् सूतसुतः राज्ये कस्मिन सुयोधन ।
मातापित्रोः पूर्वमेव किं त्वं जातो वदाधम ॥

दीपिकाभिः कृतालोकस् तस्माद्द्रङ्गाद्विनिर्ययौ ॥ २०॥
पाण्डवाश्च सहद्रोणाः सकृपा भरतर्षभाः ।
भीष्मेण सहितास्सर्वे ययुस्स्वं स्वं निवेशनम् ॥ २१॥
अर्जुनेति जनः कश्चित् कश्चित् कर्णेति भारत ।
कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थितास्तदा ॥ २२॥
कुन्त्यांश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितम् ।
पुत्रमङ्केश्वरं स्नेहाच् छन्ना प्रीतिरवर्धत ॥ २३॥
दुर्योधनस्यापि तथा कर्णमासाद्य पार्थिव ।
भयमर्जुनसंजातं क्षिप्रमन्तरधीयत ॥ २४॥

स चापि धीरः कृतशस्त्रविश्रमः
परेण साम्नाऽभ्यवदत् सुयोधनम् ।
युधिष्ठिरस्याप्यभवत् सदा मतिर्
न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ ॥ २५॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥
॥ ७ ॥ संभवपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
[अस्मिन्नध्याये २५॥ श्लोकाः]

पूर्वतोऽनुवृत्तम्—
श्रृण्वर्जुन वचो मह्यं भीमसेन भवाञ्च्छृणु ।
स्थिते भीष्मे किमस्माकं धृतराष्ट्रे स्थिते सति ॥
वैशम्पायनः—
ततः सर्वस्य सैन्यस्य हा— [अधिकः पाठः]

॥ एकत्रिंशदधिकशततमोऽध्यायः ॥

गुरुदक्षिणात्वेन जीवतो द्रुपदस्य ग्रहणे द्रोणेनाज्ञापिते तदर्थं तेन सह सर्वशिष्याणां पाञ्चालपुरगमनम् ॥ १ ॥ द्रुपदग्रहणाय पाण्डववर्जं गतानां कौरवाणां तेन पराजयः ॥ २ ॥ तदनन्तरं गतेषु अर्जुनेन द्रुपदग्रहणम् ॥ ३ ॥ जीवग्राहं गृहीत्वा भीमार्जुनाभ्यां समर्पितेन द्रुपदेन द्रोणस्य संवादः ॥ ४ ॥ द्रोणेनार्धराज्यापहारेण मुक्तस्य द्रुपदस्य पुत्रोत्पादनार्थं प्रयत्नः ॥ ५ ॥

1वैशम्पायनः—

पाण्डवान् धार्तराष्ट्रांश्च कृतास्त्रान् प्रसमीक्ष्य तु ।

---

1. घ—जनमेजयः—

कृतवान् वैरनिर्बन्धः किमर्थं कर्णपार्थयोः ।
कौ जातौ पूर्वमेतौ तु के ते दुर्योधनादयः ॥
पाण्डवाश्चैव के पूर्वं वद मे द्विजसत्तम ॥

वैशंपायनः—

शृणु राजन् पुरावृत्तम् आदौ देवयुगे पुरा ।
परस्य ब्रह्मणो जातौ सच्चिदानन्दरूपिणः ॥
मायाप्रकृतिसंयोगाज् जगत्सृष्ट्यर्थमेव हि ।
कल्पेषु ब्रह्मणः कल्पे मेघवाहनसंज्ञिके ॥
कथितं वामनेनेदं नारदाय महात्मने ।
ईश्वरः परमेष्ठी च जातौ पञ्चमुखावुभौ ॥
? तावावा शिदहङ्कारः शिवो ब्रह्माणमब्रवीत् ।
को भवान् पञ्चवदनोः मम प्रतिनिधिः किमु ॥

ब्रह्मा—

अहमेवास्य जगतः सृष्ट्यादेः कारणं महत् ।
स्रष्टा पालयिता हर्ता जगतोऽस्याहमेव च ॥

वैशम्पायनः—

त्वं कः पञ्चाननो ब्रूहि विधिनेत्थं प्रकोपितः ।
ईश्वरोऽथ रुषाऽभ्येत्य ब्रह्मणो मध्यमं शिरः ॥
कनिष्ठाङ्गुलिजेनैव नखेन समकृन्तयत् ।
तच्छिरो ब्रह्मणः कृत्तं संसक्तमभवत् करे ॥
तदाप्रभृति लोकेषु कपालीत्युच्यते बुधैः ।
ब्रह्मणस्तच्छिरोदेशात् सहजं कवचं दधत् ॥
कुण्डले सहजे चैव खड्गं चर्म च भारत ।
हिरण्यकवची नाम्ना काश्चित्प्रादुरभून्महान् ॥
संवदन् किं करोमीति परमेष्ठिनमब्रवीत् ।
सोभिद्रुताद्धरं हन्तुं सोऽप्यधावद्धरिं जवात् ॥
कौ युवामागतावत्र मत्समीपं भिया रुषा ।
किमर्थं भवतोर्युद्धमहं वा करवाणि किम् ॥
एनं जहि हरे रौद्रं मां हन्तुं समुपागतम् ।
इत्युक्त्वा हरये भर्गः पूर्ववृत्तान्तमुक्तवान् ॥
हरिर्हरेणैवमुक्तो हरिराह पुनर्हरम् ।
ममेदं दक्षिणांसं त्वं त्रिशूलेन तु द्रुतम् ॥
एवमुक्तस्त्रिशूलेन हरेरंसं जघान ह ।
त्रिभ्यो व्रणेभ्यो रक्तं तत्त्रिस्रो धारा बभूविरे ॥
ऊर्ध्वस्रोतोऽभवज्ज्योतिः मध्यमात्पुरुषोऽजनि ।
अधस्स्रोताच्छाकजातं सर्वप्राणभृतां हितम् ॥
सहस्रकवची नाम्ना विष्णुरक्तोद्भवो नरः ।
कोदण्डं च दधद् बाणां स्तस्माद्दीर्घप्रमाणतः ॥
किं करोमीति ते विष्णो वदन्तं केशवोऽब्रवीत् ।
रुद्र द्रोहिणमेनं त्वं जहि मेऽनुग्रहाद्बलात् ॥
हरिणाऽभिहितस्यास्य तस्य चैवोभयोरभूत् ।
दिव्यं वर्षशतं पूर्णं युद्धमासीन्नृपोत्तम ॥
जयेच्छोरेकाहमिव दिवारात्रं निरन्तरम् ॥
दिव्ये वर्षशतेऽतीते रोषेण महता ऽन्वितः ॥

गुर्वर्थं दक्षिणां काले प्राप्तेऽमन्यत वै गुरुः ॥ १
कृतास्त्रांश्च ततश्शिष्यांश् चोदयामास वै गुरुः ।
अस्त्रशिक्षामनुज्ञातान् गङ्गाद्वारमुपागतान् ॥ २
भारद्वाजस्ततस्तांस्तु सर्वानेवाभ्यभाषत ॥ २॥
इच्छामि दत्तां सहितैर् मह्यं परमदक्षिणाम् ॥ ३
एवमुक्तास्ततस्ते वै शिष्या द्रोणमुपागमन् ।
भगवन् किं प्रयच्छाम आज्ञापयतु नो गुरुः ॥ ४
ततश्शिष्यान् समाहूय आचार्यस्समचोदयत् ।
द्रोणस्सर्वानशेषेण दक्षिणार्थं महीपते ॥ ५

द्रोणः—

पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्धनि ।
पर्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥ ६

पूर्वतोऽनुवृत्तम्—

बलेन विष्णोराविष्टो नरो जग्राह पादयोः ।
भ्रामयित्वा शतगुणमुज्जिक्षेप रिपौ रुषा ॥
रविस्तं प्रतिजग्राह सर्वलोकहिताय च ।
नरश्च प्रेषितस्तेन हरिणा वज्रिणं गतः ॥
हिरण्यकवची भानौ सहस्रकवची हरौ ।
तावेव राजंस्त्रेतायां वालिसुग्रीवसंज्ञकौ ॥
रामाभिधाने च हरौ पुनस्तावेव भूतले ।
कर्णार्जुनाभिधेयौ च हरौ कृष्णे यदोः कुले ॥
इदं कर्णार्जुनौ राजंस्त्रिजन्मकृतशात्रवौ ।
शतं दुर्योधनादीनामविवेकशतं विदुः ॥
विवेकपञ्चमं पार्थ गुह्यमेतन्मयोदितम् ।
कृतन्ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ॥ [अधिकः पाठः]

वैशंपायनः—

तथेत्युक्त्वा तु ते सर्वे रथैस्तूर्णं प्रहारिणः ।
आचार्यधनदानार्थं द्रोणेन सहिता ययुः ॥ ७

[1]ततोऽभिजग्मुः पाञ्चालं क्रोशन्तः कौरवर्षभाः ।
[2]दुर्योधनश्च कर्णश्च युयुत्सुश्च महाबलः ॥ ८
दुःशासनो विकर्णश्च जलसन्धस्सुलोचनः ॥ ८॥
एते चान्ये च बहवः कुमारा बहुविक्रमाः ।
अहंपूर्वमहंपूर्वम् इत्येवं क्षत्रियर्षभः ॥ ९॥
[3]ततो वररथारूढाः कुमारास्सादिभिस्सह ।
प्रविश्य नगरं सर्वे राजमार्गमुपाययुः ॥ १०॥
[4]तस्मिन् काले तु पाञ्चालः श्रुत्वा दृष्ट्वा महद्बलम् ।
भ्रातृभिस्सहितो राजंस् त्वरया निर्ययौ गृहात् ॥ ११॥

---

1. घ—युष्मासु के पूर्वमेव शीघ्रं मेऽभीष्टदक्षिणाम् ।
के मे प्रियतमाश्शिष्याः केभ्यस्तुष्टो भवाम्यहम् ॥
इत्युक्ते गुरुणा राज्ञा कर्णो दुर्योधनस्तदा ॥ [अधिक. पाठः]
2. घ--दुःशासनो युयुत्सुश्च विकर्णश्च महारथः ।
दुर्मुखो दुस्सहश्चैव जलसन्धस्सुलोचनः ॥
3. घ—स्वपराज्ञातसत्त्वाश्च स्वाज्ञातबलपौरुषाः । [अधिकः पाठः]
4. घ—कुत्स्योऽयं महाघोष इति पृष्टे नृपे जगुः ।
कौरवा योद्धुमायान्ति भवता कारणं विना ॥
राधेयप्रमुखा वीरा धार्तराष्ट्रा इति प्रभो ॥
इति कञ्चुकिनस्सर्वे वेत्रहस्ताः पृथक्पृथक् ।
शीघ्रं निर्याहि राजेन्द्र भिन्दन्ति च पुरं महत् ॥
[अधिकः पाठः]

ततस्तु कृतसन्नाहा यज्ञसेनसहोदराः ।
शरवर्षाणि मुञ्चन्तः प्रणेदुस्सर्वतोदिशम् ॥ १२॥

ततो रथेन शुभ्रेण समासाद्य तु कौरवान् ।
यज्ञसेनश्शरान् घोरान् ववर्ष युधि दुर्जयः ॥ १३॥

[1]पूर्वमेव तु संमन्त्र्य पार्थो द्रोणमथाऽब्रवीत् ॥ १४
दर्पोत्सेकः कुमाराणाम् आचार्य द्विजसत्तम ।
[2]एषां पराक्रमस्यान्ते वयं कुर्याम साहसम् ॥ १५
एतैरशक्यः पाञ्चालो ग्रहीतुं रणमूर्धनि ॥ १५॥

एवमुक्त्वा तु कौन्तेयो भ्रातृभिस्सहितोऽनघः ।
अर्धक्रोशे तु नगराद् अतिष्ठद्धरिरेव सः ॥ १६॥

द्रुपदः कौरवान् दृष्ट्वा प्रधावत समन्ततः ।
शरजालेन महता मोहयन् कौरवीं चमूम् ॥ १७॥

तमुद्यन्तं रथेनैकम् आशुकारिणमाहवे ।
अनेकमिव सन्त्रासान्मेनिरे सर्वकौरवाः ॥ १८॥

द्रुपदस्य शरा घोरा विषेरुस्सर्वतोदिशम् ॥ १९॥

---

1. घ—ते पूर्वमेव संमन्त्र्य पाण्डवा जनमेजय ।
मतं यौधिष्ठिरं ज्ञात्वा पार्थो द्रोणमथाब्रवीत् ॥ [अधिकः पाठः]
2. घ—बलावलेपः सुमहान् अविवेकपरस्तदा ।
यद्येभिर्विजये प्राप्ते हर्षो नः परमो भवेत् ॥
यद्येभिस्सह योत्स्याम अस्माकं च जयो यदि ।
जयकीर्तिर्भाजनंस्युः कर्णदुर्योधनादयः ॥ [अधिकः पाठः]

[1]ततश्शङ्खाश्च भेर्यश्च मृदङ्गाश्च सहस्रशः ।
प्रावाद्यन्त महाराज पाञ्चालानां निवेशने ॥ २०
[2]सिंहनादश्च संजज्ञे पाञ्चालानां महात्मनाम् ।
धनुर्ज्यातलशब्दश्च संस्पृशद् गगनं महत् ॥ २१
दुश्शासनो विकर्णश्च सुबाहुर्दीर्घलोचनः ।
दुर्योधनश्च संक्रुद्धश् शरवर्षैरवाकिरन् ॥ २२
सोऽतिविद्धो महेष्वासः पार्षतो युधि दुर्जयः ।
व्यधमत्तान्यनीकानि तत्क्षणादेव भारत ॥ २३
दुर्योधनं विकर्णं च कर्णं चापि महाबलम् ।
नानानृपसुतान् वीरान् सैन्यानि विविधानि च ॥ २४
अलातचक्रवत्सर्वांश् चरन् बाणैरतर्पयत् ॥ २४॥
दुश्शासनं च दशभिर् विकर्णं विंशकैश्शरैः ।
शकुनिं विंशकैस्तीक्ष्णैर् दशभिर्मर्ममभेदिभिः ॥ २५॥
कर्णदुर्योधनौ चोभौ शरैस्सर्वाङ्गसन्धिषु ।
अष्टाविंशतिभिस्सर्वैः पृथक् पृथगरिन्दमः ॥ २६॥
सुबाहुं पञ्चभिर्विद्ध्वा तथाऽन्यान् विविधैश्शरैः ।
विव्याथ सहसा भूयो ननाद बलवत्तरम् ॥ २७॥

1. क-ख-ग—शुश्रुवुस्सिंहनादांश्च पाण्डवास्सुमहाबलाः । [अधिकः पाठः]
2. घ—प्राणांस्तेषां विचिन्वन्तो यमदूता इवाशुगाः । [अधिकः पाठः]

विनद्य कोपात् पाञ्चालस् सर्वशस्त्रभृतां वरः ।
धनूंषि रथयन्त्रं च हयाञ्छत्रध्वजानपि ॥ २८॥
चकर्त सर्वपाञ्चालाः प्रणेदुस्सिंहसर्पवत् ॥ २९
ततस्तु नागरास्सर्वे मुसलैर्यष्टिभिस्तदा ।
अभ्यवर्षन्त कौरव्यान् वर्षमाणा घना इव ॥ ३०
सबालवृद्धाः काम्पिल्याः कौरवानभ्ययुस्तदा ॥ ३०॥
श्रुत्वा तु तुमुलं शब्दं नागराणां महारथाः ।
द्रवन्ति स्म नदन्ति स्म क्रोशतः पाण्डवान् प्रति ॥ ३१॥
पाञ्चालशरभिन्नाङ्गो भयमासाद्य वै वृषः ।
कर्णो रथादवप्लुत्य पलायनपरोऽभवत्[1] ॥ ३२॥
[2]पाण्डवास्तु स्वनं श्रुत्वा आर्तानां रोमहर्षणम् ।
[3]अभिवाद्य ततो द्रोणं रथानारुह्य पाण्डवाः ॥ ३३॥

---

1. घ—पार्थार्जुन महाबाहो पाह्यस्मान्द्रुपदाहतान् ।
पौरैरपि हतान् राजन् धर्मपुत्र तवानुजान् ॥
लगुडैः शर्पिदण्डैश्च लोष्टपाषाणमुष्टिभिः ।
पृष्ठे च ताडितास्सर्वे शरशक्तियष्टितोमरैः ॥
छिन्ना भिन्नतनुत्राणास्सर्वे मर्मसु ताडिताः ।
काम्पिल्यै निर्ययुर्भीताः क्रोशन्तः पाण्डवान् प्रति ॥
कर्णदुर्योधनौ पूर्वं नगरात्तौ विनिर्गतौ ।
सर्वेषु निर्गतेष्वेषु दृष्ट्वा तान् कुरुनन्दनान् ॥ [अधिकः पाठः]

2. क-ख—न पाण्डुपुत्राश्च द्रोणमेक द्रुव वनं ययौ । [अधिकः पाठः]

3. घ—घोरमार्तस्वरं राजन् भीमोऽभूत्प्रीतिमान्भृशम् ।
अर्धराज्यं पुनर्देहि सूतपुत्राय कौरव ।
साहसस्यास्य कर्णस्य भीमः कौरवमब्रवीत् ॥ [अधिकः पाठः]

युधिष्ठिरं निवार्याशु मा युद्धमिति पाण्डव ।
माद्रेयौ चक्ररक्षौ तु फल्गुनस्तु तदाऽकरोत् ॥ ३४॥
सेनाग्रगो भीमसेनस् तदाऽभूद् गदया सह ।
तदा शङ्खध्वनिं कृत्वा भ्रातृभिस्सहितोऽनघः ॥ ३५॥
आयाज्जवेन कौन्तेयो रथघोषेण नादयन् ॥ ३६
पाञ्चालानां ततस्सेनाम् उद्भूतार्णवनिस्स्वनाम् ।
[1]भीमसेनो महाबाहुर् दण्डपाणिरिवान्तकः ॥ ३७
प्रविवेश महासेनां मकरस्सागरं यथा ॥ ३७॥
[2]स्वयमभ्यद्रवद्भीमो नागानीकं गदाधरः ॥ ३८
सुयुद्धकुशलः पार्थो बाहुवीर्येण चातुलः ।
अहनत्कुञ्जरानीकं गदया कालरूपधृक् ॥ ३९

---

1. घ—स्थितामभिमुखं पार्थो युगान्तज्वलनोपमः ।
[अधिकः पाठः]

2. घ—अद्रीणामिव सङ्घातं ज्वलदोषधिदीपितम् ।
विद्युत्स्तनितगम्भीरं मेघवृन्दमिवाम्बरे ॥
पाञ्चालानां गजानीकं पोथयन् गदया बली ।
कुर्वन् भीमो महामार्गं ययावग्रेऽल्पलीलया ॥
तेन मार्गेण पार्थोऽपि कम्पयन्नरिणां बलम् ।
पूरयन् रथघोषेण निघ्नञ् शत्रुबलं शरैः ॥
विस्मापयन्नरीकानि ह्लादयन् सुहृदां मनः ।
पूरयञ्छरजालेन दिशो दश ययौ रणम् ॥
[अधिकः पाठः]

[1]ते गजा गिरिसङ्काशाः क्षरन्तो रुधिरं बहु ।
[2]भीमसेनस्य गदया भिन्नमस्तकपिण्डकाः ॥ ४०
पतन्ति द्विरदा भूमौ वज्रघातादिवाचलाः ॥ ४०॥
[3]गजानश्वान् रथांश्चैव पातयामास पाण्डवः ॥ ४१

---

1. घ—दर्शयन् हस्तकुशलं पाञ्चालान् व्यथमच्छरैः ।
अनिघ्नत् कांश्चन नरान् द्रावयन् भीषयञ्छरैः ॥
रणाजिरे चरन् पार्थः क्रीडन्निव महारथैः ।
यत्र यत्र रणे पार्थो विचचार शरान् किरन् ॥
तत्र तत्र द्रवन्ति स्म पाञ्चालानां महारथाः ।
विचरन्तं वने घोरे सिंहं दृष्ट्वेव वारणाः ॥
पदातिसङ्घाः पार्थेन शरैः पृष्ठेषु ताडिताः ।
प्राद्रवन्तो विरेजुस्ते पर्णानीवाभवं स्तदा ॥
भीमोऽपि गदया मत्तान् क्ष्वेलितास्फोटितस्वनैः ।
महतां सिंहनादेन गजान् विद्रावयद्बली ॥ [अधिक. पाठः]
2. घ—आस्येन पुष्कराग्रेण पलायन्त दिशो दश । [अधिकः पाठः]
3 घ—अश्वाश्च मर्दिता योधैस्समारूढा धनुर्धरैः ।
कण्ठघण्टाव्यनत्कारा निर्ययुः फूत्कारवायवः ॥
वेगरज्ज्वायतानेकवर्णवालप्रकीर्णकाः ।
भयसंत्रस्तसारोहा कशाघातप्रघातिताः ॥
पार्थज्यातलघोषेण भीमभीमरवेण च ।
बाणपातैर्गदाघातैर् द्रवन्तो रेजिरे हयाः ॥
शरत्काले श्वेतपक्षा हंसानामिव पङ्क्तयः ।
सदश्वा सारथियुता युक्तध्वजपताकिनः ॥
नानाचर्मपरीधाना घण्टाकिङ्किणिमालिनः ।
सुवर्णरत्नमालादि सर्वप्रहरणान्विताः ॥
दंशितारूढरथिनः सव्यसाचि शरार्दिताः ॥
भीतयन्त्रप्रतोदाग्रपृथुविद्रुतवाजिनः ।
रथिनां च रथास्सर्वे भेजिरे ते दिशो दश ॥

पदातीन् नागरांश्चैव नावधीदर्जुनाग्रजः ।
गोपाल इव दण्डेन यथा पशुगणान् वने ॥ ४२
चालयन् रथनागाश्वान् संचचाल वृकोदरः ॥ ४२॥
भरद्वाजप्रियं कर्तुम् उद्यतः फल्गुनस्तदा ।
पार्षतं शरजालेन क्षिप्रं प्रच्छाद्य पाण्डवः ॥ ४३॥
हयौघांश्च गजौघांश्च रथौघांश्च समन्ततः ।
पातयन् समरे राजन् युगान्ताग्निरिव ज्वलन् ॥ ४४॥
ततस्ते हन्यमाना वै पाञ्चालास्सृञ्जयास्तथा ।
शरैर्नानाविधैस्तूर्णं पार्थं प्रच्छाद्य सर्वशः ॥ ४५॥
सिंहनादरवान् कृत्वा समयुध्यन्त पाण्डवम् ॥ ४६
तद्युद्धमभवद्घोरं सुमहाद्भुतदर्शनम् ।
सिंहनादस्वनं श्रुत्वा नामृष्यत धनंजयः ॥ ४७
ततः किरीटी सहसा पाञ्चालं समभिद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव ॥ ४८
शीघ्रमभ्यस्यतो बाणान् संदधानस्य चानिशम् ।
नान्तरं ददृशे किंचित् कौन्तेयस्य [1]तरस्विनः ॥ ४९

पूर्वतोऽनुवृत्तम्—

गजानश्वान् रथांश्चैव द्रावयामास पाण्डवः ।
पदातीन् नागरांश्चैव नावधीदर्जुनाग्रजः ॥
अर्जुनो नावधीच्चैव भीषयामास केवलम् । [अधिकः पाठः]

1. क-ख-घ—यशस्विनः

न दिशो नान्तरिक्षं च तदा नैव च मेदिनी ।
अदृश्यत महाराज [1]तत्र किंच न संयुगे ॥ ५०

[2]बाणान्धकारे बलिना कृते गाण्डीवधन्वना ।
पाञ्चालानां कुरूणां च साधु साध्विति निस्वनः ॥ ५१

तत्र तूर्यनिनादश्च शङ्खानां च महास्वनः ।
सिंहनादश्च संजज्ञे साट्टहासेन मिश्रितः ॥ ५२

ततः पाञ्चालराजस्तु तथा सत्यजिता सह ।
त्वरमाणोऽभिदुद्राव महेन्द्रं शम्बरो यथा ॥ ५३

महता शरवर्षेण पार्थः पाञ्चालमावृणोत् ॥ ५३॥

ततो हलहलाशब्द आसीत् पाञ्चालके बले ।
जिघृक्षति महासिंहे गजानामिव यूथपम् ॥ ५४॥

[3]दृष्ट्वा पार्थं तदायान्तं सत्यजित् सत्यविक्रमः ।
[4]पाञ्चालं वै परिप्रेप्सुर् धनञ्जयमभिद्रवत् ॥ ५५॥

ततस्त्वर्जुनपाञ्चालौ युद्धाय समुपागतौ ।
व्यक्षोभयेतां तौ सैन्यम् इन्द्रवैरोचनाविव ॥ ५६॥

---

1. क-ख-ग—बाणभूतमिवाभवत् ।
2. क-ख-ग—नादृश्यत तदा राजंस्तत्र किंचन संयुगे । [अधिकः पाठः]
3. घ—असौ पार्थहरिर्बद्धुं गृह्णन् द्रुपदहस्तिनम् [अधिकः पाठः]
4. घ—दुष्प्रापार्थं जिघृक्षन्तं पाञ्चालनृपतिं रणे ।
रथमास्थित्य वेगेन गृहीतशरकार्मुकः ।
प्रवदंस्तिष्ठतिष्ठेति धनञ्जयमभिद्रवत् ॥ [अधिकः पाठः]

ततस्सत्यजितं पार्थो दशभिर्मर्मभेदिभिः ।
विव्याथ बलवद्राजंस् तदद्भुतमिवाभवत् ॥ ५७॥

ततश्शरशतैः पार्थं पाञ्चालश्शीघ्रमार्दयत् ॥ ५८
पार्थस्तु शरवर्षेण च्छाद्यमानो महारथः ।
वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च ॥ ५९
ततस्सत्यजितश्चापं छित्वा राजानमभ्ययात् ॥ ५९॥

अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम् ।
साश्वं ससूतं सरथं पार्थं विव्याथ सत्वरम् ॥ ६०॥
स तं न ममृषे पार्थः पाञ्चालेनार्दितो मृधे ॥ ६१
ततस्तस्य विनाशार्थं सत्वरं व्यसृजच्छरान् ।
हयान् ध्वजं धनुर्मुष्टिम् उभौ तौ पार्ष्णिसारथी ॥ ६२
[1]स तथा भिद्यमानेषु कार्मुकेषु पुनः पुनः ।
हयेषु विनिकृत्तेषु विमुखोऽभवदाहवे ॥ ६३
स सत्यजितमालेक्य तथा विमुखमाहवे ।
वेगेन महता राजन्नभ्यधावत पार्षतम् ॥ ६४
तदा चक्रे महद्युद्धमर्जुनो जयतां वरः ।
तस्य पार्थो ध्वजं चित्रं धनुश्चोर्व्यामपातयत् ॥ ६५
पञ्चभिस्तस्य विव्याथ हयान् सूतं च सायकैः ॥ ६५॥

1. घ—छित्वा निहत्य यन्तारं द्रावयामास भूपतिम् [अधिकः पाठः]

तत उत्सृज्य तच्चापम् आददानश्शरावरम् ।
खड्गमुद्यम्य कौन्तेयस् सिंहनादमथाकरोत् ॥ ६६॥

[1]पाञ्चालस्य रथस्यैषाम् आप्लुत्य सहसा बली ।
पाञ्चालरथमास्थाय अवित्रस्तो धनञ्जयः ॥ ६७॥

विक्षोभ्याम्भोनिधिं तार्क्ष्यस् तं नागमिव सोऽग्रहीत् ॥ ६८
[2]ततस्तु सर्वपाञ्चाला विद्रवन्ति दिशो दश ॥ ६८॥

दर्शयन् सर्वसैन्यानां बाह्वोर्बलमथात्मनः ।
[3]सिंहनादस्वनं कृत्वा निर्जगाम धनञ्जयः ॥ ६९॥

---

1. घ—उत्प्लुत्य स्वरथोपस्थात् पाञ्चालस्य रथैषिकाम् । [अधिकः पाठः]
2. घ—अधरे ऽङ्गुलमादाय कुर्वन् किलकिलारवम् ।
प्रसार्य वामहस्तेन सशरं दक्षिणं करम् ॥
गृहीत्वाऽस्य समाक्षिप्य तं नागमिव सोऽग्रहीत् ।
गृहीतं द्रुपदं दृष्ट्वा पाञ्चाला भयविह्वलाः ।
हस्तैश्चटचटां कृत्वा प्राक्रोशन् भयपीडिताः ॥ [अधिकः पाठः]
3. घ—पश्यन्तश्चासकृत्पश्चादाह्वयन्तः परस्परम् ।
दर्शयन् सर्वसैन्यानां बाह्वोर्बलमथात्मनः ॥
सिंहवद्विनदन् भीममायुध्यस्व वदन्मुदा ।
इतः परं न भेतव्यं युष्माभिरिति सान्त्वयन् ॥
भीताश्च द्रवतो दिक्षु निर्जगाम पुराद्बहिः ।
द्रुपदस्य तदा ग्रस्तः पार्थेनामिततेजसा ॥
विस्मयेन च दैन्येन समाविष्टो बभूव ह ।
उत्साहं पौरुषं वीर्यं धैर्यं गाम्भीर्यमेव च ॥
सत्यं बलं च शौर्यं च धार्ष्ट्यं बुद्धिविनिश्चयम् ।
दृष्टिं मुष्टिं च सन्धानं हस्तलाघवमेव च ॥

आयान्तमर्जुनं दृष्ट्वा कुमारास्सहितास्तदा ।
ममृदुस्तस्य नगरं द्रुपदस्य महात्मनः ॥ ७०॥

अर्जुनः—

संबन्धी कुरुवीराणां द्रुपदो राजसत्तमः ।
मा वधीस्तद्बलं भीम गुरुदानं प्रदीयताम् ॥ ७१॥

[1]वैशंपायनः—

भीमसेनस्तदा राजन्नर्जुनेन निवारितः ।
अतृप्तो युद्धधर्मेषु न्यवर्तत महारथः ॥ ७२॥

[2]ते यज्ञसेनं द्रुपदं गृहीत्वा रणमूर्धनि ।
[3]उपजह्रुस्सहामात्यं द्रोणाय भरतर्षभाः ॥ ७३॥

[4]भग्नदर्पं हृतधनं तथा वशमुपागतम् ।

पूर्वतोऽनुवृत्तम्—

सौष्ठवं युद्धकौशल्यं दूरपातित्वमेव च ।
कृतदादिगुणग्रामं दृष्ट्वा विस्मयमागमत् ॥
पूर्वोक्तं स्मरतो वाच्यं द्रोणेन दृढमन्युना ।
दृष्ट्वा तच्च प्रतीकारं कृतिमात्मनि भूपतिः ।
दैन्यं जगाम मनसा स्मरन् पूर्वोक्तमात्मनः ॥

आयान्तमर्जुनं [अधिकः पाठः]

1 घ—तद्युद्धाद्विनिवर्तस्व वृथा त्वं नावधीर्जनम् ।
वैरं न द्रुपदे नोऽस्ति जीवदानं प्रदीयताम् ॥ [अधिकः पाठः]

2. ग—नागच्छत्तस्य नगरीं काम्पिल्यां कुरुनन्दन । [अधिकः पाठः]

3. घ—तिर्यक्कटाक्षैः पश्यन्तः कर्णदुर्योधनौ तदा ।
? वामहस्तैस्त्वयिप्राप्तैश्च विकृषाणः परस्परम् ॥ [अधिकः पाठः]

4. घ—विक्रम्य वामेन बद्ध्वा बलीन्द्रमिव वज्रिणे । [अधिकः पाठः]

स वैरं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत् ॥ ७४॥

द्रोणः—

प्रमृज्य तरसा राष्ट्रं पुरं ते मृदितं मया ।
प्राप्य जीवन् रिपुवशं सखिपूर्वं किमिष्यते ॥ ७५॥

वैशंपायनः—

एवमुक्त्वा प्रहस्यैनं निश्चित्य पुनरब्रवीत् ॥ ७६

द्रोणः—

मा भैः प्राणभयाद्राजन् क्षमिणो ब्राह्मणा वयम् ॥ ७६॥

आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया सह ।
तेन संवर्धितो हर्षस् त्वया मे क्षत्रियर्षभ ॥ ७७॥

प्रार्थयेऽहं त्वया सख्यं पुनरेव नरेश्वर ।
वरं ददामि ते राजन् राज्यस्यार्धमवाप्नुहि ॥ ७८॥

अराजा किल नो राज्ञस् सखा भवितुमर्हति ।
अतः प्रयतितं राज्ये यज्ञसेन मया तव ॥ ७९॥

[1]राजाऽसि दक्षिणे कूले भागीरथ्याऽहमुत्तरे ।
सखायं मां विजानीहि पाञ्चाल यदि मन्यसे ॥ ८०॥

---

1. घ—येनाहृतं यस्य राज्यं दुर्बलस्य बलीयसा ।
दुर्बलस्य न तद्राज्यं बलिनो राज्यमुच्यते ॥
राजा राज्ञस्सखा लोके इत्युक्तं हि त्वया पुरा ।
राजाऽहमभवं तस्मात् त्वं च राजा भवाभिभो ॥[अधिकः पाठः]

द्रुपदः—

अनाश्चर्यमिदं ब्रह्मन् विक्रान्तेषु महात्मसु ।
प्रीये त्वयाहं त्वत्तश्च प्रीतिमिच्छामि शाश्वतीम् ॥ ८१॥

वैशम्पायनः—

एवमुक्तस्तु तं द्रोणो मोक्षयामास भारत ।
सत्कृत्य चैनं प्रीतात्मा राज्यार्धं प्रत्यपादयत् ॥ ८२॥

आसन्दीमथ गङ्गायास् तीरे जनपदायुताम् ।
सोऽध्यावसद्दीनमनाः काम्पिल्यं च पुरोत्तमम् ॥ ८३॥

दक्षिणांश्चैव पाञ्चालान् यावच्चर्मण्वतीं नदीम् ।
अहिच्छत्रं च विषयं भारद्वाजोऽभ्यपद्यत ॥ ८४॥

एवं राज्यमहिछत्रं पुरा बहुधनान्वितम् ॥
युधा निर्जित्य पार्थेन द्रोणाय प्रतिपादितम् ॥ ८५॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि द्विचत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

॥ ७ ॥ संभवपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

[अस्मिन्नध्याये ८५॥ श्लोकाः]

॥ द्वात्रिंशदधिकशततमोऽध्यायः ॥

द्रुपदेन द्रोणविजयाय पुत्रोत्पादनार्थं उपयाजगमनम् ॥ १ ॥ उपयाजेन याजोपसर्पण कथनम् ॥ २ ॥ याजेन द्रुपदस्य वैलानाग्नौ धृष्टद्युम्न पाञ्चाल्योरुत्पादनम् ॥ ३ ॥

वैशम्पायनः—

द्रोणेन वैरं द्रुपदो न सुष्वाप स्मरंस्तदा ।
क्षात्रेण च बलेनास्य नाऽशशंसे पराजयम् ॥ १
हीनं विदित्वा चात्मानं ब्राह्मणेन बलेन च ।
द्रुपदस्त्वमर्षणाद्राजन् कर्मसिद्ध्यै द्विजोत्तमान् ॥ २
[1]अन्विच्छन् परिचक्राम ब्राह्मणावसथान् बहून् ॥ २॥
[2]नास्ति श्रेष्ठं ममापत्यं धिग्बन्धूनिति च ब्रुवन् ॥ ३
निश्वासपरमो ह्यासीद् द्रोणप्रतिचिकीर्षया ॥ ३॥
न सन्ति मम मित्राणि द्रोणेऽस्मिन्नास्ति वीर्यवान्।
[3]पुत्रजन्म परीप्सन् वै पृथिवीमन्वयादिमाम् ॥ ४॥

---

1. घ—कथमुत्पत्स्यते मह्यं द्रोणहन्ता सुतो बली ।
अर्जुनाय प्रदातुं मे कन्या चाप्रतिमा भुवि ॥
चिन्तयन्निति भूपालो दिवारात्रं च निश्वसन् ।
द्रुपदोऽमर्षणाद्राजा कर्मसिद्धिं द्विजोत्तमान् ॥ [अधिकः पाठः]

2. घ—अमात्यो नास्ति मे श्रेष्ठः बान्धवाश्चाप्तसंमताः ॥ [अधिकः पाठः]

3. घ—न सन्ति बलिनः पुत्रास्सङ्ग्रामे विजिगीषवः ।
इति चिन्ताकुलो राजा निश्वासपरमोऽभवत् ।
असुखश्च विनिद्रश्च द्रोणाप्रियचिकीर्षया ॥ [अधिकः पाठः]

[1]प्रभावशिक्षाविनयाद् द्रोणस्यास्य बलेन च ।
कर्तुं प्रयतमानो ऽपि न शशाक पराजयम् ॥ ५॥
अभितस्सोऽथ कल्माषीं गङ्गातीरे परिभ्रमन् ।
ब्राह्मणावसथं पुण्यम् आससाद महीपतिः ॥ ६॥
तत्र नास्नातकः कश्चिन्न चासीदव्रती द्विजः ।
[2]तदैव तौ महाभागौ सोऽपश्यत्संशितव्रतौ ॥ ७॥
याजोपयाजौ ब्रह्मर्षी श्राम्यन्तौ पृषतात्मजः ॥ ८
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ।
अरण्ये युक्तरूपौ तौ ब्राह्मणावृषिसत्तमौ ॥ ९
स उपामन्त्रयामास सर्वकामैरतन्द्रितः ।
बुद्ध्वा तयोर्बलं बुद्धिं कनीयांसमुपह्वरे ॥ १०
प्रपेदे छन्दयन् कामैर् उपयाजं धृतव्रतम् ॥ १०॥
गुरुशुश्रूषणे युक्तः प्रियकृत् सर्वकामदः ॥ ११
पाद्येनासनदानेन तथा ऽर्घ्येण फलैश्च तम् ।
अर्चयित्वा यथान्यायम् उपयाजोऽब्रवीत्ततः ॥ १२

उपयाजः—

केन कार्यविशेषेण त्वमस्मानभिकाङ्क्षसे ।
कुतश्चायं समुद्योगस् तद् ब्रवीतु भवानिति ॥ १३

---

1. घ—पृथ्वीमन्वचरत् सर्वां द्रोणहन्तृपरीप्सया । [अधिकः पाठः]
2. घ—इदं परिभ्रमन् देशान् आश्रमांश्च पृथक्पृथक् ।
हिमवत्पादपर्यन्ते महाभागौ तपस्विनौ ॥ [अधिकः पाठः]

वैशंपायनः—

स बुद्ध्वा प्रीतिसंयुक्तम् ऋषीणामुत्तमं तदा ।
उवाच छन्दयन् कामैर् द्रुपदस्स तपस्विनम् ॥ १४

द्रुपदः—

येन मे कर्मणा ब्रह्मन् पुत्रस्स्याद्द्रोणमृत्यवे ।
[1]उपयाज चरस्वैतत् प्रदास्याम्यर्बुदं गवाम् ॥ १५

वैशंपायनः—

एवमुक्तस्तु तेनर्षिः प्रत्युवाच पुनश्च तम् ॥ १५॥

उपयाजः—

नाहं फलार्थी द्रुपद योऽर्थी स्यात्तत्र गम्यताम् ॥ १६

वैशम्पायनः—

प्रत्याख्यातस्तु तेनैवं स वै सज्जनसंनिधौ ।
आराधयिष्यन्द्रुपदस् स तं पर्यचरत्ततः ॥ १७
ततस्संवत्सरस्यान्ते द्रुपदं द्विजसत्तमः ।
उपयाजोऽब्रवीद्वाक्यं काले मधुरया गिरा ॥ १८

उपयाजः—

ज्येष्ठो भ्राता [2]न मेऽत्याक्षीत् विचिन्वन् वननिर्झरे ॥ १८॥
अपरिज्ञातशौचायां भूमौ निपतितं फलम् ।

---

1. क—याऽर्जुनस्य भवेद्भार्या या भवेद्वरवर्णिनी । [अधिकः पाठः]
2. क-ख-ग-घ—ममागृह्णाद् विचरन्वै महावने ।

तदपश्यमहं भ्रातुर् असांप्रतमनुव्रजन् ॥ १९॥

विमर्शनं फलादाने नायं कुर्यात् कथं चन ।
यो नापश्यत्फलं दृष्ट्वा दोषांस्तस्याऽऽनुबन्धिकान् ॥ २०॥

विविनक्ति न शौचार्थी सोऽन्यत्रापि कथं भवेत् ॥ २१

संहिताध्ययनस्यान्ते पञ्चयज्ञान्निरूप्य च ।
भैक्षमुञ्छेन [1]संभिन्नं भुञ्जानस्तु तदा ततः ॥ २२
कीर्तयत्येव राजर्षे भोजनस्य रसं पुनः ॥ २२॥

संहिताध्ययनं कुर्वन् वने गुरुकुले वसन् ।
भैक्षमुच्छिष्टमन्येषां भुङ्क्ते स्म सततं तदा ॥ २३॥
कीर्तयन् गुणमन्नानाम् अथ प्रीतो मुहुर्मुहुः ॥ २४
एवं फलार्थिनस्तस्मान्मन्येऽहं तर्कचक्षुषा ॥ २४॥
तं वै गच्छेह नृपते स त्वां संयाजयिष्यति ॥ २५

वैशम्पायनः—

जुगुप्समानो नृपतिः फलानां कलुषां गतिम् ।
उपयाजवचश्श्रुत्वा द्रुपदस्सर्वधर्मवित् ॥ २६
भृशं संपूज्य पूजार्हम् ऋषिं याजमुवाच ह ॥ २६॥

द्रुपदः—

गोऽयुतानि ददाम्यष्टौ याज याजय मां विभो ।

---

1. क-ख-ग-घ—सहितं

[1]द्रोणवैरान्तरे तप्तं विषण्णं शरणागतम् ॥ २७॥

ब्रह्मबन्धुप्रणिहितं न क्षत्रं क्षत्रियो जयेत् ।
तस्माद्द्रोणभयार्तं मां भवांस्रातुमिहार्हति ॥ २८॥

भारद्वाजाग्निना दग्धं संह्लादयितुमर्हसि ।
[2]स हि ब्रह्मविदां श्रेष्ठश् शस्त्रास्त्रेष्वसमो भुवि ॥ २९॥

ततो द्रोणस्तथा ऽजैषीत् स हि विग्रहकारणात् ।
क्षत्रियो नास्ति तुल्योऽस्य पृथिव्यां कश्चिदर्हणः ॥ ३०॥

[3]भारताचार्यमुख्यस्य भारद्वाजस्य धीमतः ।
द्रोणस्य शरजालानि रिपुदेहहराणि च ॥ ३१॥

षडरत्नि धनुश्चास्य खड्गमप्रतिमं महत् ।
स हि ब्राह्मणवेगेन क्षत्रवेगमसंशयम् ॥ ३२॥

प्रतिहत्य चरत्येव भारद्वाजो महामनाः ॥ ३३

---

1. क-ख-ग—द्रोणवैराभिलप्तं मां त्वं हि त्रातुमिहार्हसि ।
त्वं हि ब्रह्मविदां श्रेष्ठः क्षत्रान्ते चाप्यनुत्तमः ॥
[अधिकः पाठः]

2. क-ख—येन मे कर्मणा ब्रह्मन पुत्रस्याद्रोणमृत्यवे ।
अर्जुनस्य भवेद्भार्या या भवेद्वरवर्णिनी ।
उपयाजारभस्वैतत् प्रदास्याम्यर्बुदं गवाम् ॥
एवमुक्तस्तु तेनर्षिः प्रत्युवाच पुनश्च तम् ।
भरद्वाजाग्निना दग्धं संह्लादयितुमर्हसि ॥ [अधिकः पाठः]

3. ख— ब्राह्मं तेजो हरेत्तस्य मन्त्राहुतिहुतं यथा ।
न जयेत् क्षत्रियस्तं वै पृथिव्यां कश्चिदग्रणीः ॥[अधिकः पाठः]

कार्तवीर्यसमो ह्येष खट्वाङ्गप्रतिमोऽपि वा ॥ ३३॥
क्षत्रो[1]च्छेदपरायत्तं जामदग्न्यमिवोद्यतम् ।
सहितं क्षत्रवेगेन ब्राह्मवेगेन सांप्रतम् ॥ ३४॥
उपपन्नं हि मन्येऽहं भारद्वाजं यशस्विनम् ॥ ३५
नेषवस्तं· पराभूवन् न च प्रासा न चासयः ।
ब्राह्मं तस्य हरेत् तेजो मन्त्राहुतिहुतं यथा ॥ ३६
तस्य ह्यस्त्रबलं·घोरम् अप्रसह्यं परैर्भुवि ।
[2]शत्रून् समेत्य जयति क्षत्रं ब्रह्मपुरस्कृतम् ॥ ३७
ब्रह्मक्षत्रे च सहिते ब्रह्मतेजो विशिष्यते ॥ ३७॥
सोऽहं क्षत्रबलादीनो ब्रह्मतेजः प्रपेदिवान् ॥ ३८
द्रोणाद्विशिष्टमासाद्य भवन्तं वेदवित्तमम् ।
द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम् ॥ ३९
द्रोणमृत्युर्यथा मेऽद्य पुत्रो जायेत वीर्यवान् ।
तत्कर्म कुरु मे याज निर्वपाम्यर्बुदं गवाम् ॥ ४०

वैशंपायनः—

तथेत्युक्त्वा तु तं याजो याज्यार्थं वाक्यमब्रवीत् ॥ ४०॥

याजः—

मा भैस्त्वं संप्रदातास्मि कर्मणा भवतस्सुतम् ।

---

1. क-ख-ग—च्छेदाय विहितो जामदग्न्य इवास्थितः ।
2. क-ख-ग—ब्राह्ममुच्चारयंस्तेजो हुतहुतिरिवानलः । [अधिकः पाठः]

क्षिप्रमुत्तिष्ठ चाज्यग्रस् संभारांश्चोपकल्पय ॥ ४१॥

वैशम्पायनः—

एवमुक्त्वा प्रतिज्ञाय कर्म चास्याददे मुनिः ॥ ४२

ब्राह्मणो द्विपदां श्रेष्ठो यथाविधि यथाक्रमम् ॥ ४२॥

याजो द्रोणविनाशाय याजयामास तं नृपम् ॥ ४३

गुर्वर्थं याजयत्कर्म याजस्यापि समीपगः ॥ ४३॥

ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः ।

आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै ॥ ४४॥

उपयाजः—

इह पुत्रो महावीर्यो महातेजा महाबलः ।

इष्यते यद्विधो राजन् भविता स तथाविधः ॥ ४५॥

वैशम्पायनः—

भारद्वाजस्य हन्तारं सोऽभिसन्धाय भूमिपः ।

आजह्रेऽयं तथा यज्ञं द्रुपदः कर्मसिद्धये ॥ ४६॥

ब्राह्मणो द्विपदां श्रेष्ठो जुहाव च यथाविधि ।

कौकिलीं नाम तां तस्य चक्रे वै पुत्रगर्धिनः ॥ ४७॥

सौत्रामणी तं तु पत्नी ततः कालेऽभ्ययात्तदा ।

याजस्तु सवनस्यान्ते देवीमाह्वापयत्तदा ॥ ४८॥

याजः—

प्रैहि मां राज्ञि पृषति मिथुनं त्वामुपस्थितम् ।

कुमारश्च कुमारी च पितृवंशविवृद्धये ॥ ४९॥

पृषती—

[1]नालिप्तं वै मम मुखं पुण्यान् गन्धान् बिभर्मि च ।
न पत्नी तेऽस्मि सूत्यर्थं तिष्ठ याज मम प्रिये ॥ ५०॥

याजः—

याजेनाश्रपितं हव्यम् उपयांजेन मन्त्रितम् ।
कथं कामं न संदध्यात् पृषति प्रैहि तिष्ठ वा ॥ ५१॥

वैशम्पायनः—

एवमुक्ते तु याजेन हुते हविषि संस्कृते ।
उत्तस्थौ पावकात्तस्मात् कुमारो देवसंमितः ॥ ५२॥
ज्वालावर्णो घोरवर्णः किरीटी वर्म धारयन् ।
वीरस्सखड्गस्सशरो धनुष्मान् विनदन् मुहुः ॥ ५३॥
सोऽध्यारोहद्रथवरं तेन च प्रययौ तदा ॥ ५४
जातमात्रे कुमारे च वाक्किलान्तर्हिताऽब्रवीत् ॥ ५४॥
एष शिष्यश्च मृत्युश्च भारद्वाजस्य धीमतः ।
भयापहो राजपुत्रः पाञ्चालानां यशस्करः ॥ ५५॥
राज्ञश्शोकापहो जात एष द्रोणवधाय हि ॥ ५६
इत्यवोचन्महद्भूतम् अदृश्यं खेचरं तदा ॥ ५६॥
द्वितीयायां च होत्रायां हुते हविषि मन्त्रतः ।

---

1. घ—न क्षालितं मुखं पुण्यान् गन्धान् पिब पिबामि ह ।

कुमारी चापि पाञ्चाली वेदिमध्यात् समुत्थिता ॥ ५७॥
प्रत्याख्याते पृषत्या च याजके भरतर्षभ ।
पुनः कुमारी पाञ्चाली सुभगा वेदिमध्यगा ॥ ५८॥
अन्तर्वेद्यां समुद्भूता कन्या सा सुमनोहरा ॥ ५९
[1]श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा ।
मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी ॥ ६०
नीलोत्पलसमो गन्धो यस्याः केशात् प्रवायति ॥ ६०॥
या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि ।
देवदानवयक्षाणाम् ईप्सिता देववर्णिनी ॥ ६१॥
तां सुजातां गुरुश्रोणीं वागुवाचाशरीरिणी ॥ ६२
सर्वयोषिद्वरा कृष्णा क्षयं क्षत्रं निनीषति ।
सुरकार्यामियं काले करिष्यति सुमध्यमा ॥ ६३
अस्या हेतोः क्षत्रियाणां महदुत्पत्स्यते भयम् ॥ ६३॥
तच्छ्रुत्वा सर्वपाञ्चालाः प्रणेदुर्सिंहसङ्घवत् ।
न चैनान् हर्षसंपूर्णान् इयं सेहे वसुन्धरा ॥ ६४॥
तथा तु मिथुनं जज्ञे द्रुपदस्य महात्मनः ।
कुमारश्च कुमारी च मनोज्ञौ च नरर्षभ ॥ ६५॥
श्रिया परमया युक्ता क्षात्रेण वपुषा तथा ।
तौ दृष्ट्वा पृषती याजं प्रपेदे सा सुतार्थिनी ॥ ६६॥

1. क-ख-ग—सुभगा दर्शनीयाङ्गी कन्या सुभ्रूर्मनोहरा ।[अधिकः पाठः]

न मां विनाऽन्यां जननीं जानीयेतामिमाविति ।
तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया ॥ ६७॥
तयोस्तु नामनी चक्रुर् द्विजास्संपूर्णमानसाः ॥ ६८
[1]धृष्टत्वादप्रधृष्यत्वात् सर्वमन्यद्धनुर्वेदपि ।
धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ॥ ६९
कृष्णेत्येवांभवत् कृष्णा राजन्नेषा च पार्षती ।
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ॥ ७०
वैदिकाध्ययने पारं धृष्टद्युम्नो गतस्ततः ॥ ७०॥
[2]धृष्टद्युम्नं तु पाञ्चाल्यम् आनीय द्रुपदात्मजम् ।
उपाकरोदस्त्रहेतोर् भारद्वाजः प्रतापवान् ॥ ७१॥
अमोक्षणीयं दैवं हि एवं मत्वा महामतिः ।
यथावत् कृतवान् द्रोण आत्मकीर्त्यर्थरक्षणात् ॥ ७२॥
सर्वास्त्राणि स तु क्षिप्रम् आप्तवान् दृष्टमात्रया ॥ ७३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आदिपर्वणि द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥
॥ ७ ॥ संभवपर्वणि सप्तसप्ततितमोऽध्यायः[4] ॥ ७७ ॥
[अस्मिन्नध्याये ७३ श्लोकाः]

---

1. क-ग—धृष्णुत्वादप्रधृष्यत्वा द्धर्मादुत्संभवादपि ।
2. घ—धृष्टद्युम्नन्तु पाञ्चाल्यम् आत्मनो मृत्युमादरात् ।
3. घ—सर्वशस्त्रास्त्रकौशल्यं नैपुण्यं धनुषाप्तवान्
4. क-ख-ग-घ—पञ्चसप्ततितमोऽध्यायः ॥

॥ त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥

द्रुपदोत्पत्तिः ॥ १ ॥

जनमेजयः—

द्रुपदस्यापि विप्रर्षे श्रोतुमिच्छामि संभवम् ।
कथं चापि समुत्पन्नः कथमस्त्राण्यवाप्तवान् ॥ १

एतदिच्छामि भगवंस् त्वत्तश्श्रोतुं द्विजोत्तम ।
कौतूहलं जन्मसु मे कथ्यमानेष्वतीव हि ॥ २

वैशम्पायनः—

राजा बभूव पाञ्चालः पुत्रार्थी पुत्रकारणात् ।
वनं गतो महाराज तपस्तेपे सुदारुणम् ॥ ३

[1]आराधयन् प्रयत्नेन तस्यापत्यस्य कारणात् ॥ ३॥

तस्य संतप्यमानस्य बने मृगगणायुते ।
[2]कालस्तु सुमहान् राजन् प्रत्यगात् सुतकारणात् ॥ ४॥

[3]स तु राजा महावीरस् तपस्तीव्रं समाददे ।
कंचित्कालं वायुभक्षो निराहारस्तथैव च ॥ ५॥

---

1. घ—अपुत्रः पुत्रकामश्च वनं गत्वा महत्तपः ।
प्रतेपे पुत्रदं राजा गङ्गाकूले तपोवने ॥ [अधिकः पाठः]
2. घ—अतीयान्सुमहान्काल स्तस्य राजन् महात्मनः ।
3. घ—यज्ञसेनो महाराज स तीव्रं तप आदधे ।

[1]तस्य त्वेवं महाबाहोर् वर्तमानस्य भारत ।
कालस्तत्र महाराज व्यत्ययान्नृपसत्तम ॥ ६॥
ततो नातिचिरात्काले वसन्ते कामदीपने ।
फुल्लाशोकवने चैव प्राणिनां सुमनोरमे ॥ ७॥
नद्यास्तीरमथो गत्वा गङ्गायाः पद्मलोचनः ।
[2]नियमस्थश्च राजाऽऽसीत् तथा भरतसत्तम ॥ ८॥

---

1. घ—तस्यैवं वर्तमानस्य तपस्युग्रे महीपते ।
दशवर्षसहस्रान्ते तद्वने समभून्नृप ॥
वसन्त स्सुखदः कालः स तु कामप्रदीपनः ।
फुल्लाशोकवनोद्देशः प्राणिनां सुमनोरमः ॥ [पाठान्तरम्]
2. घ—स पार्वतो महाघोरे नियमे तप आस्थितः ॥
तस्मिन् वसन्ते संप्राप्ते वनं तन्मनुजेश्वर ।
अप्सरा मेनका नाम संप्राप्ता तत्तपोवनम् ।
कुसुमानि विचिन्वन्ती राज्ञो दर्शनमागमत् ॥
न ददर्श तदा राजन् स्वान्तर्धानगतं नृपम् ।
पुष्पाण्येव विचिन्वाना शिञ्जद्वलयपाणिना ॥
सूक्ष्माम्बरपरीधानां विशालश्रोणिमण्डलाम् ।
मुष्टिसंमितमध्यान्तां ऊर्ध्वामृज्वायतोदराम् ॥
पीनोन्नतकुचद्वन्द्वां निष्कहारादिशोभिताम् ।
मदनागारदोर्मूलां दृष्ट्वा कामशरार्पितः ॥
राज्ञस्तस्य प्रचस्कन्द तद्दृष्ट्वाङ्गप्रदर्शनात् ।
लज्जाभारानतो राजा पद्भ्यां भूमावमर्दयत् ॥
मर्दतस्तस्य तद्रेतः पादाभ्यामुत्थितो नृप ।
मा मां हिंसीर्भवांस्तात सुतस्तेऽहं त्वदुद्भवः ॥
इत्थं वदन्नेव तदा प्रादुर्भूतो मनोहरः ।
उदितादित्यसङ्काशः पूर्णचन्द्रनिभाननः ॥

ततो नातिचिरात्कालाद् वनं तन्मनुजेश्वर ।
संप्राप्ता सहसा राजन् मेनकेति परिश्रुता ॥ ९॥
नद्यास्तीरे चरन्ती वै क्रीडन्ती च पुनः पुनः ।
पुष्पद्रुमान् प्रभञ्जन्ती राज्ञो दर्शनमागमत् ॥ १०॥
न ददर्श तु सा राजंस् तत्र स्थानगतं नृपम् ।
दृष्ट्वा चाप्सरसं तां तु शुक्रं राज्ञोऽपतद्भुवि ॥ ११॥
तच्च राजा तु राजेन्द्र लज्जया नृपतिस्स्वयम् ।
पद्भ्यामाक्रमतायुष्मंस् ततस्तु द्रुपदोऽभवत् ॥ १२॥
ततस्तु तपसा तस्य राजर्षेर्भावितात्मनः ।
पुत्रस्समभव[1]च्चार्द्रात् पादात्तस्यान्तरेण तु ॥ १३॥
ते तस्य ऋषयस्सर्वे समागम्य तपोधनाः ।
नाम चक्रुर्हि विद्वांसो द्रुपदोऽस्त्विति भूमिप ॥ १४॥
स तस्यैवाश्रमे राजन् भरद्वाजस्य भारत ।
ववृधे च सुखं तत्र कामैस्सर्वैर्नृपोत्तम ॥ १५॥
पाञ्चालोऽपि हि राजेन्द्र स्वराज्यं गतवान् प्रभुः ।

पूर्वतोऽनुवृत्तम्—

तपस्यतस्ते पुत्रार्थं पुत्रोऽहमभिवादये ।
इयं तस्यसुतो जज्ञे पादयोः स्वस्य रेतसा ॥
आर्द्रयोर्मर्दनाद्राजं स्तेन स द्रुपदोऽभवत् ।
समागत्याथ ऋषयस्तस्य चक्रे तपोधनाः ॥
नाम चक्रुर्हि विद्वांसः [अधिकः पाठः]

1. क-ख-ग—ज्ञास्य पादयोरन्तरे तु सः ।

[1]भरद्वाजस्य शिष्यार्थं सुतं दत्वा महात्मनः ॥ १६॥
स कुमारस्ततो राजन् द्रोणेन सहितो वने।
वेदांश्चाधिजगे सङ्गान् धनुर्वेदांश्च भारत ॥ १७॥
परया स मुदा युक्तो विचचार वने सुखम् ॥ १८
तस्यैवं वर्तमानस्य वने वनचरैस्सह ।
कालान्नातिचिराद्राजन् पिता स्वर्गमुपेयिवान् ॥ १९
स समागम्य पाञ्चालैः पाञ्चालेष्वभिषेचितः ।
प्राप्तश्च राज्यं राजेन्द्र सुहृदां प्रीतिवर्धनः ॥ २०
राज्यं ररक्ष धर्मेण यथा चेन्द्रस्त्रिविष्टपम् ॥ २०॥
एतन्मया ते राजेन्द्र यथावत्परिकीर्तितम् ।
द्रुपदस्य जन्म राजर्षेर् धृष्टद्युम्नस्य चैव हि ॥ २१॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि त्रय स्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥
॥ ७ ॥ संभवपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
[अस्मिन्नध्याये २१॥ श्लोकाः]

---

1. क-ख-ग—पौत्रोऽसौ पृषतस्येति पार्षतस्तेन चाभवत् ॥
वैशंपायनः—
द्रुपदो ऽजनि पाञ्चालस्य महात्मनः ।
भारद्वाजस्य शिष्योऽभून्मृत्युस्तस्यैव सोऽभवत् ॥
द्रुपदेन स्वयं दत्तः शिष्यार्थं द्रोणजन्मनः ॥
धृष्टद्युम्नो महावीरः सुकुमारो गुरुप्रियः ।
द्रोणेन सहितोऽरण्ये अग्निवेश्याश्रमेऽवसत् ॥
वेदानधिजगे [अधिकः पाठः]

॥ चतुस्त्रिंशदधिकशततमोऽध्यायः ॥

यौवराज्ये युधिष्ठिरस्याभिषेकः ॥ १ ॥ भीमसेनस्य बलरामाद्गदा-युद्धशिक्षणम् ॥२॥ द्रोणेनार्जुनस्य ब्रह्मशिरोऽस्त्रविषये नियमकथनम् ॥३॥ भीमार्जुनदिग्विजयेन धृतराष्ट्रचिन्ता ॥ ४ ॥

वैशंपायनः—

धृतराष्ट्रस्तु राजेन्द्र यदा कौरवनन्दनः ।
युधिष्ठिरमजानाद्वै समर्थं राज्यरक्षणे ॥ १

यौवराज्याभिषेकार्थम् अमन्त्रयत मन्त्रिभिः ।
ते तु बुद्ध्वाऽन्वतप्यन्त धृतराष्ट्रात्मजास्तदा ॥ २

[1]ततस्संवत्सरस्यान्ते पाण्डुपुत्रो महायशाः ।
स्थापितो धृतराष्ट्रेण यौवराज्ये युधिष्ठिरः ॥ ३

अदीर्घेण च कालेन कुन्तीपुत्रो युधिष्ठिरः ।
पित्र्यामन्तर्दधे कीर्तिं शीलवृत्तिसमाधिभिः ॥ ४

असियुद्धे रथोद्याने बाहुयुद्धे च पाण्डवः ।
संकर्षणाच्छिक्षितवान् शश्वच्छिक्षां वृकोदरः ॥ ५

---

1. घ—संप्राप्तसर्वविद्योऽसौ द्रुमत्सेनसमो बले ।
धर्मसूनुरसौ राजा पूरूराज्येऽभिषेचितः ॥
यदि शासति साम्राज्यं तदा स्याम कथं वयम् ।
वयं के ते भविष्यामः कान्दिशीका भवामहे ॥
इति संचिन्त्यमनसा पर्यतप्यत् सुयोधनः ॥ [अधिकः पाठः]

ते तं बुध्वाऽन्वतप्यन्त धृतराष्ट्रात्मजास्तदा ।
समाप्तविद्यस्सोऽप्यासीद् द्युमत्सेनसमो बले ।। ६

ततस्संवत्सरस्यान्ते पाण्डुपुत्रो महायशाः ।
गदाबलाभ्यां संपन्नो भ्रातृणामचरद्वशे ।। ७

प्रगाढदृढमुष्टौ च लाघवे चातिवेधने ।
लक्ष्यवेध्ये च मोक्षे च तोमरग्रहणेऽपि च ।। ८

असिशक्तिगदायुद्धे बभूवाप्रतिमोऽर्जुनः ।। ८।।

क्षुरनाराचभल्लानां विपाठानां सुतेजसाम् ।
ऋजुवक्रविशालानां प्रयोक्ता पाण्डवोऽभवत् ।। ९।।

[1]लाघवात् सौष्ठवाच्चैव नान्यः कश्चित्तु विद्यते ।
बीभत्ससदृशो लोक इति द्रोणोऽभ्यभाषत।। १०।।

गजयुद्धेऽश्वयुद्धे वा रथयुद्धे च पाण्डवः ।
पारगो भुजयुद्धे च बभूवेह धनञ्जयः ।। ११।।

स्वभावादगमच्छब्दो महीं सागरमेखलाम् ।
नास्त्यर्जुनसमः कश्चिद् इत्येवं मेनिरे जनाः ।। १२।।

अथाब्रवीत्तदा द्रोणः फल्गुनं जनसंसदि ।। १३

अगस्त्यस्य धनुर्वेदे शिष्यो मम गुरुस्सदा ।
अग्निवेश्य इति ख्यातस् तस्य शिष्योऽस्मि भारत ।। १४

1. घ—ऋजुवक्रगतीनां च प्रयत्ने पाण्डवोऽभवत् ।

तीर्थात्तीर्थगतं पार्थ मया संक्रामितं त्वयि ।
तपसेदं मया प्राप्तम् अमोघमशनिप्रभम् ॥ १५
अस्त्रं ब्रह्मशिरो नाम यद्धेत्पृथिवीमपि । १५॥
ददता चास्मि सन्दिष्टो न मनुष्येष्विदं त्वया ।
भारद्वाज प्रमोक्तव्यम् अस्त्रं संयुगमूर्धनि ॥ १६॥
यद्यदन्तार्हितं भूतं किंचिद्युद्धे त्वया सह ।
महातेजस्तदेतेन हन्याश् शस्त्रेण संयुगे ॥ १७॥
अवाप्तं तत्त्वया वीर दिव्यं नान्यस्तदर्हति ॥ १८
समयश्च रक्ष्यो बलवान् ईदृशो हि विशांपते ।
आचार्यदक्षिणां देहि ज्ञातिग्रामस्य पश्यतः ॥ १९
ददामीति प्रतिज्ञाते फल्गुनेनाब्रवीद्गुरुः ।
युद्धे हि प्रतियोद्धव्यो युध्यमानोऽप्यहं रणे ॥ २०
[1]तत्तथेति प्रतिज्ञाय द्रोणाय कुरुपुङ्गवः ।

---

1. क-ख-ग—तत्तथेति प्रतिज्ञाते द्रोणाय कुरुपुङ्गवे ।
द्रोणो जगाद वचनं समालिङ्ग्य च फल्गुनम् ॥ १
यन्मयोक्तं त्वया पार्थ लघ लोके नरः क्वचित् ।
सदृशं कारयेन्नैव सर्वप्रहरणे युधि ॥ २
तत्कृतं च मया सम्यग् भवत्तुल्यो न विद्यते ।
देवा युधि न शक्तास्त्वां योद्धुं दैत्यान्यजातयः ॥ ३
नाहं त्वत्तो विशिष्टोऽस्मि किं पुनर्यानवारणे ।
एकस्त्वधिको लोके यो हि वृष्णिकुलोद्भवः ॥ ४
कृष्णः कमलपलाक्षः कंसकालीयसूदनः ।

स जेता सर्वलोकानां सर्वप्रहरणायुधः ॥ ५
नैतावत्साप्यहं पार्थ भवाम्यनृतवागिह ।
तदधीनं जगत्सर्वं तत्प्रलीनं तदुद्भवम् ॥ ६
तत्पदं न विजानन्ति ब्रह्मेशानादयोऽपि च ।
तस्माभिप्रभवो ब्रह्मा सर्वभूतानि निर्ममे ॥ ७
स एष कर्ता भोक्ता च संहर्ता च जगन्मयः ।
स एव भूतं भव्यं च भवच्च पुरुषर्षभ ॥ ८
नित्यस्सर्वगतः स्थाणु रचलोऽयं सनातनः ।
प्रादुर्भवति योगात्मा पालनार्थं स लीलया ॥ ९
तत्तुल्या हि न जायन्ते न जातो न भविष्यति ।
यत्पदस्य तु माहात्म्यं न मातुं भुवि शक्यते ॥ १०
स हि मातुलजोऽभूत्ते चराचरगुरुः पिता ।
को हि तं जेतुमीहेत ज्ञानज्ञात्महितं नरः ॥ ११
स्यालश्च ते सखा चासौ तस्य त्वं प्राणवल्लभः ।
स्नेहमभ्यधिकं तस्य तव सख्यमवञ्चितम् ॥ १२
न तेन भवतो युद्धं भविता नर्मतोऽपि वा ।
अपि चार्थे तव पुरा शक्रेण किल चोदितः ॥ १३
गोकुले वर्धमानस्तु नन्दगोपस्य कारणात् ।
ममांशः पाण्डवो लोके पृथिव्यां पुरुषोत्तमः ॥ १४
कौन्तेयावरजः श्रीमान् अर्जुनो मम वीर्यवान् ।
भुवो भारावतरणे साहाय्यं ते करिष्यति ॥ १५
तदर्थमभयं देहि पाहि चास्मत्कृते विभो ।
इत्युक्तः पुण्डरीकाक्षस्तदा शक्रेण फल्गुन ॥ १६
तमुवाच तदाश्रीमान् शङ्खचक्रगदाधरः ।
जानामि पाण्डवे वंशे जातं पार्थं पितृष्वसुः ॥ १७
पुत्रं परमधर्मिष्ठं सर्वशस्त्रभृतां वरम् ।
पालयामि त्वदंशं तं जीवलोके महाभुजम् ॥ १८
आवयोस्सख्यसदृशं न च लोके भविष्यति ।
यस्तद्भक्तस्य मद्भक्तो यस्तं द्वेष्टि स मामपि ॥ १९

उपसंगृह्य चरणौ युधिष्ठिरवशोऽभवत् ॥ २१

गदायुद्धेऽसियुद्धे च रथयुद्धे च भारत ।
दिव्यमानुषसंभूतान् अवापास्त्रविदां वरः ॥ २२

सर्वांस्तथाऽखिलानस्त्रान् शस्त्राणिच तथा गुरोः ।
सर्वां तामखिलां नीतिं पातालाधिपतेस्तथा ॥ २३

उद्धवात् सकलां नीतिं भोजाद्बुद्धिमतां वरः ॥ २३॥

अस्त्रे शस्त्रे च शास्त्रे च रथनागाश्वकर्मणि ।
अवाप्य सहदेवोऽपि भ्रातृणामचरद्वशे ॥ २४॥

द्रोणेनैवं विनीतश्च भ्रातृणां नकुलः प्रियः ।
चित्रयोधी समाख्यातो बभूवातिरथोदितः ॥ २५॥

त्रिवर्षकृतयत्नैस्तु गान्धाराणामुपप्लवे ।
अर्जुनप्रमुखैः पार्थैः सौवीरास्समरे हताः ॥ २६॥

न शशाक वशे कर्तुं यं पाण्डुरपि वीर्यवान् ।

पूर्वतोऽनुवृत्तम्—

यन्मे वित्तं तु तत्तस्य तं विनाऽहं न जीवये ।
इति पार्थ पुराशक्रम् आह सर्वेश्वरो हरिः ॥ २०
तस्मात्त्वापि सदृशस्तं विनाभ्यधिकः पुमान् ।
न चेह भविता लोके तमेकं शरणं व्रज ॥ २१
शरण्यस्सर्वदेवानां देवदेवो जनार्दनः ॥ २१॥
[अधिकः पाठः]

सोऽर्जुनेन वशं नीतो स राजा यवनाधिपः ॥ २७॥

अतीव बलसंमत्तस् त्वतिमानी कुरून् प्रति ।
कुन्तलो नाम सौवीरो दान्तः पार्थेन धीमता ॥ २८॥

दान्तवक्रमिति ख्यातं पुरं पार्थस्य कर्मणा ।
अमित्रं नाम सौवीरम् अर्जुनोऽमर्दयन्मृधे ॥ २९॥

भीमसेनसहायश्च हत्वा वै मरुधन्वसु ।
प्रतीच्यां समरे राजन् जिगाय भरतर्षभः ॥ ३०॥

अर्जुनस्समरे प्राच्यान् सर्वानेकरथोऽजयत् ।
तथैवैकरथो भूत्वा दाक्षिणात्यान् नराधिपान् ॥ ३१॥

धनौघं प्रापयामास कुरुराष्ट्रं धनञ्जयः ॥ ३२

अतः पञ्चदशे वर्षे सर्वमेतच्चकार सः ॥ ३२॥
तं दृष्ट्वा धार्तराष्ट्राणां ततो भयमजायत ॥ ३३

यस्सर्वान् धृतराष्ट्रस्य पुत्रान् विप्रचकार ह ।
भीमसेनो महाबाहुर् बलाद्बलवतां वरः ॥ ३४

अदुष्टभावं तं दोषैर् जगृहुर्दुष्टबुद्धयः ।
धार्तराष्ट्रास्तथा सर्वे भयाद्भीमस्य कर्मणः ॥ ३५

तान् दृष्ट्वा कर्मभिः पार्थान् सर्वानहृतलक्षणान् ।
बलाद्बाहुबलात्तेभ्यो बिभियुर्दुष्टबुद्धयः ॥ ३६

ततो बलमभिख्यातं विज्ञाय दृढधन्विनाम् ।
दूषितस्सहसा भावो धृतराष्ट्रस्य पाण्डुषु ॥ ३७

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥
॥ ७ ॥ संभवपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
[अस्मिन्नध्याये ३७. श्लोकाः]

॥ पञ्चत्रिंशदधिकशततमोऽध्यायः ॥

युधिष्ठिरः साम्राज्येऽभिषेक्तव्य इति पौरवार्तां श्रुत्वा व्यथितस्य दुर्योधनस्य पित्रा संवादः ॥ १ ॥

वैशम्पायनः—

प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ।
दुर्योधनो लक्षयित्वा पर्यतप्यत दुर्मतिः ॥ १

दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
अनेकैरभ्युपायैस्तैर् जिघांसन्ति स्म पाण्डवान् ॥ २

पाण्डवाश्चापि तत्सर्वं प्रतिचक्रुर्यथाबलम् ।
उद्भावनमकुर्वाणा विदुरस्य मते स्थिताः ॥ ३

गुणैस्समुदितान् दृष्ट्वा जनाः पाण्डुसुतांस्तदा ।
कथयन्ति स्म ते भूयो देशे देशे सभासु च ॥ ४

प्रज्ञाचक्षुरचक्षुष्मान् धृतराष्ट्रो जनाधिपः ।
अशक्तो राज्यकरणे स कथं धारयिष्यति ॥ ५

तथा भीष्मश्शान्तनवः सत्यसन्धो महाव्रतः ।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥ ६

[1]ते वयं पाण्डवज्येष्ठं तरुणं वृद्धदर्शनम् ।
[2]अभिषिञ्चाम साम्प्रत्य [3]सत्यकारुण्यवेदिनम् ॥ ७

पितामहं शान्तनवं धृतराष्ट्रं च धर्मवित् ।
सपुत्रं विविधैर्भोगैर्[4]नियतं वासयिष्यति ॥ ८

[5]तेषां दुर्योधनश्श्रुत्वा तानि वाक्यानि सर्वशः ।

---

1. घ—दुर्योधनस्त्वल्पबुद्धिरर्थलोभादिदूषितः ।
दुष्टैः परिवृतो नित्यं न राज्यं कर्तुमर्हति ॥ [अधिकः पाठः]
2. घ—नीतिशास्त्रार्थतत्त्वज्ञो लोकरञ्जनकर्मणि ।
बुद्धिमान् वृद्धसेवी च सम्मतस्सज्जनैस्तदा ॥
दयादाक्षिण्यसम्पन्नः सत्यवादी शमान्वितः ।
ऋजुर्वदान्यो मतिमांल्लोभक्रोधविवर्जितः ॥
धर्मात्मा धर्मविद्धर्मी धर्मज्ञः प्रियबान्धवः ।
धर्मबुद्धिर्धर्मवृत्तिः मूर्तो धर्म इवापरः ॥
प्रजारञ्जनदक्षश्च प्रजापालनतत्परः ।
इत्यविधगुणाचारं सर्वप्राणिमनोहरम् ॥
अभिषिञ्चाम साम्राज्ये सत्यं करुणवेदिनम् ॥ [अधिकः पाठः]
3. क-ख-ग—सत्यं करुणवेदिनम् ।
4. क-ख-ग—मानयिष्यति मानिनम् ।
5. घ—दुर्योधनमुखान् भ्रातॄनात्मवत्परिरक्ष्यति ।
स्ववशस्थैर्महाभागै र्लोकवीरैस्सुदुर्जयैः ॥

युधिष्ठिरानुरक्तानि पर्यतप्यत दुर्मतिः ॥ ९

स तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे ।
ईर्ष्यया मुह्यमानस्तु धृतराष्ट्रमुपाद्रवत् ॥ १०

ततो विरहितं दृष्ट्वा पितरं परिगृह्य च ।
पाण्डोर्वृत्तं पूर्वमुक्त्वा पश्चादिदमथाब्रवीत् ॥ ११

दुर्योधनः—

श्रुता मे जल्पतां तात पौराणां चाशिवा गिरः ।
त्वामनादृत्य भीष्मं च पतिमिच्छन्ति पाण्डवम् ॥ १२

सममेतच्च भीष्मस्य न स राज्यं चिकीर्षति ।
अस्माकं तु परां पीडां चिकीर्षन्ति पुरे जनाः ॥ १३

पूर्वतोऽनुवृत्तम्—

अलोलुपैश्चाक्षुद्रैश्च सत्यधर्मपरायणैः ।
त्रैलोक्यवीरैरक्षुब्धै र्ज्येष्ठाज्ञावशवर्तिभिः ॥
सेव्यमानो दिवारात्रं दयादर्शितविग्रहः ।
एवं चेन्महती कीर्तिः कुरुवंशस्य जायते ॥
पुरूरवसि या कीर्तिर्नहुषे च त्रिलोकपे ।
या च या च परा कीर्तिः कुरौ या भरते च या ।
सा कीर्तिरधुना भूयो धर्मपुत्रेऽभिषेचिते ॥

वैशंपायनः—

तेषां दुर्योधनश्श्रुत्वा—

[1]स एष पाण्डवो राजा यदि प्राप्नोत्यसंशयम्।

---

1. घ—तथा जानपदास्सर्वे कुन्तीपुत्रं युधिष्ठिरम्।
राजानमभिषेक्ष्यन्ति पौरजानपदैस्सह॥
नाभिषेक्ष्यति चेद्राजा धृतराष्ट्रो युधिष्ठिरम्।
राज्येऽभिषिच्याम वयं भीष्मस्यानुमते स्थिताः॥
धृतराष्ट्रः—
एवं चेन्महती प्रीतिरतुला मे भविष्यति।
नन्दं कुलमिदं भूयः पाण्डुना सुमनुष्ठितः॥
तेनार्जितं धनं राज्यम् अचक्षुरहमात्मज।
राज्यं सुखं च भोगं च मृगयाव्यसनातुरम्॥
भार्याद्वययुतः पाण्डुः जगाम गहनं वनम्।
तत्रोद्भूताः पाण्डुसुताः कुन्तीमद्रात्मजात्मजाः॥
मृतः पाण्डु र्वने धीमान् पुनरप्राप्य राष्ट्रकम्।
वने जाता वने वृद्धा अनाथाः पाण्डवास्सुत॥
वनादानीय ऋषयो यादव्या सह पाण्डवान्।
समर्पयित्वा भीष्माय पितृपैतामहागतम्॥
वृषां पित्रार्जितं राज्यम् अंशं प्राप्तं प्रयच्छत।
पार्थेभ्य इति चोक्त्वा ते ह्यर्पयित्वा पुनश्च तान्॥
मम हस्तेषु तेषु त्वं समं वर्तस्व मामिति।
उक्त्वा ययुस्ते मुनयः पुनरागुस्स्वमाश्रमम्॥
किं च त्वं शृणु गान्धारे राजलक्षणलक्षितः।
आचारगुणशीलश्च दयादाक्षिण्यपूरितः॥
किं बहूक्तेन गान्धारे सर्वश्रेष्ठगुणाकरः।
कुलस्य ज्येष्ठपुत्रत्वात् पित्रार्जितक्रमेण च॥
सर्वसद्गुणवृत्तत्वात् कौन्तेयो राज्यमर्हति।
किं चैकं शृणु कौरव्य कस्य राज्यं भवेदयम्॥
तत्त्वतस्ते प्रवक्ष्यामि श्रुत्वा वार्ताश्च वर्त्मनि।
यस्याचरेण लोकोऽयं प्रीणाति सततं सुत॥
लोकस्य वचस्सु प्रीतिः दया धर्मो धृतिः क्षमा।

सत्यं दानममानित्वं अहिंसाऽऽर्जवमेव च ॥
बुद्धिर्धृतिश्च गाम्भीर्यं स नरो राज्यमर्हति ।
धर्मात्मनि धर्मसुते श्रुते चान्ये गुणास्थिताः ॥
न केवलमिदं राज्यं धर्मसूनोऽर्हति क्षितौ ।
त्रिविष्टपस्य राजत्वं धर्मपुत्रोऽर्हति ध्रुवम् ॥
इत्येवं शृणु मद्भावं धर्मपुत्रोऽभिषेक्ष्यति ।
चक्षुष्मान्न त्वहं यस्मादतो नास्ति प्रियस्स मे ॥
प्राप्नोतु राज्यं कौन्तेयो भवांस्तदनुमन्यताम् ।
असूयां मा कृथाः पुत्र दृष्टिवत् त्वां स पश्यति ॥
राजेति शब्दं राज्यस्य वहत्वस्य तवास्सुत ।
राज्यं सर्वमशेषेण भुङ्क्ष्व भोगांश्च पुष्कलान् ॥
पञ्चोत्तरशतं पुत्र अन्धस्य मम नो भिदा ।
पाण्डवैस्सह पुत्रत्वम् अशेषैर्भ्रातृभिस्सह ॥
एकीभूय चिरंजीवी निर्भेदो नखमांसवत् ।
भिन्नेषु भर्तृषु स्वेषु भेदं कुर्वन्ति शात्रवाः ॥
गुप्तालवापरिवृताश्चिरं तिष्ठन्ति भूरुहः ।
एकाकी सुमहान् वृक्ष श्छिद्यते काष्ठकाङ्क्षिभिः ॥
वंशस्त्ववंशसंवीतश्चिरं तिष्ठति सस्सुखम् ।
बाह्यादिभ्रातृभिरसौ संक्लिश्यत्यसहायतः ॥
तस्मात् पार्थैस्सहैव त्वं भुङ्क्ष्व भोगाननुत्तमान् ॥

वैशम्पायनः—

इत्थं पितृवचश्श्रुत्वासर्वलोकसुसंमतम् ।
ऐहिकामुष्मिकं सत्यं गान्धारिः पर्यतप्यत ॥
दीर्घमुष्णं विनिश्वस्य भङ्क्त्वा देहं रुषाऽऽकुलः ।
हस्तेन हस्तं निष्पिष्य विवृतास्यो जिजृम्भ ह ॥
रोषातिरेकादरुणया दृष्ट्याऽऽलोक्य दिशो दश ।
दन्तैर्दन्तान् सुसङ्घृष्य घोरां दुर्वाचमुद्वमन् ॥

दुर्योधनः—

एवं चेत्तव पुत्राणां का गतिः कुलवर्धन ।

तस्य पुत्रो ध्रुवं प्राप्तस् तस्य तस्येति चा परः ॥ १४

ते वयं राजवंशेन हीनास्सह सुतैरपि ।
अ[1]वज्ञाता भविष्यामो लोकस्य जगतीपते ॥ १५

ते वयं निरयं प्राप्ताः परपिण्डोपजीविनः ।
न भवामं यथा राजंस् तथा शीघ्रं समर्थ्यताम् ॥ १६

अथ त्वमपि राजेन्द्र राजवंशो भविष्यसि ।
ध्रुवं लप्स्यामहे राज्यं वयमप्यवशा जने ॥ १७

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आदिपर्वणि पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

॥ ७ ॥ संभवपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥

[अस्मिन्नध्याये १७ श्लोकाः]

पूर्वतोऽनुवृत्तम्—

कुतोऽयमीदृशी बुद्धिः स्वपुत्रकुलनाशिनी ॥
वैपरीत्यं भवेत्किं नु तव पुत्रैर्नृपोत्तम ।
वद ते तात मेऽभीष्टं जीविष्याम कथं वयम् ॥
स एष पाण्डवो राज्यं यदि प्राप्नोत्यसंशयः ।
तत्पश्चात्तस्य पुत्रोऽभूत् तत्पुत्रश्चेलि चापरः ॥
ते वयं राजवंशेन हीनास्सह सुतैरपि ॥ [अधिकः पाठः]

1. क-ख-ग-घ—वि

॥ षट्त्रिंशदधिकशततमोऽध्यायः ॥

दुर्योधनस्य पित्रा संवादः ॥ १ ॥

वैशंपायनः—

धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वचनमीदृशम् ।
मुहूर्तमिव संचिन्त्य दुर्योधनमथाब्रवीत् ॥ १

धर्मवृत्तस्सदा पाण्डुस् सुवृत्तो मयि गौरवात् ।
[1]सर्वेषु ज्ञातिषु तथा मदीयेषु विशेषतः ॥ २

नात्र किंचन जानाति भोजनानि चिकीर्षति ।
निवेदयति तत्सर्वं मयि धर्मभृतां वरः ॥ ३

तस्य पुत्रो यथा पाण्डुस् तथा धर्मपरस्सदा ।
गुणवांल्लोकविख्यातो नगरे च प्रतिष्ठितः ॥ ४

[2]स तथा वर्तमानोऽसौ धर्मसूनुर्यथाऽनुजः ।
[3]राज्यमेष हि संप्राप्तः ससहायो विशेषतः ॥ ५

ते तथा सत्कृतास्तात विषये पाण्डुना नराः ।

---

1. ख—भ्राता हि पाण्डुनाऽमात्यबलं च सततं ध्रुवम् ।
धृताःपुत्राश्च पौत्राश्च तेषामपि विशेषतः ॥ [अधिकः पाठः]
2. क-ख-घ—स कथं शक्यतेऽस्माभिरपाकृष्टुं नरर्षभः ।
3. क-ग-घ—भ्राता हि पाण्डुनाऽमात्यबलं च सततं धृतम् ।
धृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः॥[अधिकः पाठः]

कथं युधिष्ठिरस्यार्थे न नो हस्युम्सबान्धवान् ॥ ६

नैते [1]विषयमिच्छेयुर् धर्म[2]त्यागे विशेषतः ।
ते वयं कौरवेयाणाम् एतेषां च महात्मनाम् ॥ ७

